PAGES MISSING WITHIN THE BOOK ONLY

(41TO48,98TO108)

UNIVERSAL
LIBRARY
OU_184123
UNIVERSAL
LIBRARY

OUP—43—30-1-71—5,000

OSMANIA UNIVERSITY LIBRARY

Call No. S294.592 Accession No. S2304

Author स्मृतीनां समुच्चय: 1905

Title

This book should be returned on or before the date last marked below.

अथ स्मृत्यभिहितविषयाणाम-
नुक्रमणिका ।

१ अथाङ्गिरःस्मृतिः ।

विषयाः	पृष्ठाङ्काः
भारद्वाजादीन्प्रत्यङ्गिरस उक्तिः, अन्यजान्नभक्षणे द्विजन्मनां प्रायश्चित्तम्, चाण्डालकूपभाण्डोदकपाने प्रायश्चित्ताभिधानम्, अमेध्यदूषितजलपाने प्रायश्चित्तम्,इच्छयाऽमेध्यभक्षणेऽनिच्छयाऽमेध्यभक्षणे च प्रायश्चित्तम्, बलाकादीनां मांसभक्षणे प्रायश्चित्तम्, पतिताधुपस्पृष्टतूलिकादीनां शुद्धिनिरूपणम्, रजकादिस्पर्शे प्रायश्चित्तम्, श्वपाकभार्यागमने प्रायश्चित्तम्, उदक्यादिस्पर्शे आतुरस्य शुध्यभिधानम्, पुष्पवत्या आतुरायाः शुद्धिनिरूपणम्, ...	१
प्रारब्धदीर्घतपसां स्त्रीणां रजोदोषेऽपि तद्व्रताचरणेऽभ्यनुज्ञा, उच्छिष्टस्य चाण्डालादिस्पर्शे प्रायश्चित्तम्, शवदूषितकूपोदकप्राशने प्रायश्चित्तम्, नीलीरक्तधारणात्संध्यादिकर्मणां वैफल्यकथनम्, नील्या रक्षणे विक्रये च ब्राह्मणस्य पातित्यबोधनम्, प्रमादान्नीलीमध्यगमने प्रायश्चित्तम्, नील्युपहतक्षेत्रस्थसस्यभक्षणे प्रायश्चित्तम्, पतिवत्या व्रताचरणान्नरकप्राप्तिः, रजस्वलायाः प्रेतायाः संस्कारादिकरणे निषेधः, वैकारिकरजःप्रादुर्भावे स्त्रीणामशुचित्वाभावनिरूपणम्, ...	२
रजस्वलायाश्चण्डालादिस्पर्शे प्रायश्चित्तम्, रजस्वलास्पर्शप्रायश्चित्तानि, संहतानां बहूनां मध्य एकस्याशुचित्वे तदन्येषां दोषाभावाभिधानम्, सुराविण्मूत्रोपहतकांस्यस्य शुद्धिनिरूपणम्, गवाघ्रातादिकांस्यशुद्धिः, सुवर्णरूप्यादीनां शुद्धिहेतवः, दंपत्यादीनामन्तरागमने प्रायश्चित्तम्, मासं शूद्रान्नभोजिनः शूद्रत्वाभिधानम्, शूद्रान्नभोजने निन्दा, ...	३
शूद्रसंपर्कादिकर्तुर्निन्दानिरूपणम्, ब्राह्मणाद्यन्नभक्षणे फलाभिधानम्, सूतकिनो जलपाने प्रायश्चित्तम्, जन्महानौ ब्राह्मणादीनामशौचकालः, मृतसूतकान्नभोजिनां तिर्यग्योनिजन्मकथनम्, मूत्रोच्चारं कृत्वा जलपाने प्रायश्चित्तम्, अरण्ये मूत्रपुरीषोच्चारकाले द्रव्यहस्तस्य शुद्धिनिरूपणम्,	४
मूत्रोच्चारे भुञ्जानस्य प्रायश्चित्तम्, भोजनकालेऽशुचित्वप्राप्तौ निर्णयः, पङ्क्तिस्थेन कुत्सितान्नभक्षणे कृते प्रायश्चित्तम्, पङ्क्तिभेदनिर्णयः,वेदज्ञस्य दोषाभावनिरूपणम्,अरण्यगारादिषु पादुकाविसर्जनविधानम्, सपादुकयानेऽधिकारिनिरूपणम्, संस्कारादिषु भोजने प्रायश्चित्तम्, पुनर्भ्वादीनां लक्षणम्, तदन्नभोजने प्रायश्चित्तम् । ...	५
स्त्रीधनोपजीविनामधोगतिः, राजान्नभक्षणे फलाभिधानम्, चण्डालीस्पर्शे स्त्रीणां प्रायश्चित्तम्, शूद्रेषु भोज्यान्नानां दासादीनां निरूपणम्, अजापालादिसंस्पर्शे स्नानाभिधानम्, अजापाललक्षणम्, माहिषलक्षणम्, वृषलीलक्षणम्, विवाहात्प्राक्कन्याया रजोदर्शने मात्रादीनां नरकपातः,रजस्वलायाः कन्यायाः पाणिग्रहे दोषाभिधानम्, पितृकर्मणि माहिषादीनामग्राह्यत्वकथनम्,श्राद्धभोजने हविर्गुणा नोच्चारणीया इत्यादिविधिनिरूपणम्	६
अभक्ष्यादिभक्षणे प्रायश्चित्तम्, नूलिकादिद्रव्याणां संशुद्धिः, रजस्वलयोरन्योन्यस्पर्शे प्रायश्चित्तम्, रजस्वलायाश्चण्डालादिस्पर्शे	

विषयाः	पृष्ठाङ्काः
प्रायश्चित्ताभिधानम्, दिवाकीर्त्यादिसंस्पर्शे स्नानविधिः । गोदुग्धादिशुद्धद्रव्यनिरूपणम्	
गोघ्नप्रायश्चित्तम् ।	७
शवसूते सूतकप्राप्तौ निर्णयः, स्मृत्यध्ययने फलाभिधानम्, ...	८

इत्यङ्गिरःस्मृतिः ।

२ अथात्रिसंहिता ।

विषयाः	पृष्ठाङ्काः
आत्रिं प्रति मुनीनां प्रश्नः, मुनिभिः सहात्रेः सभाषणम्, स्मृतिश्रवणफलाभिधानम्, गुर्ववमानने फलकथनम्, द्विजातीनां धर्माः, द्विजातीनां वृत्त्यभिधानम्, शूद्रवृत्तिनिरूपणम्, स्वधर्माचरणे वर्णिनः फलाभिधानम्, धर्मव्यपेतानां दण्डे राज्ञः स्वर्गप्राप्तिः, सदाचारपरस्य शूद्रस्य स्वर्गप्राप्तिः, जपहोमादिषु प्रवर्तमानस्य शूद्रस्य वधः कर्तव्य इत्यभिधानम्, क्षत्रविट्पतनहेतूनां निरूपणम्	९
ब्राह्मणस्य पातित्यहेतवः, ब्राह्मणसर्गे कारणाभिधानम्, नृपयज्ञनिरूपणम्, प्रजापालनाद्राज्ञः पुण्यप्राप्तिः, वसाशुक्रादिनृमलानामभिधानम्, वसादिमलानां शुद्धिसाधनम्, विप्रलक्षणम्, अनसूयालक्षणम्, शौचलक्षणम्, अनायासलक्षणम्, अस्पृहालक्षणम्, दमदानयोर्लक्षणम्, दयालक्षणम्, पूर्वोक्तलक्षणयुक्तस्य मोक्षाभिधानम्, ...	१०
इष्टापूर्तयोर्लक्षणम्, यमनियमानामाभिधानम्, अपुत्रेण पुत्रप्रतिनिधिः कर्तव्य इत्याभिधानम्, गयामहिमवर्णनम्, मद्यभाण्डस्थितोदकपाने प्रायश्चित्तम्, संध्यालोपे प्रायश्चित्तम्, वृकश्वादिदष्टविषये प्रायश्चित्तम्,	११
सव्रतस्य श्वदंशनविषये प्रायश्चित्तम्, व्रतभङ्गे प्रायश्चित्ताभिधानम्, ब्राह्मणायुच्छिष्टभक्षणे प्रायश्चित्तम्, श्वसंस्पृष्टस्य स्नानविधिः, श्वोच्छिष्टभक्षणे प्रायश्चित्तम्, प्रमादाद्विण्मूत्रप्राशने प्रायश्चित्तम्, अन्त्य-	
श्वशवादिदूषितगृहशुद्धिविधानम्, सूतकविषये निर्णयः	१२
उष्ट्र्यादिक्षीरपाने प्रायश्चित्तम्, सूतकान्नभक्षणे प्रायश्चित्तम्, विवाहोत्सवादिष्वन्तरामृतसूतके निर्णयः, व्याधितादिनित्यसूतकिनां निरूपणम्, परिवित्तेः प्रायश्चित्तम्, कुब्जवामनादिषु परिवेदने दोषाभावनिरूपणम्.	१३
चान्द्रायणविधिः, अतिकृच्छ्रविधिः, पर्णकृच्छ्राभिधानम् । सांतपनम् । महासांतपनम्, तप्तकृच्छ्रविधिः, वैदिककृच्छ्रव्रतम्, कृच्छ्रातिकृच्छ्रव्रतम्, पराकव्रतविधिः, सौम्यकृच्छ्राभिधानम्, व्यासकृतकृच्छ्रनिरूपणम्, ...	१४
स्त्रीशूद्रपतनहेतूनां निरूपणम्, जीवद्भर्तृकाया व्रताचरणेऽनधिकारः, योषितां सदा मेध्यत्वमित्यभिधानम्, अपात्रदाने निन्दा, आयसपात्रेणान्नदाने नरक इति निरूपणम्,	१५
श्राद्धे मृन्मयपात्रेऽन्नदाने नरकाभिधानम्, भोजने पात्रनिर्णयः, यतिभिक्षादाने विधिनिरूपणम्, अनापदि भैक्षाचरणे प्रायश्चित्तम्, वज्रव्रतलक्षणम्, पञ्च महापातकानि, तत्प्रायश्चित्तानां निरूपणम्, स्त्रीवधप्रायश्चित्तम्, रजकादीनामन्नभक्षणे प्रायश्चित्तम्, अन्त्यजागमनादौ प्रायश्चित्तम्, चाण्डालभाण्डोदकपाने प्रायश्चित्तम्,	१६
अन्त्यजादिसंस्पृष्टान्नभोजने प्रायश्चित्तम्, चाण्डालान्नभोजने प्रायश्चित्तम्, चाण्डालसंस्पृष्टवृक्षस्योपरि फलभक्षणे प्रायश्चित्तम्,	

ग्रन्थावलिः ।

४८

धनान्तानां सप्तविंशति-

संख्यामितानां

स्मृतीनां समुच्चयः ।

इदं पुस्तकमानन्दाश्रमस्थपण्डितैः सपाठान्तर-

निर्देशं संशोधितम् ।

तच्च

हरि नारायण आपटे

इत्यनेन

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८२७

खिस्ताब्दाः १९०५

(अस्य ग्रन्थस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः)

मूल्यं रूप्यकपञ्चकम् (रु० ५)

अथ मुद्रितस्मृतीनां वर्णानुक्रमतो नामनिर्देशः ।

		पृ०
१	अङ्गिरःस्मृतिः	१
२	अत्रिसंहिता	९
३	अत्रिस्मृतिः	२८
४	आपस्तम्बस्मृतिः....	३५
५	औशनसस्मृतिः	४६
६	गोभिलस्मृतिः	४९
७	दक्षस्मृतिः	७२
८	देवलस्मृतिः	८५
९	प्रजापतिस्मृतिः	९०
१०	बृहद्यमस्मृतिः	९९
११	बृहस्पतिस्मृतिः	१०८
१२	यमस्मृतिः	११२
१३	लघुविष्णुस्मृतिः....	११७
१४	लघुशङ्खस्मृतिः	१२४
१५	लघुशातातपस्मृतिः	१२८
१६	लघुहारीतस्मृतिः	१३६
१७	लघ्वाश्वलायनस्मृतिः	१४२
१८	लिखितस्मृतिः	१८२
१९	वसिष्ठस्मृतिः	१८७
२०	वृद्धशातातपस्मृतिः	२३२
२१	वृद्धहारीतस्मृतिः	२३६
२२	वेदव्यासस्मृतिः....	३५७
२३	शङ्खलिखितस्मृतिः	३७२
२४	शङ्खस्मृतिः	३७४
२५	शातातपस्मृतिः....	३९६
२६	संवर्तस्मृतिः	४११
२७	बौधायनस्मृतिः+	४२५

+ इयं स्मृतिः पश्चादुपलब्धाऽतोऽन्ते स्थापिता ।

विषयाः	पृष्ठाङ्काः
एकवृक्षसमारूढयोर्ब्राह्मणचण्डालयोर्मध्ये ब्राह्मणस्य फलभक्षणे प्रायश्चित्तम्, म्लेच्छसंगतभार्यागमने प्रायश्चित्तम्, चण्डालादिस्त्रीगमने प्रायश्चित्तम्, तैलाभ्यक्तादीनां विण्मूत्रकरणे प्रायश्चित्तम्, असवर्णाद्गर्भोत्पत्तौ स्त्रीणां पातित्यम्,...	१७
अन्त्यजानां निरूपणम्, अन्त्यजस्त्रीगमनादौ प्रायश्चित्तम्, म्लेच्छोपभुक्तस्त्रीविषयकप्रायश्चित्तम्, बलात्कारोपभुक्तस्त्रीविषयकप्रायश्चित्ताभिधानम्, चाण्डालसंस्पृष्टोदकपाने प्रायश्चित्तम्, श्लेष्मादिभिः संदूषितकूपोदकपाने प्रायश्चित्तम्, प्रमादात्सुरापानादौ प्रायश्चित्ताभिधानम्, चितिभ्रष्टायाः प्रायश्चित्तम्, ब्रह्मदण्डहतानां संस्कारानिर्णयः,	१८
भूगवन्यनशनादिभिर्मृतानां संस्कारः, अतिदोहादिभिर्गोवधे प्रायश्चित्तम्, प्रसङ्गादष्टागवादिधर्महलानां निरूपणम्, काष्ठलोष्टादिभिर्गोवधे प्रायश्चित्तम्, शरभोष्ट्रादिहनने प्रायश्चित्तम्, मार्जारादिहिंसायां प्रायश्चित्तम्, दूषितवापीकूपादीनां शुद्धिकथनम्, गोदोहनादिविषये शुध्यभिधानम्, ...	१९
रेतोविण्मूत्रसंस्पृष्टकूपजलपाने प्रायश्चित्तम्, रेतोविण्मूत्रादिदूषितकुम्भस्थजलपानादौ प्रायश्चित्ताभिधानम्, आकरजद्रव्याणां शुध्यभिधानम्, एकपङ्क्त्युपविष्टानां मध्य एकेन नीलीग्रहणे सर्वेषामशुचित्वमित्यादिनिरूपणम्,देवयात्रादिषु स्पृष्टास्पृष्टिविषये दोषाभावबोधनम्, शूद्रेभ्य आरनालादिद्रव्यग्रहणेऽभ्यनुज्ञा, शूद्रजातिषु जलपाने प्रायश्चित्तम् आहिताग्नेर्महापातकवत्त्वे निर्णयः	२०
वृथापाक भुञ्जानस्य प्रायश्चित्तम्, श्रेष्ठस्य निर्गुणत्वे कनिष्ठस्य पाणिग्रहणेऽधिकारः,	

विषयाः	पृष्ठाङ्काः
पतितसंसर्गे प्रायश्चित्तम्, चाण्डालीगमने प्रायश्चित्तम्, भोजने चाण्डालादिस्पर्शे प्रायश्चित्तम्, पशुवेश्याभिगमने प्रायश्चित्तम्, गवां गमने प्रायश्चित्तम्, उदक्यादिस्पर्शे प्रायश्चितम्, ...	२१
रजस्वलायाः श्वानचण्डालादीनां स्पर्शे प्रायश्चित्तम्, रजस्वलयोरन्योन्यसंस्पर्शे प्रायश्चित्ताभिधानम्, उच्छिष्टसंस्पर्शे प्रायश्चित्तम्, चर्मकारादिसंस्पर्शे प्रायश्चित्तम्, श्वपाकच्छायाधिगमे प्रायश्चित्तम्, अभिशस्तप्रायश्चित्तम्, उष्ट्रयानादिसमारोहणे प्रायश्चित्तम्, ...	२२
पञ्चगव्यपाने [illegible] प्रायश्चित्तम्, ऊ[illegible] ब्रह्मादिना दत्तोजे प्रायश्चित्तम्, हीनवर्णस्यादिवादने प्रायश्चित्तम्, वल्मीकादिमृत्तिकानामग्राह्यत्वेन बोधनम्	२३
पुरीषोत्सर्गादौ मौनधारणविधिः, ग्रहणोद्वाहादिषु नैमित्तिकदानाभिधानम्, कांस्यपात्रादिदाननिरूपणम्, कन्यादानप्रशंसा । सत्पात्रलक्षणम्, श्राद्धे वर्जनीयब्राह्मणानामभिधानम्, ...	२४
श्राद्धार्हा ब्राह्मणाः, इन्दुक्षये श्राद्धाकरणे प्रत्यवायः, श्राद्धदानप्रशंसा	२५
देवादिदशविधानां ब्राह्मणानां लक्षणाभिधानम्, श्राद्धादिषु ज्योतिर्विदादिब्राह्मणानामनर्हत्वनिरूपणम्, आविकादिब्राह्मणानामपूज्यत्वम्, क्रयक्रीतकन्यायाः पत्नीत्वाभावबोधनम्, ब्राह्मणादितोयानां निरूपणम्	२६
महागुरुनिपातेऽब्दं तीर्थस्नानादि न कर्तव्यमित्यादिविधिनिरूपणम्, स्मृतिधारणफलाभिधानम् ।	२७

इत्यत्रिसंहिता ।

३ अथात्रिस्मृतिः ।

विषयाः	पृष्ठाङ्काः
अत्रि प्रति ऋषीणां प्रश्नः, प्राणायामविधिनिरूपणम्, योगप्रशंसा, प्राणायामलक्षणम्, प्राणायामफलम्, ...	२८
जपयज्ञाभिधानम्, गायत्रीजपफलम्, आहारशुध्यभिधानम्, चान्द्रायणविधिः ...	२९
कर्मविपाकाभिधानम्, बलात्कारादिदूषितस्त्रीणां ग्राह्याग्राह्यनिर्णयः	३०
कांस्यादिद्रव्याणां शुद्धिः, सर्ववेदपावित्राणामभिधानम्	३१
सुवर्णदानादिप्रशंसा, रहस्यप्रायश्चित्तानि ...	३२
अभक्ष्यभक्षणादिदोषाणां प्रायश्चित्तनिरूपणम्	३३
ध्यानप्रशंसनम्, नैष्ठिकधर्मात्प्रच्यवने प्रायश्चित्ताभावकथनम्, प्रव्रजितापत्यानां जात्यन्तरत्वाभिधानम्	३३
ध्यानप्रयोजननिरूपणम्, ध्यानलक्षणम्, योगस्य षडङ्गत्वाभिधानम्, ...	३४

इत्यत्रिस्मृतिः ।

४ अथाऽऽपस्तम्बस्मृतिः ।

विषयाः ।	पृष्ठाङ्काः
गोरोधनादिविषये प्रायश्चित्तम्, गोहत्याप्रायश्चितानि	३५
गोबन्धने नालीकेरादिरज्जूनां निषेधः, गो. शृङ्गादिभङ्गे प्रायश्चित्तम्, औषधदानादिकर्मनिमित्तायां गोर्विपत्तौ दोषाभावनिरूपणम्, प्रपादिषु जलपाने प्रायश्चित्तम्, अन्यखानितकूपादिषु स्नानपानयोः प्रायश्चित्तम् ...	३६
उदकशुद्धिनिरूपणम्, दूषितवापीकूपादीनां शुद्धिः, शवदूषितकूपोदकपाने प्रायश्चित्तम्, गृहेऽविज्ञातस्यान्त्यजातेर्निवसने प्रायश्चित्तम्, बालादिविषये प्रायश्चित्तम् ...	३७
चाण्डालकूपजलपानादौ प्रायश्चित्तम्, पानादिषूदक्यादिसंस्पर्शे प्रायश्चित्तम्, अज्ञाताद्ब्राह्मणोच्छिष्टभक्षणे प्रायश्चित्तम्... ...	३८
वैश्यजात्युच्छिष्टभोजने प्रायश्चित्तम्, अन्त्योच्छिष्टाशन प्रायश्चित्तम्, श्वकाकोच्छिष्टभक्षणे प्रायश्चित्तम्, नीलीवस्त्रधारणे प्रायश्चित्ताभिधानम्, प्रमादान्नीलीमध्यगमने प्रायश्चित्तम्, नीलीभक्षणे प्रायश्चित्तम् ...	३९
वैकारिकरजःप्रादुर्भावे स्त्रीणामशुचित्वाभावनिरुपणम्, अन्त्यजादिस्पर्शे रजस्वलायाः प्रायश्चित्तम्, विवाहादिषु कन्यायाः रजोदर्शने प्रायश्चित्तम्, उच्छिष्टादीनां संस्पर्शे रजस्वलायाः प्रायश्चित्ताभिधानम् ...	४०
उदक्यादिस्पर्शे विप्रस्य प्रायश्चित्तम्, चाण्डालादीनां संस्पर्श आत्रेय्याः प्रायश्चित्ताभिधानम्, सुरादिदूषितकांस्यशुद्धिविधानम्, शुद्रान्नभोजने निन्दानिरूपणम्... ...	४१
सर्वतो रसादीनां ग्रहणे दोषाभावः, आपत्काले शूद्रान्नभोजने प्रायश्चित्ताभिधानम्, भुञ्जानस्य विप्रस्य गुदस्रावे प्रायश्चित्तम्, अपेयपाने प्रायश्चित्तम्, अभक्ष्यभक्षणे प्रायश्चित्तम्, गृहस्थत्वं चिकीर्षूणां संन्यासिनां प्रायश्चित्तम्, मक्षिकाकेशदूषितान्नभोजनेप्रायश्चित्तम्, ...	४२
याजकाद्यन्नभोजने प्रायश्चित्तम्, शुल्केन कन्यादाने दोषाभिधानम्, पुनर्भवाद्यन्नभक्षणे प्रायश्चित्तम्, रजकाद्यन्नभक्षणे प्रायश्चित्ताभिधानम्, उच्छिष्टादीनां संपर्के प्रायश्चित्तम्	४३
उदक्यागमने प्रायश्चित्तम्, अनाचान्तभुक्तोच्छिष्टस्य चण्डालादिस्पर्शे प्राय-	

विषयाः	पृष्ठाङ्काः
श्चितम्, भुञ्जानस्य शुद्धिकालाभिधानम्, मोक्षाधिकारिणामभिधानम्	४४
अगम्यागमने प्रायश्चित्तम्, अग्निहोत्रत्यागे प्रायश्चित्तम्, विवाहोत्सवादिष्वन्तरा मृतसूतके सद्यःशुद्धिविधानम्, ...	४५

इत्यापस्तम्बस्मृतिः ।

५ अथौशनसस्मृतिः ।

विषयाः	पृष्ठाङ्काः
अनुलोमप्रतिलोमजात्यन्तराणां निरूपणम्, तद्धर्माभिधानं च, ...	४७
सच्छूद्रलक्षणम्	४८

इत्यौशनसस्मृतिः ।

६ अथ गोभिलस्मृतिः ।

विषयाः	पृष्ठाङ्काः
उपवीतप्रमाणाभिधानम्, आचमनविधिनिरूपणम्, वृद्धिश्राद्धे गौर्यादिमातृणां पूजाविधिः, वसोर्धारालक्षणम्, ...	४९
वृद्धिश्राद्धे युग्मब्राह्मणोपवेशननिरूपणम्, कर्मविशेषे दर्भविशेषाभिधानम्, दर्भप्रमाणम्, देवादिपरिचर्याविधिनिरूपणम्, पवित्रप्रमाणम्, पिङ्गल्या लक्षणम्, अक्रियायास्त्रैविध्यनिरूपणम्, स्वशाखाश्रयमुत्सृज्य परशाखाश्रयार्ङ्गीकारे कर्मणो वैफल्यबोधनम्, कर्मणोऽयथात्वे तावत्कर्म पुनः कुर्यादित्यादिविधिनिरूपणम्, प्रधानस्याक्रियायां साङ्गं कर्म पुनः कुर्यादित्यादिबोधनम्	५०
वृद्धिश्राद्धे पिण्डप्रदानविधिः, ...	५१
वृद्धिश्राद्धकालाभिधानम्, परिवित्तिलक्षणम्, देशान्तरस्थादिविषये परिवेत्तृत्वदोषाभावः, अग्न्याधानविधिः, ...	५२
शमीगर्भलक्षणम्, अरण्योर्नामाभिधानम्, प्रमन्थादीनां प्रमाणम्, मन्थनविधिः...	५३
स्रुवादिपात्राणां लक्षणम्, समिल्लक्षणम्, इध्मप्रमाणम्, ...	५४
अग्नीनां प्रादुष्करणकालः, होमकालाभिधानम्, क्षिप्रहोमेषु परिसमूहनादीनां निषेधः, असमिद्धाग्निहवने दोषोत्पत्तिनिरूपणम्, दन्तधावनविधिः, ...	५५
संध्योपासनविधिः, ...	५६
ब्रह्मयज्ञः, तर्पणविधिः, ...	५७
वैश्वदेवः, बलिकर्मविधिः, ऋग्वेदाद्यध्ययने फलम्	५८
आज्यस्थाल्यादिविधानम्, चरुस्थाल्यभिधानम्, दर्व्यादीनां प्रमाणम्, ...	५९
अमावास्यानिर्णयः, जीवत्पितृकादिविषये निर्णयः	६०
शङ्कुप्रमाणम्, पितृयज्ञाभिधानम्	६१
पिण्डनिर्वापणम्, एककर्मविषये पक्षान्तराभिधानम्, वैवाहिकहोमविषये विशेषाभिधानम्	६२
अग्नावन्यहोमे प्रायश्चित्तादिनिर्णयः, मृतप्रवाचने पत्न्यसन्निधाने निर्णयः, कार्यवतोऽग्निहोत्रिणः प्रवसनविधिः	६३
पत्युः प्रतिकूलाचरणे स्त्रीणां नरकप्राप्तिः, अनुकूलाचरणे प्रशंसा, दंपत्योरसमक्षं हो-	

विषयाः	पृष्ठाङ्काः
मे कृते होमस्य वैफल्यबोधनम् । अग्निदाहेनारण्योर्नाशे पुनराधानम् अग्निहोत्रिणो भार्यामरणे विधिनिरूपणम्	६४
अग्निहोत्रेण भार्यादाह आहिताग्नेः स्त्रीत्वप्राप्तिर्भार्यायाश्च पुंस्त्वप्राप्तिकथनम्, पुनराधानकर्मणि विशेषाभिधानम्, होमासमर्थविषये विधिनिरूपणम्, आहिताग्नेरन्त्येष्टिविधिः, ...	६५
अग्निहोत्रिणो विदेशमरणे विधिनिरूपणम् ...	६६
आहिताग्निभार्याभरणे संस्कारविधिः, सूतके	
संध्यादिकर्मणां त्यागः, षोडशश्राद्धाभिधानम्, षाण्मासिकश्राद्धकालः	६७
नवयज्ञेन विना नवान्नभोजने प्रायश्चित्तम्, गोयज्ञादिकर्मसु निर्वापाभिधानम्, ...	६८
गोयज्ञकर्मणः कालः, नवयज्ञकालाभिधानम्, अन्वाहार्यलक्षणम्, होमद्वयात्ययादौ पुनराधानम्	६९
उपाकर्मणः फलनिरूपणम्, सूतकादिना श्रवणाकर्मलोपे कर्मविशेषाभिधानम्	७०
पञ्चह्नानां निरूपणम्	७१

इति गोभिलस्मृतिः ।

७ अथ दक्षस्मृतिः ।

विषयाः	पृष्ठाङ्काः
उपनयनात्प्राग्बालस्य भक्ष्याभक्ष्यादिविषये दोषाभावः, नैष्ठिकोपकुर्वाणकब्रह्मचारिणोराभिधानम्, अनाश्रमिणः प्रायश्चित्तनिरूपणम्, ...	७२
द्विजानां दिनकृत्यानिरूपणम्, प्रातःस्नानविधिः, प्रातःस्नायिनः प्रशंसा, आग्नेयादिस्नानानामभिधानम्, प्रजापत्यादितीर्थनिरूपणम्	७३
आचमनविधिः, देवादिकार्याणां, कालाभिधानम्, वेदाभ्यासस्य पञ्च प्रकाराः, पोष्यवर्गनिरूपणम्	७४
स्नानीयमृत्तिकाभिधानम्, नित्यस्नानभेदाः,	
कालविशेषे यमुनायां यमतर्पणविधिनिरूपणम्	७५
गृहाश्रमिणां प्रशंसा, अदत्त्वा भोजने नरकाभिधानम्, विभागशीलादिगुणयुक्तस्य गृहस्थस्य स्वर्गप्राप्तिकथनम्, गृहस्थगुणानां निरूपणम्, स्वाध्यायाभ्यसनविधिः	७६
गृहस्थोन्नतिकारकसुधावस्तूनामभिधानम्, गृहस्थस्य नव कर्माणि, गृहस्थस्य विकर्मणां	
निरूपणम्	७७
गृहस्थस्य गोप्यागोप्यवस्तुनिरूपणम्, अदेयवस्त्वभिधानम्, न्यायागतद्रव्यस्य विनियोगाभिधानम्	७८
स्त्रीगुणानां निरूपणम्	७९
शौचविध्यभिधानम्, बाह्याभ्यन्तरभेदेन शौचस्य द्वैविध्यम्, गृहस्थादीनां बाह्यशुद्धि निरूपणम्	८०
जन्ममृत्युनिमित्तकाशौचाभिधानम्, राजर्त्विग्दीक्षितादीनां सद्यःशौचनिरूपणम्, अनूचानादीनां सूतकित्वेन बोधनम्, यज्ञादिकर्मस्वशौचापवादः	८१
योगाभिधानम्, योगस्य षडङ्गत्वनिरूपणम्, योगसाधनोपायाभिधानम्	८२
ध्यानयोगनिरूपणम्, दण्डाधिकारिणो निरूपणम्, त्रिदण्डिलक्षणाभिधानम्, यतिधर्माः, ...	८३
यतिपर्यायाः फलाभिधानम्, यतिप्रशंसा, द्वैतपक्षाभिधानम्, अद्वैतमतनिरूपणम्,	८४

इति दक्षस्मृतिः ।

८ अथ देवलस्मृतिः।

विषयाः	पृष्ठाङ्काः
शिरःकुदेशस्य वर्जनीयत्वेनाभिधानम्, म्लेच्छैर्नीतानां विप्रादीनामपेयादिपानादौ प्रायश्चित्तनिरूपणम्, सिन्धुसौवीरसौराष्ट्रादिदेशगमने प्रायश्चित्ताभिधानम्, बलादासीकृतेत्यादिविषये प्रायश्चित्तनिरूपणम्	८५
म्लेच्छैर्बलान्नीतस्य संवत्सरादुषितस्य शूद्रस्य प्रायश्चित्तविधिनिरूपणम्, बलान्नीतक्षत्रियादीनां प्रायश्चित्तम्, बला-म्लेच्छैर्नीतानां स्त्रीणां विषये प्रायश्चित्तम्	८६
अन्योन्यस्पर्शे रजस्वलायाः प्रायश्चित्तम्, म्लेच्छैर्हृतानामभक्ष्यादिभक्षणे प्रायश्चित्तम्, म्लेच्छाद्गर्भधारणे स्त्रीणां प्रायश्चित्तम्,	
विषयाः	पृष्ठाङ्काः
म्लेच्छैर्बलाद्गृहीतस्य शुद्ध्यभिधानम्, म्लेच्छैः सहोषितस्य प्रायश्चित्तम्, ...	८७
सभायां म्लेच्छस्पर्शे प्रायश्चित्तम्, म्लेच्छत्वमापन्नाया मातुर्मरणे निर्णयः, म्लेच्छत्वमापन्नस्य पितुर्मरणे निर्णयः, पञ्चगव्यविधानम्, व्यासकृतकृच्छ्राभिधानम्, प्रायश्चित्तार्थतिलहोमादिनिरूपणम्, म्लेच्छवासे प्रायश्चित्तम्, ...	८८
सांतपनकृच्छ्रम्, महासांतपनलक्षणम्, पर्णकृच्छ्रविधिः, तप्तकृच्छ्राभिधानम्, पादकृच्छ्रादीनामभिधानम्, कृच्छ्रचान्द्रायणविधिः, ...	८९

इति देवलस्मृतिः।

९ अथ प्रजापतिस्मृतिः।

विषयाः	पृष्ठाङ्काः
ब्राह्मणं प्रति रुचेः प्रश्नः, श्राद्धकालाभिधानम्, ...	९०
वृद्धिश्राद्धे फलनिरूपणम्, श्राद्धकर्तुः प्रशंसा, युगादीनामभिधानम्, संक्रान्त्यादिपर्वसु दानमहिमनिरूपणम्, अष्टकादिषु पिण्डदानविधेः	९१
श्राद्धदेशाः, श्राद्धपाकार्हस्त्रीणामभिधानम्...	९२
ब्राह्मणनिमन्त्रणम्, श्राद्धार्हब्राह्मणानां निरूपणम्	९३
श्राद्धे वर्ज्यब्राह्मणाः, श्राद्धभोक्तृनियमाः श्राद्धकृन्नियमनिरूपणम्, श्राद्धे दर्भाः ...	९४
श्राद्धोपादेयानि, श्राद्धेऽपासनीयानि, पात्राणि,	९५
श्राद्धे वर्ज्यानि, श्राद्धे मांसानि	९६
श्राद्धकालाभिधानम्	९७
श्राद्धे ब्राह्मणसंख्या, इष्टिश्राद्धादिषु ऋतुदक्षादिदेवानां निरूपणम्, पार्वणानामभिधानम्,	९८

इति प्रजापतिस्मृतिः।

१० अथ बृहद्यमस्मृतिः।

विषयाः	पृष्ठाङ्काः
श्वादिदष्टस्य प्रायश्चित्तम्, जलाग्निबन्धनभ्रष्टानां प्रायश्चित्तम्, चण्डालभाण्डोदकपाने	
विषयाः	पृष्ठाङ्काः
प्रायश्चित्तम्, चाण्डालान्नभक्षणे प्रायश्चित्तम्, चाण्डालिकारिंगमने प्रायश्चित्तम्	९९

विषयाः	पृष्ठाङ्काः
सुरापाने प्रायश्चित्तम्, गोमांसभक्षणे प्रायश्चित्तम्, चान्द्रायणविधिनिरूपणम्, पितृव्यभार्यादिगमने प्रायश्चित्तम्, मात्रादिगमने प्रायश्चित्तम्, रात्रौ चाण्डालस्पर्शे रजस्वलायाः प्रायश्चित्तम्, ...	१००
असच्छूद्रान्नभोजने प्रायश्चित्तम्, वृषलीसेवने प्रायश्चित्तम्, माहिषकादीनां लक्षणम्, कन्याया रजोदर्शने मात्रादीनां नरकप्राप्तिः, अजाविकादिसंस्पर्शे प्रायश्चित्तम्,	१०१
श्राद्धे वर्जनीयब्राह्मणाः, सत्पात्रब्राह्मणानां निरूपणम्, उच्छिष्टादिसंस्पर्शे प्रायश्चित्तम्,	१०२
अभक्ष्यभक्षणादिविषये प्रायश्चित्तम्, रजस्वलास्पर्शप्रायश्चित्तानि	१०३
प्रच्छन्नपापिनां गतिनिरूपणम्, कपिलावधे प्रायश्चित्तम्, गोरोधनादिषु प्रायश्चित्तम्, गोघ्नप्रायश्चित्तानि, पञ्चमहापातकप्रायश्चित्तानि, उपपातकप्रायश्चित्ताभिधानम्,	१०४
धर्मशास्त्रमज्ञात्वा प्रायश्चित्तदापने निर्णयः, अष्टशाल्यादिमरणे प्रायश्चित्तम्, दुर्मृत्युमृतानां शुध्यर्थं प्रायश्चित्ताभिधानम्, स्त्रीणां व्यभिचारे प्रायश्चित्तम्, विधवागमने प्रायश्चित्तम्, मानसवाचिकादिपापापनोदने प्रातःसंध्यादिविधानम्, ...	१०५
सत्पात्रब्राह्मणलक्षणम्, राजप्रतिग्रहे निन्दा, बलाद्दासीकृतेत्यादिविषये प्रायश्चित्तम्,	१०६
श्राद्धकाले पत्न्यां रजस्वलायां निर्णयः, अपुत्रस्य दायादाभिधानम्, भागनिर्णयनिरूपणम्, विवादादिनिर्णयः, ...	१०७

इति बृहद्यमस्मृतिः ।

११ अथ बृहस्पतिस्मृतिः ।

विषयाः	पृष्ठाङ्काः
सुवर्णदानादिमहिमवर्णनम्, भूमिदानफलनिरूपणम्, गोचर्मलक्षणम्, अन्नदादीनां प्रशंसा, ...	१०८
अतिदानानामभिधानम्, नीलवृषलक्षणम्, नीलवृषदानफलम्, भूमिहर्तुर्निन्दा, सुवर्णदानादीनां फलानिरूपणम्, ...	१०९
अन्यायेन भूमिहरणे फलाभिधानम्, कन्यानृतादिविषये दोषनिरूपणम्, ब्रह्मस्वहरणे फलम्, सत्पात्रलक्षणम्, ...	११०
तडागादिनिर्माणे फलाभिधानम्, दीपादिदानानां फलनिरूपणम्, अनाशकादिव्रतानां फलनिरूपणम्, ...	१११

इति बृहस्पतिस्मृतिः ।

१२ अथ यमस्मृतिः ।

विषयाः	पृष्ठाङ्काः
भुञ्जानस्य चण्डालादिस्पर्शे प्रायश्चित्तम्, भोजने गुदस्रावादौ प्रायश्चित्तम्, अधोच्छिष्टस्य चण्डालादिस्पर्शे प्रायश्चित्तनिरूपणम्, ऊर्ध्वोच्छिष्टस्य संस्पर्शे प्रायश्चित्तम्, श्वमातङ्गादीनां संस्पर्शे रजस्वलायाः प्रायश्चित्ताभिधानम्, ...	११२
भर्तुः शुश्रूषामकुर्वत्या दण्डाद्यभिधानम्, अपतितबन्धुत्यागे दण्डः, रज्ज्वादिभिरात्मत्यागिनाममेध्यलेपनाभिधानम्, जलाद्युद्बन्धनभ्रष्टादीनां प्रायश्चित्तम्, अज्ञानाच्चण्डालान्नभक्षणे प्रायश्चित्तम्, अन्त्यजलक्षणम्, अन्त्यजान्नभक्षणे तत्स्त्रीगमने च प्रायश्चि-	

विषयाः	पृष्ठाङ्काः
त्तम्, मात्रादिगमने प्रायश्चित्तम् । ...	११३
गोहत्याप्रायश्चित्तम्, काष्ठादिभिर्गोवधे प्रायश्चित्ताभिधानम्, प्रायश्चित्ताङ्गवपनस्य स्त्र्यादिविषयेऽपवादः, कृमिदष्टादिविषये प्रायश्चित्तनिरूपणम् ।	११४
इष्टापूर्तयोः फलकथनम्, पञ्चगव्यविधानम्, सूतकसंपाते निर्णयः, श्राद्धस्य पञ्चविधत्वम्, अस्थिसंचयनकालः, वृषोत्सर्गफलनिरूपणम्	११५
अप्सु जलाञ्जलिविधानम्, ...	११६

इति यमस्मृतिः ।

१३ अथ लघुविष्णुस्मृतिः ।

विषयाः	पृष्ठाङ्काः
सीमन्तोन्नयनम्, जातकर्मादिसंस्काराणामभिधानम्, क्षत्रियवैश्ययोरुपनयनकालः, ब्रह्मचारिधर्माः ।	११७
नैष्ठिकलक्षणम्, गृहस्थधर्माः, प्रातःकृत्यम्, माध्याह्निकविधिः, सायंतनविधिनिरूपणम् ।	११८
अतिथिसपर्याभिधानम्, गृहमेधिनां वृत्तिभेदेन चतुष्प्रकाराः, श्रौतस्मार्तकर्माननुष्ठाने दोषाभिधानम्, वानप्रस्थधर्माभिधानम् ।	११९
प्रव्रजितधर्माः ।	१२०
भिक्षुप्रकाराः, कुटीचकादिभिक्षूणां लक्षणानि, भिक्षुपात्राणि, यतेः कांस्यपात्रभोजने दोषः,	१२१
ब्रह्मचार्यादीनां स्वाश्रमात्पुनरावर्तने दोषाभिधानम्, क्षत्रियधर्मनिरूपणम्, वैश्यकर्माभिधानम्, शूद्रधर्माः, शूद्रस्य पञ्चयज्ञविधिनिरूपणम्, शूद्रजातेर्द्वैविध्यबोधनम् ।	१२२

इति लघुविष्णुस्मृतिः ।

१४ अथ लघुशङ्खस्मृतिः ।

विषयाः	पृष्ठाङ्काः
इष्टापूर्तकर्मणोः फलाभिधानम्, पादपप्ररोहणे फलनिरूपणम्, गङ्गायामस्थिप्रक्षेपे स्वर्गप्राप्तिः, वृषोत्सर्गः, एकोद्दिष्टं परित्यज्य पार्वणश्राद्धकरणे दोषाभिधानम्, ...	१२४
स्त्रियाः सपिण्डीकरणे निर्णयः, आयसपात्रेणान्नदाने दोषः, श्राद्धभोक्तृनियमाः, नवश्राद्धादिभोजने प्रायश्चित्तम्, सर्पविप्रहतादीनां श्राद्धाचरणे निषेधः, ब्रह्मघातकलक्षणम्, स्पृष्टप्रायश्चित्तनिरूपणम् । ...	१२५
चण्डालघटमध्यस्थजलपाने प्रायश्चित्तम्, श्वानचाण्डालसंस्पर्शे रजस्वलायाः प्रायश्चित्तम्, गवामस्थिमज्ञे प्रायश्चित्तम्, गोरोधनादिषु प्रायश्चित्तम्, औषधदानादिकर्मनिमित्तायां गोर्विपत्तौ दोषाभावनिरूपणम्, ...	१२६
मृताशौचम्, अधर्वाससो जपहोमादिक्रियाणां निन्दा, आत्मनः संकीर्णत्वदर्शने तिलहोमादिविधिनिरूपणम्, ...	१२७

इति लघुशङ्खस्मृतिः ।

१५ अथ लघुशातातपस्मृतिः

विषयाः	पृष्ठाङ्काः
ब्रह्महत्याप्रायश्चित्तम्, सुरापाने प्रायश्चित्तम्, ब्राह्मणसुवर्णहरणे प्रायश्चित्ताभिधानम्, गुरुदाराभिगमनादिप्रायश्चित्तम्, उष्ट्र्यादिक्षीरपाने प्रायश्चित्तम्, अनुदकमूत्रपुरीषकरणे प्रायश्चित्तम्, मृतवत्साया: क्षीरपाने प्रायश्चित्तम्, उपपातकाभिधानम् ।	१२८
शूद्रवधादौ प्रायश्चित्तम्, सगोत्रासप्रवरयोर्विवाहे प्रायश्चित्तम्, कन्यापरीक्षणम्, परिवेत्तृलक्षणं, क्लीबादिषु विद्यमानेषु परिवेदने दोषाभावनिरूपणम्, वेदविक्रयस्य षड्विधत्वम्, वैश्वदेवमकृत्वा भुञ्जानस्य काकयोनिसंप्राप्तिनिरूपणम्	१२९
अतिथिलक्षणम्, भिक्षादीनां लक्षणाभिधानम्, व्यवायसेवने प्रव्रजितस्य नरकपातः,	

विषयाः	पृष्ठाङ्काः
विवाहात्प्राक्कन्याया रजोदर्शने पितुर्भ्रूणहत्यानिरूपणम्, दन्तधावनविधिः, ...	१३०
बहुश्रुतविधेये दानाभिधानम्, दानभोजनयोः संनिकृष्टब्राह्मणव्यतिक्रमे दोषः, स्वदष्टस्य प्रायश्चित्तम्, कृमिदष्टप्रायश्चित्तम्, श्राद्धे ब्राह्मणोपवेशनविधिनिरूपणम्, ...	१३१
श्राद्धे दौहित्रादीनां प्रशंसनम्, कुतपकाललक्षणम्, देशविशेषा संध्याफलाविशेषाभिधानम्, गणान्नादिभोजने प्रायश्चित्तम्, अज्ञानाद्भुक्तान्नभोजने प्रायश्चित्तम्, ...	१३२
चितिवृक्षादिस्पर्शे प्रायश्चित्तं, मण्डलकरणे हेतुनिरूपणम्, ब्राह्मणादीनां मण्डलानि, अर्कसंक्रान्त्या: पुण्यकाल:	१३३
दानप्रशंसा, ब्रह्मकूर्चाभिधानम्, स्नेहादिनाऽनुग्रहकरणे दोषनिरूपणम्, ...	१३४

इति लघुशातातपस्मृतिः ।

१६ अथ लघुहारीतस्मृतिः ।

विषयाः	पृष्ठाङ्काः
श्वादिविप्रसंस्पर्शेऽधोच्छिष्टस्य प्रायश्चित्तम्, ऊर्ध्वोच्छिष्टस्य श्वादिविष्ठासंस्पर्शे प्रायश्चित्तम्, रजस्वलाया: श्वादिसंस्पर्शे प्रायश्चित्तम्, विण्मूत्रग्रहणादौ प्रायश्चित्ताभिधानम्, चण्डालोदकपाने प्रायश्चित्तम्	१३६
वैराग्यादिना शिखाछेदने प्रायश्चित्तम्, ब्रह्मसूत्रं विनोच्छिष्टस्पर्शने प्रायश्चित्तम्, ब्रह्मसूत्रेण विना भोजने प्रायश्चित्तम्, शूद्रान्नभोजने ब्रह्मचारिणः प्रायश्चित्तम्, क्षत्रियादीनामुच्छिष्टाशने प्रायश्चित्तम्, गवामस्थिभक्षादौ प्रायश्चित्तम्, प्रायश्चित्तासमर्थविषये विशेषाभिधानम्...	१३७

विषयाः	पृष्ठाङ्काः
ताम्बूलादिषूच्छिष्टदोषाभावनिरूपणम्, द्रव्यवृद्धिविषये निर्णयः, आनिषभाण्डपक्वाशने प्रायश्चित्तम्, उभयमुखीदाने फलाभिधानम्, अशौचसंपाते निर्णयः	१३८
परिणीतकन्यायाः पितृगोत्रनिवृत्तिकालाभिधानम्, दायादानां निरूपणम्, मृत्तिकाग्रहणविधिः, श्राद्धभोक्तृनियमाः, एकोद्दिष्टश्राद्धविधिनिरूपणम्, ...	१३९
अशौचसंपाते निर्णयः, मृताशौचम्, आचार्यादीन्निर्हृत्य व्रती व्रतान्न वियुज्यत इत्यादिविधिनिरूपणम्, कुतपानामभिधानम्, रात्रौ श्राद्धनिषेधः...	१४०

विषयाः	पृष्ठाङ्काः
राहुदर्शने दानादीनां विधानम्, नवश्राद्धलक्षणम्, कुतपकालस्य लक्षणम्, श्राद्धे रौहिणकालस्य प्राशस्त्यबोधनम्, पितृप्रसादफलनिरूपणम्	१४३

इति लघुहारीतस्मृतिः।

१७ अथ लघ्वाश्वलायनस्मृतिः।

विषयाः	पृष्ठाङ्काः
आचारप्रकरणम्, गृहस्थधर्माः, ब्रह्मचारिधर्माभिधानम्, ब्राह्मणस्य षट्कर्माणि, मलमूत्रोत्सर्गे गृहस्थादीनां शौचविधिनिरूपणम्, दन्तधावनम्, स्नानविधिः, ...	१४२
अशक्तविषये मन्त्रस्नानाभिधानम्, वस्त्रधारणविधिः, आचमनविधिः सन्ध्योपासनम् ...	१४३
गायत्रीजपः, प्रातर्होमविधिः, अग्न्युपस्थानम्, समित्तर्पणमन्त्राः, कर्मद्वयानामस्य सायमाज्याहुतिविधानम्, ...	१४४
आसन्नकालस्य होमद्वयाभिधानम्, पुत्रसांनिध्ये होमस्य वैफल्यम्, पोष्यवर्गानरूपणम्, मध्याह्ने स्नानादिविधिः, ब्रह्मयज्ञविधानम्, ...	१४५
देवर्षिपितृतर्पणम्, ...	१४६
अन्नशुद्ध्यर्थं वैश्वदेवविधिः, ...	१४७
भूतबलिः, अतिथिभ्यो भिक्षादानम्, परान्नत्यागिनामामान्नदानविधिः, भोजनविधिः, उच्छिष्टादिसंपर्के प्रायश्चित्तम्, ...	१४८
पात्रचालनविधिः, स्नेहाक्तपर्युषितान्नभक्षणेऽभ्यनुज्ञा, दुहित्रन्नभोजने नरकाभिधानम्, सायंतनकृत्यम्, ...	१४९
स्थालीपाकविध्यभिधानम्, ...	१५०
स्थाल्यादीनां प्रमाणनिरूपणम्, पूर्णपात्रस्थापनादिकर्मनिरूपणम्, ...	१५१
आज्योत्पवनम्, स्रुवसंस्कारादिकर्माभिधानम्,	१५२
स्वरवर्णादिलोपोत्थपापनिर्हरणप्रायश्चित्ताहुतिविधानम्, अग्नेरुपस्थानादिकर्मनिरूपणम्, गर्भाधानसंस्कारविधिः, ...	१५३
पुंसवनानवलोभनसीमन्तोन्नयनसंस्कारकथनम्, जातकर्मसंस्कारः, ...	१५५
नामकरणम्, निष्क्रमणम्, अन्नप्राशनम्, ...	१५६
चौलविधिः, ...	१५७
उपनयनप्रकरणम्, ...	१५८
महानाम्न्यादिव्रतानि	१६०
उपाकर्म, ...	१६१
उत्सर्जनविधिः, गोदानविधिनिरूपणम्, ...	१६२
विवाहप्रकरणम्, गृहस्थाश्रमप्रशंसा, कन्यानिरीक्षणम्, स्नातकादीनां मधुपर्कार्चनविधिः,	१६३
कन्यादानम्, वधूवरयोः रक्षार्थं कङ्कणबन्धनविधिनिरूपणम्, कन्यकाकण्ठे मणिसूत्रबन्धः, विवाहहोमः	१६४
गृहप्रवेशविधानम्, ...	१६५
पत्नीकुमारोपवेशनम्, **अधिकारिनियमप्रकरणम्**	१६६
नान्दीश्राद्धकालाभिधानम्, मान्त्रलिककर्माणि वर्ज्यानि, ...	१६७
प्रेतकर्मविधिनिरूपणम्, प्रेतकर्मण्यौरसपुत्रादीनामधिकारः, नग्नदेहदहने निषेधः, शिलाग्निः, नवश्राद्धकालः, ...	१६८
क्षौरकालः, वृषोत्सर्गः, षोडश श्राद्धानि, सपिण्डीकरणविधिः, ...	१६९
चाण्डालहतानामस्य षडब्दप्रायश्चित्तम्, खट्वोपर्यन्तरिक्षे वा मरणे प्रायश्चित्तम्, प्रायश्चित्तं विना प्रेतदहने प्रेतकार्यस्य नैष्फल्यबोधनम्, औपासनाग्न्यादिमतः साग्निकादीनां दाहादिविधिः	१७०

विषयाः	पृष्ठाङ्काः
सहानुमृतयोः पित्रोः श्राद्धे शाकपाकादिनिर्णयः, नैमित्तिकश्राद्धकालाः, सूतकमृतकयोः श्राद्धकर्मनिषेधः, सापिण्ड्यनिरूपणम्, सपिण्डानां मृताशौचम्, पितृमरणे पुत्रस्याऽऽशौचविधानम्	१७१
लोके निन्द्यप्रकरणम्, क्रियाहीनादीनां सदाऽशुचित्वाभिधानम्, माहिषेयादिजातिनिरूपणम्, मोहाद्विधवाविवाहे प्रायश्चित्तम्, गोलकादिनिन्द्यजात्यभिधानम्, ...	१७२
ब्राह्मणादीनां यजनादिकर्माभिधानम्, कर्मकालेऽशुचिस्पर्शे शुद्धिनिरूपणम्, उदक्यादिस्पर्शे स्नानाद्यभिधानम्, अश्नत उच्छिष्टस्पर्शने विशेषकथनम्, ...	१७३
वेदविद्विजहस्तेन सेवाग्रहणे धर्मादीनां हानिः, परदेवार्चकादीनां शूद्रत्वाभिधानम्,	
श्राद्धप्रकरणम्	१७४
श्राद्धे ब्राह्मणोपवेशनम्, आसनम्, अर्घ्यदानम्,	१७५
पितृपूजनम्, मण्डलकरणम्, पात्राणि, अग्नौकरणम्, परिवेषणेऽधिकारिणः, अन्ननिवेदनम्, ...	१७६
गायत्रीजपादि, कृणुष्वेत्यादिसूक्तपाठः, ब्राह्मणतृप्तिप्रश्नः, पिण्डदानविधिः, पिण्डपूजनम्, ...	१७७
दक्षिणाप्रदानम्, स्वधावाचनम्, प्रार्थना, ब्राह्मणविसर्जनम्, ...	१७८
श्राद्धोपयोगिप्रकरणम्, श्राद्धात्पूर्वं ब्रह्मयज्ञकरणे कर्मणो वैफल्यम्, श्राद्धात्पूर्वं पित्रोस्तर्पणेऽधोगतिः, ज्येष्ठस्यानग्निकत्वे कनिष्ठस्य साग्निकत्वेऽग्नौकरणहोमेऽधिकारिनिर्णयः, ...	१७९
श्राद्धे ब्राह्मणसंख्या, स्वशाखात्यागिनो निन्दा, श्राद्धकालाः, पित्रोः श्राद्धातिक्रमे दोषाभिधानम्, ...	१८०

इति लघ्वाश्वलायनस्मृतिः ।

१८ अथ लिखितस्मृतिः ।

विषयाः	पृष्ठाङ्काः
इष्टापूर्तकर्मणोः प्रशंसा, पादपानां प्ररोपणे फलकथनम्, इष्टलक्षणम्, वृषोत्सर्गफलनिरूपणम्, गयाशिरसि पिण्डदानफलम्, षोडश श्राद्धानि, संक्रान्त्यादिषु पिण्डसंख्याभिधानम्, ...	१८१
उदकुम्भदानम्, अग्निस्थाननिरूपणम्, अपुत्रिणामेकोद्दिष्टश्राद्धविधानम्, ...	१८३
दर्भकृष्णाजिनादीनां निर्माल्यताभावबोधनम् वृद्धौ श्राद्धत्रयविधिः, क्रतुदक्षादिविश्वदेवानामभिधानम्, श्राद्धे मृन्मयपात्रेऽन्नदाने	
नरकः, ...	१८४
श्राद्धं कृत्वा परश्राद्धभोजिनो निन्दा, श्राद्धकर्तृनियमाः, श्राद्धभोक्तृनियमाः, नवश्राद्धादिषु भुञ्जानस्य प्रायश्चित्तम्, सर्पविप्रहतादीनां श्राद्धकर्मकरणे निषेधः, तप्तकृच्छ्रविधिः, पतितान्नादिभोजने प्रायश्चित्तम्, ब्रह्महादिषु स्नेहादिनाऽनुग्रहे दोषः,	१८५
कुब्जवामनादिषु परिवेदने दोषाभावनिरूपणम्, गोवधसमानि, चण्डालघटोदकपाने प्रायश्चित्तम्, अशौचसंपाते निर्णयः,	१८६

इति लिखितस्मृतिः ।

१९ अथ वसिष्ठस्मृतिः।

विषयाः	पृष्ठाङ्काः
धर्मजिज्ञासा, धर्माचरणस्य फलाभिधानम्, धर्मलक्षणम्, आर्यावर्तलक्षणम्, एनस्विनिरूपणम्, पञ्च महापातकानि,... ...	१८७
उपपातकाभिधानम्, ब्राह्मादिविवाहानां लक्षणम्, ब्राह्मणादीनामाचाराः, ब्राह्मणादिवर्णानां निरूपणम्, ...	१८८
ब्राह्मणादीनां प्रधानकर्माणि, ...	१८९
ब्राह्मणस्य पातित्यहेतवः, कृषिधर्मनिरूपणम्, ...	१९०
वार्धुषिकान्नभक्षणे ब्राह्मणराजन्ययोर्निषेधः वार्धुषिकलक्षणम, मासिकावृद्धिग्रहणविधानम्, अश्रोत्रियादीनां शूद्रसधर्मत्वाभिधानम्,	१९१
आततायिवधे दोषाभावः, आततायिनां कथनम्, त्रिणाचिकेतादिपदोक्तपावनानां निरूपणम्, परिषल्लक्षणम्, आचार्यलक्षणम्, उपस्पर्शविधिः, ...	१९२
स्वापादिषु पुनराचमनविधिः, श्वहतमृगादीनां शुचित्वाभिधानम्, तैजसादिपात्राणां शुद्धिः, ...	१९३
भूमिशुद्धिः, मद्यादिभिः संस्पृष्टस्य शुद्ध्यभावबोधनम्, देवादितीर्थानि, शूद्रस्यासंस्कारे हेत्वभिधानम, मधुपर्कादिषु पशुहिंसनम, ...	१९४
शावाशौचनिरूपणम्, ...	१९५
आत्रेयीधर्माः, ...	१९६
आचारप्रशंसा, हीनाचारस्य निन्दा, ...	१९७
नद्यादिषु मूत्रपुरीषोत्सर्गनिषेधः, शौचार्थं मृत्तिकादानम्, भोजने मुन्यादीनां प्राससंख्या, ब्राह्मणादीनां लक्षणम्, शूद्रान्नाभ्यवहारे निन्दा, ...	१९८
सत्पात्रलक्षणम्, असत्पात्रदाने निन्दा, अञ्जलिना जलं न पिबेदित्याद्याचारनिरूपणम्, शिष्टब्राह्मणलक्षणम्, ब्रह्मचारिधर्माः, ...	१९९
गृहस्थधर्माः, ...	२००
वानप्रस्थधर्माः, प्रव्रजितधर्माः	२०१
वैश्वदेवादिकर्मनिरूपणम्	२०२
अतिथिपूजनम्, असंस्कृतप्रमीतेभ्यो भागदानम्, श्राद्धे ब्राह्मणसंख्या	२०३
श्राद्धभोजनसमये हविर्गुणानामकथनम्, कुतपकाललक्षणम्, श्राद्धकालाः, ब्राह्मणादीनामुपनयनकालः, दण्डादिधारणम्,	२०४
स्नातकव्रतानि, वस्त्रादिधारणम्	२०५
स्नातकाचाराभिधानम्, उपाकर्मकालः, ...	२०६
वेदाध्ययनस्थानध्यायाः, उपाध्यायादुत्तरोत्तरत आचार्यादीनां गुरुत्वमितिनिरूपणम्,	२०७
पापकर्मसंसृष्टानां भार्यादीनां परित्यागः, ब्राह्मणस्याप्रतिग्राह्याणि, वृद्धादिभ्यो मार्गस्य देयत्वकथनम्, चिकित्सकादीनामन्नभोजने निषेधः	२०८
दुष्कृतकारिभ्योऽप्ययतादिभिक्षाग्रहणेऽभ्यनुज्ञा, देवद्रोण्यादिषु काकादिसंस्पृष्टान्नस्य शुद्धिकथनम्, पर्युषिताद्यन्नस्य शुद्धिनिरूपणम्	२०९
लशुनपलाण्ड्वादिभक्षणे प्रायश्चित्तम्, संधिन्यादीनां क्षीरपानादौ निषेधनिरूपणम्, श्वाविच्छल्लकारिमांसस्य भक्ष्यत्वम्,	

विषयाः	पृष्ठाङ्काः
दत्तकप्रकरणम्	२१०
चरितव्रतानां पतितानां प्रत्युद्धारविधिः, **अथ व्यवहारः**, राजमन्त्रिणो धर्माः	२११
प्रमाणस्य त्रैविध्यनिरूपणम्, गृहक्षेत्रविरोधे सामन्तप्रत्ययादिविधानम्, **साक्षिप्रकरणम्**, साक्षिस्वरूपनिरूपणम्, साक्षिणां सजातीयत्वेन विधानम्, साक्षिश्रवणविधिः, ...	२१२
उद्वाहकालादिष्वनृतानुज्ञा, पुत्रिणां प्रशंसा, औरसपुत्रादीनां लक्षणम्, ...	२१३
भ्रातॄणां दायविभागः	२१४
असवर्णानां दायविभागः, अनंशानामभिधानम्, विवाहात्प्राक्कन्याया रजोदर्शने पितुर्दोषः, वाग्दानोत्तरं वरस्य पशुत्वे निर्णयः	२१५
पुत्ररहितस्य मृतस्य धनभाजां क्रमः, ब्राह्मणद्रव्यस्य राज्ञाऽहार्यत्वाभिधानम्, चण्डालादिजात्यन्तरनिरूपणम्	२१६
राजधर्माभिधानम्...	२१७
दण्ड्योत्सर्गे राज्ञ उपवासादिकथनम्, अदण्ड्यदण्डने पुरोहितादेः प्रायश्चित्तम्, राजधृतदण्डानां गतिनिरूपणम्	२१८
प्रायश्चित्तप्रकरणम्, अनभिसंधिकृतापराधे प्रायाश्चित्तम्, सूर्याभ्यादितसूर्याभिनिर्मुक्तविषये प्रायाश्चित्तम्, कुनखिश्यावदन्तादीनां प्रायश्चित्तम्, ब्रह्मघ्नप्रायश्चित्तम्, गुरुतल्पगमनादिप्रायश्चित्तानां निरूपणम्...	२१९
भ्रूणहप्रायाश्चित्तम्, राजन्यादिवधे प्रायाश्चित्तानि, ब्राह्मणसुवर्णहरणे प्रायाश्चित्तम्, कर्मविपाकप्रदर्शनम्...	२२२

विषयाः	पृष्ठाङ्काः
ब्राह्मणीगमने शूद्रस्य प्रायश्चित्तम्, वैश्यादीनां ब्राह्मणीगमने प्रायश्चित्तम्, शूद्रसंगतब्राह्मण्यादीनां प्रायश्चित्तम्	२२१
ब्राह्मणदाराभिगमने प्रायश्चित्तम्, गोवधे प्रायश्चित्तम्, कृच्छ्रतप्तकृच्छ्रयोर्निरूपणम् श्वमार्जारादिदहनने प्रायश्चित्तम्, अयाज्ययाजनादिपायाश्चित्तम्...	२२२
अभिशस्तप्रायाश्चित्तम्, वैश्वानर्यादीष्टीनां निरूपणम्, ब्रह्मचारिणः स्त्रीगमने प्रायाश्चित्तम्, रेतसः प्रयत्नोत्सर्गविषये प्रायश्चित्तम्, ब्रह्मचारिकृतमांसाशनादौ प्रायश्चित्तम ...	२२३
आत्मत्यागिनः प्रेतक्रियायां प्रायाश्चित्तम्, आत्महननाध्यवसाये प्रायश्चित्तम्, अधीयानानामन्तरागमने प्रायाश्चित्तम्, श्वकुक्कुटादीनां मांसदने प्रायश्चित्तम्, श्वदष्टस्य प्रायश्चित्तनिरूपणम्, श्वचाण्डालपतितोपस्पर्शने प्रायाश्चित्तम्, भ्रूणहत्यायां प्रायश्चित्तान्तरकथनम्, अपरः कृच्छ्रविधिः,	२२४
चान्द्रायणविधिः अतिकृच्छ्रादिनिरूपणम्, कृच्छ्राणां व्रतरूपाणि, रहस्यप्रायश्चित्तम्,	२२५
साधारणपापक्षयोपायाभिधानम्	२२६
वेदाध्ययनशंसा	२२७
आहारशुद्धिनिरूपणम्	२२८
स्वयं विप्रतिपन्नादीनां दूषितस्त्रीणां त्यागाभावकथनम्, स्त्रीणां पतनहेतवः, सर्ववेदपावित्र्याभिधानम्	२२९
दानादीनां फलनिरूपणम् अतिदानाभिधानम्, ...	२३०
प्राणाग्निहोत्रविधिः	२३१

इति वसिष्ठस्मृतिः ।

२० अथ वृद्धशातातपस्मृतिः ।

विषयाः	पृष्ठाङ्काः
ब्रह्मकूर्चविधिः, मूत्रोत्सर्गे ततः स्मृतिभ्रंशाज्जलं पिबतः प्रायाश्चित्तम्	२३२

विषयाः	पृष्ठाङ्काः
स्पृष्टप्रायश्चित्तानि	२३३
कृच्छ्रसौम्याभिधानम्, तुलापुरुषविधानम्,	

विषयाः	पृष्ठाङ्काः
प्रेतायान्नदानम्, मातुः सपिण्डीकरणम्, सपिण्डितविधिः, श्राद्धे द्विजेभ्यो मृन्मयपात्रेऽन्नदाने नरकाभिधानम्, वृषलाय श्राद्धोच्छिष्टप्रदाने नरकः, उपवासे नेत्राञ्जनादिधारणे स्त्रीणामभ्यनुज्ञा	२३४
अमावास्यादिषु दन्तकाष्ठादीनां निषेधः, कुमारप्रसवे गुडघृतहिरण्यवस्त्रादिप्रतिग्रहे दोषाभावकथनम्, अन्यायलब्धद्रव्येणौर्ध्वदैहिककरणे फलाभाव इत्यादिनिरूपणम्, ...	२३५

इति वृद्धशातातपस्मृतिः ।

२१ अथ वृद्धहारीतस्मृतिः ।

विषयाः	पृष्ठाङ्काः
हारीतं प्रत्यम्बरीषस्योक्तिः, पुरुषोत्तमस्य सर्वोत्तमत्वेन वर्णनम्	२३६
विष्णोर्दास्यानरूपणम्, दास्यलक्षणाभिधानम्, तापादिसंस्काराणां कर्तव्यत्वेन विधानम्...	२३७
वैष्णवानां पञ्च संस्काराः, आचार्यलक्षणम्, चक्रादिधारणविधि, ...	२३८
चक्रधारणाभावे कर्मणो वैफल्यबोधनम्, तप्तचक्रधारणविधिः, श्राद्धे शङ्खचक्रोर्ध्वपुण्ड्रादिधारिब्राह्मणभोजने पितॄणां दुर्गतिः, ...	२३९
ऊर्ध्वपुण्ड्रधारणविधिः	२४०
ललाटादिषु केशवादीनां न्यासः, केशवादिमूर्तीनां निरूपणम्	२४१
नामसंस्कारः	२४२
मन्त्रसंस्कारविधानम्	२४३
बिम्बलक्षणनिरूपणम्	२४४
मन्त्रयोगाभिधानम्	२४५
न्यासविधिः, विष्णोर्ध्यानादिनिरूपणम् ...	२४६
प्राणायामविधिः, जपविधानाभिधानम्, जपस्य फलम्	२४७
प्रणवस्थविष्ण्वादि देवतानां प्रतिपादनम् ...	२४८
प्रणवार्थनिरूपणम्, व्याहृत्यर्थाभिधानम्,स्वरूपादित्रिवर्गस्य संसिद्ध्युपायनिरूपणम्,	२४९
नारायणपदस्यार्थाभिधानम्, विष्णुदास्यमहिमवर्णनम्, मनोरर्थमविदित्वा जपकरणे सिद्ध्यभावादिनिरूपणम्	२५०
षडङ्गन्यासविधेः । हरिध्यानादिपूर्वकजपविधिनिरूपणम्	२५१
आयुष्कामार्थं जपादिविधिः, अष्टाक्षरमनोर्माहात्म्याभिधानम्, ...	२५२
द्वादशार्णमनुनिरूपणम्, तन्मन्त्रजपस्य फलश्रुतिः	२५३
द्वादशार्णमनोर्ऋष्यादिकथनम्, तन्मन्त्रस्य जपादिविधिः	२५४
मालतीपुष्पहेमेन सर्वेष्टसिद्धिः, षडक्षरमनोर्विधानम्, तन्मन्त्रस्य च्छन्दआदिनिरूपणम्	२५५
षडक्षरमन्त्रजपविधिः	२५६
श्रीराममन्त्रविधानम्	२५७
श्रीकृष्णमन्त्रस्य विधानम्	२५९
वाराहमन्त्रविधिः, नारसिंहमनुविधानम् ...	२६१
नरसिंहमन्त्राभिधानम्, तध्याननिरूपणं च,	२६२
वामनमन्त्राभिधानम्, ...	२६३
हयग्रीवमन्त्रविधिनिरूपणम्, सौदर्शनमनुविधानम्	२६४
विष्णोराराधनविधिः, प्रातःकृत्यम् ...	२६५
शौचविधिनिरूपणम्, स्नानादिविधिः ...	२६६
पवित्रधारणम्, संध्योपास्तिः, तर्पणविधिनिरूपणम्, विष्णोराराधनार्थं तुलस्यादीनां संचयः, ...	२६७

विषयाः	पृष्ठाङ्काः
लक्ष्मीनारायणस्य ध्यानाभिधानम्, पञ्चोपनिषन्न्यासादिकथनम्, पाद्यादिपात्रेषूशीरचन्दनादीनां प्रक्षेपः	२६८
परमात्मनो मधुपर्कादिभिः पूजनम्, आवरणदेवतानां पूजनम्	२६९
दशाङ्गधूपनिरूपणम्, दीपविधिः, नैवेद्यविधिनिरूपणम्, नैवेद्यविषये कोद्रवादिद्रव्याणां निषेधः, ...	२७०
भुक्तवतो हरेराचमनाद्युपचाराणां कथनम्, सपर्योत्तरं जपविधिः, प्रातरुपासनविधयनन्तरं होमविधिनिरूपणम्	२७१
अम्बष्ठाद्यनुलोमजातिनिरूपणम्, प्रतिलोमजातिकथनम्, असद्व्याभिधानम् ...	२७२
जीविकार्थं यायावरादिवृत्त्यभिधानम्, असत्प्रतिग्रहादीनां निषेधः, महाभागवतलक्षणम्, तामसदेवतानां निरूपणम्, विप्रादीनां प्रतिग्रहाधिधर्माः	२७३
अग्निदादीनां हननम्, कामचारेण वर्तमानानां कुलटादीनां विप्रवासनम्, अन्याय्यदण्डनिषेधः, अदण्ड्यदण्डनादिफलम्, दिग्दण्डादीनां निरूपणम्, परद्रव्यादिहरणे हस्तच्छेदादिविधानम्, मानकूटादिकरणे दण्डनिरूपणम्	२७४
जनेश्वरधर्माभिधानम्, फलितवृक्षादिच्छेदने शूलारोपणादिकथनम्, पृथिवीपतिधर्माः, सत्पात्रलक्षणम्, ...	२७५
स्वहस्तलिखितादिभिः शासनपत्रकरणम्, राज्ञो निवासस्थानम्, व्यवहारकर्मस्वध्यक्षस्थापनम्, सबन्धकादावृणे प्रतिमासं वृद्धिग्रहणविधानम्, निर्धनाधमर्णिकस्यर्णापाकरणोपायः, साक्षिनिरूपणम्, भोग्यभोग्यभेदेनाऽऽधेर्द्वैविध्यम्...	२७६
सुराकामाद्यर्थकृतऋणस्यादेयत्वम्, पितुर्ऋणस्य पुत्रपौत्रादिभिर्देयत्वम्, दायविभागः, स्त्रीधनलक्षणम्, अनुत्पन्नापत्यादीनां स्त्रीणां दायविचारः, वनस्थादीनां भागानर्हत्वनिरूपणम्, विभागोत्तरमुत्पन्नपुत्रस्य विभागविषये निर्णयः, सीमाविवादे	

विषयाः	पृष्ठाङ्काः
निर्णयः, औरसादिपुत्राणामभिधानम् ...	२७७
वैष्णवधर्मनिरूपणम्,...	२७८
नास्तिकादीनां लक्षणम्,...	२७९
दास्यधर्माभिधानम्, ब्रह्मचार्यादीनामुपवीतसंख्या, वनस्थादीनामुत्तरीयादिधारणम्,	२८०
वानप्रस्थधर्माः, संन्यासलक्षणम्, उपाकर्मविधिः	२८१
हरेर्नवविधभक्तिनिरूपणम्, अब्दादिषु हरिपूजनस्य कर्तव्यत्वेन विधानम्,... ...	२८२
यज्ञरूपस्य विष्णोर्ध्यानादिकथनम्... ...	२८३
विष्णोः पूजाविधिः...	२८४
पूजाङ्गहोमविधानम्	२८६
द्विजानामेवशालग्रामशिलार्चनेऽधिकारः, शालग्रामशिलाया महिमवर्णनम्, न्यासविधिनिरूपणम्	२८७
विष्णोः सपर्याविधिः	२८८
महाभागवतप्रशंसा, अतिथिपूजनम्, निषिद्धतरूणामभिधानम्, भोजने कांस्यपात्रस्य परिमाणम्, ...	२८९
भोजने वटाश्वत्थादिपर्णानां निषेधः, भोजने मधूकादिपात्राणां प्राशस्त्यबोधनम्, भोजनविधिः, भोजननियमविधिः... ...	२९०
सशब्दमपोशनादिपाने पातित्याभिधानम्, भोजने करञ्जमूलकादीनां निषेधः, उत्तरापोशनादिविधिनिरूपणम्, सायंसंध्या, स्थानभेदेन संध्यागुणाः	२९१
सायमौपासनविधिः, विष्णुशयनादिविधिनिरूपणम्, ऋतौ स्त्रीगमनविधिः, स्त्रीगमने वर्ज्यानि, विष्णुशयनोत्सवविधानम् ...	२९२
पवित्रारोपणम्, पवित्रारोपणस्य फलम्, कार्तिके हरिपूजनविधिनिरूपणम्,...	२९३
नृसिंहपूजनम्,...	२९४
नृसिंहपूजने फलाभिधानम्, पौर्णमास्यां वामनार्चनम्, व्यतीपाते हयग्रीवार्चनाविधिनिरूपणम्...	२९५
ग्रहणादिषु वराहवपुषो नारायणस्य सपर्याविधानम्, ...	२९६
कृष्णाष्टम्यादिषु गोपालकृष्णादीनां पूजनाभि-	

विषयाः	पृष्ठाङ्काः
धानम्	२९७
श्रीरामपूजाविधिः	२९८
वैशाख्यां पौर्णमास्यां पुरुषोत्तमपूजनम्, जन्माष्टम्यां कृष्णपूजनम्	२९९
श्रीकृष्णस्य दोलोत्सवविधिः, भाद्रपदद्वादश्यां वामनपूजनम्	३०१
नारायणपूजनम्, वेदपारायण ऋक्संख्याभिधानम्, रात्रौ होमविधिनिरूपणम् ...	३०२
माधवपूजनविधिः, विष्णुपूजनम्	३०३
यात्रोत्सवयोः फलनिरूपणम्, संवत्सरादिषु महोत्सवविध्यभिधानम्	३०४
उत्सवाङ्गयागविधानम्	३०५
अवभृथविध्यभिधानम्, नित्योत्सवे पूजाहोमादिविधिः	३०६
वैष्णवेष्टिविधिकथनम्, पित्रादीनां पञ्चत्वे संस्कारविधिः	३०७
पिण्डदानम्, नारायणबलेः कर्त्तव्यत्वबोधनम्	३१०
उदककुम्भदानादिनिरूपणम्, सात्त्विकादीनां लक्षणाभिधानम्, तामिस्रादिनरकाः	३११
पञ्च महापातकानि, ब्रह्महत्यासमानि, सुरापानसमानि, सुवर्णस्तेयसमितानि ...	३१२
गुरुतल्पसमानि, अनुपातकानामभिधानम्, उपपातकानि	३१३
प्रकीर्णपातकानि, पातकादीनां लक्षणम्, संसर्गिप्रायश्चित्तम्, जातानुतापस्य प्रायश्चित्तेऽधिकारः, ब्रह्महप्रायश्चित्तम्	३१४
यागस्थक्षत्रियादिवधे प्रायश्चित्तम्, ब्रह्महत्यायाः प्रायश्चित्तान्तरनिरूपणम्, सुरापानादौ प्रायश्चित्तम्	३१५
सूतकान्नादिभक्षणे प्रायश्चित्तम्, वृथा मांसाशनादिविषये प्रायश्चित्तम्, विशिष्टशूद्रस्य पतनहेतवः	३१६
सुरापाने द्विजातीनां प्रायश्चित्तम्, कामतः स्वर्णहारिणः प्रायश्चित्तम्, अकामतो भगिन्यादिषु सकृद्गमने प्रायश्चित्तम्, कामतो भगिन्यादिषु गमने प्रायश्चित्तम् ...	३१७
स्वदारास्वास्यगमने प्रायश्चित्तम्, पुरुषादिगमने प्रायश्चित्तम्, उदक्यादिगमने प्रायश्चित्तम्, संसर्गिणां प्रायश्चित्तम्	३१८
स्त्रीणां व्यभिचारे प्रायश्चित्तम्, स्त्रीगमने यत्यादीनां प्रायश्चित्तम्, प्रायश्चित्ताकरणे फलाभिधानम्, गोघ्नप्रायश्चित्तम्, अग्निदादिस्त्रीवधे दोषाभावकथनम्, आततायिवधेऽदोषः	३१९
ब्रह्महादिविषये प्रायश्चित्तान्तरकथनम्, रजस्वलादिसंसर्गे प्रायश्चित्तम्, उच्छिष्टस्पर्शने प्रायश्चित्तम्	३२०
रजस्वलासूतिकयोः पञ्चत्वे स्नापनादिसंस्कारः, चण्डालादिहतानां संस्काराभिधानम्, रजस्वलादिस्पर्शे रजस्वलायाः प्रायश्चित्तम्, चण्डालपतितोदकपाने प्रायश्चित्तम्, चण्डालपतितादीनां गृहेष्वन्नभोजने प्रायश्चित्तम्...	३२१
चण्डालवाटिकायां स्वापादा कृते प्रायश्चित्तम्, शूद्रान्नादिभोजने प्रायश्चित्तम्, अमेध्यशवादिदूषितकूपस्य शुद्ध्यभिधानम्, चण्डालपतितादिदूषितप्रासाददेवहर्म्याणां शुद्धिः	३२२
विष्णोरुत्सवमध्ये विद्युत्स्तनितसंभवादौ शान्तिनिरूपणम्, अवैष्णवस्थापितमधुसूदने वासुदेवेष्टिविधानम्, सेनेशवैनतेयादीनां बिम्बस्थापनम्	३२३
अवैष्णवस्य वैष्णवदीक्षाविधिः, अवैष्णवविप्रपूजनादौ प्रायश्चित्तम्, नारायण्यादीष्टिविधिनिरूपणम्	३२४
यज्ञवपुषो वर्णनम्, द्रव्ययज्ञादीनां निरूपणम्, नारायणेष्टिविधानम्	३२५
वासुदेवेष्टिः, वैष्णवेष्टिविधिनिरूपणम् ...	३२८
वैयूहेष्टिविधिकथनम्, केशवादीनां वर्णाभिधानम्	३२९
केशवादीनामायुधानि, तद्बिम्बादिषु गन्धादिभिः पूजनविधिः	३३०
वैभवेष्टेर्विधानम्, आनन्तेष्टिकथनम् ...	३३१
वैनतेयेष्टिनिरूपणम्, वैष्वक्सेनेष्टिविधिः ...	३३२
सौदर्शनेष्टिनिरूपणम्...	३३३
भागवतेष्ट्यभिधानम्, पाञ्चरात्रेष्टिः	३३४

विषयाः	पृष्ठाङ्काः
पवित्रेष्टिविधि., पञ्चरात्रोत्सवविधिः... ...	३३५
क्षीराब्धियजनम्	३३६
दोलोत्सवविधिः	३३७
विष्णोरुत्सवविधानिरूपणम्	३३८
उत्सवस्य फलश्रुतिः...	३३९
विष्णुपूजाविधिः	३४०
स्त्रीधर्माभिधानम्	३४४
भाण्डादीनां संशुद्धिः, भावदुष्टादिद्रव्याणां प्रतिपादनम्	३४५
कालदुष्टलक्षणम्, संसर्गदुष्टाभिधानम्, जातिदुष्टकथनम्, अभक्ष्यभोक्त्रादीनां सङ्गनिषेधः, वैष्णवधर्मनिरूपणम्	३४६
नवविधेज्याभिधानम्, अर्चापञ्चकनिरूपणम्, विष्णोराराधनम्, वैष्णवलक्षणम्, वैष्णवस्य पातित्यहेतुनिरूपणम्	३४७
लोकायतिकादीनां लक्षणम्, अवैदिकविधिना विष्णुपूजनाच्छाण्डिल्यस्य शापाभिधानम्, वेदोक्तविधिना नारायणपूजनाच्छाण्डिल्यस्य तद्धामप्राप्तिनिरूपणम् ...	३४८
स्त्रीधर्माभिधानम्, सहगमनस्य फलम्, गर्भिण्याः सहगमने निषेधः, विधवाधर्माः, पत्न्यां मृतायामग्निहोत्रिणः कुशमय्यादिपत्न्यन्तरेणाग्निहोत्रधारणविधानम्, ...	३४९
चक्रादिधारणविधिः, पुण्ड्रक्रियाभिधानम्, मन्त्रदीक्षारहितस्य वैष्णवस्य मन्त्रादिविषये सिद्ध्यभावकथनम्, ...	३५०
वैष्णवदीक्षाविधिः	३५१
वैष्णवधर्मनिरूपणम्...	३५२
वैष्णवप्रशंसा	३५३
महापापोपपापाद्यैरन्वितस्य वैष्णवस्य प्रायश्चित्तादिकथनम्, अवैष्णवान्नभोजननिषेधः, वैष्णवब्राह्मणाद्यूजने नरकपातः, श्राद्धकर्मणि हव्यापतान्नदानात्पतॄणां विष्णुस्थानप्राप्तिः	३५४
अमादिश्राद्धकालाः, एकादशीपत्रोः श्राद्धनिषेधः, वैष्णवधर्माभिधानम्, एतच्छास्त्रस्य फलश्रुतिः	३५५

इति वृद्धहारीतस्मृतिः ।

---

२२ अथ वेदव्यासस्मृतिः ।

विषयाः	पृष्ठाङ्काः
धर्माचरणदेशः, ब्राह्मणादिवर्णानां निरूपणम्, अनुलोमविलोमजातीनां कथनम्, गर्भाधानादिसंस्काराणां निरूपणम्	३५७
पुंसवादिसंस्कारकालाः, ब्रह्मचारिधर्माः, ...	३५८
व्रताचरणान्नैष्ठिकब्रह्मचारिणो ब्रह्मसायुज्यफलम्, समावर्त्तनम्, विवाहविधिः ...	३५९
क्षत्रियादिकन्याविवाहे विप्रादीनामधिकारः, गृहस्थधर्मनिरूपणम्, स्त्रीधर्माभिधानम् ...	३६०
स्त्रीणां नित्यकर्मकथनम्, रजस्वलाधर्मनिरूपणम्	३६१
पतिव्रताधर्माः, गृहस्थधर्मनिरूपणम्, पूर्वाह्णकृत्यम्	३६२
स्नानादिविधिप्रतिपादनम्, तर्पणविधिः ...	३६३
पाकयज्ञादिविधिनिरूपणम्	३६४
अतिथिपूजनम्, अभोज्यान्नानां निरूपणम्, शूद्रेषु नापितादयो भोज्यान्ना इत्यादिकथनम्, भक्ष्याभक्ष्यप्रकरणम्	३६५
भोजनविधिः	३६६
गृहस्थाश्रमप्रशंसा, तीर्थनिरूपणम्, दानधर्मप्रकरणम् ।	३६७

विषयाः	पृष्ठाङ्काः
इन्दुक्षयादिषु दानप्रशंसा, सत्पात्राणां निरूपणम्	३६८
ब्राह्मणब्रुवादीनां लक्षणम्, ब्राह्मणप्रशंसनम्...	३६९
एकपङ्क्त्यां विषान्नदाने ब्रह्महत्यादोषाभिधानम्, शूद्रान्नभोजने फलनिरूपणम्...	३७०

इति वेदव्यासस्मृतिः ।

२३ अथ शङ्खलिखितस्मृतिः ।

विषयाः	पृष्ठाङ्काः
वैश्वदेवकृत्वैव भुक्तान्नस्य कालाग्निहोत्रादिरितिनिरूपणम्, अतिथिपूजनम्, परान्नभोजने निषेधः, रजप्रशंसा, ब्राह्मणप्रशंसनम्, ...	३७३

इति शङ्खलिखितस्मृतिः ।

२४ अथ शङ्खस्मृतिः ।

विषयाः	पृष्ठाङ्काः
ब्राह्मणादीनां कर्माणि, पुंसवनादिसंस्काराणामभिधानम्, ब्राह्मणादीनामुपनयनकालाः	३७४
ब्राह्मणाद्युपनयने मौञ्ज्यादीनां निरूपणम्, ब्रह्मचारिधर्माः, वेदाध्ययनविधिः, अनध्यायाः, ...	३७५
समावर्तनम्। विवाहप्रकरणम्। ब्राह्मादिविवाहानां लक्षणम्, ब्राह्मणादीनामसवर्णकन्यापरिणयेऽधिकारः, शूद्रापरिणये द्विजातीनां निषेधः, ...	३७६
पञ्च महायज्ञाः, गृहाश्रमिणां प्रशंसा, अतिथिपूजनाद्गृहस्थस्य स्वर्गाभिधानम्, ...	३७७
वानप्रस्थधर्मनिरूपणम्, यतिप्रकरणम्। यतिधर्माः यतिपात्राणि	३७८
यत्याचारकथनम्, प्राणायामलक्षणम्, धारणादीनां लक्षणम्, ध्यानयोगनिरूपणम्, ...	३७९
नित्यनैमित्तिकादिस्नानानां लक्षणानि ...	३८०
क्रियास्नानविधिः, ...	३८१
आचमनविधिनिरूपणम्, ...	३८२
अघमर्षणम्, ...	३८३
गायत्रीजपविधिः। गायत्रीजपस्य फलम्, गायत्रीहोमादभीष्टसिद्धिः, गायत्र्याः प्रशंसा, ...	३८४
तर्पणविधिः	३८५
श्राद्धे ब्राह्मणपरीक्षणम्, वर्ज्यब्राह्मणाः, पङ्क्तिपावनब्राह्मणानां निरूपणम्, श्राद्धे ब्राह्मणसंख्या, श्राद्धे उग्रगन्धादिपुष्पाणां वर्जनम्, ...	३८६
श्राद्धे वर्ज्यद्रव्याणामभिधानम्, श्राद्धोपादेयानि, श्राद्धदेशाः, म्लेच्छदेशादौ श्राद्धाचरणे निषेधः, ...	३८७
अशौचप्रकरणम्, ...	३८८
द्रव्यशुद्धिप्रकरणम्, मृन्मयादिपात्राणां शुद्धिः, मुक्तामणिप्रवालानां शुद्धिनिरूपणम्, यज्ञपात्राणां शुद्धिः, केशादीनां शुद्धिः,	३८९
धान्यादीनां शुद्धिनिरूपणम्, निर्यासादीनां शुद्धिः, स्वशय्यादीनां शुद्धिनिरूपणम्, गृहस्थादीनां शौचविधिः, महापातकिनां संशुद्ध्यर्थं द्वादशाब्दव्रतनिरूपणम्, ...	३९०

विषयाः	पृष्ठाङ्काः
कूटसाक्ष्यादिविषये व्रताभिधानम् ,क्षत्रियादिवधे व्रतनिरूपणम्, गवाद्यपहारे संवत्सरव्रतविधानम्, लवणाद्यपहारे व्रतनिरूपणम्, पलाण्ड्वादिभक्षणे व्रतनिरूपणम्, ...	३९१
विवत्सादीनां क्षीरपाने व्रताभिधानम्, शूद्रादीनामन्नभोजने व्रतनिरूपणम्, ...	३९२
परिवित्त्यादीनां संशुद्धये संवत्सरं व्रतम्, काकोच्छिष्टादिभक्षणे व्रताभिधानम्, वाग्दुष्टादिभक्षणे व्रतम्, एकपङ्क्त्युपविष्टादिषु विषमादिदाने व्रतनिरूपणम् , ...	३९३
अघमर्षणव्रतम्, पराकव्रतम्, वारुणकृच्छ्रविधिः , अतिकृच्छ्रः , सांतपनकृच्छ्राद्यभिधानम्, ...	३९४

इति शङ्खस्मृतिः ।

२५ अथ शातातपस्मृतिः ।

विषयाः	पृष्ठाङ्काः
प्रायश्चित्तस्य फलम् , दुष्कर्मजरोगाणां जप्यादिभिः शम इत्यादिकथनम्, महापापात्कुष्ठादिरोगाणामुत्पत्तिरिति निरूपणम्, उपपापाज्जलोदरादिव्याधीनामुत्पत्तिः, पापाद्दण्डापतानकादीनां प्रादुर्भाव इत्यादिकथनम् , ...	३९६
गोदानादिविधिः, वृषभदानम्, गोचर्मदानविधिः, अश्वदानादीनां निरूपणम्, प्रायश्चित्तविधिः	३९७
कर्मविपाकः, नरकस्यान्ते ब्रह्महा पाण्डुकुष्ठी भवति तत्पातकशान्तये प्रायश्चित्तम्, गोवधात्कुष्ठरोगः, तत्पातकविशुद्ध्यर्थप्रायश्चित्तम्	३९८
पितृहत्यया चेतनाहीनस्तच्छान्त्यर्थं प्रायश्चित्तम्, बालहत्यादिदोषाद्वन्ध्यादिदोषास्तदपनोदनाय प्रायश्चित्तम्	३९९
रुद्रलक्षणम्, महारुद्रातिरुद्रयोर्लक्षणम्, राजहा क्षयरोगी तद्दोषापनुत्तये गोभूहिरण्यादिप्रदानम्, शूद्रहन्ता दण्डापतानकयुतो भवति तत्पापशान्तये प्राजापत्यादिनिरूपणम्, ...	४००
उष्ट्रवधाद्विकृतस्वरस्तत्पापाविशुद्ध्यर्थं कर्पूरजफलदानम्, महिष्यादिहननात्कृष्णगुल्मादीनामुत्पत्तिस्तच्छान्त्यर्थं मद्यादिदाननिरूपणम्	४०१
सुरापानादिपापानां फलम्, तत्पापशान्तये प्राजापत्याष्टकव्रतनिरूपणम्, अभक्ष्यभक्षणस्य फलनिरूपणं तत्पापशान्तये भीष्मपञ्चकाभिधानम्, परान्नविघ्नकरणस्य फलं तत्पापशान्तये लक्षहोमविधिः, परवञ्चकस्य फलं तत्पापविशुद्धये प्रायश्चित्ताभिधानम्,	४०२
परोपतापस्य फलं तच्छुद्धयेऽन्नदानादिकथनम्, दावाग्निदायकादीनां फलनिरूपणं तत्पापशान्तय उदपानादिनिरूपणम्, कुलघ्नादीनां फलं तत्पापशुद्धये स्वर्णदानादिनिरूपणम्...	४०३
दुग्धहरणादबहुमूत्ररोगस्तच्छान्तये दुग्धधेनुदानम्, इक्षुविकाराद्यपहरणादुदरादिरोगोत्पत्तिनिरूपण तद्दोषशान्तये गुडधेन्वादिदानाभिधानम्, ...	४०४
मातृगमनादिदोषाणां फलाभिधानं तद्दोषशान्तये धनेश्वरादीनामर्चनाविधिनिरूपणम् ,	४०५
स्वसुतागमनादिपापाद्रक्तकुष्ठाद्युत्पत्तिस्तच्छान्तये सुरेश्वरार्चनादिनिरूपणम्, विश्वस्तभार्यादिगमनाद्रजचर्माद्युत्पत्तिस्तच्छान्तये प्रायश्चित्तनिरूपणम्	४०६

विषयाः	पृष्ठाङ्काः
मातृष्वस्रभिगमनादिपापाद्व्रणाद्युत्पत्तिस्तच्छान्तये सम्यग्दासीप्रदानादिनिरूपणम् ...	४०७
दुर्मृत्युकारणाभिधानं तच्छान्तये प्रायश्चित्तनिरूपणम्...	४०८

इति शातातपस्मृतिः।

२६ अथ संवर्तस्मृतिः।

विषयाः	पृष्ठाङ्काः
ब्रह्मचारिधर्माः	४११
गृहस्थधर्मनिरूपणम्, नानाविधदानानि, तद्दानफलनिरूपणं च	४१३
संध्याकाल आहारादीनां वर्जनम्, वानप्रस्थधर्माः	४१६
प्रायश्चित्तविधिः, महापातकप्रायश्चित्तानि ...	४१७
गोवधप्रायश्चित्तम्	४१८
गजादिवधे प्रायश्चित्तम्, चाण्डाल्यादिगमने प्रायश्चित्तम्, ...	४१९
भिक्षोरपत्यार्थं स्त्रीगमने प्रायश्चित्तम्, महापातक्यादीनामुदकदानादिनिषेधः... ...	४२१
स्त्रीक्षीरादिपाने प्रायश्चित्तम्...	४२२
महापातकिनां प्रायश्चित्तान्तरनिरूपणम्, अयाज्ययाजनादौ प्रायश्चित्तम्...	४२३

इति संवर्तस्मृतिः।

२७ अथ बौधायनस्मृतिः।

विषयाः	पृष्ठाङ्काः
धर्मलक्षणम्, शिष्टलक्षणम्, पर्षल्लक्षणम्, ...	४२५
आरण्यकादिनिषिद्धदेशगमने प्रायश्चित्तम्, ब्राह्मणादीनामुपनयनकालः, द्विजातीनां मेखलादिनिरूपणम्	४२६
ब्रह्मचारिधर्माः	४२७
स्नातकधर्मनिरूपणम्...	४२८
कमण्डलुदर्भाभिधानम्	४२९
शुद्धिप्रकरणम्। अन्तःशुद्धिनिरूपणम्, बाह्यशुद्धिः, ब्राह्मादितीर्थानि, आचमनविधिः	४३०
द्रव्यशुद्धिप्रकरणम्। उच्छिष्टतैजसादिद्रव्याणां शुद्धिः	४३१
चैत्यवृक्षादिस्पर्शे सचैलस्नानम्, भूमिशुद्धिः, श्रद्धाप्रशंसा	४३२
शौचविधिनिरूपणम्, वार्धुषिकलक्षणम्, गोक्षकादिविप्रेषु शूद्रवद्व्यवहरेदित्यादिकथनम्	४३३
जननाशौचमृताशौचयोरभिधानम्, सपिण्डलक्षणम् अशौचसंपाते निर्णयः, ...	४३४
कृमिदष्टादिप्रायश्चित्तम्, ...	४३५
मूत्रपुरीषाद्युपहतद्रव्याणां शुद्धिनिरूपणम्.	४३६
यज्ञाङ्गविधिनिरूपणम्, ...	४३७
ब्राह्मणादिवर्णनिरूपणम्, ब्राह्मणस्य क्षत्रियादिकन्यापरिणयेऽधिकार इत्यादिकथनम्, संकरजातिनिरूपणम्, ...	४३८
राजधर्माः	४३९
दण्डप्रकरणम्, ब्राह्मणस्य ब्रह्महत्यादिषु दण्डनिरूपणम्, क्षत्रियादिकृतब्राह्मणवधे दण्डाभिधानम्, साक्षिश्रवणम्, ...	४४०
अष्टौ विवाहाः, ...	४४१

विषयाः	पृष्ठाङ्काः
अनध्यायाः	४४२
प्रायश्चित्तप्रकरणम् । भ्रूणहप्रायश्चित्तम्, अमत्या ब्राह्मणहनने प्रायश्चित्तम्, गुरुतल्पगमनादिप्रायश्चित्तानि	४४३
समुद्रसंयानादिपतनीयकर्मणां निरूपणम् ...	४४४
उपपातकानि, अशुचिकराभिधानम्, तत्प्रायश्चित्तनिरूपणं च, तिलविक्रये निषेधः	४४५
तप्तकृच्छ्रादिकथनम्, दायविभागः ...	४४६
औरसादिपुत्राणामभिधानम्	४४७
स्त्रिया अस्वातन्त्र्यकथनम्, स्त्रीत्यागहेतवः, अगम्यस्त्रीणामभिधानम्, चण्डालीगमने ब्राह्मणस्य पातित्यम्	४४८
आपद्धर्मनिरूपणम्, देवादितर्पणविधिः ...	४४९
स्नातकव्रतानि, ...	४५०
संध्योपासनविधिः	४५१
संध्यातिक्रमे प्रायश्चित्तम, संध्याकर्मणः फलम्,	४५२
मध्याह्नस्नानविधिः	४५३
ब्रह्मयज्ञाङ्गतर्पणम्	४५४
पञ्च महायज्ञाः, आश्रमधर्मनिरूपणम् ...	४५७
शालीनयायावराणामात्मयाजिनां प्राणाहुतिव्याख्यानम्	४५९
पङ्क्तिपावनानां निरूपणम्, श्राद्धान्नामौकरणादिविधिनिरूपणम्	४६१
सत्पुत्रप्रशंसा, संन्यासविधिव्याख्यानम्, ...	४६२
भोजने मुन्यादीनां ग्रासंख्या	४६५
शालीनयायावरादीनां पण्निवर्तन्यादयो नव वृत्तयः, शालीनयायावरादीनां धर्मनिरूपणम्...	४६६
षण्निवर्तन्यादिवृत्तीनां स्वरूपकथनम्... ...	४६७
पचमानकापचमानकभेदेन वानप्रस्थस्य द्वैविध्यबोधनम्, तत्र पचमानकस्य सर्वारण्यकादिभेदेन पञ्च प्रकाराः, सर्वारण्यकस्यापवान्तरभेदनिरूपणम्	४६८
उन्मज्जकादिरूपेणापचमानकस्य पञ्च भेदाः, वैखानसानां दीक्षाभिधानम्, मांसादिभक्षणे ब्रह्मचारिणः प्रामश्चित्तीयहोमविधिः.	४६९
अघमर्षणकल्पव्याख्यानम्, आत्मकृतदुरितोपशमाय प्रसृतयावकस्य हवनविधिः ...	४७०
कूष्माण्डहोमः	४७१
चान्द्रायणकल्पाभिधानम्...	४७२
अनश्नत्पारायणविधिव्याख्यानम्. ...	४७३
याप्यकर्मणोपेतस्य निष्क्रयार्थं जपादिनिरूपणम्...	४७५
चक्षु श्रोत्रत्वग्घ्राणमनोव्यतिक्रमादिषु प्रायश्चित्तम्, विवाहात्प्राक्कन्याया रजोदर्शने दोषनिरूपणम्	४७६
प्राणायामफलम्, योगप्रशंसा.	४७७
पापनिवृत्तये वेदपवित्राणां निरूपणम् ...	४७८
प्रायश्चित्तविधिः	४७९
अघमर्षणादिविधिव्याख्यानम्, कृच्छ्रादिविधिनिरूपणम्...	४८०
सांतपनकृच्छ्रः, पराककृच्छ्राभिधानम्, महासांतपनम्, चान्द्रायणादिविधिः, तुलापुरुषव्रतनिरूपणम, ब्रह्मकूर्चव्रताभिधानम्, पापापनुत्तय व्रतान्तरनिरूपणम्... ...	४८१
पापनोदकानि, मृगारेष्ट्यादीनां निरूपणम्, पवित्रैर्मार्जनादिविधिः, वेदपवित्राणामभिधानम्	४८२
गणहोमफलम्	४८३
एतदध्यापनादौ फलनिरूपणम्	४८४

इति बौधायनस्मृतिः ।

समाप्तेयं स्मृत्यभिहितविषयाणामनुक्रमणिका ।

ॐ तत्सद्ब्रह्मणे नमः ।

अङ्गिरःस्मृतिः ।

धर्मजिज्ञासुभिः सम्यगमितौजा महाद्युतिः । भारद्वाजादिभिः पृष्टः प्राब्रवीदेतदङ्गिराः १
आश्रमेषु च सर्वेषु वर्णानामनुपूर्वशः । प्रायश्चित्तविधिं कृत्स्नं वक्ष्यमाणं निबोधत २
अन्त्यानामविशेषेण जग्ध्वाऽन्नं हि द्विजन्मनाम् । चान्द्रं कृच्छ्रं तदर्धं च ब्रह्मक्षत्रविशां स्मृतम् ३
चाण्डालकूपभाण्डेषु यस्त्वपः पिबते द्विजः । प्रायश्चित्तं कथं तेषां वर्णे वर्णे विनिर्दिशेत् ४
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः । तदर्धं तु चरेद्वैश्यः पादं शूद्रः समाचरेत् ५
चाण्डालोदकभाण्डेषु यः पिबेत्तृषितो जलम् । तत्क्षणं तत्समुत्तार्य प्राजापत्यं समाचरेत् ६
यदि चानुद्धृतं तोयं शरीरे तस्य जीर्यति । तदा विप्रः स्वशुद्ध्यर्थं कृच्छ्रं सांतपनं चरेत् ७
चाण्डालभाण्डसंस्पृष्टं पिबेच्चेत्तृषितो जलम् । गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ८
यस्तु चाण्डालसंस्पृष्टं पिबेत्तोयमकामतः । स तु सांतपनं कृच्छ्रं चरेच्छुद्ध्यर्थमात्मनः ९
कृते मूत्रपुरीषे तु भुक्तोच्छिष्टोऽथ वा द्विजः । श्वादि स्पृष्ट्वा जपेत्स्नात्वा गायत्र्या अयुतद्वयम् १०
कूपे विण्मूत्रसंयुक्ते पीत्वा तोयं द्विजोत्तमः । कृच्छ्रं सांतपनं कृत्वा त्रिरात्रेण विशुध्यति ११
बलाकाभासगृध्राखू(खु)खरश्च(श्व)बकसूकराः । दृष्ट्वा चैषाममेध्यानि स्पृष्ट्वाऽऽचम्य विशुध्यति १२
इच्छयैषाममेध्यानि भक्षयित्वा द्विजोत्तमाः । कुर्युः सांतपनं कृच्छ्रं प्राजापत्यमनिच्छया १३
एतदेव व्रतं कुर्युरेषां मांसस्य भक्षणे । श्वकाकयोश्च मांसानि भुक्त्वा चान्द्रायणं चरेत् १४
स्पर्शनं चैव कुरुते ब्राह्मणो ब्राह्मणैः सह । आहतुः शंखलिखितौ विण्मूत्रोच्चारभोजने १५
तूलिका चोपधानं च पुष्परक्ताम्बराणि च । पतिताद्यैरुपस्पृष्टं[1] शोषणैः प्रोक्षणैः शुचि[2] १६
रजकं चर्मकारं च नटं धीवरमेव च । बुरुडं च तथा स्पृष्ट्वा शुध्येदाचमनाद्द्विजः १७
संस्पृष्ट एभिरुच्छिष्टैरेकरात्रं पयः पिबेत् । संस्पृश्य चैतानुच्छिष्ट उपोष्य त्रिदिनं क्षिपेत् १८
भुक्त्वा चैषां समुच्छिष्टं विप्रः सांतपनं चरेत् । पादोनमर्धपादं च क्षत्रविट्शूद्रयोनयः १९
यश्च भार्यां श्वपाकस्य ब्राह्मणो ह्यधिगच्छति । सचैलो जलमाप्लुत्य घृतं प्राश्य विशुध्यति २०
स चोदक्यादिभिः स्पृष्टो यदा स्यादातुरो नरः । अनातुरः सप्तवारं स्पृष्ट्वा स्नानं समाचरेत् २१
आतुरा चैव या नारी रजसा मलिनी भवेत् । चतुर्थेऽहनि संप्राप्ते स्पृष्ट्वा तामप्यनातुरः २२

---

१ क. °स्पृष्टे शो° । २ क. ख. शुचिः ।

दशैकादश वारान्वा स्नानं कुर्याद्विचक्षणः । एवं तस्या विशुद्धिः स्यात्परिवर्तितवाससः
प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत्। न तेन तद्व्रतं तासामुपहन्येत कर्हिचित् २४
स्वभाव एष नारीणां ज्ञेयो मूत्रपुरीषवत्। अत ऊर्ध्वं न दुष्यन्ति चरेयुश्चैव तद्व्रतम् २५
चाण्डालपतितोदक्यां स्पृष्ट्वोच्छिष्टो द्विजोत्तमः। प्राजापत्यं चरेत्कृच्छ्रं सुमन्तुवचनं यथा
चण्डालपतितादीनामुच्छिष्टान्नादिभोजने । द्विजः शुध्येत्पराकेण शूद्रः कृच्छ्रेण शुध्यति
पतितानां स्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। मासोपवासं कुर्वीत चान्द्रायणमथापि वा
श्वगर्दभखरादीनां नरमांसादिदूषणे। उद्धरेत्सकलं वारि कूपवापीविशोधनम् २९
यस्तु कूपे पिबेत्तोयं ब्राह्मणः शवदूषिते। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३०
क्लिन्नभिन्नशवव्याप्तं वारि विप्रो यदा पिबेत्। शुद्धिश्चान्द्रायणं तस्य तप्तकृच्छ्रमथापि वा
अत ऊर्ध्वं प्रवक्ष्यामि निलि(नीली)शौचस्य यो विधिः । स्त्रीणां क्रीडार्थसंभोगे शयनीये न दुष्यति ३२
संध्या स्नानं जपो होमः स्वाध्यायः पितृतर्पणम् । वृथा तस्य महायज्ञा नीलीरक्तस्य धारणात् ३३
पालनाद्विक्रयाच्चैव नीलीवृत्त्युपजीवनात्। पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति ३४
नीलीरक्तं यदा वस्त्रं विप्रो देहेषु धारयेत्। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ३५
नीलीमध्ये यदा गच्छेत्प्रमादाद्ब्राह्मणः क्वचित् । अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति ३६
नील्या चोपहते क्षेत्रे शस्यं यच्च प्ररोहति। अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत्
वापयेद्यत्र नीलीं तु तावत्स्यादशुचिर्महीं। प्रमाणं द्वादश समाम(अ)त ऊर्ध्वं शुचिर्भवेत्
मृते भर्तरि या नारी नीलीवस्त्रं तु धारयेत्। स्वामी तिष्ठति पाताले नीलीवस्त्रस्य धारणात्
पत्यौ जीवति या नारी उपोष्य व्रतचारिणी । आयुर्वै हरते भर्तुः सा नारी नरकं व्रजेत्
स्नानं रजस्वलायास्तु चतुर्थेऽहनि शुध्यति।कुर्याद्रजसि निर्वृ(वृ)त्ते नानिर्वृ(वृ)त्ते कदाचन
रजस्वलायाः प्रेतायाः संस्कारादीनि नाऽऽचरेत् । ऊर्ध्वं त्रिरात्रं स्नातायाः शवधर्मेण दाहयेत् ४२
रोगेण यद्रजः स्त्रीणामत्यन्तं संप्रवर्तते। अशुच्यस्ता न तेन स्युस्तासां वैकारिको मदः४३
साध्वाचारा न तावत्सा रजो यावत्प्रवर्तते।वृत्ते रजसि साध्वी स्याद्गृहकर्मणि चेन्द्रिये४४
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी। तृतीये रजकी चैव चतुर्थेऽहनि शुध्यति ४५
चाण्डालः श्वपचो वाऽपि यद्यात्रेयीं स्त्रियं स्पृशेत् । अफालकृष्टैर्वर्तेत पञ्चगव्येन शुध्यति

---

१ ख. ग. °ते । निर्वृ° ।

रजस्वला तु संस्पृष्टा चण्डालान्त्यश्ववायसैः । तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति ४७

रजस्वले यदा नार्यावन्योन्यं स्पृशतः क्वचित् । सवर्णा पञ्चगव्यं तु त्रिरात्रमसवर्णके ४८

उच्छिष्टोच्छिष्टसंस्पृष्टा कदाचित्स्त्री रजस्वला।पूर्वाः कृच्छ्रं प्रकुर्वीरञ्शूद्रा दानेन शुध्यति

नियमस्था यदा नारी प्रपश्येदन्तरा रजः । उपोष्यैव तु ता रात्रीः शेषं स्नात्वा चरेद्व्रतम्

आतुरे स्नान उत्पन्ने दशकृत्वस्त्वनातुरः । स्नात्वा स्नात्वा च दशधा ततः शुध्येदनातुरः

ऋतौ तु गर्भशङ्कायां स्नानं मैथुनिनः स्मृतम् । अनृतौ तु सदा कुर्याच्छौचं मूत्रपुरीषवत्

द्वावेताववशुची स्यातां दंपती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ५३

रजसा शुध्यते नारी न चेद्गच्छेद्विवर्णताम् । यथा ग्राममलग्राही नदी वेगेन शुध्यति ५४

बहूनां संहतानां च यद्यप्येकोऽशुचिर्भवेत् । तस्य मात्रस्य तच्छौचं नेतरेषां कदाचन ५५

भस्मना शुध्यते कांस्यं सुरया यन्न लिप्यते । सुराविण्मूत्रसंस्पृष्टं शुध्यते तापलेखनैः ५६

गत्वाऽऽघातानि कांस्यानि शूद्रोच्छिष्टानि यानि च । शुध्यन्ते दशभिः क्षारैः श्वकाकोपहतानि च ५७

शुद्धिः सुवर्णरूप्याणां मारुतार्केन्दुरश्मिभिः । गण्डूषं पादशौचं च कुर्यात्कांस(स्य)स्य भाजने ५८

भूमौ निक्षिप्य षण्मासान्पुनराकारमादिशेत् । निर्लेपं काञ्चनं भाण्डमद्भिरेव विशुध्यति

आमिषाभि(भी)रसंस्पृष्टं ताम्रमम्लेन शुध्यति । रेतःस्पृष्टं शवस्पृष्टमाविकं न च दुष्यति

दंपत्योर्विप्रयोरग्न्योर्विप्राग्न्योर्गोद्विजन्मनोः । अन्तरे यदि वा गच्छेदहोरात्रेण शुध्यति

विना दर्भेण यत्स्नानं यच्च दानं विनोदकम् । असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत्

आसने पादमारूढे यत्स्यादर्धं कृतं पदः । मुखेन धमितं भुङ्क्ते तुल्यं गोमांसभक्षणे(णम्)६२

पिबतः पतते तोयं भाजने मुखनिःसृतम् । अभोज्यं तद्भवेदन्नं भुक्त्वा चान्द्रायणं चरेत्

शुष्कमन्नमविद्यस्य सप्तरात्रेण जीर्यति । अन्नं व्यञ्जनसंयुक्तमर्धमासेन जीर्यति ६५

पयो दधि तु मासेन षण्मासेन घृतं तथा । तैलं संवत्सरेणैव कोष्ठे जीर्यति मा(वा)न वा

यस्तु भुञ्जीत शूद्रान्नं मासमेकं निरन्तरम् । स जीवन्नेव शूद्रः स्यान्मृतः श्वानोऽभिजायते

शूद्रान्नरसपुष्टस्य त्वधीयानस्य नित्यशः । यजतो जुह्वतो वाऽपि गतिरूर्ध्वं न विद्यते६८

शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति । यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्तते६९

शूद्रान्नेनोदरस्थेन यस्तु प्राणान्विमुञ्चति । स भवेत्सूकरो ग्रामे तस्य वा जायते कुले ७०

---

१ घ. स्नानं ।

शूद्रान्नं पच्यते येन शूद्रा च गृहमेधिनी। वर्जितः पितृभिर्देवैः रौरवं नरकं व्रजेत् ७१
शूद्रमेक्षणकारी यो ब्राह्मणो ज्ञानदुर्बलः। भूमौ देयं तु तस्यान्नं यथैव श्वा तथैव सः ७२
शूद्रान्नं शूद्रसंपर्कः शूद्रेणैव सहासनम्। शूद्राज्ज्ञानागमः कश्चिज्ज्वलन्तमपि पातयेत् ७३
शूद्रे कृतप्रणामे तु स्वस्ति चेत्क्रियते द्विजैः। शूद्रोऽग्रे नरकं याति ब्राह्मणस्तदनन्तरम्
अग्निहोत्री तु यो विप्रः शूद्रान्नान्न निवर्तते। पञ्च तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः ७५
शूद्रोच्छिष्टस्तु संस्पृष्टः प्रमादाद्द्रव्यपाणिना। तद्द्विजेन न भोक्तव्यमापस्तम्बोऽब्रवीन्मुनिः ७६
भुञ्जीत ब्राह्मणस्यान्नं क्षत्रियस्य तु पर्वणि। सकृद्वैश्यस्य भुञ्जीत न शूद्रस्य कथंचन ७७
अमृतं ब्राह्मणस्यान्नं क्षत्रियस्य पयः स्मृतम्। वैश्यान्नमन्नमेव स्याच्छूद्रस्य रुधिरं स्मृतम् ७८
ब्राह्मणान्ने पवित्रत्वं क्षत्रान्ने पशुता स्मृता। वैश्यान्ने चापि शूद्रत्वं शूद्रान्ने नरकं व्रजेत् ७९
दुष्कृतं हि मनुष्याणामन्नमाश्रित्य तिष्ठति। यस्यान्नं च समश्नाति भुङ्क्ते तस्य च किल्बिषम् ८०
सूतके तु यदा विप्रो ब्रह्मचारी विशेषतः। पिबेत्पानीयमज्ञानाद्भुङ्क्ते चान्नं स्पृशेत्तथा ८१
पानीयपाने कुर्वीत पञ्चगव्यस्य प्राशनम्। त्रिरात्रोपोषितो भूत्वा स्पृष्ट्वा स्नानेन शुध्यति
दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनिषु ८३
यद्येकजाता बहवः पृथक्क्षेत्रेषु वर्णिनाम्। सर्वेषां पैतृकं शौचं यावन्नोपरतः पिता ८४
मृतसूतकपुष्टाङ्गं द्विजं शूद्रान्नभोजनम्। अहमेव न जानामि कां कां योनिं स गच्छति
गृध्रो द्वादश जन्मानि दश जन्मानि सूकरः। श्वा भवेत्सप्त जन्मानि इत्येवं मनुरब्रवीत्*
उपनीतं यदा त्वन्नं भाजने समुपस्थितम्। अपीतरसमुत्सृष्टं न दद्यान्नैव होमयेत् ८७
अन्ने भोजनसंपन्ने मक्षिकाकेशदूषिते। अनन्तरं स्पृशेदा(च्चा)पस्तच्चान्नं भस्मना स्पृशेत्
मूत्रं कृत्वा व्रजन्यस्तु स्मृतिभ्रंशाज्जलं पिबेत्। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति
अरण्ये निर्जले देशे चौरव्याघ्रादिसंकुले। कृत्वा मूत्रं पुरीषं च द्रव्यहस्तो न दुष्यति ९०
भूमौ निक्षिप्य तद्द्रव्यं शौचं कृत्वा यथाविधि। गृह्णीयाच्चैव तद्द्रव्यमुपस्पृश्य यथाविधि ९१

---

* इत उत्तरमेतद्वचनमुपलभ्यते ख. ग. पुस्तकयोः–"प्रस्तुते दीक्ष(क्षा)होमे च विवाहे यज्ञमण्डपे। अन्तरा सूतकोत्पत्तौ न दोषो मनुरब्रवीत्" इति।

---

१ क.ख. ग. आत्म ब्र°। २ क. ख. ग. दरिद्रत्वं। ३ क. ख. ग. भुङ्क्ते। ४ क. वर्णितः। स°। ख. वर्णिनः। ५ क. ख. 'रमते पि'। ६ क ग. भोजने।

मन्त्रोच्चारं द्विजः कृत्वा न कुर्याच्छौचमात्मनः । मोहाद्भुङ्क्ते त्रिरात्रं तु जलं पीत्वा विशुध्यति ९२

यदा भोजनकाले तु अशुचिर्भवति द्विजः । भूमौ निक्षिप्य तद्ग्रासं स्नात्वा विप्रो विशुध्यति ९३

भक्षयित्वा तु तद्ग्रासमहोरात्रेण शुध्यति । अशित्वा सर्वमेवान्नं त्रिरात्रेण विशुध्यति ९४

यस्तु भुञ्जीत पङ्क्तिस्थः कुत्सितान्नं विशेषतः । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति

एकपङ्क्त्युपविष्टानां दुष्कृतं सर्वसाधुनाम् । सर्वे तत्समतां यान्ति पङ्क्तिर्यावन्न भुञ्जति(?)

अग्निना भस्मना चैव स्तम्भेन उदकेन च । द्वारेणाप्यथ मार्गेण पङ्क्तिर्भिद्येत षड्विधा ९७

एकपङ्क्तिस्थितो भुङ्क्ते न स्पृशेच्च परस्परम् । भस्मना कृतमर्यादा एकपङ्क्तिर्न दुष्यति

कृत्वा पापं हि शोचन्वै ब्राह्मणो वेदपारगः । स्मृत्यर्थं विन्दति यो ऽपि तस्मात्पापात्प्रमुच्यते ९९

नैव कुर्यां पुनरिति निवृत्त्यात्मा भवेद्यदि । वह्निर्वेदागमाभ्यासः सर्वं पापं विशुध्यति १००

यथा जातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । एवं दहति वेदज्ञः कर्मजं दोषमात्मनः

न देव(वेद)बलमाश्रित्य पापकर्मरतिर्भवेत् । अज्ञानाद्वा प्रमादाद्वा दहते कर्म नेतरत् १०२

उदक एवोदकस्थश्च स्थले स्थलगतः शुचिः । पादौ स्थाप्योभयत्रैव आचान्तोभयतः शुचिः १०३

उत्तीर्याऽऽचम्य उदकमवतीर्य उपस्पृशेत् । एवं स श्रेयसा युक्तो वरुणेनाभिमन्त्रितः १०४

अग्न्यगारे गवां गोष्ठे देवब्राह्मणसंनिधौ । भोजने जपकाले च पादुकानां विसर्जनम्

पादुकासनमारुढः स्वगृहात्परगृहं व्रजेत् । छेदयेत्तस्य पादौ तु धार्मिकः पृथिवीपतिः

अग्निहोत्री तपस्वी च श्रोत्रियो वेदपारगः । एते सपादुका यान्ति शेषान्दण्डेन ताडयेत्

जन्मप्रभृतिसंस्कारे श्मशानान्ते तथैव च । गणान्ने गणकान्ने वा चौरस्य वृषलीपतेः १०८

पाचकान्ने नवश्राद्धे संग्रहे चन्द्रसूर्ययोः । स्त्रीणां प्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत्

अन्यदत्ता तु या कन्या पुनरन्यत्र दीयते । तस्याश्चैव न भोक्तव्यं पुनर्भूः कीर्तिता बुधैः

पूर्वं तु स्रवते गर्भो यस्याश्चैवाथ संस्कृतः । द्वितीयो गर्भसंस्कारः पुनरेता तु सोच्यते १११

या चाऽऽदौ दशभिर्वर्षैर्जीवत्तिष्ठति गर्भिणी(?) । धारितं तु न रेतो वै रेतोधाः सा तथोच्यते

भर्तुः शयनमुल्लङ्घ्य या चान्येषु प्रवर्तते । तस्या अन्नं न भोक्तव्यं विज्ञेया कामचारिणी

पुनर्भूः पुनरेता च रेतोधा कामचारिणी । तासां प्रथमगर्भे च भुक्त्वा चान्द्रायणं चरेत्

अनपत्या तु या नारी नाश्नीयादेव तद्गृहे । अथ भुञ्जीत मोहात्मा पूयसं नरकं व्रजेत्

---

१ घ. भुञ्जते । २ घ. विन्दतो यो । ३ क. घ. °तीये ग° । ४ क. °र्जीवेति° । ५क. °धाता त° । ६ ख. ग. सा न शुच्य°

स्त्रीधनानि च ये मोहादुपजीवन्ति बान्धवाः। नारीयानानि वस्त्राणि ते पापा यान्त्यधो-
गतिम् ११६
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्चसम्। सूतकान्नं तु यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम्[1] ११७
रात्रावस्तमिते सूर्ये चण्डाली स्पृशते स्त्रियः। ताः स्पृष्टास्तु यदा किंचित्प्रायश्चित्तं कथं
भवेत् ११८
जातरूपं स्पृशेदा(च्चा)पो दिवाऽऽनीतं[2] तु यज्जलम्। तेन स्नात्वा च पीत्वा च सर्वे(र्वः)
स्पृष्ट्वा शुचिर्भवेत् ११९
दासनापितगोपालकुलमित्रार्धसीरिणः। एते शूद्रेषु भोज्यान्ना यश्चाऽऽत्मानं निवेदयेत्
अन्यशूद्रेषु अन्नाद्यं ये भुञ्जन्ति क्षुधा द्विजाः। प्रायश्चित्तं च संप्राप्तं चरेच्चान्द्रायणं व्रतम्
वृषलीफेनजातस्य निःश्वासोपहतस्य च। तासु चैव प्रसूतस्य निष्कृतिर्न विधीयते १२२
अजापालो म(मा)हिषश्च तथा च वृषलीपतिः। प्रमादादपि संस्पृष्ट्वा सचैलं स्नानमाचरेत्
रेतःक्षयकरी वंध्या अजास्ताः परिकीर्तिताः। तासां यः पालयेद्विप्रो ह्यजापालः स
उच्यते १२४
महिषीत्युच्यते नारी या चैव व्यभिचारिणी। तं दोषं क्षमते यस्तु स वै माहिष उच्यते
पितुर्वेश्मनि या कन्या रजस्तु समुपस्पृशेत्। भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली
स्मृता १२६
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च। त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्
उद्वहेद्यस्तु तां कन्यां ब्राह्मणो मदमोहितः। असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः
अग्रे च माहिषं दृष्ट्वा मध्ये च वृषलीपतिः। अन्त्ये वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः
श्वित्री कुष्ठी तथा तस्य कुनखी श्यावदन्तकः। निराशाः पितरो यान्ति देवता ऋषिभिः
सह १३०
नाश्नन्ति पिशुने देवा नाश्नन्त्यनृतवादिनः। भार्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे
नखलोमोपजातस्य न रक्तोन (त्त?) रवाससः। व्यङ्गुलातीतकर्णस्य भुञ्जते पितरो हविः
यावदुष्णं भवेदन्नं यावद्भुञ्जन्ति वाग्यताः। तावदश्नन्ति पितरो यावन्नोक्ता हविर्गुणाः
हविर्गुणा न वक्तव्याः पितरो यत्र तर्पिताः। पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः
यावतो ग्रसते पिण्डान्हव्यकव्येष्वमन्त्रवित्। तावतो ग्रसते प्रेत्य दीप्तान्स्थूलानयोमयान्
यावद्विप्रा न पूज्यन्ते अन्नदानहिरण्ययोः। तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति १३६
यद्विष्ठया काकबलाकयोर्वा अमेध्यलिप्तं च भवेच्छरीरम्।
श्रोत्रे मुखेन प्रविशेच्च सम्यक्स्नानेन लेपोपहतस्य शुद्धिः॥ १३७

---

१ क. 'मू। अस्तमिते यदि सू°। २ ख. ग. °ननीत°।

अभक्ष्याणामपेयानामलेह्यानां च भक्षणे । रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् १३८
पद्मोदुम्बरबिल्वानां कुशाश्वत्थपलाशयोः । एतेषामुदकं पीत्वा षड्रात्रेण विशुध्यति
ये प्रत्यवसिता विप्राः प्रव्रज्याग्निजलोद्वहाः । अनाशकनिवृत्तश्च[1] गृहस्थत्वं चिकीर्षति
स चरेत्त्रीणि कृच्छ्राणि त्रीणि चान्द्रायणानि च । जातकर्मविधिं कृत्वा पुनः संस्कारमर्हति १४१
तूलिका चोपधानानि[2] पुष्परक्ताम्बराणि च । शोषयित्वाऽर्कतापेन प्रोक्षणेन विशुध्यति
देशं कालं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम् । उपपत्तिमवस्थां च ज्ञात्वा कर्म समाचरेत्
रथ्याकर्दमतोयानि नाना पथि तृणानि च । मारुतार्केण शुध्यन्ति पक्वेष्टकचितानि च
आतुरे स्नानमु(उ)त्पन्ने दशकृत्वो ह्यनातुरः । स्नात्वा स्नात्वा स्पृशेद्वाऽपि ततः शुध्येत्स आतुरः १४५
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रिया तथा । कृच्छ्रमेकं चरेत्पूर्वा पादमेकं तथोत्तरा
उपवासैस्त्रिभिर्वाऽपि अहोरात्रेण चोत्तरा । एवं पातकनिर्दिष्टमङ्गिरा मुनिरब्रवीत् १४७
स्पृष्ट्वा रजस्वलाऽन्योन्यं वैश्या च शूद्रिणी तथा । कृच्छ्रेण शुध्यते पूर्वा शूद्रा दानेन शुध्यति १४८
रजस्वला तु संस्पृष्टा[3] चण्डालादि यदि स्पृशेत् । गोमूत्रयावकाहारा षड्रात्रेण विशुध्यति
नारी रजस्वला[स्पृष्टा] खरचाण्डालकुक्कुटैः । भुक्त्वा ह्येतान्प्रपश्येत मानस्तोकऋचं जपेत्
भुञ्जानेनैव विप्रेण स्पृष्टा चैव रजस्वला । प्राजापत्येन कृच्छ्रेण प्राणायामशतेन च १५१
दिवाकीर्तिमुदक्यां च पतितं सूतकं तथा । शवसंस्पर्शने चैव स्पृष्ट्वा स्नानेन शुध्यति १५२
दिवाऽऽहृतेन तोयेन तापितेनाग्निसंनिधौ । दिवा नार्केण संस्पृष्टा रात्रौ नक्षत्रमालिनी(?)
संध्ययोरुभयोश्चैव पवित्रं सर्वदा जलम् । खातं वापी तथा कूपः प्रपान्[4]नद्यास्तु वाक्पतिः
यष्टिघाते तथा चैव मृत्पिण्डे गोमयेन तु । उपलेपेन शुध्यन्ति अङ्गिरा मुनिरब्रवीत् १५५
गोदुग्धं गोमयं क्षीरं दधि तक्रं तथा घृतम् । गोपुच्छं पश्चिमे भागे एते सर्वे पवित्रकाः १५६
एवं ते कथितं सर्वं प्रमादाज्ञानवित्तमः(?) । यत्र यत्र मृता गावः प्रायश्चित्तं पृथक्पृथक् १५७
गवां च पतने कृच्छ्रं पाषाणे च द्वयं चरेत् । अर्धकृच्छ्रं तु वाप्यां स्यात्पादकृच्छ्रं तु कूपके
शस्त्रहा त्रीणि कृच्छ्राणि यष्टिघाती द्वयं चरेत् । मृत्पिण्डादतिकृच्छ्रं तु प्राजापत्यं च गोमये
एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत् । योजने पादहीनं स्याच्चरेत्सर्वं निपातने १६०
न स्त्रीषु वचनं कुर्यान्नैव गानमुपव्रजेत् । न[5] च रात्रौ भवेद्दोष्टे न कुर्याद्दैदिकां(कीं) क्रियाम्

---

१ क. ख. ग. °वृत्ताश्च । २ ग. °धान्यानि । ३ क. घ. °स्पृष्ट्वा च° । ४ ख. °पातद्या° । ५ ग. यष्ट्याघा° । ३ क. ख. नचारा° ।

लाङ्गूलच्छेदने पादौ तथा चैवानुधारणे ।पादहीने शिखावर्जं सशिखं च निपातने १६२
एवमेव तु नारीणां मुण्डमुण्डापनं स्मृतम् । एकीकृत्य कचान्सर्वांश्छेदयेदङ्गुलद्वयम् १६३
अनुच्छिष्टेन संस्पृष्टो येन चाऽऽचमनं व्रजेत् । तेनैवोच्छिष्टसंस्पृष्टे त्रिरात्रेण विशुध्यति
शवसूते समुत्पन्ने सूतकं तु भवेद्यदि । शवेन शुध्यते सूतिर्न सूत्या शुध्यते शवम् १६५
सूतके न तु जातेन उभाभ्यां सूतकं यदि । पातकेन तु लिप्येत सूतकेनैव गच्छति १६६
सर्वव्रतेषु निर्दिष्टं पश्चात्सूतकिनो भवेत् । चीर्णव्रते तु निर्दिष्टं पश्चाद्ब्राह्मणभोजनम् १६७
अधीते य इदं शास्त्रमुक्तमङ्गिरसा स्वयम् । ऋषीणां संनिधौ विप्रः सर्वपापैः प्रमुच्यते १६८

इति श्रीमदङ्गिरःप्रोक्तं धर्मशास्त्रं संपूर्णम् ॥

समाप्तेयमङ्गिरःस्मृतिः ॥

ॐ तत्सद्ब्रह्मणे नमः ।

महर्ष्यत्रिप्रणीता

अत्रिसंहिता ।

हुताग्निहोत्रमासीनमत्रिं[1] वेदविदां वरम् । सर्वशास्त्रविधिज्ञातमृषिभिश्च नमस्कृतम् १
नमस्कृत्य च ते सर्व इदं वचनमब्रुवन् । हितार्थं सर्वलोकानां भगवन्कथयस्व नः २

अत्रिरुवाच—

वेदशास्त्रार्थतत्त्वज्ञा यन्मे पृच्छथ संशयम् । तत्सर्वं संप्रवक्ष्यामि यथादृष्टं यथाश्रुतम् ३
सर्वतीर्थान्युपस्पृश्य सर्वान्देवान्प्रणम्य च । जप्त्वा तु सर्वसूक्तानि सर्वशास्त्रानुसारतः ४
सर्वपापहरं नित्यं सर्वसंशयनाशनम् । चतुर्णामपि वर्णानामत्रिः शास्त्रमकल्पयत् ५
ये च पापकृतो लोके ये चान्ये धर्मदूषकाः । सर्वैः पापैः प्रमुच्यन्ते श्रुत्वेदं शास्त्रमुत्तमम् ६
तस्मादिदं वेदविद्भिरध्येतव्यं प्रयत्नतः । शिष्येभ्यश्च प्रवक्तव्यं सद्वृत्तेभ्यश्च धर्मतः ७
अकुलीने ह्यसद्वृत्ते जडे शूद्रे शठे द्विजे । एतेष्वेव न दातव्यमिदं शास्त्रं द्विजोत्तमैः ८
एकमप्यक्षरं यस्तु गुरुः शिष्ये निवेदयेत् । पृथिव्यां नास्ति तद्द्रव्यं यद्दत्त्वा ह्यनृणी भवेत्
एकाक्षरप्रदातारं यो गुरुं नाभिमन्यते । शुनां योनिशतं गत्वा चाण्डालेष्वपि जायते १०
वेदं गृहीत्वा यः कश्चिच्छास्त्रं चैवावमन्यते । सँ सद्यः पशुतां याति संभवानेकविंशतिम्
स्वानि कर्माणि कुर्वाणा दूरे सन्तोऽपि मानवाः । प्रिया भवन्ति लोकस्य स्वे स्वे कर्मण्यवस्थिताः १२
कर्म विप्रस्य यजनं दानमध्ययनं तपः । प्रतिग्रहोऽध्यापनं च याजनं चेति वृत्तयः १३
क्षत्रियस्यापि यजनं दानमध्ययनं तपः । शस्त्रोपजीवनं भूतरक्षणं चेति वृत्तयः १४
दानमध्ययनं वार्ता यजनं चेति वै विशः । शूद्रस्य वार्ता शुश्रूषा द्विजानां कारुकर्म च १५
मयैष धर्मोऽभिहितः संस्थिता यत्र वर्णिनः । बहुमानमिह प्राप्य प्रयान्ति परमां गतिम्
ये व्यपेताः स्वधर्मेभ्यः परधर्मे व्यवस्थिताः । तेषां शास्तिकरो राजा स्वर्गलोके महीयते
आत्मीये संस्थितो धर्मे शूद्रोऽपि स्वर्गमश्नुते । परधर्मो भवेत्त्याज्यः सुरूपपरदारवत् १८
वध्यो राज्ञा स वै शूद्रो जपहोमपरश्च यः । ततो राष्ट्रस्य हन्ताऽसौ यथा वह्नेश्च वै जलम् १९
प्रतिग्रहोऽध्यापनं च तथाऽविक्रेयविक्रयः । याज्यं चतुर्भिरप्येतैः क्षत्रविट्पतनं स्मृतम्

---

१ ग. हुत्वाऽग्निं° । २ ग. °विधानज्ञं मुनिभिं° । ३ ग. °दज्ञाः शास्त्रतत्त्व° । ४ क. यन्मां पृ° । ५ ख. ग. दिव्यं । ६ ग. यत्नतः । ७ ग. स प्रेत्य प° । ८ ग. च याज्या च क्रयविक्रयम् । च° ।

सद्यः पतति मांसेन लाक्षया लवणेन च* । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्
अव्रताश्चानधीयाना यत्र भैक्षचरा द्विजाः । तं ग्रामं दण्डयेद्राजा चौरभक्तप्रदं बुधैः २२
विद्वद्भोज्यमविद्वांसो येषु राष्ट्रेषु भुञ्जते । तेऽप्यनावृष्टिमिच्छन्ति महद्वा जायते भयम् २३
ब्राह्मणान्वेदविदुषः सर्वशास्त्रविशारदान् । तत्र वर्षति पर्जन्यो यत्रैतान्पूजयेन्नृपः २४
त्रयो लोकास्त्रयो वेदा आश्रमाश्च त्रयोऽग्नयः । एतेषां रक्षणार्थाय संसृष्टा ब्राह्मणाः पुरा
उभे संध्ये समाधाय मौनं कुर्वन्ति ये द्विजाः । दिव्यवर्षसहस्राणि स्वर्गलोके महीयते+२५
य एवं कुरुते राजा गुणदोषपरीक्षणम् । यशः स्वर्गं नृपत्वं च पुनः कोशं समृद्धयेत्* २७

दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोशस्य च संप्रवृद्धिः ।
अपक्षपातोऽर्थिषु राष्ट्ररक्षा पञ्चैव यज्ञाः कथिता नृपाणाम् ॥ २८

यत्प्रजापालने पुण्यं प्राप्नुवन्तीह पार्थिवाः । न तु क्रतुसहस्रेण प्राप्नुवन्ति द्विजोत्तमाः२९
अलाभे देवखातानां ह्रदेषु च सरःसु च । उद्धृत्य चतुरः पिण्डान्पारके स्नानमाचरेत् ३०
वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविण्नखाः । श्लेष्मास्थिदूषिकाः स्वेदो द्वादशैते नृणां मलाः ३१
षण्णां षण्णां क्रमेणैव शुद्धिरुक्ता मनीषिभिः । मृद्वारिभिश्च पूर्वेषामुत्तरेषां च वारिणा
शौचं मङ्गलमायासअ(श्रा)नसूयाऽस्पृहा दमः । लक्षणानि च विप्रस्य तथा दानं दयाऽपि च
न गुणान्गुणिनो हन्ति स्तौति चान्यान्गुणानपि । न हसेच्चान्यदोषांश्च साऽनसूया प्रकीर्तिता ३४
अभक्ष्यपरिहारश्च संसर्गश्चाप्यनिन्दितैः । आचारेषु व्यवस्थानं शौचमित्याभिधीयते ३५
प्रशस्ताचरणं नित्यमप्रशस्तविवर्जनम् । एतद्धि मङ्गलं प्रोक्तमृषिभिर्धर्मदर्शिभिः ३६
शरीरं पीड्यते येन शुभेन त्वशुभेन वा । अत्यन्तं तन्न कुर्वीत अनायासः स उच्यते ३७
यथोत्पन्नेन कर्तव्यः संतोषः सर्ववस्तुषु । न स्पृहेत्परदारेषु साऽस्पृहा परिकीर्तिता ३८
बाह्यमाध्यात्मिकं वाऽपि दुःखमुत्पाद्यते परैः । न कुप्यति न वा हन्ति दम इत्याभिधीयते
अहन्यहनि दातव्यमदीनेनान्तरात्मना । स्तोकादपि प्रयत्नेन दानमित्याभिधीयते ४०
परस्मिन्बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा । आत्मवद्वर्तितव्यं हि दयैषा परिकीर्तिता४१
यश्चैतैर्लक्षणैर्युक्तो गृहस्थोऽपि भवेद्द्विजः । स गच्छति परं स्थानं जायते नेह वै पुनः४२

---

* इतःपरं ग. पुस्तक एतदर्धं विद्यते—" नील्या तिलैश्च तैलेन गोभिरश्वैश्च गोरसैः " । इति । +आर्षो वचनव्यत्ययः । *इतः परमेतदर्धं ग. पुस्तके–"य एवं कुरुते राजा तस्य कोटिफलं भवेत्" । इति ।

ग. °ह्मणो वेदविक्रयी । अ° । २ ख. °रभुक्तं प्रदण्डवत् । वि° । ३ ग. °भक्षप्रदो हि सः । वि° । ४ ग. °षां तु हितार्थो° । ५ ख. स आर्जये° । ६ ग. °भिर्ब्रह्मवादिभिः । ७ ग. °न सुशुभेनापि कर्मणा । अतियत्नं न कु° । ८ ग. स्तोकमपि । ९ ग. द्वेष्टरि वा त° ।

अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम्। आतिथ्यं वैश्वदेवश्च इष्टमित्यभिधीयते ४३
वापीकूपतडागादि देवतायतनानि च। अन्नप्रदानमारामः पूर्तमित्यभिधीयते ४४
इष्टं पूर्तं प्रकर्तव्यं ब्राह्मणेन प्रयत्नतः। इष्टेन लभते स्वर्गं पूर्तेन मोक्षमाप्नुयात् ४५
इष्टापूर्तौ द्विजातीनां सामान्यौ धर्मसाधनौ। अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ४६
यमान्सेवेत सततं न नित्यं नियमान्बुधः। यमान्पतत्यकुर्वाणो नियमान्केवलान्भजन्
आनृशंस्यं क्षमा सत्यमहिंसा दानमार्जवम्। प्रीतिः प्रसादो माधुर्यं मार्दवं च यमा दश ४८
शौचमिज्या तपो दानं स्वाध्यायोपस्थनिग्रहः। व्रतमौनोपवासाश्च स्नानं च नियमा दश
प्रतिकृतिं कुशमयीं तीर्थवारिषु मज्जयेत्। यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः ५०
मातरं पितरं वाऽपि भ्रातरं सुहृदं गुरुम्। यमुद्दिश्य निमज्जेत द्वादशांशफलं लभेत् ५१
अपुत्रेणैव कर्तव्यः पुत्रप्रतिनिधिः सदा। पिण्डोदकक्रियाहेतोर्यस्मात्तस्मात्प्रयत्नतः ५२
पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम्। ऋणमस्मिन्संनयति अमृतत्वं च गच्छति
जातमात्रेण पुत्रेण पितॄणामनृणी पिता। तदाहि शुद्धिमाप्नोति नरकात्त्रायते हि सः ५४
जायन्ते बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजते चाश्वमेधं च नीलं वा वृषमुत्सृजेत्
काङ्क्षन्ति पितरः सर्वे नरकान्तरभीरवः। गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति
फल्गुतीर्थे नरः स्नात्वा दृष्ट्वा देवं गदाधरम्। गयाशीर्षे पदाऽऽक्रम्य मुच्यते ब्रह्महत्यया
महानदीमुपस्पृश्य तर्पयेत्पितृदेवताः। अक्षयाल्लभते लोकान्कुलं चैव समुद्धरेत् ५८
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यविवर्जिते। आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु
अक्षारलवणं रौक्षं पिबेद्ब्राह्मीं सुवर्चलाम्। त्रिरात्रं शङ्खपुष्पीं वा ब्राह्मणः पयसा सह ६०
मद्यभाण्डे द्विजः कश्चिदज्ञानात्पिबते जलम्। प्रायश्चित्तं कथं तस्य मुच्यते केन कर्मणा
पलाशबिल्वपत्राणि कुशान्पद्मान्युदुम्बरम्। काथयित्वा पिबेदपस्त्रिरात्रेणैव शुध्यति
सायं प्रातस्तु यः संध्यां प्रमादाद्विक्रमेत्सकृत्। गायत्र्यास्तु सहस्रं हि जपेत्स्नात्वा समाहितः ६३
शोकाक्रान्तोऽथ वा श्रान्तः स्थितः स्थानजपाद्बहिः। ब्रह्मकूर्चं चरेद्भक्त्या दानं दत्त्वा विशुध्यति ६४
गवां शृङ्गोदके स्नात्वा महानद्युपसंगमे। समुद्रदर्शनेनैव व्यालदष्टः शुचिर्भवेत् ६५
वृकश्वानशृगालैस्तु यदि दष्टश्च ब्राह्मणः। हिरण्योदकसंमिश्रं घृतं प्राश्य विशुध्यति ६६

---

१ ख. ग. °तिनिधिं कुं। २ ख. ग. मज्जति। ३ ग. °त द्वादशांशं फलं भवेत्। मां°। ४ ग. °त ह्यष्टभागं लभेत सः। अं°। ५ ग. सः। यष्टव्या ब°। ६ क. भैक्षं। ग. रुक्षं। ७ क. ख. °र्चसम्। त्रि°। ८ क. °भाण्डाद्विज°। ९ ख ग. °तः। रोगाक्रा°।

ब्राह्मणी तु शुना दष्टा जम्बुकेन वृकेण वा । उदितं ग्रहनक्षत्रं दृष्ट्वा सद्यः शुचिर्भवेत् ६७
सव्रतश्च शुना दष्टस्त्रिरात्रमुपवासयेत् । सघृतं यावकं प्राश्य व्रतशेषं समापयेत् ६८
मोहात्प्रमादात्संलोभाद्व्रतभङ्गं तु कारयेत् । त्रिरात्रेणैव शुध्येत पुनरेव व्रती भवेत् ६९
ब्राह्मणान्नं यदुच्छिष्टमश्नात्यज्ञानतो द्विजः । दिनद्वयं तु गायत्र्या जपं कृत्वा विशुध्यति
क्षत्रियान्नं यदुच्छिष्टमश्नात्यज्ञानतो द्विजः । त्रिरात्रेण भवेच्छुद्धिर्यथा क्षत्रे तथा विशि ७१
अभोज्यान्नं तु भुक्तान्नं स्त्रीशूद्रोच्छिष्टमेव वा । जग्ध्वा मांसमभक्ष्यं तु सप्तरात्रं यवान्पिबेत्
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते । तदुच्छिष्टं तु संप्राश्य षण्मासान्कृच्छ्रमाचरेत्
असंस्पृष्टेन संस्पृष्टः स्नानं तेन विधीयते । तस्य चोच्छिष्टमश्नीयात्षण्मासान्कृच्छ्रमाचरेत्
अज्ञानात्प्राश्य विण्मूत्रं सुरासंस्पृष्टमेव च । पुनः संस्कारमर्हन्ति त्रयो वर्णा द्विजातयः ७५
वपनं मेखलादण्डं भैक्षचर्यव्रतानि च । निवर्तन्ते द्विजातीनां पुनः संस्कारकर्मणि ७६
गृहशुद्धिं प्रवक्ष्यामि अन्त्यश्वशवदूषिता(त)म् । प्रोयोज्यं मृन्मयं भाण्डं सिद्धमन्नं तथैव च
गृहान्निष्क्रम्य तत्सर्वं गोमयेनोपलेपयेत् । गोमयेनोपलिप्याथ च्छागेनाऽऽघ्रापयेत्पुनः
ब्राह्मैर्मन्त्रैस्तु पूतं तु हिरण्यकुशवारिभिः । तेनैवाभ्युक्ष्य तद्वेश्म शुध्यते नात्र संशयः ७९
राज्ञाऽन्यैः श्वपचैर्वाऽपि बलाद्विचालितो द्विजः । पुनः कुर्वीत संस्कारं पश्चात्कृच्छ्रत्रयं
चरेत् ८०
शुना चैव तु संस्पृष्टस्तस्य स्नानं विधीयते । तदुच्छिष्टं तु संप्राश्य यत्नेन कृच्छ्रमाचरेत्
अतः परं प्रवक्ष्यामि सूतकस्य विनिर्णयम् । प्रायश्चित्तं पुनश्चैव कथयिष्याम्यतः परम् ८२
एकाहाच्छुध्यते विप्रो योऽग्निवेदसमन्वितः । त्र्यहात्केवलवेदस्तु निर्गुणो दशभिर्दिनैः
*व्रतिनः शास्त्रपूतस्य आहिताग्नेस्तथैव च । राज्ञस्तु सूतकं नास्ति यस्य चेच्छति
ब्राह्मणः ८४
ब्राह्मणो दशरात्रेण द्वादशाहेन भूमिपः । वैश्यः पञ्चदशाहेन शूद्रो मासेन शुध्यति ८५
सपिण्डानां तु सर्वेषां गोत्रजैः साप्तपौरुषैः । पिण्डांश्चोदकदानं च शावाशौचं तथाऽनुगम्
चतुर्थे दशरात्रं स्यात्षडहः पञ्चमे तथा । षष्ठे चैव त्रिरात्रं स्यात्सप्तमे त्र्यहमेव वा ८७
+अष्टमे दिनमेकं तु नवमे प्रहरद्वयम् । दशमे स्नानमात्रेण सूतके तु शुचिर्भवेत् ८८

---

* एतदर्धस्थानेऽयं पाठो ग. पुस्तके—" संयती शास्त्रपूतस्तु आहिताग्निस्तथैव च । " इति । + एतद्वचनं न विद्यते ख. ग. पुस्तकयोः ।

---

१ ग. °भङ्गो यदा भवेत् । त्रि° । २ ख. ग. °णानां य° । ३ क. °न्नं यथा भुक्त्वा स्त्री° । ४ क. ख. °अन्तस्थश्च° । ५ ख. प्रयोज्यं । ग. अभोज्यं । ६ ग. राजान्नैः श्व° । ७ ग. °त्रतः सप्तपूरुषम् । सपिण्डानां शोदकानां शा° । ८ ग. °मेन तु । षष्ठेन तु त्रिरात्रं स्यात्सप्तमे त्वहरेव च । ९ ग. °मे त्वहरेव च। सुतेषु दासदासी ।

मृतसूतके दासीनां पत्नीनां चानुलोमिनाम् । स्वामितुल्यं भवेच्छौचं मृते स्वामिनि यौनिकम्[1] ८९

शवस्पृष्टस्तृतीयस्तु सचैलं स्नानमाचरेत्[2]। चतुर्थे सप्तमे भैक्ष्यं स्यादाशौचे विधिः स्मृतः[3] ९०

एकत्र संस्कृतानां तु मातृणामेकभोजिनाम् । स्वामितुल्यं भवेच्छौचं विभक्तानां पृथक्पृथक्[4] ९१

उष्ट्रीक्षीरमवीक्षीरं यच्चान्नं मृतसूतके । पाचकान्नं नवश्राद्धं भुक्त्वा चान्द्रायणं चरेत्[5] ९२

सूतकान्नमधर्माय यस्तु प्राश्नाति मानवः । त्रिरात्रमुपवासः स्यादेकरात्रं जले वसेत्[6] ९३

महायज्ञविधानं तु न कुर्यान्मृतजन्मनि। होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ९४

बालस्त्वन्तर्दशाहे तु पञ्चत्वं यदि गच्छति । सद्य एव विशुद्धिः स्यान्न प्रेतं नैव सूतकम्[7] ९५

कृतचूडस्तु कुर्वीत उदकं पिण्डमेव च। स्वधाकारं प्रकुर्वीत नामोच्चारणमेव च ९६

ब्रह्मचारी यतिश्चैवं मन्त्रे पूर्वकृते तथा। यज्ञे विवाहकाले च सद्यःशौचं विधीयते ९७

विवाहोत्सवयज्ञेषु अन्तरा मृतसूतके। पूर्वसंकल्पितार्थस्य न दोषश्चात्रिरब्रवीत् ९८

मृतसंजननादूर्ध्वं[8] सूतकादौ विधीयते। स्पर्शनाचमनाच्छुद्धिः सूतिकां चेन्न संस्पृशेत्[9] ९९

पञ्चमेऽहनि विज्ञेयः संस्पर्शः क्षत्रियस्य तु। सप्तमेऽहनि वैश्यस्य विज्ञेयं स्पर्शनं बुधैः[10] १००

दशमेऽहनि शूद्रस्य कर्तव्यं स्पर्शनं बुधैः। मासेनैवाऽऽत्मशुद्धिः स्यात्सूतके मृतके तथा

व्याधितस्य कदर्यस्य ऋणग्रस्तस्य सर्वदा। क्रियाहीनस्य मूर्खस्य स्त्रीजितस्य विशेषतः

व्यसनासक्तचित्तस्य पराधीनस्य नित्यशः[11]। स्वाध्यायव्रतहीनस्य सततं सूतकं भवेत्

द्वे कृच्छ्रे परिवित्तेस्तु कन्यायाः कृच्छ्रमेव च । कृच्छ्रातिकृच्छ्रं[12] मातुः स्याद्वेत्तुः सांतपनं स्मृतम्[13] १०४

कुब्जवामनषण्ढेषु[14] गर्हितेऽथ जडेषु च। जात्यन्धबधिरे मूके न दोषः परिवेदने १०५

क्लीबे देशान्तरस्थे च पतिते व्राजितेऽपि वा । योगशास्त्राभियुक्ते च न दोषः परिवेदने

पिता पितामहो यस्य अग्रजो वाऽपि कस्यचित्[15] । नाग्निहोत्राधिकारोऽस्ति न दोषः परिवेदने १०७

भार्यामरणपक्षे वा देशान्तरगतेऽपि वा। अधिकारी भवेत्पुत्रस्तथा पातकसंयुते १०८

ज्येष्ठो भ्राता यदा नष्टो नित्यं रोगसमन्वितः । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा

---

१ ग. यौगिक°। २ ग. शवं स्पृष्ट्वा तृतीये तु स°। ३ क. °सभैक्ष्यं स्यादेष शाववि°। ४ ग. संभृता°। ५ ग. जलं पिबेत्। म°। ६ ग. °री गृहस्थानां सत्रे पर्व°। ७ ग. मृतात्संचयना°। ८ ख. °ननोर्ध्वं। ९ ग. सतकान्ते च सं°। १० ख. ग. °शः। श्राद्धत्यागविहीनस्य भस्मान्तं सू°। ११ ग. °कृच्छ्रे दातः स्या[द्वो]ढुः सां°। १२ ग. कुष्टिवा°। १३ क. °नखञ्जेषु। १४ ख. °त्। अग्नि°। ग. °त्। अग्निहोत्राधिकारोऽस्य न। १५ ग. °त्पुत्रो महापातकिनि द्विजे। ज्ये°।

नाग्नयः परिविन्दन्ति न वेदा न तपांसि च। न च श्राद्धं कनिष्ठो वै विना चैवाभ्यनुज्ञया तस्माद्धर्मं सदा कुर्याच्छ्रुतिस्मृत्युदितं च यत् । नित्यं नैमित्तं काम्यं यच्च स्वर्गस्य साधनम् १११

एकैकं वर्धयेन्नित्यं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः ११२

एकैकं ग्रासमश्नीयात्त्र्यहाणि त्रीणि पूर्ववत् । त्र्यहं परं च नाश्नीयादतिकृच्छ्रं तदुच्यते इत्येतत्कथितं पूर्वैर्महापातकनाशनम्। वेदाभ्यासरतं क्षान्तं महायज्ञक्रियापरम् ११४

न स्पृशन्तीह पापानि महापातकजान्यपि। वायुभक्षो दिवा तिष्ठेद्रात्रौ चैवाप्सु सूर्यदृक् जप्त्वा सहस्रं गायत्र्याः शुद्धिर्ब्रह्मवधादृते । पद्मोदुम्बरबिल्वैश्च कुशाश्वत्थपलाशयोः एतेषामुदकं पीत्वा पर्णकृच्छ्रं तदुच्यते। पञ्चगव्यं च गोक्षीरं दधिमूत्रशकृद्घृतम् ११७

जग्ध्वा परेऽह्न्युपवसेदेष सांतपनो विधिः । पृथक्सांतपनैर्द्रव्यैः षडहः सोपवासकः सप्ताहेन तु कृच्छ्रोऽयं महासांतपनं स्मृतम्। त्र्यहं सायं त्र्यहं प्रातस्त्र्यहं भुक्ते त्वयाचितम् त्र्यहं परं च नाश्नीयात्प्राजापत्यो विधिः स्मृतः । सायं तु द्वादश ग्रासाः प्रातः पञ्चदश स्मृताः १२०

अयाचिते चतुर्विंशः परेऽह्न्यनशनं स्मृतम्।कुक्कुटाण्डप्रमाणं स्याद्यावद्वाऽस्य मुखं विशेत् एतद्ग्रासं विजानीयाच्छुद्ध्यर्थं कायशोधनम् । त्र्यहमुष्णं पिबेदा(च्चा)परुत्र्यहमुष्णं पिबेत्पयः १२२

त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्रयम् । पट्पलानि पिबेदा(च्चा)पस्त्रिपलं तु पयः पिबेत् १२३

पलमेकं तु वै सर्पिस्तप्तकृच्छ्रं विधीयते। दध्ना च त्रिदिनं भुञ्जे त्र्यहं भुञ्जे च सर्पिषा १२४

क्षीरेण तु त्र्यहं भुञ्जे वायुभक्षो दिनत्रयम्। त्रिपलं दधिक्षीरेण पलमेकं तु सर्पिषा १२५

एतदेव व्रतं पुण्यं वैदिकं कृच्छ्रमुच्यते । एकभक्तेन नक्तेन तथैवायाचितेन च १५६

उपवासेन चैकेन पादकृच्छ्रः प्रकीर्तितः । कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् द्वादशाहोपवासेन पराकः परिकीर्तितः। पिण्याकदधिसक्तूनां ग्रासश्च प्रतिवासरम् १२८

एकैकमुपवासः स्यात्सौम्यकृच्छ्रः प्रकीर्तितः । एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् १२९

तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः। कपिलायास्तु दुग्धाया धारोष्णं यः पयः पिबेत् एष व्यासकृतः कृच्छ्रः श्वपाकमपि शोधयेत्। निशायां भोजनं चैव तज्ज्ञेयं नक्तमेव तु अनादिष्टेषु पापेषु चान्द्रायणमथोदितम् । अग्निष्टोमादिभिर्यज्ञैरिष्ट्वा द्विगुणदक्षिणैः १३२

---

१ ग °द्धं तु नष्टस्य वृषला च न कन्यका । तं°। २ ख. 'त्रि नीत्वाऽप्सु। ३ ग. °द्वा प्रविशेन्मुखम्। ए°। ४ ख. °कश्चामतक्राम्बुसक्तूनां प्र'। ५ ग. कृच्छ्रो महापातकशोधनः । नि°।६ ग. °मपोहनम्। अ°। ७ ग. °ष्टैर्विपुलद°।

यत्फलं समवाप्नोति तथा कृच्छ्रैस्तपोधनः । वेदाभ्यासरतं शान्तं महायज्ञक्रियारतम्
न स्पृशन्तीह पापानि महापातकजान्यपि । वेदाभ्यासरतः क्षान्तो धर्मशास्त्राण्यवेक्षयेत्
शौचाचारसमायुक्तो गृहस्थोऽपि हि मुच्यते । उक्तमेद्विजातीनां महर्षे श्रूयतामिति १३५
अतः परं प्रवक्ष्यामि स्त्रीशूद्रपतनानि च । जपस्तपस्तीर्थयात्रा प्रव्रज्या मन्त्रसाधनम् १३६
देवताराधनं चैव स्त्रीशूद्रपतनानि षट् । जीवद्भर्तरि या नारी उपोष्य व्रतचारिणी १३७
आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत्+ । तीर्थस्नानार्थिनी नारी पतिपादोदकं पिबेत्
शंकरस्यापि विष्णोर्वा प्रयाति परमं पदम् । जीवद्भर्तरि वामाङ्गी मृते वाऽपि सुदक्षिणे
श्राद्धे यज्ञे विवाहे च पत्नी दक्षिणतः सदा । सोमः शौचं ददौ तासां गन्धर्वाश्च तथाऽङ्गिराः १४०
पावकः सर्वमेध्यं च मेध्यं वै योषितां सदा । जन्मना ब्राह्मणो ज्ञेयः संस्कारैर्द्विज उच्यते
विद्यया याति विप्रत्वं श्रोत्रियस्त्रिभिरेव च । वेदशास्त्राण्यधीते यः शास्त्रार्थं च निषेवते
तदाऽसौ वेदवित्प्रोक्तो वचनं तस्य पावनम् । एकोऽपि वेदविद्धर्मं यं व्यवस्येद्द्विजोत्तमः
स ज्ञेयः परमो धर्मो नाज्ञानामयुतायुतैः । पावका इव दीप्यन्ते जपहोमैर्द्विजोत्तमाः १४४
प्रतिग्रहेण नश्यन्ति वारिणा इव पावकाः । तान्प्रतिग्रहजान्दोषान्प्राणायामैर्द्विजोत्तमाः
उत्सादयन्ति विद्वांसो वायुर्मेघानिवाम्बरे । भुक्तमात्रो यदा विप्र आर्द्रपाणिस्तु तिष्ठति
लक्ष्मीर्बलं यशस्तेज आयुश्चैव प्रलीयते । यस्तु भोजनशालायामासनस्थ उपस्पृशेत् १४७
तच्चान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् । पात्रोपरि स्थितं पात्रं यः संस्थाप्य उपस्पृशेत् १४८
तस्यान्नं नैव भोक्तव्यं भुक्त्वा चान्द्रायणं चरेत् । न देवास्तृप्तिमायान्ति दातुर्भवति निष्फलम् १४९
हस्तं प्रक्षाल्य यच्चापः पिबेद्भुक्त्वा द्विजोत्तमः । तदन्नमसुरैर्भुक्तं निराशाः पितरो गताः
नास्ति वेदात्परं शास्त्रं नास्ति मातुः परो गुरुः । नास्ति दानात्परं मित्रमिह लोके परत्र च
अपात्रे ह्यपि यद्दत्तं दहत्यासप्तमं कुलम् । हव्यं देवा न गृह्णन्ति कव्यं च पितरस्तथा १५२
आयसेन तु पात्रेण यदन्नमुपदीयते । अन्नं विष्ठासमं भोक्तुर्दाता च नरकं व्रजेत् १५३
इतरेण च पात्रेण दीयमानं विचक्षणः । न दद्याद्वामहस्तेन आयसेन कदाचन १५४

---

* इतः परं ग. पुस्तकेऽधिकं वचनम्—पतिं विनाऽन्यत्कुरुते व्रतानि देवसेवनम् । न सा तत्फलमाप्नोति स्वपतिस्तु तया हतः । अतः परं श्लोकत्रयं न विद्यते ग. पुस्तके ।

---

१ ग. °त्रार्थदर्शकः । शौ° । २ख. शौचमृद्वार्यभिरतो गृ° ; ३ ग. °त्राप्राव्रज्यं लिङ्गधारणम् । ४ ख. विबोधयेत् । ५ ग. °भे यदि ब्रूयाद्द्विजो° । ६ क. भुक्त्वाऽऽचम्य य° । ७ क. तस्यान्नं । ८ ग. तत्रान्नं । ९ ग. °न्ति दत्तं भव° । १० ग. मातृसमो गु° । ११ ख. °ते । श्वानविष्ठासमं भुङ्क्ते दाता ।

मृन्मयेषु च पात्रेषु यः श्राद्धे भोजयेत्पितॄन्[1]। अन्नदाता च भोक्ता च तावेव(?)नरकं व्रजेत्
अभावे मृन्मये दद्यादनुज्ञातस्तु तैर्द्विजैः। तेषां वचः प्रमाणं स्यो[2]दृतं चानृतमेव च १५६
सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च। भिक्षादातुर्न धर्मोऽस्ति भिक्षुर्भुङ्क्ते तु किल्बिषम्
न च कांस्येषु भुञ्जीयादापद्यपि कदाचन। +पलाशे यतयोऽश्नन्ति गृहस्थः कांस्य-
भाजने १५८
कांस्यकस्य च यत्पापं गृहस्थस्य तथैव च। कांस्यभोजी यतिश्चैव प्राप्नुयात्किल्बिषं तयोः
अत्राप्युदाहर[3]न्ति—
सौवर्णायसताम्रेषु कांस्यरौप्यमयेषु च। भुञ्जन्भिक्षुर्न दुष्येत दुष्येच्चैव परिग्रहात् १६०
यतिहस्ते जलं दद्याद्भिक्षां दद्यात्पुनर्जलम्। तद्भैक्षं मेरुणा तुल्यं तज्जलं सागरोपमम्
चरेन्माधुकरीं वृत्तिमपि म्लेच्छकुलादपि। एकान्नं नैव भोक्तव्यं बृहस्पतिसमो यदि
अनापदि चरेद्यस्तु सिद्धं भैक्षं गृहे वसन्। दशरात्रं पिबेद्[4]ब्रह्मपस्तु त्र्यहमेव च १६३
गोमूत्रेण तु संमिश्रं यावकं घृतपाचितम्। एतद्ब्रह्मपमिति प्रोक्तं भगवानत्रिरब्रवीत् १६४
ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः। अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः
षण्मा[5]सान्कामयेन्मर्त्यो गर्भिणीमेव च स्त्रियम्। आ दन्तजननादूर्ध्वमेषं[6] धर्मो विधीयते
ब्रह्महा प्रथमश्चैव द्वितीयो गुरुतल्पगः। तृतीयश्च सुरापोऽयं चतुर्थः स्तेन एव च १६७
*आपो गावस्तिला भूमिर्गन्धो वा स्तेयते तथा(?)।पापानां चैव संसर्गः पञ्चमं पातकं महत्
एषामेव विशुध्यर्थं चरेत्कृच्छ्राण्यनुक्रमात्। त्री[10]णि कृ[11]च्छ्राण्यकामश्चेद्ब्रह्म[12]हत्यां व्यपोहति
अर्धं तु ब्रह्महत्यायाः क्षत्रियेषु विधीयते। षड्भागो द्वादशश्चैव विट्शूद्रयोस्तथा भवेत्
त्रीन्मासा[13]न्नक्तमश्नीयाद्भूमौ शयनमेव च। स्त्रीघातः शुध्यतेऽप्येवं चरेत्कृच्छ्राब्दमेव च
रजकः शैलुषश्चैव वेणुकर्मोपजीवनः। एतेषां यस्तु भुङ्क्ते वै द्विजश्चान्द्रायणं चरेत् १७२
सर्वान्त्यजानां गमने भोजने संप्रवेशने। पराकेण विशुद्धिः स्याद्भगवानत्रिरब्रवीत् १७३
चाण्डालभाण्डे यत्तोयं पीत्वा चैव द्विजोत्तमः। गोमूत्रयावकाहारः सं[14]वत्त्रिंशदहान्यपि

+ एतदर्धस्थानेऽयं पाठः ख. पुस्तके—" मलाशाः सर्व एवैते यतयः कांस्यभोजनाः। " इति।
* नास्त्येतदर्धं क. पुस्तके। आधिकं चैतत्।

---

१ ग. °येद्द्विजान्। अ°। २ ख. स्याद्यदन्नं चातिरिक्त[क]म्। सौ°। ग. स्यादमृतं च कृतं भवेत्। सौ°। ३ ग. °रन्तीममितिहासं पुरातनम्। सौ°। ४ क. °तिकुलादपि। अ°। ५ ग. °वेद्दुग्धम°। ६ ग. °ण्मासं काम°। ७ ख. °मेवं धर्मो न हीय°। ८ क. °थमं चैव द्वितीयं गुरुतल्पगः। तृतीयं तु सुरापोऽयं चतुर्थं स्तेयमुच्यते। पापानां। ९ क. °रेद्वर्षाण्य°। १० ख. ग. °णि वर्षाण्य°। ११ ख. ग. °हत्या पृथक्पृथक्। अ°। १२ ग. °गोर्ध्वं तु वैश्यस्य किंचिच्छूद्रे तथा। १३ ग. °सान्कृच्छ्रम°। १४ ख. °षट्त्रिंशहा°। ग. °षट्त्रीण्यहानि च। सं°।

संस्पृष्टं यस्तु पक्वान्नमन्त्यजैर्वाऽप्युदक्यया । अज्ञानाद्ब्राह्मणोऽश्नीयात्प्राजापत्यार्धमाचरेत् १७५

चाण्डालान्नं यदा भुङ्क्ते चातुर्वर्ण्यस्य निष्कृतिः । चान्द्रायणं चरेद्विप्रः क्षत्रः सांतपनं चरेत् षड्रात्रमाचरेद्वैश्यः पञ्चगव्यं तथैव च । त्रिरात्रमाचरेच्छूद्रो दानं दत्त्वा विशुध्यति १७७

ब्राह्मणो वृक्षमारूढश्चाण्डालो मूलसंस्पृशः । फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् ब्राह्मणान्समनुज्ञाप्य सवासाः स्नानमाचरेत् । नक्तभोजी भवेद्विप्रो घृतं प्राश्य विशुध्यति

एकवृक्षसमारूढश्चाण्डालो ब्राह्मणस्तथा । फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् ब्राह्मणान्समनुज्ञाप्य सवासाः स्नानमाचरेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति

एकशाखासमारूढश्चाण्डालो ब्राह्मणो यदा।फलान्यत्ति स्थितस्तत्र प्रायश्चित्तं कथं भवेत् त्रिरात्रोपोषितो भूत्वा पञ्चगव्येन शुध्यति* । स्त्रिया म्लेच्छस्य संपर्काच्छुद्धिः सांतपने तथा १८३

तप्तकृच्छ्रं पुनः कृत्वा शुद्धिरेषाऽभिधीयते । संवर्तेत यथा भार्यां गत्वा म्लेच्छस्य संगताम् सचैलं स्नानमादाय घृतस्य प्राशनेन च । स्नात्वा नद्युदकैश्चैव घृतं प्राश्य विशुध्यति १८५

संगृहीतामपत्यार्थमन्यैरपि तथा पुनः । चाण्डालम्लेच्छश्वपचकपालव्रतधारिणः १८६

अकामतः स्त्रियो गत्वा पराकेण विशुध्यति । कामतस्तु प्रसूतो वा तत्समो नात्र संशयः स एव पुरुषस्तत्र गर्भो भूत्वा प्रजायते । तैलाभ्यक्तो घृताभ्यक्तो विण्मूत्रं कुरुते द्विजः तैलाभ्यक्तो घृताभ्यक्तश्चाण्डालं स्पृशते द्विजः । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति १८९

केशकीटनखस्नायु अस्थिकण्टकमेव च । स्पृष्ट्वा नद्युदके स्नात्वा घृतं प्राश्य विशुध्यति मत्स्यास्थिजम्बुकास्थीनि नखशुक्तिकपर्दिकाः । स्पृष्ट्वा स्नात्वा हेमतप्तघृतं पीत्वा विशुध्यति १९१

गोकुले कन्दुशालायां तैलचक्रेक्षुचक्रयोः । अमीमांस्यानि शौचानि स्त्रीणां च व्याधि-तस्य च १९२

न स्त्री दुष्यति जारेण ब्राह्मणोऽवेदकर्मणा । नाऽऽपो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः । भुञ्जते मानवाः पश्चान्न ता दुष्यन्ति कर्हिचित् १९४

असवर्णैस्तु यो गर्भः स्त्रीणां योनौ निषिच्यते । अशुद्धा सा भवेन्नारी यावद्गर्भं न मुञ्चति

---

* इत उत्तरं पराकेण विशुध्यतीत्यन्तं न विद्यत ग. पुस्तके ।

---

१ ग. यत्तु प° । २ ग. °लतः स्पृशेत् । फलं च भक्षयद्विप्रः प्रा° । ३ ग. °काः । हेमतप्तं घृतं प्राश्य तत्क्षणादेव शु° । ४ ग. °वच्छल्यं तु तिष्ठति । विनिःसृते ततः शल्ये रजसो वाऽपि दर्शने । त° ।

विमुक्ते तु ततः शल्ये रजश्चापि प्रदृश्यते । तदा सा शुध्यते नारी विमलं काञ्चनं यथा १९६
स्वयं विप्रतिपन्ना या यदि वा विप्रतारिता । बलान्नारी प्रभुक्ता वा चौरभुक्ता तथाऽपि वा
न त्याज्या दूषिता नारी न कामोऽस्या विधीयते । ऋतुकाल उपासीत पुष्पकालेन
शुध्यति १९८
रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः १९९
एषां गत्वा स्त्रियो मोहाद्भुक्त्वा च प्रतिगृह्य च । कृच्छ्राब्दमाचेरज्ज्ञानादज्ञानादैन्दव-
द्वयम् २००
सकृद्भुक्त्वा(क्ता)तु या नारी म्लेच्छैर्या पापकर्मभिः । प्राजापत्येन शुध्येत ऋतुप्रस्रवणेन तु
बलाद्धृता स्वयं वाऽपि परप्रेरितया यदि । सकृद्भुक्ता तु या नारी प्राजापत्येन शुध्यति
प्रारब्धदीर्घतपसां नारीणां यद्रजो भवेत् । न तेन तद्व्रतं तासां विनश्यति कदाचन
मद्यसंस्पृष्टकुम्भेषु यत्तोयं पिबति द्विजः । कृच्छ्रपादेन शुध्येत पुनः संस्कारमर्हति २०४
अन्त्यजस्य तु ये वृक्षा बहुपुष्पफलोपगाः । उपभोग्यास्तु ते सर्वे पुष्पेषु च फलेषु च २०५
चाण्डालेन तु संस्पृष्टं यत्तोयं पिबति द्विजः । कृच्छ्रपादेन शुध्येत आपस्तम्बोऽब्रवीन्मुनिः
श्लेष्मोपानहविण्मूत्रस्त्रीरजो मद्यमेव च । एभिः संदूषिते कूपे तोयं पीत्वा कथं विधिः २०७
एकं द्व्यहं त्र्यहं चैव द्विजातीनां विशोधनम् । प्रायश्चित्तं पुनश्चैव नक्तं शूद्रस्य दापयेत्
सद्यो वान्ते सचैलं तु विप्रस्तु स्नानमाचरेत् । पर्युषिते त्वहोरात्रमतिरिक्ते दिनत्रयम् २०९
शिरः कण्ठोरुपादांश्च सुरया यस्तु लिप्यते । दशषट्त्रितयैकाहं चरेदेवमनुक्रमात् २१०

अत्राप्युदाहरन्ति—

प्रमादान्मद्यपः सुरां सकृत्पीत्वा द्विजोत्तमः । गोमूत्रयावकाहारो दशरात्रेण शुध्यति २११
मद्यपस्य निषादस्य यस्तु भुङ्क्ते द्विजोत्तमः । न देवा भुञ्जते तत्र न पिबन्ति हविर्जलम् २१२
चितिभ्रष्टा तु या नारी ऋतुभ्रष्टा च व्याधिता । प्राजापत्येन शुध्येत ब्राह्मणानां तु भोज-
नात् २१३
ये च प्रव्रजिता विप्राः प्रव्रज्याग्निजलावहाः । अनाशकाग्निवर्तन्ते चिकीर्षन्ति गृहस्थि-
तिम् २१४
धारयेत्त्रीणि कृच्छ्राणि चान्द्रायणमथापि वा । जातकर्मादिकं प्रोक्तं पुनः संस्कारमर्हति
नाशौचं नोदकं नाश्रु नापवादानुकम्पने । ब्रह्मदण्डहतानां तु न कार्यं कटधारणम् २१६

---

१ ग. °त्तं प्रकुर्वीत न° । २ ग. °द्यो ज्ञाते स° । ३ ग. °पादेषु सुरया यत्र लि° । ४ ग. दशाह षट् त्र्यहैका° । ५ ग. °विर्हुतम् । चित्तभ्र° । ६ ग. °री अपुण्येन च । ७ क. °णान्भोजयेद्दश । ये । ८ ग. नास्ति नोपवासादिकं तपः । त्र° । ९ क. °श्रु नोप° ।

स्नेहं कृत्वा भयादिभ्यो यस्त्वेतानि समाचरेत्। गोमूत्रयावकाहारः कृच्छ्रमेकं विशोधनम् २१७

वृद्धः शौचस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः २१८

तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसंचयम्। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमाचरेत्
यस्यैकाऽपि गृहे नास्ति धेनुर्वत्सानुचारिणी। मङ्गलानि कुतस्तस्य कुतस्तस्य तपःक्षयः
अतिदोहातिवाहाभ्यां नासिकाभेदनेन वा। नदीपर्वतसंरोधे मृते पादोनमाचरेत् २२१
अष्टागवं धर्महलं षड्गवं व्यावहारिकम्। चतुर्गवं नृशंसानां द्विगवं वध्यते सह २२२
द्विगवं वाहयेत्पादं मध्याह्ने तु चतुर्गवम्। षड्गवं तु त्रिपादोक्तं पूर्णाहस्त्वष्टभिः स्मृतः
काष्ठलोष्टशिलागोघ्नः कृच्छ्रं सांतपनं चरेत्। प्राजापत्यं चरेन्मृत्सा(?)अतिकृच्छ्रं तु आयसैः
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम्। अनडुत्सहितां गां च दद्याद्विप्राय दक्षिणाम्
शरभोष्ट्रहयान्नागान्सिंहशार्दूलगर्दभान्। हत्वा च शूद्रहत्यायाः प्रायश्चित्तं विधीयते
मार्जारगोधानकुलमण्डूकांश्च पतत्रिणः। हत्वा त्र्यहं पिबेत्क्षीरं कृच्छ्रं वा पादिकं चरेत्
चाण्डालस्य च संस्पृष्टं विण्मूत्रस्पृष्टमेव वा। त्रिरात्रेण विशुद्धिः स्याद्भुक्त्वोच्छिष्टं समाचरेत् २२८

वापीकूपतडागानां दूषितानां च शोधनम्। उद्धरेद्घटशतं पूर्णं पञ्चगव्येन शुध्यति* २२९
अस्थिचर्मावसिक्तेषु खरश्वानादिदूषिते। उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् २३०

गोदोहने चर्मपुटे च तोयं यन्नाकरे कारुकशिल्पिहस्ते।
स्त्रीबालवृद्धाचरितानि यान्यप्रत्यक्षदृष्टानि शुचीनि तानि+ ॥ २३१
प्राकाररोधे विषमप्रदेशे सेनानिवेशे भवनस्य दाहे।
आरब्धयज्ञेषु महोत्सवेषु तथैव दोषा न विकल्पनीयाः ॥ २३२
प्रपास्वरण्ये घटकस्य कूपे द्रोण्यां जलं कोशविनिर्गतं च।
श्वपाकचण्डालपरिग्रहे तु पीत्वा जलं पञ्चगव्येन शुद्धिः ॥ २३३

---

* इतः परं ग. पुस्तक एतद्वचनं विद्यते—"चाण्डालश्वपचोत्सर्गविण्मूत्रोच्छिष्ट एव वा। त्रिरात्रेण विशुद्धिः स्याद्भुक्तोच्छिष्टं षडाचरेत्।" इति। + इत आरभ्य अहोरात्रं समाचरेदित्यन्तं न विद्यते ग. पुस्तके।

---

१ क. ख. °वं गववध्यकृत्। द्वि°। २ ख. °रेन्मुत्सा। ग. °रेन्मुष्टिरिति कृच्छ्रं तु···। प्रा°। ३ ग. त्र्यहमुपोष्यैव कृच्छ्रं सांतपनं चरेत्। वापी°। ४ ख. °च्छ्रं व्यापा°। ५ क. °ष्टं तथाऽऽच°। ६ ख. °रेत्षट्शतं। ७ क. घटकस्य।

रेतोविण्मूत्रसंस्पृष्टं कौपं यदि जलं पिबेत् । त्रिरात्रेणैव शुद्धिः स्यात्कुम्भे सांतपनं तथा क्लिन्नभिन्नशवं यत्स्यादज्ञानादुदकं पिबेत्। प्रायश्चित्तं चरेत्पीत्वा तप्तकृच्छ्रं द्विजोत्तमः उष्ट्रीक्षीरं खरीक्षीरं मानुषीक्षीरमेव च। प्रायश्चित्तं चरेत्पीत्वा तप्तकृच्छ्रं द्विजोत्तमः२३६ वर्णबाह्येन संस्पृष्ट उच्छिष्टस्तु द्विजोत्तमः।पञ्चरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति२३७ मुंचि गोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् । चर्मभाण्डैस्तु धाराभिस्तथा यन्त्रोद्धृतं जलम् चण्डालेन तु संस्पृष्टः(ष्टे) स्नानमेव विधीयते । उच्छिष्टस्तु च संस्पृष्टस्त्रिरात्रेणैव शुध्यति आकराहृतवस्तूनि नाशुचीनि कदाचन । आकराः शुचयः सर्वे वर्जयित्वा सुराकरम् भ्र(भृ)ष्टा भ्र(भृ)ष्टयवाश्चैव तथैव चणकाः स्मृताः।खर्जूरं चैव कर्पूरमन्यद्भ्र(भृ)ष्टतरं शुचि अमीमांस्यानि शौचानि स्त्रीभिराचरितानि च* । अदुष्टाः सततं धारा वातोद्धूताश्च रेणवः २४२

बहूनामेकलग्नानामेकश्चेदशुचिर्भवेत् । अशौचमेकमात्रस्य नेतरेषां कथंचन २४३ एकपङ्क्त्युपविष्टानां भोजनेषु पृथक्पृथक् । यद्येको लभते नीलीं सर्वे तेऽशुचयः स्मृताः यस्य पटे पट्टसूत्रे नीलीरक्तो हि दृश्यते। त्रिरात्रं तस्य दातव्यं शेषाश्चैवोपवासिनः २४५ आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि। भगवन्केन शुद्धिः स्यात्ततो ब्रूहि तपोधन आदित्येऽस्तमिते रात्रौ स्पृशन्हीनं दिवाजलम् । तेनैव सर्वशुद्धिः स्याच्छवस्पृष्टं तु वर्जयेत् २४७

देशं कालं वयः शक्तिं पापं चावेक्षयेत्त(क्ष्य यत्न)तः।प्रायश्चित्तं प्रकल्प्यं स्याद्यस्य चोक्ता न निष्कृतिः २४८

देवयात्राविवाहेषु यज्ञप्रकरणेषु च । उत्सवेषु च सर्वेषु स्पृष्टास्पृष्टिर्न विद्यते २४९ आरनालं तथा क्षीरं कन्दुकं दधिसक्तवः। स्नेहपक्वं च तक्रं च शूद्रस्यापि न दुष्यति २५० आर्द्रमांसं घृतं तैलं स्नेहाश्च फलसंभवाः । अन्त्यभाण्डास्थिता एते निष्क्रान्ताः शुद्धिमाप्नुयुः २५१

अज्ञानात्पिबते तोयं ब्राह्मणः शूद्रजातिषु। अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति आहिताग्निस्तु यो विप्रो महापातकवान्भवेत्। अप्सु प्रक्षिप्य पात्राणि पश्चादग्निं विनिर्दिशेत् २५३

योऽगृहीत्वा विवाहाग्निं गृहस्थ इति मन्यते । अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः २५४

---

* इत उत्तरमेतदर्धं "गोकुले कद्रशालायां तैलयन्त्रेक्षुयन्त्रयोः" इति विद्यते ख. पुस्तके ।

---

१ क. °रालयम्। २ ख. °शहीनं ।

वृथापाकस्य भुञ्जानः प्रायश्चित्तं चरोद्विजः । प्राणानप्सु त्रिराचम्य घृतं प्राश्य विशुध्यति
वैदिके लौकिके वाऽपि हुतोच्छिष्टे जले क्षितौ । वैश्वदेवं प्रकुर्वीत पञ्चसूनापनुत्तये २५६
कनीयान्गुणवाञ्श्रेष्ठः श्रेष्ठश्चेन्निर्गुणो भवेत् । पूर्वं पाणिं गृहीत्वा च गृह्याग्निं धारयेद्बुधः
ज्येष्ठश्चेद्यदि निर्दोषो गृह्णात्यग्निं यवीयकः । नित्यं नित्यं भवेत्तस्य ब्रह्महत्या न संशयः
महापातकसंस्पृष्टः(ष्टे) स्नानमेव विधीयते।संस्पृष्टस्य यदा भुङ्क्ते स्नानमेव विधीयते२५९
पतितैः सह संसर्गं मासार्धं मासमेव वा । गोमूत्रयावकाहारो मासार्धेन विशुध्यति २६०
कृच्छ्रार्धं पतितस्यैव सकृद्भुक्त्वा द्विजोत्तमः । अविज्ञानाच्च तद्भुक्त्वा कृच्छ्रं सांतपनं
चरेत् २६१
पतितान्नं यदा भुक्तं भुक्तं चाण्डालवेश्मनि । मासार्धं तु पिबेद्वारि इति शातातपोऽब्रवीत्
गोब्राह्मणहतानां च पतितानां तथैव च । अग्निना न च संस्कारः शङ्खस्य वचनं यथा
यश्चाण्डालीं द्विजो गच्छेत्कथंचित्काममोहितः । त्रिभिः कृच्छ्रैर्विशुध्येत प्राजापत्या-
नुपूर्वशः २६४
पतिताच्चान्नमादाय भुक्त्वा वा ब्राह्मणो यदि । कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं विनि-
र्दिशेत् २६५
अन्त्यहस्ताच्छवे क्षिप्तं(प्त) काष्ठलोष्टतृणानि च । न स्पृशेत्तु तथोच्छिष्टमहोरात्रं समाचरेत्
चाण्डालं पतितं म्लेच्छं मद्यभाण्डं रजस्वलाम् । द्विजः स्पृष्ट्वा न भुञ्जीत भुञ्जानो यदि
संस्पृशेत् २६७
अतः परं न भुञ्जीत त्यक्त्वाऽन्नं स्नानमाचरेत् । ब्राह्मणैः समनुज्ञातस्त्रिरात्रमुपवासयेत्
सघृतं यावकं प्राश्य व्रतशेषं समापयेत् । भुञ्जानः संस्पृशेद्यस्तु वायसं कुक्कुटं तथा २६९
त्रिरात्रेणैव शुद्धिः स्यादथोच्छिष्टस्त्वहेन तु(?)। आरूढो नैष्ठिके धर्मे यस्तु प्रच्यवते पुनः
चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत् । पशुवेश्याभिगमने प्राजापत्यं विधीयते
गवां गमने मनुप्रोक्तं व्रतं चान्द्रायणं चरेत् । अमानुषीषु गोवर्जमुदक्यायामयोनिषु २७२
रेतः सिक्त्वा जले चैव कृच्छ्रं सांतपनं चरेत् । उदक्यां सूतिकां वाऽपि अन्त्यजां स्पृशते
यदि २७३
त्रिरात्रेणैवशुद्धिःस्याद्विधिरेषपुरातनः ।संसर्गयदिगच्छेच्चेदुदक्यावा(क्यया)तथान्त्यजैः
प्रायश्चित्ती स विज्ञेयः पूर्वं स्नानं समाचरेत् । एकरात्रं चरेन्मूत्रं पुरीषं तु दिनत्रयम् २७५
दिनत्रयं तथा पाने मैथुने पञ्च सप्त वा* । भोजने तु प्रसक्तानां प्राजापत्यं विधीयते २७६

* इतः परं ख. पुस्तकेऽधिकम्—"स्मृत्यन्तरे—अङ्गीकारेण ज्ञानिनां ब्राह्मणानुग्रहेण च । पूयन्ते तत्र पापिष्ठा महापातकिनोऽपि ये" इति ।

१ ख. °णवांश्चैव श्रे° । २ क. गृह्णीयादग्निमग्रतः । नित्यं नित्यं भ° । ३ ख. °स्तात्तु वाक्षि° । ४ ग. °ते । गोमयेन नरः कुर्याद्व्रतं । ५ ग. 'रीषेण दिनद्वयम् । दिनद्वयं तु पानेन मैथुने ससमं चरेत् । भो° ।

दन्तकाष्ठे त्वहोरात्रमेष शौचविधिः स्मृतः। रजस्वला यदा स्पृष्टा श्वानचण्डालवायसैः
निराहारा भवेत्तावत्स्नात्वा कालेन शुध्यति । रजस्वला यदा स्पृष्टा उष्ट्रजम्बुकशंबरैः
पञ्चरात्रं निराहारा पञ्चगव्येन शुध्यति। स्पृष्टं(ष्टा) रजस्वलाऽन्योन्यं ब्राह्मण्या ब्राह्मणी
चया २७९
एकरात्रं निराहारा पञ्चगव्येन शुध्यति । स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या क्षत्रियी
चया२८०
त्रिरात्रेण विशुद्धिः स्याद्व्यासस्य वचनं यथा । स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या वैश्य-
संभवा २८१
चतूरात्रं निराहारा पञ्चगव्येन शुध्यति । स्पृष्टा रजस्वलाऽन्योन्यं ब्राह्मण्या शूद्रसंभवा
षड्रात्रेण विशुद्धिः स्याद्ब्राह्मणी कामकारतः। अकामतश्चरेदेवं ब्राह्मणी सर्वतः स्पृशेत्
चतुर्णामपि वर्णानां शुद्धिरेषा प्रकीर्तिता । उच्छिष्टेन तु संस्पृष्टो ब्राह्मणो ब्राह्मणेन यः
भोजने मूत्रचारे च शङ्खस्य वचनं यथा। स्नानं ब्राह्मणसंस्पर्शे जपहोमौ तु क्षत्रिये २८५
वैश्ये नक्तं च कुर्वीत शूद्रे चैव उपोषणम्। चर्मको रजको वैण्यो धीवरो नटकस्तथा २८६
एतान्स्पृष्ट्वा द्विजो मोहादाचामेत्प्रयतोऽपि सन्। एतैः स्पृष्टो द्विजो नित्यमेकरात्रं पयः
पिबेत् २८७
उच्छिष्टैस्तैस्त्रिरात्रं स्याद्घृतं प्राश्य विशुध्यति। यस्तु च्छायां श्वपाकस्य ब्राह्मणस्त्वधि-
गच्छति २८८
तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति । अभिशस्तो द्विजोऽरण्ये ब्रह्महत्याव्रतं चरेत्
मासोपवासं कुर्वीत चान्द्रायणमथापि वा। वृथा मिथ्योपयोगेन भ्रूणहत्याव्रतं चरेत्२९०
अब्भक्षो द्वादशाहेन पराकेणैव शुध्यति। शठं च ब्राह्मणं हत्वा शूद्रहत्याव्रतं चरेत् २९१
निर्गुणं सगुणो हत्वा पराकव्रतमाचरेत्। उपपातकसंयुक्तो मानवो म्रियते यदि २९२
तस्य संस्कारकर्ता च प्राजापत्यद्वयं चरेत् । प्रभुञ्जानोऽतिसस्नेहं कदाचित्स्पृशते द्विजः
त्रिरात्रमाचरेन्नक्तैर्निस्नेहमथ वा चरेत् । बिडालकाकाद्युच्छिष्टं जग्ध्वा श्वनकुलस्य च
[+स्नात्वा विप्रस्य दिग्वासाः प्राणायामेन शुध्यति। शूद्रसंस्कारकर्तारो वृद्धब्राह्मणसंम-
तम् २९५
हत्वा नक्रं चरेत्कृच्छ्रं ब्रह्महत्यादिपातकम् ।] केशकीटावपन्नं च पिबेद्ब्राह्मीं सुवर्च-
स(ला)म् २९६
उष्ट्रयानं समारुह्य खरयानं च कामतः। स्नात्वा विप्रो जितग्रासः प्राणायामेन शुध्यति
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते

+ धनुश्चिह्नान्तर्गतं ग. पुस्तकेऽधिकम् ।

शक्तद्विगुणगोमूत्रं सर्पिर्दद्याच्चतुर्गुणम् । क्षीरमष्टगुणं देयं पञ्चगव्ये तथा दधि २९९
पञ्चगव्यं पिबेच्छूद्रो ब्राह्मणस्तु सुरां पिबेत् । उभौ तौ तुल्यदोषौ च वसतो नरके चिरम्
अजा गावो महिष्यश्च अमेध्यं भक्षयन्ति याः । दुग्धं हव्ये च कव्ये च गोमयं न विलेपयेत्
ऊनस्तन्यधिका या च आत्मनस्तन्यपायिनी । तासां दुग्धं न होतव्यं हुतं चैवाहुतं
भवेत् ३०२
ब्रह्मौदने च सोमे च सीमन्तोन्नयने तथा । जातश्राद्धे नवश्राद्धे भुक्त्वा चान्द्रायणं चरेत्
राजान्नं हरते तेजः शूद्रान्नं ब्रह्मवर्चसम् । स्वसुतान्नं च यो भुङ्क्ते स भुङ्क्ते पृथिवीमलम् ३०४
स्वसुता अप्रजा तावन्नाश्नीयात्तद्गृहे पिता । अन्नं भुङ्क्ते तु यो मोहात्पूयं स नरकं व्रजेत्
अधीत्य चतुरो वेदान्सर्वशास्त्रार्थतत्त्ववित् । नरेन्द्रभवने भुक्त्वा विष्ठायां जायते कृमिः
नवश्राद्धे त्रिपक्षे च षण्मासे मासिकेऽब्दिके । पतन्ति पितरस्तस्य यो भुङ्क्तेऽनापदि द्विजः
चान्द्रायणं नवश्राद्धे पराको मासिके तथा । त्रिपक्षे चैव कृच्छ्रः स्यात्षण्मासे कृच्छ्रमेव च
आब्दिके पादकृच्छ्रं स्यादेकाहः पुनराब्दिके । ब्रह्मचर्यमनाधाय मासश्राद्धेषु पर्वसु
द्वादशाहे त्रिपक्षेऽब्दे यस्तु भुङ्क्ते द्विजोत्तमः । पतन्ति पितरस्तस्य ब्रह्मलोके गता अपि
एकादशाहेऽहोरात्रं भुक्त्वा संचयने त्र्यहम् । उपोष्य विधिवद्विप्रः कूष्माण्डीं जुहुया-
द्घृतम् ३११
पक्षे वा यदि वा मासे यस्य नाश्नन्ति वै द्विजाः । भुक्त्वा दुरात्मनस्तस्य द्विजश्चान्द्रायणं
चरेत् ३१२
यन्न वेदध्वनिश्रान्तं न च गोभिरलं कृतम् । यन्न बालैः परिवृतं श्मशानमिव तद्गृहम्
हास्येऽपि बहवो यत्र विना धर्मं वदन्ति हि(न)।विनाऽपि धर्मशास्त्रेण स धर्मः पावनः स्मृतः
हीनवर्णे च यः कुर्यादज्ञानादभिवादनम् । तत्र स्नानं प्रकुर्वीत घृतं प्राश्य विशुध्यति ३१५
समुत्पन्ने यदा स्नाने भुङ्क्ते वाऽपि पिबेद्यदि । गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः
अङ्गुल्या दन्तकाष्ठं च प्रत्यक्षं लवणं तथा । मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणम्
दिवा कपित्थच्छायायां रात्रौ दधि शमीषु च । कार्पासं दन्तकाष्ठं च विष्णोरपि हरेच्छ्र-
यम् ३१८
शूर्पवातनखाग्राम्बुस्नानं वस्त्रपदोदकम् । मार्जनीरेणुकेशाम्बु हन्ति पुण्यं दिवाकृतम्
मार्जनीरजकेशाम्बु देवतायतनोद्भवम् । तेनावगुण्ठितं तेषु गङ्गाम्भःप्लुत एव सः ३२०
मृत्तिकाः सप्त न ग्राह्या वल्मीके मूषिकस्थले । अन्तर्जले श्मशानान्ते वृक्षमूले सुरालये
वृषभैश्च तथोत्खाते श्रेयस्कामैः सदा बुधैः । शुचौ देशे तु संग्राह्या शर्कराश्मविवर्जिता

---

१ क.ख. °स्तनीमधिकां वा या चान्या स्तनपा° । २ क.ग. °निध्वान्तं । ३ क.ख. स्नानवस्त्रघटोद° ।
४ ग. मार्जारर° ।

पुरीषे मैथुने होमे प्रस्रावे दन्तधावने । स्नानभोजनजप्येषु सदा मौनं समाचरेत् ३२३
यस्तु संवत्सरं पूर्णं भुङ्क्ते मौनेन सर्वदा । युगकोटिसहस्रेषु स्वर्गलोके महीयते ३२४
स्नानं दानं जपं होमं भोजनं देवतार्चनम्[1] । प्रौढपादो न कुर्वीत स्वाध्यायं पितृतर्पणम्
सर्वस्वमपि यो दद्यात्पातयित्वा द्विजोत्तमम् । नाशयित्वा तु तत्सर्वं भ्रूणहत्याफलं लभेत्
ग्रहणोद्वाहसंक्रान्तौ स्त्रीणां च प्रसवे तथा । दानं नैमित्तिकं ज्ञेयं[2] रात्रौ चापि प्रशस्यते
क्षौमं[3] जं वाऽथ कार्पासं पट्टसूत्रमथापि वा । यज्ञोपवीतं यो दद्याद्वस्त्रदानफलं लभेत् ३२८
कांस्यस्य भाजनं दद्याद्धृतपूर्णं सुशोभनम् । तथा भक्त्या विधानेन अग्निष्टोमफलं लभेत्
श्राद्धकाले तु यो दद्याच्छोभने च उपानहौ[4] । स गच्छत्यन्यमार्गेऽपि अश्वदानफलं लभेत्[5]
तिलपात्रं तु यो दद्यात्संपूर्णं तु समाहितः । स गच्छति ध्रुवं स्वर्गे नरो नास्त्यत्र संशयः
दुर्भिक्षे अन्नदाता च सुभिक्षे च हिरण्यदः । पानीयदस्त्वरण्ये च स्वर्गलोके महीयते ३३२
यावदर्धप्रसूता गौस्तावत्सा पृथिवी स्मृता । पृथिवी तेन दत्ता स्यादीदृशीं गां ददाति यः
तेनाग्नयो हुताः सम्यक्पितरस्तेन तर्पिताः । देवाश्च पूजिताः सर्वे यो ददाति गवाह्निकम्
जन्मप्रभृति यत्पापं मातृकं पैतृकं तथा । तत्सर्वं नश्यति क्षिप्रं वस्त्रदानान्न संशयः ३३५
कृष्णाजिनं च यो दद्यात्सर्वोपस्करसंयुतम् । उद्धरेन्नरकस्थानात्कुलान्येकोत्तरं शतम्
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः । शूलपाणिस्तु भगवानभिनन्दन्ति भूमि-
दम् ३३७
वालुकानां कृता राशिर्यावत्सप्तर्षिमण्डलम्[6] । गते वर्षशते चैव पलमेकं विशीर्यति ३३८
क्षयं च दृश्यते तस्य कन्यादाने न[7] चैव हि । आतुरे प्राणदाता च त्रीणि दानफलानि च(?)
सर्वेषामेव दानानां विद्यादानं ततोऽधिकम् । पुत्रादिस्वजने दद्याद्विप्राय[8] च न कैतवे
सकामः स्वर्गमाप्नोति निष्कामो मोक्षमाप्नुयात् । ब्राह्मणे वेदविदुषि सर्वशास्त्रविशारदे
मातृ(ता)पितृपरे चैव ऋतुकालाभिगामिनि । शीलचारित्रसंपूर्णे प्रातःस्नानपरायणे ३४२
तस्यैव दीयते दानं यदीच्छेच्छ्रेय आत्मनः । संपूज्य विदुषो विप्रानन्येभ्योऽपि प्रदीयते
तत्कार्यं नैव कर्तव्यं न दृष्टं न श्रुतं मया । अतः परं प्रवक्ष्यामि श्राद्धकर्माणि ये द्विजाः ३४४
पितृणामक्षयं दानं दत्तं येषां तु निष्फलम् । न हीनाङ्गो न रोगी च श्रुतिस्मृतिविवर्जितः
नित्यं चानृतवादी च तांस्तु श्राद्धे न भोजयेत् । *हिंसारतं च कपटमुपगूह्य श्रुतं च यः
किंकरं कपिलं काणं श्वित्रिणं रोगिणं तथा । दुश्चर्माणं शीर्णकेशं पाण्डुरोगं जटाधरम्

---

* एतदर्धस्थानेऽयं पाठो ग. पुस्तके—हिंसको व्यङ्गपादश्च उपगूह्य सुतश्च य इति ।

१ख. 'म् । व्यूढ' । २ ग. °यं यज्ञादपि । ३ ग. क्षौमं वालं तु का° । ४ ग. °हौ । नश्यन्ते विपुलात्पापादश्व° । ५ क. 'त् । तैल° । ६ ग. न विद्यते । सर्वे° । ७ ग. 'द्याद्द्याद्विप्राय दक्षिणाम् । स° । ८ ग. °विगर्हितः ।

भारवाहकमुग्रं च द्विभार्यं वृषलीपतिम्। भेदकारी भवेच्चैव बहुपीडाकरोऽपि वा ३४८
हीनातिरिक्तगात्रो वा तमप्यपनयेत्तथा । बहुभोक्ता दीनमुखो मत्सरी क्रूरबुद्धिमान्
एतेषां नैव दातव्यः कदाचिद्वै प्रतिग्रहः। अथ चेन्मन्त्रविधुक्तः शारीरैः पङ्क्तिदूषणैः ३५०
अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः। श्रुतिः स्मृतिश्च विप्राणां नयने द्वे प्रकीर्तिते ३५१
काणः स्यादेकहीनोऽपि द्वाभ्यामन्धः प्रकीर्तितः। न श्रुतिर्न स्मृतिर्यस्य न शीलं न कुलं यतः ३५२
तस्य श्राद्धं न दातव्यं स्वन्धकस्यात्रिरब्रवीत्। तस्माद्वेदेन शास्त्रेण ब्राह्मण्यं ब्राह्मणस्य तु
न चैकेनैव वेदेन भगवानत्रिरब्रवीत्। योगस्थैर्लोचनैर्युक्तः पादाग्रं च प्रपश्यति ३५४
लौकिकज्ञैश्च शास्त्रोक्तं पश्येच्चैवाधरोत्तरम्। वेदैश्च ऋषिभिर्गीतं दृष्टिमाञ्शास्त्रवेदवित्
व्रतिनं च कुलीनं च श्रुतिस्मृतिरतं सदा। तादृशं भोजयेच्छ्राद्धे पितॄणामक्षयं भवेत् ३५६
यावतो ग्रसते ग्रासान्पितॄणां दीप्ततेजसाम्। पिता पितामहश्चैव तथैव प्रपितामहः ३५७
नरकस्था विमुच्यन्ते ध्रुवं यान्ति त्रिविष्टपम्। तस्माद्विप्रं परीक्षेत श्राद्धकाले प्रयत्नतः
न निर्वपति यः श्राद्धं प्रमीतापितृको द्विजः। इन्दुक्षये मासि मासि प्रायश्चित्ती भवेत्तु सः
सूर्ये कन्यागते कुर्याच्छ्राद्धं यो न गृहाश्रमी। *धनं पुत्रान्कुलं तस्य पितृनिश्वासपीडया
कन्यागते सवितरि पितरो यान्ति सत्सुतान्। शून्या प्रेतपुरी सर्वा यावद्वृश्चिकदर्शनम्+
ततो वृश्चिकसंप्राप्ते निराशाः पितरो गताः। पुनः स्वभवनं यान्ति शापं दत्त्वा सुदारुणम्
पुत्रं वा भ्रातरं वाऽपि दौहित्रं पौत्रकं तथा। पितृकार्ये प्रसक्ता ये ते यान्ति परमां गतिम्
यथा निर्मन्थनादग्निः सर्वकाष्ठेषु तिष्ठति। तथा स दृश्यते धर्मः श्राद्धदानान्न संशयः
सर्वशास्त्रार्थगमनं सर्वतीर्थावगाहनम्। सर्वयज्ञफलं विन्द्याच्छ्राद्धदानान्न संशयः ३६५
महापातकसंयुक्तो यो युक्तश्चोपपातकैः। घनैर्मुक्तो यथा भानू राहुमुक्तश्च चन्द्रमाः ३६६
सर्वपापविनिर्मुक्तः सर्वपापं विलङ्घयेत्। सर्वसौख्यं स्वयं प्राप्तः श्राद्धदानान्न संशयः
सर्वेषामेव दानानां श्राद्धदानं विशिष्यते। मेरुतुल्यं कृतं पापं श्राद्धदानं विशोधनम्
श्राद्धं कृत्वा तु मर्त्यो वै स्वर्गलोके महीयते। अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्

---

* एतदर्धस्थानेऽयं पाठो ग. पुस्तके–'धनपुत्रौ कलत्रं च पितृनिश्वासमालिनः' इति । + एतदुत्तरम्– " श्रुत्वैतदत्रिणा प्रोक्तं शास्त्रं चैव द्विजोत्तमः। यस्त्विदं पठते श्राद्धे ब्राह्मणः सांशतव्रतः। अप्रभुग्न भवेच्छ्राद्धे यावतो नात्र संशयः। विद्यार्थी प्राप्नुयाद्विद्यां धनकामो धनानि च। आयुष्कामस्तथाऽऽयुश्च पुत्रार्थी पुत्रमाप्नुयात् " इति ग्रन्थो ग. पुस्तके। अत्रैव च स्मृतिसमाप्तिर्दृश्यते ।

---

१ ग. वा वातमप्ययने तथा। २ ग अर्वयन्मन्त्रविधुक्तं शा°। ३ ग 'नौर्वैप्रः प्रत्याङ्गं पश्यतः सदा। लौ'। ४ क. प्रयच्छति। ५ ग. °न्ति स्वान्सुता°। ६ ग °र्शनात्। ७ क. धर्म्याच्छ्राद्ध°।

वैश्यस्य चान्नमेवान्नं शूद्रान्नं रुधिरं भवेत् । एतत्सर्वं मयाऽऽख्यातं श्राद्धकाले समुत्थिते
वैश्वदेवे च होमे च देवताभ्यर्चने जपेत् । अमृतं तेन विप्रान्नमृग्यजुःसामसंस्कृतम् ३७१
व्यवहारानुपूर्व्येण धर्मेण बलिभिर्जितम् । क्षत्रियान्नं पयस्तेन घृतान्नं यज्ञपालने ३७२
देवो मुनिर्द्विजो राजा वैश्यः शूद्रो निषादकः। पशुर्म्लेच्छोऽपि चाण्डालो विप्रा दशविधाः
स्मृताः ३७३
संध्यां स्नानं जपं होमं देवतानित्यपूजनम् । अतिथिं वैश्वदेवं च देवब्राह्मण उच्यते ३७४
शाके पत्रे फले मूले वनवासे सदा रतः । निरतोऽहरहः श्राद्धे स विप्रो मुनिरुच्यते ३७५
वेदान्तं पठते नित्यं सर्वसङ्गं परित्यजेत् । सांख्ययोगविचारस्थः स विप्रो द्विज उच्यते
अस्त्राहताश्च धन्वानः सङ्ग्रामे सर्वसंमुखे । आरम्भे निर्जिता येन स विप्रः क्षत्र उच्यते
कृषिकर्मरतो यश्च गवां च प्रतिपालकः । वाणिज्यव्यवसायश्च स विप्रो वैश्य उच्यते
लाक्षालवणसंमिश्रं कुसुम्भं क्षीरसर्पिषः । विक्रेता मधुमांसानां स विप्रः शूद्र उच्यते
चौरश्च तस्करश्चैव सूचको दंशकस्तथा । मत्स्यमांसे सदा लुब्धो विप्रो निषाद उच्यते
ब्रह्मतत्त्वं न जानाति ब्रह्मसूत्रेण गर्वितः । तेनैव स च पापेन विप्रः पशुरुदाहृतः ३८१
वापीकूपतडागानामारामस्य सरःसु च । निःशङ्कं रोधकश्चैव स विप्रो म्लेच्छ उच्यते
क्रियाहीनश्च मूर्खश्च सर्वधर्मविवर्जितः । निर्दयः सर्वभूतेषु विप्रश्चाण्डाल उच्यते ३८३
वेदैर्विहीनाश्च पठन्ति शास्त्रं शास्त्रेण हीनाश्च पुराणपाठाः ।
पुराणहीनाः कृषिणो भवन्ति भ्रष्टास्ततो भागवता भवन्ति ॥ ३८४
ज्योतिर्विदो ह्यथर्वाणः कीराः पौराणपाठकाः । श्राद्धे यज्ञे महादाने वरणीयाः कदाच न
श्राद्धं च पितरं घोरं दानं चैव तु निष्फलम् । यज्ञे च फलहानिः स्यात्तस्मात्तान्परिवर्जयेत्
आविकश्चित्रकारश्च वैद्यो नक्षत्रपाठकः । चतुर्विप्रा न पूज्यन्ते बृहस्पतिसमा यदि ३८७
मागधो माथुरश्चैव[1] कापटः कीटकानजौ । पञ्च विप्रा न पूज्यन्ते बृहस्पतिसमा यदि ३८८
क्रयक्रीता च या कन्या पत्नी सा न विधीयते । तस्यां जाताः सुतास्तेषां पितृपिण्डं न
विद्यते ३८९
अष्टशल्यागतो नीरं पाणिना पिबते द्विजः । सुरापानेन तत्तुल्यं तुल्यं गोमांसभक्षणम्
ऊर्ध्वजङ्घेषु विप्रेषु प्रक्षाल्य चरणद्वयम् । तावच्चाण्डालरूपेण यावद्गङ्गां न मज्जति ३९१
दीपशय्यासनच्छाया कार्पासं दन्तधावनम् । अजारेणुस्पृशं चै(शश्वै)व शक्रस्यापि
श्रियं हरेत् ३९२
गृहादशगुणं कूपं कूपादशगुणं तटम् । तटादशगुणं नद्यां गङ्गासंख्या न विद्यते ३९३
स्रवद्यद्ब्राह्मणं तोयं रहस्यं क्षत्रियं तथा । वापीकूपे तु वैश्यस्य शौद्रं भाण्डोदकं तथा ३९४

---

[1] क. माधुर° ।

तीर्थस्नानं महादानं यच्चान्यत्तिलतर्पणम् । अब्दमेकं न कुर्वीत महागुरुनिपाततः १९५
गङ्गा गया त्वमावस्यावृद्धिश्राद्धेक्षयेऽहनि। मघापिण्डप्रदानं स्यादन्यत्र परिवर्जयेत् १९६
घृतं वा यदि वा तैलं पयो वा यदि वा दधि। चत्वारो ह्याज्यसंस्थानं हुतं नैव तु वर्जयेत्
श्रुत्वैतानृषयो धर्मान्भाषितानत्रिणा स्वयम्। इदमूचुर्महात्मानं सर्वे ते धर्मनिष्ठिताः १९८
य इदं धारयिष्यन्ति धर्मशास्त्रमतन्द्रिताः। इह लोके यशः प्राप्य ते यास्यन्ति त्रिविष्टपम्
विद्यार्थी लभते विद्यां धनकामो धनानि च। आयुष्कामस्तथैवाऽऽयुः श्रीकामो महतीं
श्रियम् ४००

इति श्रीमदत्रिमहर्षिस्मृतिः (संहिता)।

ॐ तत्सद्ब्रह्मणे नमः ।

महर्ष्यत्रिप्रणीता

अत्रिस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

हुताग्निहोत्रमासीनमत्रिं वेदविदां वरम् । पृच्छन्ति जातसंदेहा ऋषयः शंसितव्रताः १
भगवन्केन दानेन जप्येन तपसैव च । मुच्यन्ते पातकैर्युक्तास्तन्नो ब्रूहि महामुने २

अत्रिरुवाच—

अविख्यापितदोषाणां पापानां महतां तथा । सर्वेषां चोपपापानां शुद्धिं वक्ष्यामि तत्त्वतः
प्राणायामैः पवित्रैश्च व्याहृतिप्रणवैस्तथा । पवित्रपाणिरासीनो ब्रह्मविन्यस्तमभ्यसेत् ४
आवर्तयेत्सदा युक्तः प्राणायामं पुनः पुनः । आ केशादा नखाग्राच्च तपस्तप्तं तदुत्तमम् ५
निरोधाज्जायते वायुर्वायोरग्निः प्रजायते । अग्नेरापश्च जायन्ते ततोऽन्तः शुध्यते त्रिभिः
न तां तीव्रेण तपसा न ध्यानैर्न च वेज्यया । गतिं गन्तुं द्विजाः शक्ता योगात्संप्राप्नुवन्ति याम् ७
योगात्संप्राप्यते ज्ञानं योगो धर्मस्य लक्षणम् । योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत् ८
प्रणवाद्यास्त्रयो वेदाः प्रणवे पर्यवस्थिताः । वाङ्मयं प्रणवे सर्वं तस्मात्प्रणवमभ्यसेत् ९
प्रणवे नित्ययुक्तस्य सव्याहृतिषु सप्तसु । त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित्
एकाक्षरं परं ब्रह्म प्राणायामः परं तपः । सावित्र्यास्तु परं नास्ति पावनं परमं स्मृतम् ११
सव्याहृतिं सप्रणवां गायत्रीं च शिरस्तथा । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते

इत्यात्री(त्रे)ये धर्मशास्त्रे प्रथमोऽध्यायः ॥ १ ॥

(अथात्रिस्मृतौ द्वितीयोऽध्यायः ।)

प्राणायामांश्चरेत्त्रींस्तु यथाकालमतन्द्रितः । अहोरात्रकृतं पापं तत्क्षणादेव नश्यति १
कर्मणा मनसा वाचा यद्रात्रौ क्रियते त्वघम् । संतिष्ठन्पूर्वसंध्यायां प्राणायामैस्तु पूयते २
कर्मणा मनसा वाचा यदह्ना कुरुते त्वघम् । आसीनः पश्चिमां संध्यां प्राणायामैस्तु शुध्यति ३
प्राणायामैर्य आत्मानं नियम्याऽऽस्ते पुनः पुनः । दशद्वादशभिर्वाऽपि चतुर्विंशात्परं तपः

---

१ ग. हुत्वाऽग्नि°। २ ख. °हतात्मनाम् । स°। ३ ख.°म् । विरो°। ४ क. °त्रीं शिरसा तथा ।

सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश । अपि भ्रूणहनं मासात्पुनन्त्यहरहःकृताः
अपि चाप्सु निमज्जित्वा यः पठेदघमर्षणम् । यथाऽश्वमेधावभृथस्तथैव मनुरब्रवीत् ६
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः।उपांशु स्याच्छतगुणः सहस्रो मानसः स्मृतः
ध्वनिरोष्ठविकारेण निश्वासोपांशुलक्षणः । निर्विकारेण वक्त्रेण मनसा मानसः स्मृतः८
सहस्रपरमां देवीं शतमध्यां दशावराम् । गायत्रीं यो जपेद्विप्रो न स पापेन लिप्यते ९
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः । धनेन वैश्यशूद्रौ तु जपहोमैर्द्विजोत्तमः १०
यथाऽश्वा रथहीनास्तु रथाश्चाश्वैर्विना यथा।एवं तपोऽप्यविद्यस्य विद्या चाप्यतपस्विनः
यथाऽन्नं मधुसंयुक्तं मधु चान्नेन संयुतम् । एवं तपश्च विद्या च संयुक्तं भेषजं महत् १२
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपतत्परम् । कुत्सितेष्वपि वर्तन्तं नैनः संस्पृशते क्वचित्

इत्यात्री(त्रे)ये धर्मशास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

(अथात्रिस्मृतौ तृतीयोऽध्यायः ।)

अथ कार्यशतं साग्रं कृतं वेदश्च धार्यते । सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम् १
यथाऽतिप्रबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । तथा दहति वेदज्ञः कर्मजं दोषमात्मनः २
यथा पर्वतधातूनां दोषा दह्यन्ति धाम्यताम् । तथेन्द्रियकृता दोषा दह्यन्ते प्राणनिग्रहात्
तपस्तप्यति योऽरण्ये मुनिर्मूलफलाशनः । ऋचमेकां च योऽधीते तच्च तानि च तत्समम्
न वेदबलमाश्रित्य पापकर्मरतिर्भवेत् । न हि कामकृतं पापं वेदेन प्रतिहन्यते ५
याजनाध्यापनाद्योनात्तथैवासत्प्रतिग्रहात् । विप्रेषु न भवेद्दोषो ज्वलनार्कसमो द्विजः ६
मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च । नोच्छिष्टस्तु भवेद्विप्र आत्रेयवचनं यथा ७
शङ्कास्थाने समुत्पन्ने भक्ष्यभोज्यसमन्विते । आहारशुद्धिं वक्ष्यामि तां मे निगदतः शृणु
अक्षारलवणं यत्नात्पिबेद्ब्राह्मीं सुवर्चलाम् । त्रिरात्रं शङ्खपुष्पीं वा ब्राह्मणः पयसा सह९
पलाशबिल्वपत्राणि कुशं पद्ममुदम्बरम् । काथयित्वा पिबेदम्भस्त्रिरात्रेणैव शुध्यति १०
हविष्यं प्रातरश्नंस्त्रीन्हविष्यं सायमेव च । हविष्यायाचितं त्र्यहमुपवासं त्र्यहं चरेत् ११
अथ चेत्त्वरते कर्तुं दिवसं मारुताशनः । रात्रौ जले स्थितो व्युष्टः प्राजापत्येन तत्समम्१२
दुरितेषु त्वरिष्टानां[2] पापानां महतामपि । सर्वेषां चोपपापानां शुद्धिश्चान्द्रायणं भवेत् १३
एकैकं वर्धयेद्ग्रासं शुक्ले कृष्णे च ह्रासयेत् । अमावास्यां न भुञ्जीत एष चान्द्रायणो विधिः
गायत्र्यष्टसहस्रं तु जप्यं कृत्वा स्थिते रवौ । मुच्यते सर्वपापेभ्यो यदि न ब्रह्महा भवेत्१५

इत्यात्री(त्रे)ये धर्मशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

---

१ ग. कृतवे' । २ क. 'रि त्वरिष्टानां चैव पापाना' ।

(अथात्रिस्मृतौ चतुर्थोऽध्यायः।)

अचीर्णप्रायश्चित्तानां यमविषयनरकयातनाभिश्च पातितानां यदि कदाचिन्मानुष्यं भवति तदैतच्चिह्नाङ्कितशरीरा जायन्ते ॥१॥ तथा—अनृतवादी खलो ब्रह्महा कुष्ठी ॥ २ ॥ न्यासापहारी चानपत्यः ॥ ३ ॥ रत्नापहारी चात्यन्तदरिद्रः ॥ ४ ॥ अयाज्ययाजको वराहः ॥५॥ बहुयाजकः प्लवः ॥६॥ असत्सुभोजी वानरः ॥ ७ ॥ अनिमन्त्रितभोजी वायसः ॥ ८ ॥ इतस्ततस्तर्कको मार्जारः ॥ ९ ॥ कक्षागारदाहकः खद्योतः ॥ १० ॥ दारकाचार्यो मुखगन्धी ॥ ११ ॥ अवधूतदायी बलीवर्दः ॥ १२ ॥ मिष्टान्नमदत्त्वा यः स्वयंभोजी[स] कृमिः ॥१३॥ मत्सरी भ्रमरः ॥१४॥ फलहरणाद्वलगण्डी ॥ १५ ॥ वस्त्रहरणाच्छ्वित्री ॥ १६ ॥ चण्डालीपुल्कसीगमनेऽजगरः ॥ १७ ॥ प्रव्रजितोपगमने मरुपिशाचः ॥१८॥ शूद्रीगमने दीर्घकीटः ॥१९॥ जलहरणान्मत्स्यः ॥२०॥ क्षीरहरणाद्बलाका ॥२१॥ धान्यहरणान्मूषकः ॥ २२ ॥ क्रयविक्रयणाद्भृध्रः ॥२३॥ गोमैथुनान्मण्डूकः ॥२४॥ चित्रोपजीवी श्वा ॥२५॥ भृतकाध्यापकः शृगालः ॥ २६ ॥ तस्करो विड्वराहः ॥ २७ ॥गुरुदारगमनादुष्टूः ॥ २८ ॥ परदारगमनात्कुररः ॥ २९ ॥ परद्रव्यहरणात्प्रेतः ॥ ३० ॥ मत्स्यबन्धकः परप्रेष्यः ॥ ३१ ॥ गरद ऋक्षः ॥ ३२ ॥ विषदो व्याघ्रः ॥ ३३ ॥ तैलहरणात्तैलपायिका ॥ ३४ ॥ लवणहरणादरसंज्ञः ॥३५॥ राजमहिषीहरणात्खरः ॥ ३६ ॥ राजाक्रोशे गर्दभः ॥३७॥ ब्राह्मणपरिवादात्कुकलासः ॥ ३८ ॥ देवलश्चाण्डालः ॥ ३९ ॥ वार्धुषिकः कूर्मः ॥ ४० ॥ फलविक्रयादफलः ॥ ४१ ॥ वस्त्रविक्रयादुलूकः ॥ ४२ ॥ ऊर्णनाभो नास्तिकः कृतघ्नश्च ॥ ४३ ॥ शरणागतत्यागी ब्रह्मराक्षसोऽविक्र(क्रे)यविक्रयकारी च ॥ ४४ ॥ सर्वदाऽनृतवचनात्पापः ॥ ४५ ॥

इत्यात्री(त्रे)ये धर्मशास्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

(अथात्रिस्मृतौ पञ्चमोऽध्यायः।)

न स्त्री दुष्यति जारेण न विप्रो वेदपारगः। नाऽऽपो मूत्रपुरीषेण नाग्निर्दहनकर्मणा १ बलात्कारोपभुक्ता वा चौरहस्तगताऽपि वा। स्वयं चापि विपन्ना वा यदि वा विप्रवादिता न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते। पुष्पकालमुपासीत्वा (मपास्याथ) ऋतुकालेन शुध्यति २

१ ख. महापि°। २ ग. °प्रचोदि°।

स्त्रियः पवित्रमतुलं नैता दुष्यन्ति केनचित् । मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति
पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः। भुज्यन्ते मानुषैः पश्चान्नैता दुष्यन्ति कर्हिचित्
असवर्णेन यो गर्भः स्त्रीणां योनौ निषिच्यते । अशुद्धा तु भवेन्नारी यावच्छल्यं न मुञ्चति
निःसृते तु ततः शल्ये रजसोऽपीह दर्शनात् । ततः सा शुध्यते नारी विमला काञ्चनोपमा
सोमः शौचं ददौ तासां गन्धर्वश्च शुभां गिरम् । पावकः सर्वमेध्यत्वं तस्मान्निष्कल्मषाः
स्त्रियः ८

व्यञ्जनेषु च जातेषु सोमो भुङ्क्ते च कन्यकाम् । पयोधरेषु गन्धर्वा रजस्यग्निः प्रतिष्ठितः ९
भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति। रजसा शुध्यते नारी नदी वेगेन शुध्यति १०
गोकरीषेण रजतं सुवर्णं चापि वारिणा । आकराः शुचयः सर्वे वर्जयित्वा सुराकरम् ११
आसनं शयनस्थानं स्त्रीमुखं कुतपः(पं) खुरम्। न दूषयन्ति विद्वांसो यज्ञेषु चमसं यथा १२
मक्षिका संततिर्धारा भूमिस्तोयं हुताशनः । मार्जारश्चैव दर्वी च नकुलश्च सदा शुचिः १३
वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने । स्त्रियश्च रतिसंयोगे श्वा मृगग्रहणे शुचिः १४
पादुके खञ्जतो मेध्ये उत्तमाङ्गे (दुष्टमार्गे) ह्युपानहौ । वस्त्रं कौपीनके मेध्यं स्त्रियो मेध्यास्तु
सर्वतः १५

*अजाश्वौ मुखतो मेध्यौ गावो मेध्यास्तु पृष्ठतः । ब्राह्मणाः पादतो मेध्याः स्त्रियो
मेध्यास्तु सर्वतः १६

इत्यात्री(त्रे)ये धर्मशास्त्रे पञ्चमोऽध्यायः ॥ ५ ॥

(अथात्रिस्मृतौ षष्ठोऽध्यायः ।)

सर्ववेदपवित्राणि तानि वक्ष्याम्यशेषतः । येषां जप्यैश्च होमैश्च पूयन्ते कल्मषाद्भृताः १
अघमर्षणं देवकृतश्चोदुत्यं तरत्समन्दी पावमान्यश्च सावित्री रेवती शतरुद्रियमथर्व-
शिरस्त्रिसुपर्णं महाव्रतमभिशंसति स्तोत्रसामानि व्याहृतयः ॥ २ ॥
भारुण्डानि च सामानि गायत्रं रैवतं तथा । +पुरुषव्रतं च भाषं(?) च तथा देवव्रतानि च ३
अशुचि गां बार्हस्पत्यांश्च काकं सार्कमन्दैवतं तथा(?) । गोसूक्तमश्वसूक्तं च इन्द्रसूक्ते च
सामनी ४

त्रीण्याज्यदोहानि रथंतरं च आग्नेयमेवं सहवामदेव्यम् ।
एतानि जप्तानि पुनन्ति जन्तूञ्जातिस्मरत्वं लभते यदीच्छेत् ॥ ५

---

* एतद्वचनं न विद्यते ख. पुस्तके । + एतदर्धं न ख. पुस्तके ।

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी[1] सूर्यसुताश्च गावः।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात् ६
वैशाख्यां पौर्णमास्यां तु ब्राह्मणान्सप्त पञ्च वा। तिलान्क्षौद्रेण संयुक्तान्प्राहयेद्विधि-
पूर्वकम् ७
प्रीयतां धर्मराजेति यद्वा मनसि वर्तते। यावज्जन्मकृतं पापं तेन दानेन शुध्यति ८
सुवर्णनाभं यः कृत्वा सखुरं कृष्णमार्गकम्। तिलैः प्रच्छाद्य यो दद्यात्तस्य पुण्यफलं शृणु
ससमुद्रगुहा तेन सशैलवनकानना। चतुरन्ता भवेद्दत्ता पृथिवी नात्र संशयः १०
तिलान्कृष्णाजिने कृत्वा सुवर्णे मधुसर्पिषी। ददाति यस्तु विप्राय सर्वं तरति दुष्कृतम्

इत्यात्री(त्रे)ये धर्मशास्त्रे षष्ठोऽध्यायः ॥ ६ ॥

(अथात्रिस्मृतौ सप्तमोऽध्यायः।)

अथातो रहस्यानि व्याख्यास्यामः ॥ १ ॥ नटनर्तकगायनगान्धर्विकश्वपाककारु-
कवीशोत्कटवीर्णाशास्त्रस(श)कयवनकाम्बोजवाह्लीकखशद्रविडवङ्गपारशवबिल्वाता-
दीनांभुक्त्वा प्रतिगृह्य च स्त्रीगमने सह भोजने रहस्ये रहस्यानि प्रकाशे प्रकाश्यानि चरेत्
॥ २ ॥ यावत्तु तिष्ठेदप्सु निमज्ज्य तरत्समन्दीं त्रिरावर्त्य शुध्येत् ॥ ३ ॥
रहस्ये तप्तकृच्छ्रं तु चरेद्विप्रः समाहितः। प्रकाशे चैन्दवं कुर्यात्सकृद्भुक्त्वा द्विजोत्तमः ४
गोवैश्यवधे कन्यादूषणे चैवम् ॥५॥ मृतकाष्ठे अधोत्सर्गलशुनपलाण्डुगृञ्जनकुम्भीर-
कगोमायुविड्वराहश्वादीनामन्येषां वाऽभक्ष्याणां भक्षणे ॐशुद्धेनापः पीत्वा शुध्येत् ६
वेदस्यैकगुणं चापि सद्यः शोधनमुच्यते। एकादशगुणान्रुद्रान् ७
अनृतमहापातकोपपातकैर्मलिनीकरणीयैर्मुच्यते ॥ ८ ॥ ब्राह्मणीगमने स्नात्वा ब्राह्म-
णायोदकुम्भं दद्यात् ॥ ९ ॥ क्षत्रियावैश्यागमने तापसीं त्रिरावर्त्य शुध्येत् ॥ १० ॥
शूद्रागमने त्वघमर्षणेनापः पीत्वा शुध्येत् ॥ ११ ॥ स्वियोनिगमने कूष्माण्डैर्घृतहोमान्मु-
च्यते ॥ १२ ॥ गुरुदारान्गत्वा ऋषभं द्वादश गा दत्त्वा शुध्येत् ॥ १३ ॥ अपेयं
पीत्वाऽभक्ष्यं भक्षयित्वाऽकार्यं कृत्वाऽघमर्षणेनापः पीत्वा शुध्येत् ॥ १४ ॥
अशक्तः प्रायश्चित्ते सर्वत्रानुशोचनेन शुध्येत् ॥ १५ ॥

इत्यात्री(त्रे)यधर्मशास्त्रे सप्तमोऽध्यायः ॥ ७ ॥

---

१ ख. ग. °वैंणवी। २ ग. °कविपोत्क°। ३ ख. °धीषोत्क°। ४ ख ग. °णा वाशा°। ५ क °शबील्वा° ६ क. °र्म्भाक°।

(अथात्रिस्मृताष्टमोऽध्यायः ।)

त ऋषयः पुनरत्रिमाहुः ॥ १ ॥ भगवन्किमेतानि प्रायश्चित्तानि भवन्त्याहोस्विदन्यानि सन्ति रहस्यानि ॥ २ ॥ व्याख्यास्यामः ॥ ३ ॥ तत्र रजनीं यावद्यामपेक्षं[1] समाचरेत् । तत्पूर्वं ब्रह्म तत्सवितुर्वरेण्यमित्यभक्ष्यभक्षणादपेयपानादकार्यकरणादशेषतो मुच्यते ॥ ४ ॥

वामदेव्यं त्रिरावर्त्य मुच्यते ब्रह्महत्यया । आतूनइन्द्रसोमेन कन्यादूषी च शुध्यति ५

उदुत्यमिति सप्तरूपेणाऽऽदित्यमुपास्येहकृतैः पुराकृतैश्च मुच्यते ॥ ६ ॥ सोमं राजानमिति विषगराग्निदाहाच्च मुच्यते ॥ ७ ॥

सर्वेषामेव पापानां संकरे समुपस्थिते । दशसाहस्रमभ्यस्ता गायत्री शोधनं परम् ८

रुद्रकूष्माण्डरूपैश्च जपैस्तैत्तिरिवैस्तथा । वैराजर्षिभिर्जप्यैश्च सायत्र्यास्तु विशेषतः ९

यानि पूर्वप्रणीतानि पवित्राणि महर्षिभिः । तेषां जप्यैश्च होमैश्च पूयन्ते कल्मषाद्वृताः १०

ब्रह्महा गुरुतल्पी वाऽगम्यागामी सुवर्णस्तेयी सुरापो गोघ्नो विश्वासघाती मित्रभुक्शरणागतघाती कूटसाक्ष्यकार्यकृच्चैवमादिष्वन्येष्वपि नरः प्राणायामशतं कृत्वा सूर्योदयं प्रतीदमापः प्रवहतामिति त्रिरावर्त्य मुच्यते सर्वकिल्बिषैः ॥ ११ ॥

सूर्यस्योदयनं प्राप्य निर्मला धौतकल्मषाः । भवन्ति भास्कराभास्ते विधूमा इव पावकाः

ध्यानेन सदृशं नास्ति शोधनं पापकर्मणाम् । श्वपाकेष्वपि भुञ्जानो ध्यानेनेह विशुध्यति

ध्यानमेव परं ब्रह्म ध्यानमेव परं तपः । ध्यानमेव परं शौचं ध्यानमेव परं पदम् १४

सर्वपापप्रसक्तोऽपि ध्यायन्नेव प्रमुच्यते । तपस्वी च भवेदेवं पङ्क्तिपावनपावकः १५

आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः । प्रायश्चित्तं न पश्यामि येन शुध्यति कर्मणा १६

रक्तवस्त्रं यथा धौतं न रक्तं न च पाण्डुरम् । एवं विधिविहीनस्तु न शूद्रो न च स द्विजः १७

ये च प्रव्रजितापत्या या चैषां बीजसंततिः । विदूरा नाम चाण्डाला जायन्ते नात्र संशयः

शतिको म्रियते गृध्रश्चाषो द्वादशिकस्तथा । भासो विंशतिवर्षैश्च सूकरो दशभिस्तथा १९

अपुष्पो विफलो वृक्षो जायते कण्टकावृतः । वने दावाग्निदग्धश्च स्थाणुर्भवति सानुगः २०

ततो वर्षशतान्यष्टौ द्वे च तिष्ठत्यचेतनः । पूर्णे वर्षसहस्रे तु जायते ब्रह्मराक्षसः २१

जले प्लवो वा भवति कुलस्योत्सादनेन च । पतत्यर्धशरीरेण यस्य भार्या सुरां पिबेत् २२

पतितार्धशरीरस्य निष्कृतिर्न विधीयते ॥ २३ ॥

इत्यात्री(त्रे)ये धर्मशास्त्रेऽष्टमोऽध्यायः ॥ ८ ॥

---

१ ख. °जस्वनीं यावद्यानमे° । ग. °जस्वनायावद्यानमे° ।

(अथात्रिस्मृतौ नवमोऽध्यायः।)

यो ध्याता यच्च यद्ध्यानं यद्ध्येयं यत्प्रयोजनम्।सर्वाण्येतानि यो वेत्ति स योगं योक्तुमर्हति
आत्मा ध्याता मनो ध्यानं ध्येयः सूक्ष्मो महेश्वरः। यत्परापरमैश्वर्यमेतद्ध्यानप्रयोजनम् २
विदित्वा सर्वसूक्ष्माणि षडङ्गं च महेश्वरम्। प्रधानगुणतत्त्वज्ञः परं ब्रह्माधिगच्छति ३
विद्वेषादपि गोविन्दं दमघोषात्मजः स्मरन्। शिशुपालो गतः स्वर्गं किं पुनस्तत्परायणः
उपलब्धिः स्मृतिर्ध्यानं संकल्पः प्रणवं प्रति। कल्पना भावना चिन्ता ध्यानमित्यभिधीयते ५
प्रत्याहारस्तथा ध्यानं प्राणायामोऽथ धारणा। तर्कश्चैव समाधिश्च षडङ्गो योग उच्यते ६
यस्त्विदं पठते शास्त्रं विप्रेभ्यश्च प्रयच्छति। मुच्यते सर्वपापेभ्यो ब्रह्मलोकं स गच्छति ७

इत्यात्री(त्रे)ये धर्मशास्त्रे नवमोऽध्यायः ॥ ९ ॥

अत्रिस्मृतिः समाप्ता ॥

ॐ तत्सद्ब्रह्मणे नमः ।

आपस्तम्बस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

आपस्तम्बं प्रवक्ष्यामि प्रायश्चित्तविनिर्णयम् । दूषितानां हितार्थाय वर्णानामनुपूर्वशः १
परेषां परिवादेषु निवृत्तमृषिसत्तमम् । विविक्तदेश आसीनमात्मविद्यापरायणम् २
अनन्यमनसं शान्तं सत्त्वस्थं योगवित्तमम् । आपस्तम्बमृषिं सर्वे समेत्य मुनयोऽब्रुवन् ३
भगवन्मानवाः सर्वेऽसन्मार्गेऽपि स्थिता यदा । चरेयुर्धर्मकार्याणां तेषां ब्रूहि विनिष्कृतिम् ४
यतोऽवश्यं गृहस्थेन गवादिपरिपालनम् । कृषिकर्मादिवपने द्विजामन्त्रणमेव च ५
बालानां स्तन्यपानादि कार्यं च परिपालनम् । देयं चानाथकेऽवश्यं विप्रादीनां च भेषजम् ६
एवं कृते कथंचित्स्यात्प्रमादो यद्यकामतः । गवादीनां ततोऽस्माकं भगवन्ब्रूहि निष्कृतिम् ७
एवमुक्तः क्षणं ध्यात्वा प्रणिपातादधोमुखः । दृष्ट्वा ऋषीनुवाचेदमापस्तम्बः सुनिश्चितम् ८
बालानां स्तन्यपानादिकार्ये दोषो न विद्यते । विपत्तावपि विप्राणामामन्त्रणचिकित्सने ९
गवादीनां प्रवक्ष्यामि प्रायश्चित्तं तृणादिषु । केचिदाहुर्न दोषोऽत्र स्नेहे लवणभेषजे १०
औषधं लवणं चैव स्नेहं पुष्ट्यर्थभोजनम् । प्राणिनां प्राणवृत्त्यर्थं प्रायश्चित्तं न विद्यते ११
अतिरिक्तं न दातव्यं काले स्वल्पं तु दापयेत् । अतिरिक्ते विपन्नानां कृच्छ्रमेव विधीयते १२
त्र्यहं निरशनं पादः पादश्चायाचितं त्र्यहम् । *सायं त्र्यहं तथा पादः पादः प्रातस्तथा त्र्यहम् १३
प्रातः सायं दिनार्धं च पादोनं सायमर्जितम् । प्रातः पादं चरेच्छूद्रः सायं वैश्यस्य दापयेत् १४
अयाचितं तु राजन्ये त्रिरात्रं ब्राह्मणस्य च । पादमेकं चरेद्रोधे द्वौ पादौ बन्धने चरेत् १५
योजने पादहीनं च चरेत्सर्वं निपातने । घण्टाभरणदोषेण गोस्तु यत्र विपद्यते १६
चरेदर्धव्रतं तत्र भूषणार्थं कृतं हि तत् । दमने वाँ निरोधे वा संघाते चैव योजने १७
स्तम्भशृङ्खलपाशैश्च मृते पादोनमाचरेत् । पाषाणैर्लकुटैर्वाऽपि शस्त्रेणान्येन वा बलात् १८
निपातयन्ति ये गास्तु तेषां सर्वं विधीयते । प्राजापत्यं चरेद्विप्रः पादोनं क्षत्रियस्तथा

---

* एतदर्धस्थानेऽयं पाठश्छ. पुस्तके—" एकभक्तं त्र्यहं पादो नक्तं पादस्त्र्यहं निशि " इति ।

---

१ घ. परवा° । २ ख. तत्त्वस्थं । ३ ख. ग. 'र्वे असन्मार्गे स्थि' । ४ ग. यदि । ५ क. घ. ङ. च. छ. झ. °दा । भवेयु' । ६ ग. °दि चाऽऽपत्सु द्वि° । घ. °दिपवने । ७ घ. °मुखान् । द° । ८ क. °तं तुषादि° । ग. °तं रुजादि° । ङ. °तं वधादि° । ९ ग. °त्र देहधारण' । १० क. ङ. च. ञ. कृत्स्नमे° । ११ ग. °शनात्पादः । १२ ग. °म् । पादः सायं त्र्यहं पादः प्रातर्भोज्यं तथा । १३ क. घ. ङ. च. विनार्धं । १४ क. घ. च. झ वाहने रोधे सं° । १५ ख. ये पापास्तेषां ।

कृच्छ्रार्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत्। द्वौ मासौ पाययेद्वत्सं द्वौ मासौ द्वौ स्तनौ दुहेत्
द्वौ मासावेकवेलायां शेषकालं यथारुचि। दशरात्रार्धमासेन गौस्तु यत्र विपद्यते २१
सशिखं वपनं कृत्वा प्राजापत्यं समाचरेत्। हलमष्टगवं धर्म्यं षड्गवं जीवितार्थिनाम् २२
चतुर्गवं नृशंसानां द्विगवं हि जिघांसिनाम्। अतिवाहातिदोहाभ्यां नासिकाभेदनेन वा
नदीपर्वतसंरोहे मृते पादोनमाचरेत्। न नारिकेलबालाभ्यां न मुञ्जेन न चर्मणा २४
एभिर्गास्तु न बध्नीयाद्बद्ध्वा परवशो भवेत्। कुशैः काशैस्तु बध्नीयाद्वृषभं दक्षिणामुखम्
पादलग्नाग्निदाहेषु प्रायश्चित्तं न विद्यते। व्यापन्नानां बहूनां तु रोधने बन्धनेऽपि च २६
भिषङ्मिथ्योपचारे च द्विगुणं गोव्रतं चरेत्। शृङ्गभङ्गेऽस्थिभङ्गे च लाङ्गूलस्य च कर्तने
सप्तरात्रं पिबेद्दुग्धं यावत्स्वस्था पुनर्भवेत्। गोमूत्रेण तु संमिश्रं यावकं भक्षयेद्द्विजः २८
एतद्विमिश्रितं वज्रमुक्तं चोशनसा स्वयम्। देवद्रोण्यां विहारेषु कूपेष्वायतनेषु च २९
एषु गोषु विपन्नासु प्रायश्चित्तं न विद्यते। एका यदा तु बहुभिर्दैवाद्व्यापादिता क्वचित् ३०
पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक्। यज्ञणे गोचिकित्सार्थे गूढगर्भविमोचने ३१
यत्ने कृते विपत्तिश्चेत्प्रायश्चित्तं न विद्यते। सरोमं प्रथमे पादे द्वितीये श्मश्रुधारणम् ३२
तृतीये तु शिखा धार्या सशिखं तु निपातने। सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम्
एवमेव तु नारीणां शिरसो मुण्डनं स्मृतम्॥ ३४

इत्यापस्तम्बीये प्रथमोऽध्यायः॥ १॥

(अथ द्वितीयोऽध्यायः।)

कारुहस्तगतं पण्यं यच्च पात्राद्विनिःसृतम्। स्त्रीबालवृद्धाचरितं सर्वमेतच्छुचि स्मृतम् १
प्रपास्वरण्येषु जलेषु वै गिरौ द्रोण्यां जलं केशविनिःसृतं च।
श्वपाकचाण्डाल परिग्रहेषु पीत्वा जलं पञ्चगव्येन शुद्धिः॥ २
न दुष्येत्संतता धारा वातोद्धताश्च रेणवः। स्त्रियो वृद्धाश्च बालाश्च न दुष्यन्ति कदाचन ३
आत्मशय्या च वस्त्रं च जायाऽपत्यं कमण्डलुः। आत्मनः शुचीन्येतानि परेषामशुचीनि तु
अन्यैस्तु खानिताः कूपास्तडागानि तथैव च। येषु स्नात्वा च पीत्वा च पञ्चगव्येन
शुध्यति ५

---

१ ग. च. °रोधे मृ°। २ क. °त्तं विधीयते। ३ ख. ग. °श्चिथ्योप°। ४ क. घ. च. °स्त्वस्थः पु°। ५ छ °तद्वि मि। ६ ग. ज. गोश्चिकि°। ७ ग. °च्च ग्रामाद्वि°। ज. °च्च ग्रासाद्वि°। ८ क. ख. घ. °वृद्धच°। ९ ग. ज. °तं प्रत्यक्षादृष्टमेव च। प्र°। १० ग ज. °लेऽथ सीरे द्रोण्यां जलं यच्च विनिःसृतं भवेत्। श्व°। ११ ग. ज. शुचिरेता।

उच्छिष्टमशुचित्वं च यच्च विष्ठानुलेपनम्। सर्वं शुध्यति तोयेन तत्तोयं केन शुध्यति ६
सूर्यरश्मिनिपातेन मारुतस्पर्शनेन च। गवां मूत्रपुरीषेण तत्तोयं तेन शुध्यति ७
अस्थिचर्मादियुक्तं च खराश्वोष्ट्रोपदूषितम्। उद्धरेदुदकं सर्वं शोधनं परिमार्जनम् ८
कूपो मूत्रपुरीषेण ष्ठीवनेनापि दूषितः। श्वशृगालखरोष्ट्रैश्च क्रव्यादैश्च जुगुप्सितः ९
उद्धृत्यैव च तत्तोयं सप्त पिण्डान्समुद्धरेत्। पञ्चगव्यं मृदा पूतं कूपे तच्छोधनं स्मृतम् १०
वापीकूपतडागानां दूषितानां च शोधनम्। कुम्भानां शतमुद्धृत्य पञ्चगव्यं ततः क्षिपेत्
यच्च कूपात्पिबेत्तोयं ब्राह्मणः शवदूषितात्। कथं तत्र विशुद्धिः स्यादिति मे संशयो भवेत्
अक्लिन्नेनाप्यभिन्नेन शवेन परिदूषितात्। पीत्वा कूपादहोरात्रं पञ्चगव्येन शुध्यति १३
क्लिन्ने भिन्ने शवे चैव तत्रस्थं यदि तत्पिबेत्। शुद्धिश्चान्द्रायणं तस्य तप्तकृच्छ्रमथापि वा

इत्यापस्तम्बीये द्वितीयोऽध्यायः॥ २॥

(अथ तृतीयोऽध्यायः।)

अन्त्यजातिरविज्ञातो निवसेद्यस्य वेश्मनि। सम्यग्ज्ञात्वा तु कालेन द्विजाः कुर्वन्त्यनुग्रहम् १
चान्द्रायणं पराको वा द्विजातीनां विशोधनम्। प्राजापत्यं तु शूद्रस्य शेषं तदनुसारतः २
यैर्भुक्तं तत्र पक्वान्नं कृच्छ्रं तेषां प्रदापयेत्। तेषामपि चैर्यैर्भुक्तं कृच्छ्रपादं प्रदापयेत् ३
कूपैकपानैर्दुष्टानां स्पर्शसंसर्गदूषणात्। तेषामेकोपवासेन पञ्चगव्येन शोधनम् ४
बालो वृद्धस्तथा रोगी गर्भिणी वायुपीडिता। तेषां नक्तं प्रदातव्यं बालानां प्रहरद्वयम् ५
अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः। प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च ६
न्यूनैकादशवर्षस्य पञ्चवर्षाधिकस्य च। चरेद्गुरुः सुहृद्वाऽपि प्रायश्चित्तं विशोधनम् ७
अर्थे तैः क्रियमाणेषु येषामार्तिः प्रदृश्यते। शेषसंपादनाच्छुद्धिर्विपत्तिर्न भवेद्यथा ८
क्षुधा व्याधितकायानां प्राणो येषां विपद्यते। ये न रक्षन्ति वक्तारस्तेषां तत्किल्बिषं भवेत्
पूर्णेऽपि कालनियमे न शुद्धिर्ब्राह्मणैर्विना। अपूर्णेष्वपि कालेषु शोधयन्ति द्विजोत्तमाः
समाप्तमिति नो वाच्यं त्रिषु वर्णेषु कर्हिचित्। विप्रसंपादनं कार्यमुत्पन्ने प्राणसंशये ११

---

१ ग. खराश्वो°। २ क. ख. घ. °रश्वानोप°। ३ ख. °ण यवने°। ४ क. घ. ङ. °ग्नेन न भिन्नेन केवलं शवदू°। ख. °ग्नेन च भिन्नेन केवलं शवदूषिते। पी°। ५ ग. ज. °षिते। पी°। ६ ख. °नि। तस्य ज्ञात्वा। ७ घ. च यद्भुक्तं। ८ ग. °र्शने शवदूषिणाम्। ते°। ज. °र्शने शवदूषणम्। ते°। ९ ग. ज. °थवा क्रि°। १० ङ. ज. °नाद्बुद्धि°। ११ ग. °न्ति भक्तेन तेषां। १२ क. घ. पूर्णोऽपि। १३ क. ङ. झ. °मासिमि°।

संपादयन्ति[1] ये विप्राः स्नानतीर्थफलप्रदम्। सम्यक्कर्तुरपापं स्याद्व्रती च फलमाप्नुयात्

इत्यापस्तम्बीये तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

चाण्डालकूपभाण्डेषु योऽज्ञानात्पिबते जलम्। प्रायश्चित्तं कथं तस्य वर्णे वर्णे विधीयते १
चरेत्सांतपनं विप्रः प्राजापत्यं तु भूमिपः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् २
भुक्तोच्छिष्टस्त्वनाचान्तश्चाण्डालैः श्वपचेन वा। प्रमादात्स्पर्शनं गच्छेत्तत्र कुर्याद्विशोधनम् ३
गायत्र्यष्टसहस्रं तु द्रुपदां वा शतं जपेत्। जपंस्त्रिरात्रमनश्नन्पञ्चगव्येन शुध्यति ४
चाण्डालेन यदा स्पृष्टो विण्मूत्रे च कृते द्विजः। प्रायश्चित्तं त्रिरात्रं स्याद्भुक्तोच्छिष्टः षडाचरेत्[2] ५
पानमैथुनसंपर्के तथा मूत्रपुरीषयोः। संपर्कं[3] यदि गच्छेत्तु उदक्या चान्त्यजैस्तथा ६
एतैरेव यदा स्पृष्टः प्रायश्चित्तं कथं भवेत्। भोजने च त्रिरात्रं स्यात्पाने तु त्र्यहमेव च ७
मैथुने पादकृच्छ्रं स्यात्तथा मूत्रपुरीषयोः। दिनमेकं तथा मूत्रे पुरीषे तु दिनत्रयम् ८
एकाहं तत्र निर्दिष्टं दन्तधावनभक्षणे। वृक्षारूढे तु चाण्डाले द्विजस्तत्रैव तिष्ठति ९
फलानि भक्षयंस्तस्य कथं शुद्धिं विनिर्दिशेत्। ब्राह्मणान्समनुज्ञाप्य सवासाः स्नानमाचरेत्
एकरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति। येन केनचिदुच्छिष्टो अ(ब्र)मेध्यं स्पृशति द्विजः
अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ॥ १२

इत्यापस्तम्बीये चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः।)

चाण्डालेन यदा स्पृष्टो द्विजवर्णः कदाचन। अनभ्युक्ष्य पिबेत्तोयं प्रायश्चित्तं कथं भवेत्?
ब्राह्मणस्तु त्रिरात्रेण पञ्चगव्येन शुध्यति। क्षत्रियस्तु द्विरात्रेण पञ्चगव्येन शुध्यति ५
अहोरात्रेण वैश्यस्तु पञ्चगव्येन शुध्यति। चतुर्थस्य तु वर्णस्य प्रायश्चित्तं कथं भवेत् ६
व्रतं नास्ति तपो नास्ति होमो नैव च विद्यते। पञ्चगव्यं न दातव्यं तस्य मद्यविवर्जनात्[4] ४
ख्यापयित्वा द्विजानां तु शूद्रो दानेन शुध्यति। ब्राह्मणस्य यदोच्छिष्टमश्नात्यज्ञानतो द्विजः ५

---

१ ग. ज. °न्ति यद्विप्राः स्नानतीर्थफलं च तत्। स°। २ छ. स्नानं ती°। ३ छ. °तू। याने मै°। ४ क. घ. ङ. संसर्गे। ५ क. घ. ङ. शुद्धिर्विनि°। ६ क. ख. °णस्य त्रिरात्रं तु प°। ७ क. ख. घ. °यस्य द्विरात्रं तु प°। ८ क. ख. घ. ङ. °रात्रं तु वैश्यस्य प°। ९ ग. ज. °तं न वै भ°।

अहोरात्रं तु गायत्र्या जपं कृत्वा विशुध्यति।उच्छिष्टं वैश्यजातीनां भुङ्क्ते ज्ञानाद्द्विजो यदि शङ्खपुष्पीपयः पीत्वा त्रिरात्रेणैव शुध्यति। ब्राह्मण्या सह योऽश्नीयादुच्छिष्टं वा कदाचन न तत्र दोषं मन्यन्ते नित्यमेव मनीषिणः। उच्छिष्टमितरस्त्रीणामश्नीयात्स्पृशतेऽपि वा ८ प्राजापत्येन शुद्धिः स्याद्भगवानङ्गिरा*ब्रवीत्। अन्त्यानां भुक्तशेषं तु भक्षयित्वा द्विजातयः ९

चान्द्रायणं तदर्धार्धं ब्रह्मक्षत्रविशां विधिः। विण्मूत्रभक्षणे विप्रस्तप्तकृच्छ्रं समाचरेत् १० श्वकाकोच्छिष्टभोगे च प्राजापत्यविधिः स्मृतः। उच्छिष्टः स्पृशते विप्रो यदि कश्चिदकामतः ११

शुनः कुक्कुटशूद्रांश्च मद्यभाण्डं तथैव च। पक्षिणाऽधिष्ठितं यच्च यद्यमेध्यं कदाचन १२ अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति । वैश्येन च यदा स्पृष्ट उच्छिष्टेन कदाचन स्नानं जप्यं च त्रैकाल्यं दिनस्यान्ते विशुध्यति । विप्रो विप्रेण संस्पृष्ट उच्छिष्टेन कदाचन स्नानान्ते च विशुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ॥ १५

इत्यापस्तम्बीये पञ्चमोऽध्यायः ॥ ५ ॥

(अथ षष्ठोऽध्यायः ।)

अत ऊर्ध्वं प्रवक्ष्यामि नीलीशौचस्य यो विधिः । स्त्रीणां क्रीडार्थसंभोगे शयनीये न दुष्यति १

पालने विक्रये चैव तद्वृत्तेरुपजीवने। पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति २

स्नानं दानं जपो होमः स्वाध्यायः पितृतर्पणम्। पञ्च यज्ञा वृथा तस्य नीलीवस्त्रस्य धारणात् ३

नीलीरक्तं यदा वस्त्रं ब्राह्मणोऽङ्गेषु धारयेत्। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति रोमकूपैर्यदा गच्छेद्रसो नील्यास्तु कर्हिचित्। पतितस्तु भवेद्विप्रस्त्रिभिः कृच्छ्रैर्विशुध्यति नीलीदारु यदा भिन्द्याद्ब्राह्मणस्य शरीरकम्। शोणितं दृश्यते तत्र द्विजश्चान्द्रायणं चरेत् नीलीमध्ये यदा गच्छेत्प्रमादाद्ब्राह्मणः क्वचित्।अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति नीलीरक्तेन वस्त्रेण यदन्नमुपनीयते। अभोज्यं तद्द्विजातीनां भुक्त्वा चान्द्रायणं चरेत् ८ भक्षयेद्यस्तु नीलीं तु प्रमादाद्ब्राह्मणः क्वचित्। चान्द्रायणेन शुद्धिः स्यादापस्तम्बोऽब्रवीन्मुनिः ९

---

* अत्र संधिरार्षः ।

---

१ क. ख. घ. °दृगोभिश्च प्रा°। २ ग. ज स्नात्वाऽऽचम्य वि°। ३ ग. छ. ज. °लीवस्त्रस्य ।

*यावत्यां वापिता नीली तावती वाऽशुचिर्मही। प्रमाणं द्वादशाब्दानि अत ऊर्ध्वं शुचिर्भवेत् १०

इत्यापस्तम्बीये षष्ठोऽध्यायः ॥ ६ ॥

(अथ सप्तमोऽध्यायः ।)

स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते । वृत्ते रजसि गम्या स्त्री नानिवृत्ते कथंचन १
रोगेण यद्रजः स्त्रीणामत्यर्थं हि प्रवर्तते । अशुद्धास्तास्तु नैवेह तासां वैकारिको मदः २
साध्वाचारा[1] न तावत्सा रजो यावत्प्रवर्तते । वृत्ते रजसि साध्वी स्याद्गृहकर्मणि चेन्द्रिये ३
प्रथमेऽहनि चाण्डाली द्वितीये ब्रह्मघातिनी । तृतीये रजकी प्रोक्ता चतुर्थेऽहनि शुध्यति ४
अन्त्यजातिश्वपाकेन संस्पृष्टा वै रजस्वला । अहानि तान्यतिक्रम्य प्रायश्चित्तं प्रकल्पयेत्
त्रिरात्रमुपवासः स्यात्पञ्चगव्यं विशोधनम्[2] । निशां प्राप्य तु तां योनिमजाघ्रातां तु कारयेत्
रजस्वलाऽन्त्यजैः स्पृष्टा शुना च श्वपचेन च । त्रिरात्रोपोषिता भूत्वा पञ्चगव्येन शुध्यति
प्रथमेऽहनि षड्रात्रं द्वितीये तु त्र्यहस्तथा । तृतीये चोपवासस्तु चतुर्थे वह्निदर्शनात् ८
विवाहे वितते यज्ञे संस्कारे च कृते यदा[3] । रजस्वला भवेत्कन्या संस्कारस्तु कथं भवेत् ९
स्नापयित्वा तदा कन्यामन्यैर्वस्त्रैरलंकृताम् । पुनर्मैत्याहुतिं[4] हुत्वा शेषं कर्म समाचरेत् १०
रजस्वला तु संस्पृष्टा प्लवकुक्कुटवायसैः । सा त्रिरात्रोपवासेन पञ्चगव्येन शुध्यति ११
+रजस्वला तु या नारी अन्योन्यं स्पृशते यदि । तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति १२
उच्छिष्टेन तु संस्पृष्टा कदाचित्स्त्री रजस्वला । कृच्छ्रेण शुध्यते विप्रा शूद्रा दानेन शुध्यति
एकशाखां समारूढाश्चाण्डाली[5] वा रजस्वला । ब्राह्मणश्च समं तत्र सवासाः स्नानमाचरेत्
रजस्वलायाः संस्पर्शः कथंचिज्जायते शुना । रजोदिनानां यच्छेषं तदुपोष्य विशुध्यति
अशक्ता चोपवासे तु स्नानं पश्चात्समाचरेत् । तथाऽप्यशक्तौ[6] विवेकेन पञ्चगव्येन शुध्यति
उच्छिष्टस्तु यदा विप्रः स्पृशेन्मद्यं रजस्वलाम् । मद्यं स्पृष्ट्वा चरेत्कृच्छ्रं तदर्धं तु रजस्वलाम् १७

---

* एतद्वचनं न विद्यते क. घ. च. झ. पुस्तकेषु । + नैतद्वचनं ग. ज. झ पुस्तकेषु ।

---

१ ग. च. न सा तावद्रजो । २ ख. ग. च. छ. योनिं प्रजाकारं(रीं)च का° । ३ ख. ग. ज. तथा । ४ ग. पुनः प्रत्या° । ५ ख. °मैध्याहु° । ६ क. छ. °ण्डालो वा । ७ ग. तत्राप्य° । ८ ग. ज. °क्तौ वैकेन

ॐ तत्सद्ब्रह्मणे नमः ।

ॐ सामवेदाय नमः ।

गोभिलस्मृतिः ।

(तत्र प्रथमः प्रपाठकः ।)

अथातो गोभिलोक्तानामन्येषां चैव कर्मणाम्। अस्पष्टानां विधिं सम्यग्दर्शयिष्ये प्रदीपवत् १

त्रिवृद्ब्रह्मसूत्रं कार्यं तन्तुत्रयमधोधृतम्। त्रिवृत्तच्चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते २

पृष्ठवंशे च नाभ्यां च धृतं यद्विन्दते कटिम्। तद्धार्यमुपवीतं स्यान्मात्र(ति)लम्बं ननोच्छ्रितम् ३

सदोपवीतिना भाव्यं सदा बद्धशिखेन च। विशिखो व्युपवीतश्च यत्करोति न तत्कृतम् ४

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्। आस्यनासाक्षिकर्णांश्च* नाभिवक्षःशिरोंसकान्+ ५

अङ्गुष्ठेन प्रदेशिन्या घ्राणं चैवमुपस्पृशेत्। अङ्गुष्ठानामिकाभ्यां च चक्षुः श्रोत्रं पुनः पुनः ६

*कनिष्ठाङ्गुष्ठयोर्नाभिं हृदयं च तलेन वै। सर्वाभिस्तु शिरः पश्चाद्बाहुं चाग्रेण संस्पृशेत् ७

यत्रोपदिश्यते कर्म कर्तुरङ्गं न तूच्यते। दक्षिणस्तत्र विज्ञेयः कर्मणां पारगः करः ८

यत्र दिङ्नियमो न स्याज्जपहोमादिकर्मसु। तिस्रस्तत्र दिशः प्रोक्ता ऐन्द्रीसौम्यापराजिताः ९

तिष्ठन्नासीनः प्रहो वा नियमो यत्र नेदृशः। तदासीनेन कर्तव्यं न प्रहेण न तिष्ठता १०

गौरी पद्मा शची मेधा सावित्री विजया जया। देवसेना स्वधा स्वाहा मातरो लोकमातरः ११

धृतिः पुष्टिस्तथा तुष्टिरात्मदेवतया सह। गणेशेनाधिकास्त्वेता वृद्धौ पूज्याश्चतुर्दश (षोडश) १२

कर्मादिषु तु सर्वेषु मातरः सगणाधिपाः। पूजनीयाः प्रयत्नेन पूजिताः पूजयन्ति ताः १३

प्रतिमासु च शुभ्रासु लिखित्वा वा पटादिषु। अपि वाऽक्षतपुञ्जेषु नैवेद्यैश्च पृथग्विधैः १४

कुड्यलग्नां वसोर्धारां सप्तधारां घृतेन तु। कारयेत्पञ्चधारां वा नातिनीचां न चोच्छ्रिताम् १५

अनिष्ट्वा तु पितॄञ्श्राद्धे न कुर्यात्कर्म वैदिकम्। तत्रापि मातरः पूर्वं पूजनीयाः प्रयत्नतः

---

* अत्र कर्ण चेति भवितुं युक्तम्। मध्यमपदलोपी वा समासः। + अत्रापि नपुंसकप्रथमैकवचनान्तः पाठो युक्तः पूर्ववत्समासो वा। * तृतीयार्थे षष्ठी ज्ञेया।

आयुष्याणि च शान्त्यर्थं जप्त्वा तत्र समाहितः। षड्भ्यः पितृभ्यस्तदनु भक्त्या श्राद्ध-
मुपक्रमेत् १७
वसिष्ठोक्तो विधिः कृत्स्नो द्रष्टव्योऽत्र निरामिषः। अतः परं प्रवक्ष्यामि विशेष इह यो
भवेत् १८
प्रातरामन्त्रितान्विप्रान्युग्मानुभयतस्तथा। उपवेश्य कुशान्दद्याद्दक्षिणैव हि पाणिना १९
हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञिकाः। समूलाः पितृदै(दे)वत्याः कल्माषा वैश्व-
देविकाः २०
हरिता वै सपिञ्जूलाः शुद्धाः स्निग्धाः समाहिताः। रत्निमात्राः प्रमाणेन पितृतीर्थेन
संस्कृताः २१
पिण्डार्थे ये स्कृ(स्तृ)ता दर्भाः स्तरणार्थे तथैव च। धृतैः कृते च विण्मूत्रे त्यागस्तेषां
विधीयते २२
दक्षिणं पातयेज्जानु देवान्परिचरन्सदा। पातयेदितरज्जानु पितॄन्परिचरन्नपि २३
निपातो नैव सव्यस्य जानुनो विद्यते क्वचित्। सदा परिचरेद्भक्त्या पितॄनप्यत्र देववत्
पितृभ्य इति दत्तेषु उपवेश्य कुशेषु तान्। गोत्रनामभिरामन्त्र्य पितॄनर्घ्यं प्रदापयेत् २५
नात्रापसव्यकरणं न पित्र्यं तीर्थमिष्यते। पात्राणां पूरणादीनि दैवेनैव हि कारयेत् २६
ज्येष्ठोत्तरकरान्युग्मान्करानग्राग्रपवित्रकान्। कृत्वाऽर्घ्यं संप्रदातव्यं नैकैकस्य प्रदीयते २७
अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च। प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् २८
एतदेव हि पिञ्जूलया लक्षणं समुदाहृतम्। आज्यस्योत्पवनार्थं यत्तदप्येतावदेव तु २९
एतत्प्रमाणभेदैके कौशीमेवाऽऽर्द्रमञ्जरीम्। शुष्कां वा शीर्णकुसुमां पिञ्जूलीं परिचक्षते
पित्र्यमन्त्र्या(त्रा)नुद्रवण आत्मालम्भेऽधमेक्षणे। अधोवायुसमुत्सर्गे प्रहासेऽनृतभाषणे
मार्जारमूख(ष)करस्पर्शे आक्रु(क्रु)ष्टे क्रोधसंभवे। निमित्तेष्वेषु सर्वत्र कर्म कुर्वन्नपः स्पृशेत्
अक्रिया त्रिविधा प्रोक्ता विद्वद्भिः कर्मकारिणाम्। अक्रिया च परोक्ता च तृतीया चाय-
थाक्रिया ३३
स्वशाखाश्रयमुत्सृज्य परशाखाश्रयं च यः। कर्तुमिच्छति दुर्मेधा मोघं तत्तस्य चेष्टितम्
यन्नाऽऽम्नातं स्वशाखायां परोक्तमविरोधि च। विद्वद्भिस्तदनुष्ठेयमग्निहोत्रादिकर्मवत्
प्रवृत्तमन्यथा कुर्याद्यदि मोहात्कथंचन। यतस्तदन्यथाभूतं तत एव समापयेत् ३६
समाप्तं यदि जानीयान्मयैतदयथाकृतम्। तावदेव पुनः कुर्यान्नाऽऽवृत्तिः सर्वकर्मणः ३७

प्रधानस्याक्रिया यत्र साङ्गं तत्क्रियते पुनः। तदङ्गस्याक्रियायां च नाऽऽवृत्तिर्नैव तत्क्रिया
। धुपद्विति यस्तत्र त्रिर्जपोऽशितुमिच्छताम्। गायत्र्यनन्तरं सोऽत्र मधुमन्त्रविवर्जितः
न चाश्नत्सु जपेदत्र कदाचित्पितृसंहिताम्। अन्य एव जपः कार्यः सोमसामादिकः शुभः

यस्तत्र प्रक(कि)रोऽन्नस्य तिलम(व)यववत्तथा। उच्छिष्टसंनिधौ सोऽत्र तृप्तेषु विपरीतकः ४१
संपन्नमिति तृप्ताः स्थ प्रश्नस्थाने विधीयते। सुसंपन्नमिति प्रोक्ते शेषमन्नं निवेदयेत् ४२
प्रागग्रेष्वथ दर्भेषु आद्यमामन्त्र्य पूर्ववत्। अपः क्षिपेन्मूलदेशेऽवनेनिष्वेनि(ति) पात्रतः ४३
द्वितीयं च तृतीयं च मध्यदेशाग्रदेशयोः। मातामहप्रभृतींस्तु एतेषामेव वामतः ४४
सर्वस्मादन्नमुद्धृत्य व्यञ्जनैरुपसिच्य च। संयोज्य यवकर्कन्धुदधिभिः प्राङ्मुखस्ततः ४५
अवनेजनवत्पिण्डान्दत्त्वा बिल्वप्रमाणकान्। तत्पात्रक्षालनेनाथ पुनरप्यवनेजयेत् ४६
उत्तरोत्तरदानेन पिण्डानामुत्तरोत्तरम्। भवेदधश्चाधराणामधरश्राद्धकर्मणि ४७
तस्माच्छ्राद्धेषु सर्वेषु वृद्धिप्रतिस्वतरेषु च। मूलमध्याग्रदेशेषु ईषत्सिक्तांश्च निर्वपेत् ४८
गन्धादीनि क्षिपेत्तूष्णीं तत आवाहयेद्द्विजान्। अन्यत्राप्येष एव स्याद्यवादिरहितो विधिः ४९
दक्षिणाप्रवणे देशे दक्षिणाभिमुखस्य च। दक्षिणाग्रेषु दर्भेषु एषोऽन्यत्र विधिः स्मृतः
अथाग्रभूमिमासिञ्चेत्सुसंप्रोक्ष(क्षि)तमस्त्विति। शिवा आपः सन्त्विति च युग्मानेवोदकेन च ५१
सौमनस्यमस्त्विति च पुष्पदानमनन्तरम्। अक्षि(क्ष)तं चारिष्टं चास्त्वित्यक्षतान्प्रतिदापयेत् ५२
अक्षय्योदकदानं तु अर्घ(र्घ्य)दानवदिष्यते। षष्ठ्यैव नित्यं तत्कुर्यान्न चतुर्थ्या कदाचन
प्रार्थनासु[2] प्रतिप्रोक्ते सर्वास्वेव[3] द्विजोत्तमैः। पवित्रान्तर्हितान्पिण्डान्सिञ्चेदुत्तानपात्रकृत्
युग्मानेव स्वस्तिवाच्याङ्कुष्ठप्रश्नहेतत्सदा(?)। कृत्वा धुर्यस्य पित्र्यस्य प्रणम्यानुव्रजेत्ततः ५५
एष श्राद्धविधिः कृत्स्न उक्तः संक्षेपतो मया। ये विदन्ति[5] न मुह्यन्ति श्राद्धकर्मसु ते क्वचित्
इदं शास्त्रं च गुह्यं च परिसंख्यानमेव च। वसिष्ठोक्तं च यो वेद स श्राद्धं वेद नेतरः ५७
असकृद्यानि कर्माणि क्रियेरन्कर्मकारिभिः। प्रतिप्रयोगं नैताः स्युर्म(र)चिरश्राद्धं एव च
आधाने होमयोश्चैव वैश्वदेवे तथैव च। बलिकर्मणि दर्शे च पौर्णमासे तथैव च ५९
नवयज्ञे च यज्ञज्ञा वदन्त्येवं मनीषिणः। एकमेव भवेच्छ्राद्धमेतेषु न पृथक्पृथक्[6] ६०
नाष्टकासु भवेच्छ्राद्धं न श्राद्धे श्राद्धमिष्यते। न सोष्यन्तीजातकर्मण्योषितागतकर्मसु ६१

विवाहादि(दिः)कर्मगणो य उक्तो गर्भाधानपुंसवनान्तः (?)।
विवाहादावेकमेवात्र कुर्याच्छ्राद्धं नाऽऽदौ कर्मणः कर्मणः स्यात् ॥ ६२

---

१ क. °धस्वाधरा°। २ क. °र्थनां सुप्रतिप्रोक्तं स°। ३ क. °स्वेवं द्वि°। ४ ख. °हते सदा। ५ ख. ग. विन्दन्ति। ६ ख. ग. °द्धमेव।

प्रदोषे श्राद्धमेकं स्याद्दोनिष्कान्तप्रवेशयोः।न श्राद्धं युज्यते कर्तुं प्रथमे यु(पु)ष्टिकर्मणि६३
हलाभियोगादिषु तु षट्सु कुर्यात्पृथक्पृथक् । प्रतिप्रयोगमप्येषामादावेकं तु कारयेत् ६४
बृहत्पत्रक्षुद्रपशुस्त्रस्त्यर्थं परिविष्यतोः । सूर्येन्दोः कर्मणी ये तु तयोः श्राद्धं न विद्यते६५
गणशःक्रियमाणेषु मातृभ्यः पूजनं सकृत्।सकृदे(दे)व भवेच्छ्राद्धमादौ न प्र(पृ)थगादिषु
न दशाग्रन्थिकेनैव विषवद्दष्टकर्मणि । कृमिदष्टचिकित्सायां नैव शेषेषु विद्यते ६७
यत्र यत्र भवेच्छ्राद्धं तत्र तत्र च मातरः । प्रासङ्गिकमिदं प्रोक्तमतः प्रकृतमुच्यते ६८
आधानकाला ये प्रोक्तास्तथा याश्चाग्नियोनयः । तदाश्रयोऽग्निमादध्यादग्निमानग्रजो
यदि ६९
दाराधिगमनाधाने यः कुर्यादग्रजाग्रिमः । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ७०
परिवित्तिपर(रि)वेत्तारौ नरकं गच्छतो ध्रुवम् ।अपि चीर्णप्रायश्चित्तौ पादोनफलभागिनौ
देशान्तरस्थक्लीबैकवृषणानसहोदरान् । वेश्यातिसक्तपतितशूद्रतुल्यातिरोगिणः ७२
जडमूकान्धबधिरकुब्जवामनकुण्ठकान् । अतिवृद्धानभार्यांश्च कृषिसक्तान्नृपस्य च ७३
धनवृद्धिप्रसक्तांश्च कामतोऽकारिणस्तथा । कुलटोन्मत्तचौरांश्च परिविन्दन्न दुष्यति ७४
धनवार्धुषिकं राजसेवकं कर्मकं तथा । प्रोक्षि(षि)तं च प्रतीक्षेत वर्षत्रयमपि त्वरन् ७५
प्रोषितं यद्यशृण्वानस्त्वष्टादन्ते समाचरेत्(?) । आगते तु पुनस्तस्मिन्पादं वा शुद्धये चरेत्
लक्षणे प्राग्गनाथा(ताया)स्तु प्रमाणं द्वादशाङ्गुलम् । तन्मूलसक्ता योदीची तस्या एतन्न
चोत्तरम् ७७
उदग्गताया (याः)संलग्ना ज्ञेयाः प्रादेशमात्रिकाः । सप्तसप्ताङ्गुलानि स्युः कुशेनैव समु-
ल्लिखेत् ७८
मानक्रियायां युक्तायामनुक्ते मानकर्तरि । मानकृद्यजमान(नः)स्याव(द्वि)दुषामेव(ष)
निश्चयः ७९
पुण्यमेवाऽऽदधीताग्निं स हि सर्वैः प्रशस्यते । अनर्थुकत्वं यत्तस्य काम्यैस्तन्नीयते शमम्
यस्य दत्ता भवेत्कन्या वाचा सत्येन केवचित् । सोऽन्यां समिधमाधास्यन्नादधीतैव
नान्यथा ८१
अनूढैव तु सा कन्या पञ्चत्वं यदि गच्छति । न तथा व्रतलोपोऽस्य तेनैवान्यां समुद्वहेत्८२
अथ चेन्न लभेतान्यां याचमानोऽपि कन्यकाम् । तमग्निमात्मसात्कृत्वा क्षिप्रं स्यादुत्तरा-
ग्न्यपी ८३

---

१ क. °णे प्रग्ग° ।

*षष्ठी कण्डिका ॥ ६ ॥

अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः । तस्य या प्राङ्मुखी शाखा वोदीची चोर्ध्व-
गाऽपि वा ८४
अरणिस्तन्मयी प्रोक्ता तन्मध्ये चोत्तरारणिः । सारवद्वारवक्त्रम्वो(म्बू)बीली च प्रशस्यते
संसक्तमूलो यः शम्याः स शमीगर्भ उच्यते । आलभे त्वशमीगर्भाद्वारे देवा विल-
म्बितः(ताः)(?) ८६
चतुर्विंशतिरङ्गुष्ठा दैर्घ्ये षडपि पार्थिवम् । चत्वार उच्छ्रयो मानमरण्योः परिकीर्तितम्
अष्टाङ्गुलः प्रमन्थः स्याच्चत्रं स्याद्द्वादशाङ्गुलम् । ऊबीली द्वादशैव स्यादेतन्मन्थनयत्रकम्
अङ्गुष्ठाङ्गुलिमानं तु यत्र यत्रोपदिश्यते । तत्र तत्र बृहत्पर्व ग्रन्थिभिर्मनुयात्सदा ८९
गोबालैः शणसंमिश्रैस्त्रिवृद्वृत्तमनं स्वकम्(?) । व्यामप्रमाणं नेत्रं स्यात्प्रमथस्तेन पावकः
मूर्धाक्षिकर्णवक्त्राणि क्रन्धरा चापि पञ्चमी । अङ्गुष्ठमात्राण्येतानि व्यङ्गुष्ठं वक्ष उच्यते ९१
अङ्गुष्ठमात्रं हृदयं त्र्यङ्गुष्ठमुदरं स्मृतम् । एकाङ्गुष्ठा कटिर्ज्ञेया द्वौ बस्तिर्द्वौ च गुह्यकम् ९२
ऊरू जङ्घे च पादौ च चतुरङ्गेकैर्यथाक्रमम् । अरण्यवयवा ह्येते याज्ञिकैः परिकीर्तिताः
यत्तद्वृषेति प्रोक्तं देवयोनिस्तु सोच्यते । तस्यां यो जायते वह्निः स कल्याणकृदुच्यते
अन्येषु ये तु मथ्नन्ति ते रोगभयमाप्नुयुः । प्रथमे मन्थने स्वेष नियमो नोत्तरेषु च ९५
उत्तरारणिनिर्यत्रं प्रमथः सर्वदा भवेत् । योनिसंकरदोषेण युज्यते स्त्व(त्व)न्यमन्थकृत्
आर्द्रा सुसुखि(षि)रा चै(नै)व पूर्णाङ्गी पाटिता तथा । न हिता यजमानानामरण्ये(ण्य)-
श्चोत्तरारणिः ९७

कण्डिका सप्तमी ॥ ७ ॥

परिधायाहतं वासः प्राङ्मुख्त्य च यथाविधि । बिभृयात्प्राङ्मुखो यत्नमाहुत्ता(ता) ब्रह्म(ह्य)-
माणया ९८
यत्रबुध्ने प्रमन्थाग्रं गाढं कृत्वा विचक्षणः । कृत्वोत्तराग्रामरणिं न बुध्नमुपरि न्यसेत् ९९
यत्राग्रकीलकाग्रस्तामो(मू)बीलीमुदगग्रकाम् । विष्कम्भाद्वारयेद्यत्नं निष्कम्पं प्रयतः
शुचिः १००
अरुद्वेष्याथ नेत्रेण चित्रंपत्न्यौह तंसकाः(?) । पूर्वेमन्थस्त्वरण्यन्तेप्राच्यैग्नेः स्याद्यथा द्युतिः
नैकयाऽपि विना कार्यमाधानं भार्यया द्विजैः । अकृतं तद्विजानीयात्सर्वान्मा(ना)म्वार-
भन्ति यत्(?) १०२

---

* अन्यकण्डिकाविभागो न दृश्यते ।

---

१ क. ग. °रणी तन्मं । २ क. °ते । असं° । ३ ग. °ङ्गुष्ठदै° । ४ क. °ङ्गुलः । ऊं । ५ ख. °न्त्रप्रथमः सं° । ६ क. °टिना तं° । ७ ख. °णि तद्वध्नमु° । ८ क. ग. °प्रकम् । वि° । ९ क. ग. °च्यग्नेर्या° ।

वर्णज्यैष्ठ्ये(ष्ठ्ये)न वह्नीभिः सवर्णाभिश्च जन्मतः। कार्यमग्निच्युतेराभिः साध्वीभिर्मन्थनं पृथक् १०३

नात्र भूर्द्वीं प्रयुञ्जीत न द्रोहद्वेषकारिणीम्। न चैवाव्रतस्थां नान्यपुंसा च सह संगताम् ततः शक्ततरा पश्चादासामन्यतराऽपि वा। उपेतानां वाऽन्यतमो मन्थेदग्निं निकामतः जातस्य लक्षणं कृत्वा तं प्रणीय समिध्य च। आधाय समिधं चैव ब्रह्माणं चोपवेशयेत् ततः पूर्णाहुतिं हुत्वा सर्वतन्त्रसमन्वितम्। गां दद्याद्यज्ञवास्त्वन्ते ब्रह्मणे वाससी तथा होमपात्रमनादेशे द्रवद्रव्ये स्रुवः स्मृतः। पाणिरेवेतरस्मिंस्तु स्रुचै(चा)वाऽत्र तु हूयते खादिरो वाऽथ षा(पा)र्णो वा द्वितस्तिः स्रुवः स्मृतः। स्रुग्बाहुमात्रा विज्ञेया हुत्तस्तु प्रग्रहस्तयोः १०९

स्रुवाग्रे घ्राणवत्खातं व्यङ्गुष्ठं परिमण्डलम्। सर्वखातं स निर्वाहं स्रुचश्चार्धषडङ्गुलम्+११०

प्राक्प्रणश्चैव कुशैः कार्यः संप्रमार्गो जुहु(हू)षता। प्रतापनं च लिप्तानां प्रक्षाल्योष्णेन वारिणा १११

प्राञ्चं प्राञ्चमुदेङ्मेरुदग्गैग्रं समीपतः। तत्तथाऽऽसादयेद्द्रव्यं यद्यथा विनियुज्यते ११२

आज्यं हव्यमनादेशे जुहोतिषु विधीयते। तत्रश्च देवतायाश्च प्रजापतिरिति स्थितिः ११३

नाङ्गुष्ठादधिक(का)प्राज्ञा समित्स्थूलतया क्वचित्। न वियुक्ता त्वचा चैव न सकीटा न पाटिता ११४

प्रादेशान्नाधिका न्यूना न च(स)शाखाविशाखिका। न सपर्णा न निर्वीर्या होमेषु च विजानता ११५

प्रादेशद्वयमिध्मस्य प्रमाणं परिकीर्तितम्। एवंविधाभिरेवेह समिद्भिः सर्वकर्मसु ११६

समिधोऽष्टादशेध्मस्य प्रवदन्ति मनीषिणः। दर्शे च पौर्णमासे च क्रियास्त्व(स्व)न्यासु विंशतिः ११७

समिधादिषु होमेषु मन्त्रदैवतवर्जिताः। पुरस्ताच्चोपरिष्टाच्च इन्धनार्थं समिद्भवेत् ११८

इध्मोऽप्येषार्थमाचार्यैर्हविराहुतिषु स्मृतः। यत्र वाऽस्य निवृत्तिः स्यात्तत्स्पष्टीकरवाण्यहम् ११९

अन्नहोमसमित्तन्त्रसौष्ठा(ष्य)न्त्याख्येषु कर्मसु। येषां चैतदुपर्युक्तं तेषु तत्सदृशेषु च १२०

अक्षभङ्गादि विपदि जपहोमादिकर्मणि। कृत्वाऽऽहुतिषु सर्वासु नैतेष्विध्मो विधीयते

---

* एतदग्रे स्थलमित्यधिकमादर्शपुस्तकेषु। + एतदग्रे कुर्यादित्यधिकमादर्शपुस्तकेषु।

---

१ क. °देशाद्रव्यद्र°। २ ख. °दङ्मेरु°। ३ क. °गग्रस°। ४ क.ग. °ते। तत्रश्च। ५ क. °दशोध्या°। ६ ख. °मिदादि°। ७ क. सोर्ष्यात्याख्ये°। ८ ख. जलहो°।

सूर्येऽस्तशैलमप्राप्ते षट्त्रिंशाद्भिः सदाऽङ्गुलैः । प्रादुष्करणमग्नीनां प्रातर्भासां च दर्शनात्
हस्तादूर्ध्वं रविर्यावद्गिरिं हित्वा न गच्छति । तावद्धोमविधिः पुण्यो नान्येत्यु(न्योऽभ्यु)
दितहोमिनाम् १२३
यावत्सम्यङ्न भासन्ते नभस्यृक्षाणि सर्वतः । न च लोहितमापैति तावत्सायं न हूयते
रजोनीहारधूमाभ्रवृक्षाग्रान्तरिते रवौ । संध्यामुद्दिश्य जुहुयाद्व्रतमस्य न लुप्यते १२५
न कुर्यात्क्षिप्रहोमेषु द्विजः परिसमूहनम् । वैरूपाक्षं च न जपेत्प्रपदं च विवर्जयेत् १२६
पर्युक्षणं तु सर्वत्र कर्तव्यमदितेऽन्विति । अन्ते च वामदेव्यस्य गानं कुर्याच्चि(तृ)चेऽर्चिषा
अहोमकेष्वपि भवेद्यथोक्तं चन्द्रदर्शने । वामदेव्यं गणेष्वन्ते वल्यन्ते वैश्वदेविके १२८
यान्य(येष्व)धस्तरणान्नानं न तेषु स्तरणं भवेत् । एककार्यार्थसाध्यत्वात्परिधीनावि(पि)
वर्जयेत् १२९
बहिः पर्युक्षणं चैव वामदेव्यजपं तथा । कृत्वाऽऽहुतीषु सर्वासु त्रिकमेतन्न विद्यते १३०
हविष्येषु यवा मुख्यास्तदनु व्रीहयः स्मृताः । माषकोद्रवगौरादि सर्वालाभे विवर्जयेत्
पाण्याहुतिर्द्वादशपर्वपूरिका कंसादिना चेत्सु(त्स्रु)वपूरमात्रिका ।
दैवेन तीर्थेन च हूयते हविःष्वङ्गारिणि स्वर्चिषि तच्च पावके ॥ १३२
योऽनर्चिषि जुहोत्यग्नौ व्यङ्गारिणि च मानवः । मन्दाग्निरामयावी च दरिद्रश्च स जायते
तस्मात्समिद्धे होतव्यं नासमिद्धे कदाचन । आरोग्यमिच्छताऽऽयुश्च श्रियमात्यन्तिकीं
पराम् १३४
होतव्ये च हुते चैव पाणिशूर्पास्यदार्वीभिः । न कुर्यादग्निधमनं कुर्याद्वा व्यजनादिना १३५
मुखेनैके धमन्त्यग्निं मुखाज्ज्येष्ठोऽध्यजायत । नाग्निं मुखेनेति च यल्लौकिके योजयन्ति तत्
यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः । दन्तान्प्रक्षाल्य नद्यादौ गृहे चेत्तदमन्त्रवत्
नारदाद्युक्तवार्क्षं यदृष्टाङ्गुलमपो(पा)टितम् । सत्त्वचन्दनकाष्ठं स्यात्तदग्रेण प्रधावयेत् १३८
उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः । परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् १३९
आयुर्बलं यशो वर्चः प्रजां पशून्वसूनि च । ब्रह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते १४०
मासद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः । तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः
धनुःसहस्राण्यष्टौतुतोयं यासां न विद्यते । न तानदीशब्दवाहा(च्या) गर्तास्ते परिकीर्तिताः
उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चन्द्रसूर्यग्रहे चैव रजोदोषो न विद्यते १४३
वेदाश्छन्दांसि सर्वाणि ब्रह्माद्याश्च दिवौकसः । जलार्थिनोऽथ पितरो मरीच्याद्यास्त्व-
र्षयः १४४
उपाकर्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः । यियासूननुगच्छन्ति संहृष्टाश्च(श्च) शरीरिणः

---

१ क. ग. °र्यात्क्षप्रहो' । २ ख. °जपस्तथा ।

समागमस्तु यत्रैषां तत्र हत्यादयो मलाः । नूनं सर्वे क्षयं यान्ति किमुतैकं नदीरजः १४६
ऋषीणां सिच्यमानानामन्तरालं समाश्रितः । संपिबेद्यः शरीरेण पर्व(र्ष)न्मुक्तजलच्छदाः
विद्यादीन्ब्राह्मणः कामान्वरादीन्कन्यका ध्रुवम् । आमुष्मिकान्य(न)पि मुख्यानामु-
यात्स न संशयः १४८
अशुच्यशुचिना दत्तमांसैमृच्छं जलादिना(?) । अन्तर्गतदशाहास्तु प्रेता रक्षांसि भुञ्जते
स्वर्धुन्यम्भःसमानि स्युः सर्वाण्यम्भांसि भूतले । कूपस्थान्यपि सोमार्कग्रहणे नात्र
संशयः १५०

इति श्री[गोभिलप्रोक्ते]कर्मप्रदीपे प्रथमः प्रपाठकः ॥ १ ॥

(अथ द्वितीयः प्रपाठकः ।)

अत ऊर्ध्वं प्रवक्ष्यामि संध्योपासनकं विधिम् । अनर्हः कर्मणां विप्रः संध्याहीनो यतः
स्मृतः १
सव्ये पाणौ कुशान्कृत्वा कुर्यादाचमनक्रियाम् । ह्रस्वाः प्रचरणाय स्युः कुशा दीर्घास्तु
बर्हिषः २
दर्भाः पवित्रमित्युक्तमतः संध्यादिकर्मणि । सव्यः सोपग्रहः कार्यो दक्षिणः सपवित्रकः
रक्षयेद्वारिणाऽऽत्मानं परिक्षिप्य समन्ततः । शिरसो मार्जनं कुर्यात्कुशैः सोदकबिन्दुभिः
प्रणवो भूर्भुवः स्वश्च सावित्री च तृतीयका । अब्दैवतस्तृचश्चैव चतुर्थ इति मार्जनम् ५
भूराद्यास्तिस्र एवैता महाव्याहृतयोऽव्ययाः । महर्जनस्तपःसत्यं गायत्री च शिरस्तथा ६
आपो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरिति शिरः । प्रतिप्रतीकं प्रणवमुच्चारयेदन्ते शिरसः
अर्चयन्ति तपः सत्यं मधु क्षरंन्ति रिवि आपो०(?) । एता एनां सहानेन तथैभिर्दशभिः
सह ८
त्रिर्जपेदायतप्राणः प्राणायामः स उच्यते । करेणोद्धृतसलिलं घ्राणपासाद्य तत्र च ९
जपेदनायतासुर्वा त्रिः सकृद्वाऽघमर्षणम् । उत्थायार्कं प्रति प्रोहेत्रिकोणाञ्जलिमम्भसः
उद्धित्रमित्यृग्द्वयेन उपतिष्ठेदनन्तरम् । संध्याद्वयेषूपस्थानमेतदाहुर्मनीषिणः ११
मध्ये त्वह्न उपस्पर्शं(स्पृश्य) विभ्राडादीच्छया जपेत् । तदसंपृक्तपार्ष्णिर्वै(र्वा ए) कपाद-
र्धपादपि १०
कुर्यात्कृताञ्जलिर्वाऽपि ऊर्ध्वबाहुरथापि वा । यत्र स्यात्कृच्छ्रभूयस्त्वं श्रेयसोऽपि मनी-
षिणः १२

---

१ क. ग. तासां । २ ख. °माममृ । ३ क. °समच्छं । ४ ख. मनः सं । ५ ख. त्रिकेणा° ।

भूयस्त्वं ब्रुवते तत्र कृच्छ्राच्छ्रेयो ह्यवाप्यते । तिष्ठेदुदयनात्पूर्वां मध्यमामपि शक्तितः १४
आसीतास्तमयाच्चान्त्यां संध्यां पूर्वत्रिकं जपेत् । एतत्संध्यात्रयं प्रोक्तं ब्राह्मण्यं यत्र तिष्ठति १५
यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते । संध्यालोपाच्च चकितः स्नानशीलस्तु यः सदा १६
ते दोषा नोपसर्पन्ति गरुत्मन्तमिवोरगाः । वेदमादित आरभ्य शक्तितोऽहरहर्जपेत् १७
उपतिष्ठेत्ततो रुद्रमर्वाग्वा वैदिकाज्जपात् । अथाद्भिस्तर्पयेद्देवान्सतिलाभिः पितॄनपि नामान्ते तर्पयामीति आदावोमिति च ब्रुवन् ॥ १८

ब्रह्माणं विष्णुं रुद्रं प्रजापतिं वेदान्देवांश्छन्दांस्यृषीन्पुराणानाचार्यान्गन्धर्वानितरान् । मासं संवत्सरं सावयवं देवीरप्सरसो देवानुगान्नागान्सागरान्पर्वतान्सरितो दिव्यान्मनुष्यान्यक्षान्रक्षांसि सुपर्णान्पिशाचान्पृथिवीमोषधीभ्यः(धीः) पशून्वनस्पतीन्भूतग्रामं चतुर्विधमित्युपवीतीति ॥ १९ ॥ अथ प्राचीनावीती यमं यमपुरुषान्कव्यवाहानं(हम)नलं सोममर्यमणमग्निष्वात्तान्सोमपीथान्बर्हिषदोऽथ स्वान्पितॄन्सकृत्सकृन्मातामहांश्चेति प्रतिपुरुषमभ्यसेज्ज्येष्ठभ्रातृस्वसृ(श्वशु)रपितृव्यमातुलांश्च पितृवंशमातृवंशौ ये चान्ये मत्त उदकमर्हन्ति तांस्तर्पयामीति । अयमवसानाञ्जलिरथश्लोकः २०

छायां यथेच्छेच्छरदातपार्तः पयः पिपासुः क्षुधितोऽलमन्नम् ।
बालो जनित्रीं जननी च बालं योषित्पुमांसं पुरुषश्च योषाम् ॥ २१

तथा भूतानि सर्वाणि स्थावराणि चराणि च । विप्रादुदकमिच्छन्ति सर्वाभ्युदयकाङ्क्षिणः तस्मात्सदैतत्कर्तव्यमकुर्वन्महतैनसा । युज्यते ब्राह्मणः कुर्वन्विश्वमेतद्बिभर्ति हि २३
अल्पत्वाद्धोमकालस्य हुत्वा तत्स्नानकर्मणः । प्रातर्न तनुयात्स्नानं होमलोपो हि गर्ह(र्हि)तः २४
पञ्चानामथ सत्राणां महतामुच्यते विधिः । यैरिष्ट्वा सततं विप्रः प्राप्नुयात्सख्य शाश्वतम् देवभूतपितृब्रह्ममनुष्याणामनुक्रमात् । महासत्राणि जानीयात्त एवेह महामखाः २६
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् । होमो दैवो बलिर्भूतो(त) नृयज्ञोऽतिथिपूजनम् श्राद्धं वा पितृयज्ञः स्यात्पित्रोर्बलिरथापि वा । यश्च श्रुतिजपः प्रोक्तो ब्रह्मयज्ञः स वो(चो)च्यते २८
स चार्वाक्तर्पणात्कार्यः पश्चाद्वा प्रातराहुतेः । वैश्वदेवावसाने वा नान्यत्रेति निमित्तकात् अप्येकमाशयेद्विप्रं पितृयज्ञार्थसिद्धये । [1]अदैवं नास्ति चेदन्यो भोक्ता भोज्यमथापि वा

---

१ क. अदेवं ।

अप्युद्धृत्य यथा शक्त्या(क्ति) किंचिदन्यं(न्नं) यथाविधि। पितृभ्योऽथ मनुष्येभ्यो दद्या-
दहरहर्द्विजे ३१

पितृभ्य इदमित्युक्त्वा स्वधाकारमुदीरयेत्। हन्तकारं मनुष्येभ्यस्तदर्थे(र्थं) निनयेदपः
ऋषिभिर्द्वीरइमयुक्तं विप्राणां मर्त्यवासिनां नित्यम्।
अहनि तथा च तमश्वि(स्वि)न्याः सार्धप्रथमयामान्तः॥ ३३

सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च। अनश्नताऽर्थिमननमन्यथा किल्बिषी भवेत् ३४

अमुष्यै नम इत्येवं बलिदानं विधीयते। बलिदानः(न) प्रमाणार्थे नमस्कारः कृतो यतः
स्वाहाकारवषट्कारनमस्कारा दिवौकसाम्। स्वधाकारः पितॄणां च हन्तकारो नृणां कृतः
स्वधाकारेण निनयेत्पित्र्यं बलिमतः सदा। तदध्येके नमस्कारं कुर्वते नेति गौतमः ३७

नावराघ्र्या बलयो भवन्ति महामार्जारः। श्रवणः प्रमाणादेकत्र वेदविकृष्टा भवन्तीतरे-
तरमसंसक्ताश्च(?)॥३८॥अथ तद्विन्यासो वृद्धिपिण्डानिवोत्तरोत्तरांश्चतुरो बलीन्निदध्यात्
॥३९॥पृथिव्यै वायवे विश्वेभ्यो देवेभ्यः प्रजापतय इति सव्यत एतेषामेकैकस्यैकैकमग्र्य
ओषधिवनस्पतिभ्य आकाशाय कामायेत्येतेषामपि ॥४०॥ मन्यश्च(व) इन्द्राय वासुकये
ब्रह्मण इत्येतेषामपि रक्षोजनेभ्य इति ॥४१॥ सर्वेषां दक्षिणतः पितृभ्य इति चतुर्दश
नित्याः॥४२॥आसस्यप्रभृतयः काम्याः(?) ॥४३॥ सर्वेषामुभयतोऽद्भिः परिषेव(कः)
पिण्डवच्च पश्चिमात्प्रतिपत्तिर्ना(र्ने)स्याताम् ॥ ४४ ॥ काम्यसामान्ये जुहोतिबलिकर्मणि
पूर्वं नित्यविशेषोक्तं जुहोतिबलिकर्मणोः। काममन्ते भवेयातां न तु मध्ये कदाचन ४६

नैकस्मिन्कर्मणि तते कर्मान्यत्तायते यतः। अग्न्यादि गौतमाद्युक्तो होमः शाकल्य एव च
अनाहिताग्नेरप्येष युज्यते बलिभिः सह। स्पृष्ट्वाऽपो वीक्ष्य(क्ष)माणोऽग्निं कृताञ्जलिपु-
टस्ततः ४८

वामदेव्यजपात्पूर्वं प्रार्थये द्रविणोदकम्। आरोग्यमायुरैश्वर्यं धीर्धृतिः शं बलं यशः ४९

ओजो वर्चः पशून्वीर्यं ब्रह्म ब्राह्मणमेव च। सौभाग्यं कर्मसिद्धिं च कुलज्यैष्ठ्यं सुकृतृताम्
सर्वमेतत्सर्वसाक्ष्यं द्रविणोदररोहिणः(?)। ५१

न ब्रह्मयज्ञादधिकोऽस्ति यज्ञो न तत्प्रदानात्परमस्ति दानम्।
सर्वेऽन्तवन्तः क्रतवः सदाना नान्तो दृष्टः कैश्चिदस्य द्विजस्य॥ ५२

ऋचः पठन्मधुपयःकुल्याभिस्तर्पयेत्सुरान्। घृतामृतौघकुल्याभिर्यजूंष्यपि पठन्सदा ५३

सामान्यपि पठन्सोमघृतकुल्याभिरन्वहम्। मेदःकुल्याभिरपि वा अथर्वाङ्गिरसः पठन्
मांसक्षीरौदनमधुकुल्याभिस्तर्पयेत्पठन्। वाको वाक्यं पुराणानि इतिहासानि चान्वहम्

---

१ क. °इमयुक्तं। २ ग. °धेवं पि°।

ऋगादीनामन्यतमभेतेषां शक्तितोऽन्वहम् । पठन्मध्वाज्यकुल्याभिः पितॄनपि उद(सुत)-
र्पयेत् ५६
ते तृप्तास्तर्पयन्त्येनं जीवन्तं प्रेतमेव च । कामचारी सु(स)भवति सर्वेषु सुरसद्मसु ५७
गुर्वप्येनो न तं स्पर्शे(स्पृशे)त्पाङ्क्तं चैव पुनाति सः । यं यं क्रतुं च पठति फलभाक्तस्य
तस्य च ५८
वसुपूर्णा(र्ण)वसुमतीत्रिर्दानफलमाप्नुयात् । ब्रह्मयज्ञादपि ब्रह्मदानमेवातिरिच्यते ५९
तद्दद्धि समाप्नोति ब्रह्मलोकमविच्युतम् । ब्रह्मणे दक्षिणा देया यत्र या परिकीर्तिता
कर्मान्ते नोच्यमानाऽपि पूर्णयात्रादि कारयेत् । यावता बहुभोक्तुस्तु तृप्तिः पूर्णेन विद्यते
नावरार्ध्यमतः कुर्यात्पूर्णपात्रमिति स्थितिः । विद्ध्याद्धौत्रमन्यश्चेद्दक्षिणार्धहरो भवेत्
स्वयं चेदुभयं कुर्यादन्यस्मै प्रतिदापयेत् । कुलीनं(ज)मधीयानं संनिकृष्टं तथा गुरुम् ६३
नातिक्रामेत्सदा दित्सेन(द्य) इच्छेदात्मनो हितम् । अहमस्मै ददामीति एवमाभाष्य दीयते
नैतावपृष्ट्वा दातः पात्रेऽपि फलमस्ति हि । दूरस्थाभ्यामपि त्वाभ्यां प्रदाय मनसा वरम्
इतरेभ्यस्ततो देयादेष दानविधिः परः । संनिकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् ६६
यद्ददाति तमुल्लङ्घ्य तत्स्तेयेन स युज्यते । यस्य चास्ति गृहे मूर्खो दूरस्थश्च गुणान्वितः
गुणान्विताय दातव्यं नास्ति मूर्खे व्यतिक्रमः । ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते
ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते । आज्यस्थाली च कर्तव्या तैजसद्रव्यसंभवा
मही(मयी) वा कर्तव्या सर्वास्वाज्याहुतीषु च । आज्यस्थाल्याः प्रमाणं तु यथाकामं तु
कारयेत् ७०
सुदृढामव्रणां भद्रामाज्यस्थालीं प्रचक्षते । तिर्यगूर्ध्वं समिन्मात्रा दृढा नातिबृहन्मुखी ७१
मृन्मय्यौदुम्बरी वाऽपि चरुस्थाली प्रशस्यते । स्वशाखोक्तश्च सुस्निग्धो ह्यदग्धोऽकठिनः
शुभः ७२
न चातिशिथिलः पाच्यो न चरुश्चारसस्तथा । इध्मजातीयमिध्मार्धप्रमाणं मेक्षणं भवेत्
वृत्तं चाङ्गुष्ठपृथ्वग्रमवदानक्रियाक्षमम् । एषैव दर्वी यस्तत्र विशेषस्तमहं ब्रुवे ७४
दर्वी ह्यङ्गुष्ठपृथ्वग्रा तुरीयोनं तु मेक्षणम् । मुशलोलूखले चा(वा)र्से स्त्रायते सुदृढे तथा ७५
इच्छाप्रमाणे भवतः सू(शू)र्पे वैणवमेव च । दक्षिणं वामतो बाह्यमात्माभिमुखमेव च ७६
करं करस्य कुर्वीत करणे न्यञ्चकर्मणः । कृत्वाऽग्न्यभिमुखौ पाणी स्वस्थानस्थौ सुसंयुतौ
प्रदक्षिणं तथाऽऽसीनः कुर्यात्परिसमूहनम् । बाहुमात्राः परिधयः ऋजवः सत्त्वचोऽ-
व्रणाः ७८
त्रयो भवन्त्यशीर्णाग्रा एकेषां च चतुर्दशम् । प्रागग्रावभितः पश्चादुदगग्रमथापरम् ७९

---

१ क. ग. °योऽनृज°।

न्यसेत्परिधिमन्यश्चेदुदगग्रं स पूर्वतः। यथोक्तवस्तु(स्त्व)संपत्तौ ग्राह्यं तदनुकारि यत् ८०
यवानामिव गोधूमा व्रीहीणामिव शालयः। पिण्डान्वाहार्यकं श्राद्धं क्षीणे राजनि शस्यते
वासरस्य तुरीयेंऽशे नातिसंध्यासमीपतः। यदा चतुर्दशी यामं तुरीयमनुपूरयेत् ८२
अमावास्या क्षीयमाणा तदैव श्राद्धमिष्यते। यदुक्तं यदहस्त्वेव दर्शनं नैति चन्द्रमाः ८३
अमावास्याष्टमेंऽशे च पुनः किल भवेदणु । *आग्रहायण्यमावास्या तथा ज्येष्ठस्य या भवेत् ८४
विशेषमस्यां ब्रुवते चन्द्रचारविदो जनाः। अनयाऽपेक्षया ज्ञेयं क्षीणे राजनि चेत्यपि ८५
यच्चोक्तं दृश्यमानेऽपि तच्चतुर्दृश्यपेक्षया । अमावास्यां प्रतीक्षेद्वा तदन्ते वाऽपि निर्वपेत्
अष्टमेंऽशे चतुर्दृश्याः क्षीणो भवति चन्द्रमाः ॥ ८७

अत्रेन्दुराद्ये प्रहरेऽवतिष्ठेच्चतुर्थभागो न कलावशिष्टः।
तदन्त एव क्षयमेति कृत्स्न एवं ज्योतिश्चक्रविदो वदन्ति ॥ ८८
यस्मिन्नब्दे द्वादशैकश्च यव्यस्तस्मिंस्तृतीये परिदृश्य नोपजायते(?)।
एवं चारं चन्द्रमसो विदित्वा क्षीणे तस्मिन्नपराह्णे च दद्यात् ॥ ८९

संमिश्रा या चतुर्दृश्या अमावास्या क्वचिद्भवेत् । स्वर्वि(र्चि)तां तां विदुः केचिद्भताध्वामिति चापरे ९०
वर्धमानाममावास्यां लभेच्चेदपरेऽहनि। यामांस्त्रीनाधिकां वाऽ(कान्वाऽ)पि पितृयज्ञस्ततो भवेत् ९१
पक्षादावेव कुर्वीत सदा पक्षादिकं चरुम्। पूर्वाह्ण एव कुर्वन्ति विद्धेऽप्यन्ये मनीषिणः ९२
सपितुः पितृकृत्येष्व(त्येषु अ)धिकारो न विद्यते । न जीवन्तमतिक्रम्य किंचिद्दद्यादिति श्रुतिः ९३
पितामहो म्रियते च पितुः प्रेतस्य निर्वपेत्। पितुस्तस्य च वृत्तस्य जीवेच्च प्रपितामहः ९४
पितुः पितुः पितुश्चैव तस्यापि पितुरेव च। कुर्यात्पिण्डत्रयं यः स्यात्संस्थिता(तः) प्रपितामहः ९५
जीवन्तम(त्पिताऽ)पि दद्याद्वा प्रेतायान्नोदके द्विजः। पितुः पितृभ्यो वा देयात्सपितेत्यपरा श्रुतिः९६
पितामहः पितुः पश्चात्पञ्चत्वं यदि गच्छति।पौत्रेणैकादशाहानि(दि) कर्तव्यं श्राद्धषोडशम्
नैतत्पौत्रेण कर्तव्यं पुत्रवांश्चेत्पितामहः । पितुः सपिण्डतां कृत्वा कुर्यान्मासानुमासिकम्
असंस्कृतौ न संस्कार्यौ पूर्वौ पौत्रप्रपौत्रकैः । पितरस्तस्य संस्कुर्यादिति कात्यायनोऽब्रवीत् ९९

---

* नैतद्वचनं क. पुस्तके ।

---

१ क. ग. °णा न दं' ।

पापिष्ठमपि शुद्धेन शुद्धं पापकृताऽपि वा । पितामहेन पितरं संस्कुर्यादिति निश्चयः १००
ब्राह्मणादिहते ताते पतिते सङ्गवर्जिते । व्युत्क्रमाच्च मृते देयं येभ्य एव ददात्यसौ १०१
मातुः सपिण्डीकरणं पितामह्या सहोदितम् । यथोक्तेनैव कल्पेन पुत्रिकाया न चेत्सुतः
न योषिद्भ्यः पृथग्दद्यादवसानादिनाहते । स्वभर्तृपिण्डमात्राच्च तृप्तिरासां यतः स्मृता १०३
न योषयोः(षायाः)पतिर्दद्यादपुत्राया अपि क्वचित् । न पुत्रस्य पिता चैव नानुजस्य
तथाऽग्रजः १०४
मातुः प्रथमतः पिण्डे(ण्डं) निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः
पुरतो नाऽऽत्मनः कर्षूः सा पूर्वा परिकीर्त्यते । मध्यमा दक्षिणेनास्या तद्दक्षिणतदुत्तमाः(?)
वाय्वग्निदिङ्मुखान्तास्ताः कार्याः सार्धाङ्गुलान्तराः । तीक्ष्णान्ता यवमध्याश्च मध्यं
नाव इवोत्किरन् १०७
शङ्कुश्च खादिरः कार्यो रजतेन विभूषितः । शङ्कुश्चैवोपवेषश्च द्वादशाङ्गुल इष्यते १०८
अग्न्याशाग्रैः कुशैः कार्यं कर्षूणां स्तरणं धनैः । दक्षिणान्तां तदंयै(दन्यै)स्तु पितृयज्ञे परि-
स्तरेत् १०९
स्थगरं(नं) सुरभि ज्ञेयं चन्दनादिविलेपनम् । सौवीराञ्जनमप्युक्तं पिञ्जूलीनां यदञ्जनम्
स्वस्तरे सर्वमासाद्यं यथा यदुपयुज्यते । दैवपूर्वमतः श्राद्धमत्वरः शुचिरारभेत् १११
आसनाद्यर्घपर्यन्तं वसिष्ठेन यथेरितम् । कृत्वा कर्माथ पात्रेषु उक्तं दद्यात्तिलोदकम् ११२
तूष्णीं पृथगपो दत्त्वा मन्त्रेण तु तिलोदकम् । गन्धोदकं च दातव्यं संनिकर्षक्रमेण तु ११३
आसुरेण तु पात्रेण यस्तु दद्यात्तिलोदकम् । पितरस्तस्य नाश्नन्ति दश वर्षाणि पञ्च च
कुलालचक्रनिष्पन्नमासुरं मृन्मयं स्मृतम् । तदेव हस्तं(स्त) घटितं स्थालादि दैवकं भवेत्
गन्धान्ब्राह्मणसात्कृत्वा पुष्पाण्यृतुभवानि च । धूपं चैवाऽऽनुपूर्वे(र्व्ये)ण अग्नौ कुर्यादन-
न्तरम् ११६
अग्नौकरणहोमश्च कर्तव्य उपवीतिना । प्राङ्मुखेनैव दैवेभ्यो जुहोतीति श्रुतिश्रुतेः ११७
अपसव्येन वा कार्या(र्यो) दक्षिणाभिमुखेन च । निरुप्य हविरन्यस्मादन्यस्मै न हि हूयते
स्वाहा कुर्यान्न चात्रान्ते न चैव जुहुयाद्धविः । स्वाहाकारेण हुत्वाऽग्नौ पश्चान्मन्त्रं समाप-
येत् ११९
पित्रे(त्र्ये)ण पङ्क्तिमूर्धन्यस्तस्य पाणावनग्निमान् । हुत्वा मन्त्रवदन्येषां तूष्णीं पात्रेषु निक्षि-
पेत् १२०
नो कुर्याद्धोममन्त्राणां प्रथमादिषु कुत्र चित् । अन्येषां चाविकृष्टानां कालेनाऽऽचमना-
दिना(?) १२१

---

१ क. ग. °णां पृथगादि° ।

सव्येन पाणिनेन्यै(त्ये)वं यदन्नं समुदीरितम् । परिग्रहणमात्रं तत्सव्यस्याऽऽदिशति व्रतम् १२२

पिञ्जूल्यादिभि(भिः)संगृह्य दक्षिणेनेतरात्करात् । अन्वारभ्य च सव्येन कुर्यादुल्लेखनादिकम् १२३

यावदर्थमुपादाय हविषोऽर्भकमर्भकः(?)[1][2]। चरुणा सह संनीय पिण्डान्दातुमुपक्रमेत् १२४

पितुरुत्तरकर्षे(र्षी)शे मध्यमे मध्यमस्य तु। दक्षिणे तु पितुश्चैव पिण्डान्पर्वणि निर्वपेत् १२५

वाममावर्तनां केचिदुदगन्तं प्रचक्षते । सर्वौ गौतमशाण्डिल्यौ शाण्डिल्यायन एव च(?)

आवृत्य प्राणमायम्य पितॄन्ध्यायन्यथार्थतः । जपंस्तेनैव त्वावृत्य ततः प्राणं प्रमोचयेत्

शाकं च फाल्गुनाष्टम्यां स्वयं पत्न्यपि वा पचेत्[3]। यस्तु शाकादिहोमश्च कार्योऽपूपाष्टकावृता १२८

अन्वष्टक्यं मध्यमायामिति गोभिलगौतमौ। वार्कषण्डिश्च[4] सर्वासु कौत्सो मेनेऽष्टकासु च

स्थालीपाकं पशुस्थाने कुर्याद्यद्यानुकल्पित(क)म् । श्रपयेत्तं सवत्सायास्तरुण्या गोः पयस्थतु(स्तथा) १३०

सायमादि प्रातरन्तमेकं कर्म प्रचक्षते । दर्शान्तं पौर्णमासाद्यमेकमेव मनीषिणः १३१

ऊर्ध्वं पूर्णाहुतेर्दर्शः पौर्णमासोऽपि वाऽग्रिमः।य आयाति स होतव्यः स एवाऽऽदिरिति श्रुतेः १३२

ऊर्ध्वं पूर्णाहुतेः कुर्यात्सायंहोमादनन्तरम् । वैश्वदेवं तु पाकान्ते बलिकर्मसमन्वितम्

ब्राह्मणान्भोजयेत्पश्चादभिरूपांश्च शक्तितः।यजमानस्ततोऽश्नीयादिति कात्यायनोऽब्रवीत् १३४

वैवाहिकेऽग्नौ कुर्वीत सायंप्रातस्त्वतन्द्रितः। चतुर्थीकर्म कुर्वीत एतच्छाट्यायनेर्मतम् १३५

ऊर्ध्वं पूर्णाहुतेः प्रातर्हुत्वा तां सायमाहुतिम् । प्रातर्होमं ततः कुर्यादेष एवोत्तरो विधिः

सायं होमात्यये प्रातर्हुत्वा तां सायमाहुतिम् । प्रातर्होमं ततः कुर्यादेष एवोत्तरो विधिः

पौर्णमासात्यये हव्यं होता वा यदहर्भवेत् । तदहर्जुहुयादेवममावास्यात्ययेऽपि च १३८

अहूयमानेऽनश्नंश्चेन्नयेत्कालं समाहितः । संपन्ने तु यथा तत्र हूयते तदिहोच्यते १३९

अहुताः परिसंख्याय पात्रे कृत्वाऽऽहुतीः सकृत्। मन्त्रेण विधिवद्धुत्वा एवमेव परा अपि

यत्र व्याहृतिभिर्होमः प्रायश्चित्तार्थको भवेत् । चतस्रस्तत्र विज्ञेयाः स्त्रीपाणिग्रहणे यथा

अपि वाऽज्ञातमप्येषा प्राजापत्याऽपि चाऽऽहुतिः। होतव्या त्रिविकल्पोऽयं प्रायश्चित्तविधिः स्मृतः १४२

---

१ क. °षोभकम°। २ ख. °र्भकम्। च°। ग. °र्भक। च°। ३ ख. °पयेत्। य°। ४ क. वार्षषण्डि°।

यद्यग्निरग्निनाऽन्येन संभवेदाहितः क्वचित् । अग्नये विविचय इति जुहुयाद्वा घृताहुतिम्
अग्नये शुचये चैव जुहुयाद्वैद्युतेन च । अग्नयेऽप्सुमते चैव जुहुयाच्चेद्रु(हु)रग्निना १४४
गृहदाहाग्निना यस्तु यष्टव्यः क्षामवान्द्विजैः । दावाग्निना च संसर्गो हृदयं यदि तप्यते
द्विर्भूतो यदि संसृज्येत्संस्पृष्टमुपशामयेत् । असंसृष्टं जागरये गिरिशर्मैवमुक्तवान् १४६
न स्वेऽग्नावन्यहोमः स्यान्मुक्त्वैकां समिदाहुतिम् । स्वं भगसत्क्रियार्थाश्च यावच्चा(च्चा)[1][2]
सौ प्रजायते (?) १४७
अग्निस्तु नामधेयादौ होमे सर्वत्र लौकिकः । न हि पित्रा समानीतः पुत्रस्य भवति क्वचित्
यस्याग्नावन्यहोमः स्यात्स वैश्वानरदैवतम् । चरुं निरुप्य जुहुयात्प्रायश्चित्तं तु तस्य तत्
परेणाग्नौ हुते स्वार्थं परस्याग्नौ हुते स्वयम् । पितृयज्ञात्यये चैव वैश्वदेवद्वयस्य च १५०
अनिष्ट्वा नवयज्ञेन नवान्नप्राशनेन च । भोजने पतितान्नस्य चरुर्वैश्वानरो भवेत् १५१
स्वपितृभ्यः पिता दद्यात्सुतसंस्कारकर्मसु । पिण्डानोद्वहनात्तेषां तस्याभावे तु तत्क्रमात् १५२
भूतप्रवाचने पत्नी यद्यसंनिहिता भवेत् । रजोरोगादिना तत्र कथं कुर्वन्ति याज्ञिकाः
माहानसेऽन्नं या कुर्यात्सवर्णां तां प्रवाचयेत् । प्रणवाद्यपि वा कुर्यात्कात्यायनवचो यथा
यज्ञवास्तुनि मुष्ट्यां च स्तम्बे दर्भच(ब)टौ तथा । दर्भसंख्या न विहिता विष्टरास्तरणेषु च
निक्षिप्याग्निं स्वदारेषु परिकल्प्याऽऽर्त्विजं तथा । प्रवसेत्कार्यवान्विप्रो मृषैव[3] न चिरं क्वचित् १५६
मनसा नैत्यकं कर्म प्रवसन्नप्यतन्द्रितः । उपविश्य शुचिः सर्वं यथाकालमनुद्रवेत् १५७
पत्न्या चाप्यवियोगिन्या शुश्रु(श्रू)ष्योऽग्निर्विनीतया । सौभाग्यवित्ताऽवैधव्यकामया भर्तृभक्तया १५८
या वा स्याद्वीरसूरासामाज्ञासंपादिनी प्रिया । दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत्
दिनक्रमेण वा कर्म यथाज्येष्ठं स्वशक्तितः । विभज्य सह वा कुर्युर्यथाज्ञानमशाठ्यवत्
स्त्रीणां सौभाग्यतो ज्यैष्ठ्यं विद्यया[4]व द्विजन्मनाम् । न हि स्वल्पेन तपसा भर्ता तुष्यति योषिताम् १६१
भर्तुरादेशवर्तिन्या यथोमा बहुभिर्व्रतैः । अग्निश्च तोषितोऽमुत्र सा स्त्री सौभाग्यमाप्नुयात् १६२
श्रोत्रियं सुभगां गां वा साग्निमग्निचितिं यथा । प्रातरुत्थाय यः पश्येदापद्यः स प्रमुच्यते
विनयावनताऽपि स्त्री भर्तुर्या दुर्भगा भवेत् । अमुत्रोमाग्निभर्तॄणामवज्ञाऽतिकृता तया

---

१ क. °यार्थश्च । २ ख. ग. °वन्वासौ । ३ क. मृषेव ।

पापिष्ठं दुर्भगामन्त्यं नग्नमुत्कृत्तनासिकम् । प्रातरुत्थाय यः पश्येत्स कालरु(उ)पयुज्यते
पतिमुल्लङ्घ्य मोहात्स्त्री कं कं न नरकं व्रजेत् । कृच्छ्रान्मानुषतां प्राप्य किं किं दुःखं न
पश्यति १६६
पतिशुश्रूषयैव स्त्री सर्वाल्लोकान्समश्नुते । दिवः पुनरिहाऽऽयाता सुखानामम्बुधिर्भवेत्
स्व(स)दारोऽन्यान्पुनर्दारान्कथंचित्कारणान्तरात् । यदिच्छेदग्निमान्कर्तुं द्युहोमोऽस्य
विधीयते १६८
स्वेऽग्नावेव भवेद्धोमो लौकिके न कदाचन । न ह्याहिताग्नेः स्वं कर्म लौकिकेऽग्नौ विधीयते
षडाहुतिकमन्ये तु जुह्वत्याध्रुवदर्शनात् । न ह्यात्मनाऽर्थं(र्थः) स्यात्तावद्यावन्न परिणीयते
पुरस्ताद्विविकल्पो(ल्पं) यत्प्रायश्चित्तमुदाहृतम् ।तत्षडाहुतिकं शिष्टैर्यज्ञविद्भिः प्रकीर्तितम्

इति [गोभिलप्रोक्ते] श्रीकर्मप्रदीपे द्वितीयः प्रपाठकः ॥ २ ॥

(अथ तृतीयः प्रपाठकः ।)

असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना । द्वयोरप्यसमक्षं हि भवेद्धुतमनर्थकम् १
विहायाग्निं सभार्यश्चेत्सीमामुल्लङ्घ्य गच्छति । होमकालात्यये तस्य पुनराध्मा(धा)
नमिष्यते २
अरण्यो(ण्योः)क्षयनाशाग्निदाहेष्वग्निं समाहितः । पालयेदुपशान्तेऽस्मिन्पुनराधानमि-
ष्यते ३
ज्येष्ठा चेद्बहुभार्यस्य अतिचारेण गच्छति । पुनराधानमत्रैक इच्छन्ति न तु गौतमः ४
दाहयित्वाऽग्निभिर्भार्यां सदृशीं पूर्वसंस्थिताम् । पात्रैश्चाथाग्निमादध्यात्कृतदारोऽविल-
म्बितः ५
एवंवृत्तां सवर्णां स्त्रीं द्विजातिः पूर्वसारिणीम् । दाहयित्वाऽग्निहोत्रेण यज्ञपात्रैश्च धर्म-
वित्+ ६
द्वितीयां चैव यः पत्नीं दहेद्वैतानिकाग्निभिः । जीवन्त्यां प्रथमायां तु ब्रह्महत्येन समं हि तत्
मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् । ब्रह्मोज्झं[1] तं विजानीयाद्यस्य(श्च) कामा-
त्समुत्सृजेत् ८
मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत् । उपाधिनाऽपि तत्कर्म यावज्जीवं समा-
पयेत् ९

+ एतदग्रे " अत्र विषयज्येष्ठा समानवर्णा इति " इत्यधिकं सकलादर्शपुस्तकेषु ।

---

१ क. °तमम् । दा° । २ ख. तु सुरापान° । ३ क. ग. °ह्मोद्वतं ।

रामोऽपि कृत्वा सौवर्णे[र्णी] सीतां पत्नीं यशस्विनीम् । ईजे यज्ञैर्बहुविधैः सह भ्रातृभिरर्चितैः १०

यो दहेदग्निहोत्रेण स्वेन भार्यां कथंचन । स स्त्री संपद्यते तेन भार्या चास्य पुमान्भवेत् ११
भार्यां मरणमापन्ना देशान्तरगताऽपि वा । अधिकारी भवेत्पुत्रो महापातकिनि द्विजे १२
मान्या चेन्म्रियते पूर्वं भार्या पतिविमानिता।त्रीणि जन्मानि सा पुंस्त्वं पुरुषः स्त्रीत्वमर्हति
पूर्वैव योनिः पूर्वावृत्पुनराधानकर्मणि । विशेषोऽत्राग्न्युपस्थानमाज्याहुत्यष्टकं तथा १४
कृत्वा व्याहृतिहोमान्त उपतिष्ठेत पावकम् । अध्यायः केवलाग्नेयः कस्ते जामिरमानसः
अग्निमीडेऽग्न आयाहि अग्न आयाहि वीतये । तिस्रोऽग्निर्ज्योतिरित्याग्निं दूतमग्ने मृडेति च
इत्यष्ट वाऽऽहुतीर्हुत्वा यथाविध्यनुपूर्वशः । पूर्णाहुत्यादिकं कर्म अन्यत्पूर्ववदाचरेत् १७
अरण्योरल्पमप्यङ्गं यावत्तिष्ठति पूर्वयोः । न तावत्पुनराधानमन्यारण्योर्विधीयते १८
विनष्टं स्रुक्स्रुवं न्युब्जं प्रत्यक्स्थालमुदर्चिषि । प्रत्यग्रं च मुशलं प्रहरेज्जातवेदसि १९
स्वयं होमासमर्थस्य समीपमुपसर्पणम् । तत्राप्यस (श)क्तस्य सतः शयनाच्चोपवेशनम् २०
हुतायां सायमाहुत्यां दुर्बलश्चेद्गृही भवेत् । प्रातर्होमस्तदैव स्याज्जीवेच्चेच्छः पुनर्न वा २१
दुर्बलं स्नापयित्वा तु शुद्धचैलाभिसंवृतम् । दक्षिणाशिरसं भूमौ बर्हिष्मत्यां निवेशयेत्
घृतेनाभ्यु(भ्य)क्तमाघ्राप्य सुवस्त्रमुपवीतिनम् । चन्दनोक्षितसर्वाङ्गं सुमनोभिर्विभूषयेत्
हिरण्यशकलान्यस्य क्षिप्त्वा छिद्रेषु सप्तसु । मुख्येष्वथापिधायैनं निर्हरेयुः सुतादयः
आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरम् । एको ऽन(नु)गच्छन्नस्यार्धमर्धं पथ्युत्सृजेद्भुवि
ऊर्ध्वमादहनं प्राप्त आसीनो दक्षिणामुखः।सव्यं जान्वाच्य शनकैः सतिलं पिण्डदानवत्
अथ पुत्रादिनाऽऽप्लुत्य कुर्याद्दारुचयं महत् । भूप्रदेशे शुचौ देशे पश्चाच्चित्यादिलक्षणे २७
तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे । आज्यपूर्णां स्रुचं दद्याद्दक्षिणाग्रां नसि स्रुवम्
पादयोरधरां प्राचीमरणीमुरसीतराम् । पार्श्वयोः शूर्पचमसे सव्यदक्षिणयोः क्रमात् २९
मुशलेन सह न्युब्जमन्तरूर्वोरुलूष(ख)लम् । तत्रोवीलीकमत्रैव(त्रे च) अनश्रुनयनो विभीः ३०
अपसव्येन कृत्वैतद्वाग्यतः पितृदिङ्मुखः । अथाग्निं सव्यजान्वक्तो दद्याद(द्द)क्षिणशः शनैः ३१
अस्मात्त्वमधिजातोऽसि त्वदयं जायतां पुनः । असौ स्वर्गाय लोकाय स्वाहेति यजुरीरयन् ३२
एवं गृहपतिर्दग्धः सर्वं तरति दुष्कृतम् । यश्चैनं दाहयेत्सोऽपि प्रजां प्राप्नोत्यनिन्दिताम्
यथा सायुधधृक्पान्थो ह्यरण्यान्यपि निर्भयः । *अतिक्रम्याऽऽत्मनोऽभीष्टं स्थानमिष्टांश्च विन्दति ३४

---

* एतद्वचनं न. क पुस्तके ।

एवमेषोऽग्निमान्यज्ञपात्रायुधविभूषितः । लोकानन्यानतिक्रम्य परं ब्रह्मैव विन्दति ३५
अथानपेक्षयेत्पापः सर्व एव शवस्पृशः(?)।स्नात्वा सचैलमाचम्य दद्युरस्योदकं स्थले ३६
गोत्रनामानुवाक्यं ते तर्पयामीत्यनन्तरम् । दक्षिणाग्रान्कुशान्कृत्वा सतिलं[1] पिण्डदानवत्
एवं कृतोदकान्सम्यक्सर्वाञ्शाद्वलसंस्थितान् । आप्लुत्य पुनराचान्तान्वदेयुस्तेऽनुयायिनः ३८
मा शोकं कुरुतानित्ये सर्वस्मिन्प्राण(णि)धर्मणि । धर्मं कुरुत यत्नेन यो वः सह गमिष्यति ३९
मानुष्ये कदलीस्तम्भनिःसारे सारमार्गणम् ।करोति यः स संमूढो जलबुद्बुदसंनिभे ४०
गन्त्री वसुमती नाशमुदधिर्दैवतानि च । के(फे) नप्रख्यः कथं नाशं मर्त्यलोको न यास्यति
पञ्चधा संभृतः कायो यदि पञ्चत्वमागतः । कर्मभिश्च शरीरोत्थैस्तत्र का परिदेवना ४२
सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः । संयोगा विप्रयोगान्ता मरणान्तं हि जीवितम् ४३
श्लेष्माश्रु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः । अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ४४
एवमुक्त्वा व्रजेयुस्ते गृहाल्लँघुपुरःसराः । स्नानाग्निः(ग्नि)स्पर्शनो(ने)ज्याशैः[3](द्यैः)शुद्धे-(ध्ये)युरितरे कृतैः ४५
एवमेवाऽऽहिताग्नेस्तु पात्रन्यासादिकं भवेत् । कृष्णाजिनादिकश्चात्र विशेषोऽध्वर्युनो[4]दितः ४६
विदेशमरणेऽस्थीनि आहृत्याभ्यज्य सर्पिषा । दाहयेदूर्णयाऽऽच्छाद्य पात्रन्यासादि पूर्ववत् ४७
अस्थ्नामलाभे पार्णानि शकलान्युक्तयोऽऽहृता । भर्जयेदस्थिसंख्यानि ततः प्रभृति सूतकम् ४८
महापातकसंयुक्तो दैवात्स्यादग्निमान्यदि ।पुत्रादिः पालयेदग्नीन्युक्त आदोषसंक्षयम् ४९
प्रायश्चित्तं ततः कुर्यात्कुर्वन्वा म्रियते यदि । गृह्यं निर्वापयेच्छ्रौतमश्वस्ये(न्यश्वे)त्सपरिच्छदम् ५०
सादयेदुभयं वाऽप्सु अद्भ्योऽग्निरभवद्यतः । पात्राणि दद्याद्विप्राय दहेदप्स्वेव वा क्षिपेत्
अनयैवा[6]ऽऽहृता नारी दग्धव्या या व्यवस्थिता । अग्निप्रदानमन्त्रोऽस्या न प्रयुज्य.
इति स्थितिः ५२

---

१ ख. 'न्तरः । द' । २ ख. °लं तु पृथक्पृथक् । ए' । ३ क. ग. °शैर्युद्धे' । ४ ख. °शेषः सूत्रचोदि° । ५ क. °याहृता । ग. °याहृत' । ६ क. 'वाहृता ।

अग्निनैव दहेद्भार्यां स्वतन्त्रां पतितां न चेत् । तदुत्तरेण पात्राणि दाहयेत्पृथगन्तिके ५३
अपरेद्युस्तृतीये वा अस्थ्नां संचयनं भवेत् । यस्तत्र विधिना(रा)दिष्ट ऋषिभिः सोऽधुनोच्यते ५४
स्नानान्तं पूर्ववत्कृत्वा गव्येन पयसा ततः । संच(ची)यास्थीनि सर्वाणि प्राचीनावीत्यभाषयन् ५५
शमीपलाशशाखाभ्यामुद्धृत्योद्धृत्य भस्मतः । आज्येनाभ्यज्य गव्येन सेचयेद्गन्धवारिणा
मृत्पात्रसंपुटे कृत्वा सूत्रेण परिवेष्ट्य च । श्वभ्रं स्ना(खा)त्वा शुचौ भूमौ निखनेद्दक्षिणामुखः ५७
पूरयित्वाऽवटं पङ्क्तिपिण्डं से(शै)वालसंयुतम् । दत्त्वोपरि समं शेषं कुर्यात्पूर्वाह्णकर्मणा ५८
एवमेवाग्रहीताग्नेः प्रेतस्य विधिरिष्यते । स्त्रीणामिवाग्निदानं स्यादथातोऽनुक्त उच्यते
सूतके कर्मणां त्यागः संध्यादीनां विधीयते । होमः श्रौते तु(तस्तु) कर्तव्यः शुष्कान्नेनापि वा फलैः ६०
अकृतं हावयेत्स्मार्ते तदभावे कृताकृतम् । कृतं वा हावयेदन्नमनारम्भविधानतः ६१
कृतमोदनसक्त्वादि तण्डुलादि कृताकृतम् । व्रीह्यादि वा कृतं प्रोक्तमिति हव्यं त्रिधा बुधैः ६२
सूतके च प्रवासे वा शक्तौ वा श्राद्धभोजने । एवमादिनिमित्तेषु हावयेद्वेति योजयेत् ६३
न त्यजेत्सूतके कर्म ब्रह्मचारी स्वकं क्वचित् । न दीक्षिण्यात्परं(?) यज्ञे न कुच्छ्रादि तपश्चरन् ६४
पितर्यपि मृते नैषां दोषो भवति कर्हिचित् । आशौचं कर्मणोऽन्ते स्याद्यद्वा ब्रह्मचारिणः
श्राद्धमग्निमतः कार्यं दाहादेकादशेऽहनि । प्रत्याब्दिकं प्रकुर्वीत प्रमीताहनि सर्वदा ६६
द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा । सपिण्डीकरणं चैव एतद्वै श्राद्धषोडशम्
एकाहेन तु षण्मासा यदा स्युरपि वा त्रिभिः । न्यूनाः संवत्सराश्चै(च्चै)व स्यातां षाण्मासिके तथा ६८
यानि पञ्चदशाऽऽद्यानि अपुत्रस्येतराण्यपि । एकस्मिन्नह्नि देयानि सपुत्रस्यैव सर्वदा
न योषायाः पतिर्दद्यादपुत्राया अपि क्वचित् । न पुत्रस्य पिता चैव नानुजस्य तथाऽग्रजः
एकादशेऽह्नि निर्वर्त्य अर्वाग्दर्शाद्यथाविधि प्रकुर्वीताग्निमान्पुत्रो मातापित्रोः सपिण्डताम्
सपिण्डीकरणादूर्ध्वं न दद्यात्प्रेतमासिकम् । एकोद्दिष्टविधानेन दद्यादित्याह गौतमः
कर्षूसमन्वितं मुक्त्वा तथाऽऽद्यं श्राद्धषोडशम् । प्रत्याब्दिकं तु शेषेषु पिण्डाः स्युः षडिति स्थितिः ७३
अर्घेऽक्षय्योदके चैव पिण्डदानेऽवनेजने । तन्नस्य तु निवृत्तिः स्यात्स्वधावाचन एव च

---

१ क. ग. व्योषा । २ क. °मान्वार्यं । ३ क. ग. न्यूनः सं° । ४ क. कर्पूरस ।

ब्रह्मदण्डादियुक्तानां येषां नास्त्यग्निसत्क्रिया । श्राद्धादिसत्क्रियाभाजो न भवन्तीह ते क्वचित् ७५

मन्त्राम्नायेऽग्न इत्येतत्पञ्चकं लाघवार्थिभिः । पठ्यते तत्प्रयोगे स्यान्मन्त्रेण[1] मन्त्रविंशतिम् ७६

अग्नेः स्थाने वायुचन्द्रसूर्या बहुर्वेदुह्य[2] च । समस्य पञ्चमीसूत्रे चतुश्चतुरिति श्रुतेः ७७

प्रथमे पञ्चके[3] पापी लक्ष्मीरिति पदं भवेत् । अपि पञ्चसु मन्त्रेषु इति यज्ञविदो विदुः ७८

द्वितीये तु पतिघ्नी स्यादपुत्रेति तृतीयके । चतुर्थे त्वपसिच्येति इदमाहुतिविंशकम् ७९

धृतिहोमे न प्रयुञ्ज्याद्यो नामसु तथाऽष्टसु । चतुर्थीमध्य इत्येतद्धोनाम न हि हूयते ८०

लताग्रपल्लवो बुध्नः शुङ्गेति परिकीर्त्यते । पतिव्रता व्रतवती ब्रह्मबन्धुस्तथा श्रुतः ८१

शिलोटु[4] नीलमित्युक्तं ग्रन्थस्तबक उच्यते । कपुष्पिकाभितः केशान्मूर्ध्नि पश्चात्कपुच्छलम्[5] ८२

श्वाविच्छलाका शलली तथा वीरतरः शरः । तिलतण्डुलसंपक्वकुशरः सोऽभिधीयते[6] ८३

नामधेये मुनिवसुपिशाचा बहुवत्सदा । यक्षाश्च पितरो देवा यष्टव्यास्तिथिदेवताः ८४

आग्नेयाद्येऽथ सार्पाद्ये विशाखाद्ये तथैव च । आषाढाद्ये धनिष्ठाद्ये अश्विन्याद्ये तथैव च

द्वन्द्वान्येतानि[च]बहून्वृक्षाणां जुहुयात्सदा । द्वंद्वद्वयं वि(व्य)वच्छेद्यमवशिष्टान्यथैकवत् ८५

देवतास्वपि हूयन्ते बहुवत्सर्प्यपि त्रयः । देवाश्च वसवश्चापि द्विर्देवाश्विनौ[7] सदा ८७

ब्रह्मचारी समादिष्टो गुरुणा व्रतकर्मणि । बाढमोमिति च ब्रूयात्तत्तथैवानुपालयेत्[8] ८८

सशिखं वपनं कार्यमास्नानब्रह्मचारिणः[9] । आशरीरविमोक्षाय ब्रह्मचर्यं न चेद्भवेत् ८९

वपनं नास्य कर्तव्यमर्वागौदनिकव्रतात्[10] । व्रतिनो वत्सरं यावत्षण्मासानिति गोतमः९०

न गात्रोत्सादनं कुर्यादनापदि कदाचन । जलक्रीडामलंकारं व्रती दण्ड इवाऽऽप्लवेत्९१

देवतानां विपर्यास(सो)जुहोतिषु कथं भवेत् । सर्वप्रायश्चित्तं हुत्वा क्रमेण जुहुयात्पुनः

संस्कारा अतिपद्येरन्स्वकालाच्च कथंचन । हुत्वैव(त) देव कर्तव्या ये तूपनयनादधः ९३

अनिष्ट्वा नवयज्ञेन नवान्नं योऽत्ति कामतः । वैश्वानरश्चरुस्तस्य प्रायश्चित्तं विधीयते ९४

चरुः समश्नीयो यस्तथा गोयज्ञकर्मणि । ऋषभोत्सर्जने चैव अश्वयज्ञे तथैव च ९५

श्रावण्यां च प्रदोषे यः कृष्यारम्भे तथैव च । कथमेतेषु निर्वापाः कथं चैव जुहोतयः ९६

देवतासंख्यया गृह्य निर्वापांस्तु पृथक्पृथक् । तूष्णीं द्वेरेवगृह्णीयाद्धोमश्चापि पृथक्पृथक्(?)

यावंता होमनिर्वृत्तिर्भवेद्या यत्र कीर्तिता । शेषं चैव भवेत्किंचित्तावन्तं निर्वपेच्चरुम् ९८

चरुसमश्नीये तु पितृयज्ञे चरौ यथा । होतव्यं मेक्षणेनान्य उपस्तीर्णाभिघारितः ९९

कालः कात्यायनेनोक्तो विधिश्चैव समासतः । वृषोत्सर्गे यतो नात्र गोभिलेन तु भाषितः

---

१ ख. त्रेणामत्रवि' । २ क. °वदह्य । ३ ख पञ्चमी । ४ क. °के वापी' । ५ क. °लादुनी° । ६ क. °पुस्तिका' । ७ क °म् । श्रीवि° । ८ क. ग. °म् । अश° । ९ ग. °व । दे° । १० क. °वर्ता हो° ।

पारिभाषिक एव स्यात्कालोगोवाजियज्ञयोः।अन्यस्यानुपदेशाच्चस्वस्तवारोहणस्यच(?)
अथवा मार्गपाल्येऽह्नि कालो गोयज्ञकर्मणः। नीराजनेऽह्नि वाऽश्वानामिति तत्रान्तरे
विधिः १०२
शरद्वसन्तयोः केचिन्नवयज्ञं प्रचक्षते। धान्यपाकवशादन्ये श्यामाको वनिनः स्मृतः१०३
आश्वयुज्यां तथा कृष्यां वास्तुकर्मणि याज्ञिकाः। यज्ञार्थतत्त्ववेत्तारो होममेवं प्रचक्षते
द्वे पञ्च द्वे क्रमेणैता हविराहुतयः स्मृताः। शेषा आज्येन होतव्या इति कात्ययनोऽब्रवीत्
पयो यदाऽऽज्यसंयुक्तं तत्पृषातक उच्यते। दध्येकतदु(उ)पासाद्य कर्तव्यः पायसश्चरुः
व्रीहयः शालयो मुद्गा गोधूमाः सर्षपास्तिलाः। यवाश्चौषधयः सप्त विपदं घ्नन्ति धारिताः
संस्काराः पुरुषस्यैते स्मर्यन्ते गौतमादिभिः।अतोऽष्टकादयः कार्याः सर्वे कालक्रमादितः
सकृदप्यष्टकादीनि कुर्यात्कर्माणि यो द्विजः। स पङ्क्तिपावको भूत्वा लोकान्प्रैति घृतश्रुतः
एकाहमपि कर्मस्थो योऽग्निशुश्रूषकः शुचिः। नयत्पत्रवदेवास्य(?) शताहं दिवि जायते
यस्त्वाधायाग्निमाशास्य देवादीन्नैभिरिष्टवान्। निराकर्ताऽमरादीनां स विज्ञेयो निरा-
कृतिः १११
यच्छ्राद्धं कर्मणामादौ यागान्ते दक्षिणा भवेत्। आमावास्यं द्वितीयं यदन्वाहार्यं तदुच्यते
एकसाध्येष्ववर्हिःषु न स्यात्परिसमूहनम्। नोदगासादनं चैव क्षिप्रहोमादि ते(के)
मता(तम्) ११३
अभावे व्रीहियवयोर्दध्ना वा पयसाऽपि वा। तदभावे यवाग्वा वा जुहुयादुदकेन वा११४
रौद्रं तु राक्षसं पित्र्यमासुरं चाऽऽभिचारिकम्। उक्त्वा मन्त्रं स्पृशेदा(च्चा)प आलभ्याऽऽ-
त्मानमेव च ११५
यजनीयेऽह्नि सोमश्चेद्वारुण्यां दिशि दृश्यते। तत्र व्याहृतिभिर्हुत्वा दण्डं दद्याद्विजातये
लवणं मधुमांसं च क्षार[3]श्वो येन हूयते(?)।उपवासे न भुञ्जीत नोरुरात्रौ कथंचन११७
स्वकाले सायमाहुतेरप्राप्तौ होतृहव्ययोः। प्राक्प्रातराहुतेः कालः प्रायश्चित्ते हुते सति
प्राक्सायमाहुतेः प्रातर्होमकालानतिक्रमः। प्राक्पूर्णमासादर्शस्य प्राग्दर्शादितरस्य तु
वैश्वदेवे त्वतिक्रान्ते अहोरात्रमभोजनम्। प्रायश्चितमथो हुत्वा पुनः संतनुयाद्धुतम्१२०
होमद्वयात्यये दर्शपौर्णमासात्यये तथा। पुनरेवाग्निमादध्यादिति भार्गवशासनम् १२१
अनृचो मानवो ज्ञेय एणः कृष्णमृगः स्मृतः। रुरुर्गौरमृगः प्रोक्तस्तम्बलं(?) शण उच्यते
केशान्तिको ब्राह्मणस्य दण्डः कार्यः प्रमाणतः। ललाटसंमितो राज्ञः स्यात्तु नासान्तिको
विशः १२३
ऋजवस्ते तु सर्वे स्युरव्रणाः सौम्यदर्शनाः। अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिताः
गौर्व(र्वि)शिष्टतमा विप्रैर्वेदेष्वपि निगद्यते।न ततोऽन्यद्वरं यस्मात्तस्माद्गौर्वर उच्यते१२५

१ क. °देकास्य। ग. °देक्यस्य। २ क. °शास्यं दे°। ३ क. °रान्श्वोये°।

येषां व्रतानामन्तेषु दक्षिणा न विधीयते। वरस्तत्र भवेद्दानमपि वाऽऽच्छादयेद्गुरुम्[1] १२६
अस्थानोष्वा(च्छा)सविच्छेदघोषणाध्यापनादिकम्[2]। प्रामादिकश्रुतौ यस्माद्यातयाम-
त्वकारि तत् १२७
प्रत्यब्दं यदुपाकर्म सोत्सर्गं विधिवद्द्विजैः। क्रियते छन्दसां तेन पुनराप्यायनं भवेत् १२८
अयातयामैश्छन्दोभिर्यत्कर्म क्रियते द्विजैः। क्रीडमानैरपि सदा तत्तेषां सिद्धिकारकम्
गायत्रीं च सगायत्रां बार्हस्पत्यमिति त्रिकम्। शिष्येभ्योऽनूच्य विधिवदुपाकुर्यात्ततः
श्रुतिम्[3] १३०
छन्दसामेकविंशानां संहितायां यथाक्रमम्। न च्छन्दस्काभिरेषाऽऽभिराघा(घ्या)भिर्होम
इष्यते १३१
पर्वभिश्चैव गानेषु ब्राह्मणेषूत्तरादिभिः। अङ्गेषु चर्चामन्त्रेषु इति षष्टिं जुहोति यः १३२
अक्षतास्तु यवाः प्रोक्ता भृष्टा धाना भवन्ति ते। भृष्टास्तु व्रीहयो लाजा घटाः षण्डिक
उच्यते १३३
नाधीयीत रहस्यानि सोत्तराणि विचक्षणः। न चोपनिषदश्चैव षण्मासान्दक्षिणायनात्
उपाकृत्योदगयने ततोऽधीयीत धर्मवित्। उत्सर्गश्चैक एवैषां नैष्यं[4](?) प्रोष्ठपदेऽपि वा १३५
अजातव्यञ्जनाऽलोम्नीं न तया सह संविशेत्। अयुगूः(?) काकवन्ध्याया जातो (तां) तां
न विवाहयेत् १३६
संसक्तपदविन्यासः संपदः प्रक्रमः स्मृतः। स्मार्तकर्मणि सर्वत्र श्रौते त्वध्वर्युनोदितः १३७
यस्यां दिशि बलिं दद्यात्तामेवाभिमुखो दिशम्। श्रवणाकर्मणि भवेन्यञ्चकर्म(?) न सर्वदा
बलिशेषस्य हवनमग्निप्रणयनं तथा। प्रत्यहं न भवेयातामुल्मुकं तु भवेत्सदा[5] १३९
वृषान्तकप्रेक्षणयोर्नवस्य हविषस्तथा। शिष्टस्य प्राशनं मन्त्रस्तत्र सर्वेऽधिकारिणः १४०
ब्राह्मणानामसांनिध्ये स्वयमेव प्र(पृ)षातकम्। आचक्षेद्धविषः शेषं नवयज्ञेऽपि भक्षयेत्
सफला बदरीशाखा फलवत्यभिधीयते। धना विशङ्कताशङ्का[6] स्मृता जातशिला स्मृताः(?)
नष्टो विनष्टो मणिकः शिलानाशे तथैव च। न(?) दैवाहृत्य संस्कार्यो न क्षिपेदाग्रहायणीम्
श्रवणाकर्म लुप्तं चेत्कथंचित्सूतकादिना। आग्रहायणकं कुर्याद्बलिवर्जमशेषतः १४४
ऊर्ध्वं स्वस्तरशायी[7] स्यान्मासमर्धमथापि वा। सप्तरात्रं त्रिरात्रं च एकां वा सद्य एव वा १४५
नोर्ध्वं मन्त्रप्रयोगः स्यान्नाग्न्यागारं नियम्यते। नाऽऽहतास्तरणं चैव न पार्श्वे चापि
दक्षिणम् १४६
दृढश्चेदाग्रहायण्यामावृतोऽपि कर्मणः। कुम्भौ मन्त्रवदासिञ्चेत्प्रतिकुम्भमृचं पठेत् १४७

---

१ क. ग. 'द्गुरू अ'। २ ख. ग. 'म्। प्रमा°। ३ ग श्रुतिः। ४ क. ग. नष्ट्यं। ५ क. ग. 'दा। दृषा'। ६ क. °शक्तताश°। ७ क. ग. °शाणायी। ८ ग. °मादृताष्वपि। ९ क. ताष्वपि।

अल्पानां यो विघातः स्यात्स बाधो बहुभिः स्मृतः । प्राणसंमित इत्यादि वासिष्ठं बाधितं यथा १४८

विरोधो यत्र वाक्यानां प्रामाण्यं तत्र भूयसाम् । तुल्यप्रमाणकत्वे तु न्याय एवं प्रकीर्तितः त्रैयम्बकं करतलमपूपा मण्डकाः स्मृताः । पालाशा गोलकाश्चैव लोहचूर्णं तु चीवरम् स्पृशंस्त्वनामिकाग्रेण क्वचिदालोकयन्नपि । अनुपन्नणीयं सर्वत्र सदैवमनुपन्नयेत् १५१ क्षालनं दर्भकूर्चेन सर्वत्र स्रोतसां पशोः । तूष्णीमिच्छाक्रमेण स्याद्वपार्थे पार्णदारुणी सप्त तावन्मूर्धन्यानि तथा स्तनचतुष्टयम् । नाभिश्रोणीरपानं च गोः स्रोतांसि चतुर्दश क्षुरो मांसावदानार्थं कृत्स्नां स्विष्टप्रदावृतौ। वपामादाय जुहुयात्तत्र मन्त्रं समापयेत् १५४ हृज्जिह्वाक्रोडसक्थीनि यत्तद्वृक्को गुदस्तनाः । श्रोणिस्कन्ध(न्धं)सदा पार्श्वे पञ्चाङ्गानि प्रचक्षते १५५

एकादशानामङ्गानामवदानानि संख्यया । पार्श्वस्थं वृक्कसत्कौ(स्यवृक्कसक्थ्नो)श्च द्वित्वादाहुश्चतुर्दश १५६

चरितार्थां श्रुतिः कार्या तस्मादप्यनुकल्पतः । अतो ह्यार्चेन होमः स्याच्छागपक्षे चरावपि अवदानानि यावन्ति क्रियेरन्प्रस्तरे पशोः तावतःपायसान्पिण्डान्पशुभावेऽपि कारयेत् ओदनव्यञ्जनार्थं तु पशुभावेऽपि पायसम् । सद्रवं श्रपयेत्तद्वदन्वष्टक्येऽपि कर्मणि १५९ प्राधान्यं पिण्डदानस्य केचिदाहुर्मनीषिणः । गयादौ पिण्डमात्रं तु दीयमाननिदर्शनात् भोजनस्य प्रधानत्वं वदन्त्यन्ये महर्षयः । ब्राह्मणानां परीक्षायां महायज्ञे प्रदर्शनात् १६१ आमश्राद्धविधानस्य विना पिण्डैःक्रियाविधिः।तदालभ्याप्यनध्यायविधान श्रवणादपि विद्वन्मतमुपादाय समाप्येतद्धृदि स्थितम् । प्राधान्यमुभयोर्यस्मात्तस्मादेष समुच्चयः प्राचीनावीतिना कार्यं पित्र्येषु प्रोक्षणं पशोः । दक्षिणोद्वासनान्तं च चरोर्निर्वपणादिकम् सन्नपशुवदानानां प्रधानार्थो न हीतरः । प्रधानहवनं चैव शेषं प्रकृतिवद्भवेत् १६५ द्वीपमुन्नतमाख्यातं शादाश्चैवेष्टकाः स्मृताः । किलिनं यजुलं(?) प्रोक्तं दूरखातोदको मरुः द्वारगवाक्षःसंदर्भैः कर्दमभित्त्यन्तकोणवावेधैश्चानष्टं वास्तु घोरं विद्वन्मनाक्रान्तमाग्नैश्च(?) वशंगमावितिव्रीहीञ्शंषश्चेति यवांस्तथा(?)।असावित्यत्र नामोक्त्वा जुहुयात्क्षिप्रहोमवत् साक्षतं सुमनोयुक्तमुदकं दधिसंयुतम्। अर्घ्यं दधिमधुभ्यां च मधुपर्कोऽभिधीयते १६९ कांस्येनैवार्हणीयस्य निनयेदर्घ्यमञ्जली । कांस्यापिधानं कांस्यस्थं मधुपर्कं समर्पयेत्*

इति [गोभिलप्रोक्ते]श्रीकर्मप्रदीपे तृतीयः प्रपाठकः ॥ ३ ॥

---

* अत्र ग्रन्थसमाप्तिचिह्नं नास्ति तस्मादयं ग्रन्थः समाप्तो न वेत्यत्र संदेहः ।

---

१ क. ग. तुल्यं प्र° । २ क. ग. 'स्वदक्क° । ३ क. ग. °तार्थश्रु° । ४ क. ग. °ख्यानं सा° ।

ॐ तत्सद्ब्रह्मणे नमः ।

दक्षस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

ॐ सर्वशास्त्रार्थतत्त्वज्ञः सर्ववेदविदां वरः । पारगः सर्वविद्यानां दक्षो नाम प्रजापतिः
*ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा । एतेषां तु हितार्थाय धर्मशास्त्रमकल्पयत् २
जातमात्रः शिशुस्तावद्यावद्दष्टौ समा वयः । स[२] हि गर्भसमो ज्ञेयो[१] जातिमात्रप्रदर्शकः ३
भक्ष्याभक्ष्ये तथा पेये वाच्यावाच्ये तथाऽनृते[२] । अस्मिन्बाले न दोषः स्यात्स यावन्नोप-
नीयते ४
उपनीते तु दोषोऽस्ति क्रियमाणैर्विगर्हितैः ।अप्राप्तव्यवहारोऽसौ बालः षोडशवार्षिकः५
स्त्री करोति यदा वेदं धत्ते वेदव्रतानि च । ब्रह्मचारी भवेत्तावदूर्ध्वं स्नातो गृही भवेत् ६
द्विविधो ब्रह्मचारी[३] स्यादाद्यो ह्युपकुर्वाणकः । द्वितीयो नैष्ठिकश्चैव तस्मिन्नेव व्रते स्थितः
त्रयाणामानुलोम्येन प्रातिलोम्येन वा पुनः । +प्रतिलोमं व्रतं यस्य स भवेत्पापकृत्तमः ८
यो गृहाश्रममास्थाय ब्रह्मचारी भवेत्पुनः । न यतिर्न वनस्थश्च स सर्वाश्रमवर्जितः ९
अनाश्रमी न तिष्ठेच्च क्षणमेकमपि द्विजः । आश्रमेण विना तिष्ठन्प्रायश्चित्तीयते हि सः १०
जपे होमे तथा दाने स्वाध्याये च रतः सदा । नासौ फलमवाप्नोति कुर्वाणोऽप्याश्रमा-
च्च्युतः ११
मेखलाजिनदण्डैश्च ब्रह्मचारीति लक्ष्यते । गृहस्थो[४] यज्ञवेदाद्यैर्नखलोमैर्वनाश्रमी १२
त्रिदण्डेन यतिश्चैवं लक्षणानि पृथक्पृथक् । यस्यैतल्लक्षणं नास्ति प्रायश्चित्ती न चाऽऽश्रमी
उक्तं कर्म क्रमेणैव[५] यः काल ऋषिभिः स्मृतः । द्विजानां तु हितार्थाय दक्षस्तु स्वयम-
ब्रवीत्* १४

इति दाक्षे धर्मशास्त्रे प्रथमोऽध्यायः ॥ १ ॥

---

* क. घ. च. पुस्तकातिरिक्तपुस्तकेषु एतस्मात्प्रागधिकः श्लोकः " उत्पत्तिः प्रलयश्चैव स्थितिः संहार एव च । आत्मा चाऽऽत्मनि तिष्ठेत चाऽऽत्मा ब्रह्मण्यवस्थितः" इति । + इतः प्रभृति भवेत्पुनरित्यन्तग्रन्थो न विद्यते च. छ. ज. पुस्तकेषु । * अत्र प्रथमाध्यायसमाप्तिः ख. ग. पुस्तकातिरिक्तपुस्तकेषु नास्ति । एवमग्रेऽप्यध्यायसमाप्तिः ख. ग. व्यतिरिक्तपुस्तकेषु नास्तीति बोध्यम् ।

---

१ ख. ग. °यो व्यक्तिमात्रप्रदर्शितः । भ° । घ. °यो व्यक्तिमा° । २ ग °ते । तस्मिन्काले न दोषोऽस्ति स या° । ३ ग °री तु स्मृतः शास्त्रे मनीषिभिः । उपकुर्वाणकस्त्वाद्यो द्वितीयो नैष्ठिकः स्मृतः । यो । ४ ख. °स्थो दानवेदाद्यैर्न विलो° । ग. °स्थो वयज्ञाद्यैर्नखलोम्ना वनाश्रितः । त्रि° । च. °स्थोऽतिथिपूजार्थै° । ५ ग. उक्तकर्मक्रमो नोक्तो न कालो मुनिभिः । ६ च. छ. °व स्वका°।

(अथ द्वितीयोऽध्यायः ।)

प्रातरुत्थाय कर्तव्यं यद्द्विजेन दिने दिने । तत्सर्वं संप्रवक्ष्यामि द्विजानामुपकारकम् १
उदयास्तमयं यावन्न विप्रः क्षणिको भवेत् । नित्यनैमित्तिकैर्युक्तः काम्यैश्चान्यैरगर्हितैः * २
स्वकं कर्म परित्यज्य यदन्यत्कुरुते द्विजः । अज्ञानादथ वा लोभात्स तेन पतितो भवेत् ३
दिवसस्याऽऽद्यभागे तु कृत्यं तस्योपदिश्यते । द्वितीये च तृतीये च तुरीये पञ्चमे तथा ४
षष्ठे च सप्तमे चैव त्वष्टमे च पृथक्पृथक् । विभागेष्वेषु यत्कर्म तत्प्रवक्ष्याम्यशेषतः ५
उषःकाले तु संप्राप्ते शौचं कुर्याद्यथार्थवत् । ततः स्नानं प्रकुर्वीत दन्तधावनपूर्वकम् ६
अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः । स्रवत्येष दिवा रात्रौ प्रातःस्नानं विशोधनम् ७
क्लिद्यन्ति हि प्रसुप्तस्य चेन्द्रियाणि क्षरन्ति च । अङ्गानि समतां गच्छन्त्युत्तमान्यधमैः सह+ ८
प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् । सर्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम्
उषस्युषसि यत्स्नानं संध्यायामुदिते रवौ । प्राजापत्येन तत्तुल्यं सर्वपापापनोदनम् †
लालास्वेदसमाकीर्णः शयनादुत्थितो द्विजः । स्नात्वा समारभेन्नित्यं जपहोमं विशेषतः
प्रातरुत्थाय यो नित्यं संध्यास्नायी भवेद्द्विजः । सप्तजन्मकृतं पापं त्रिभिर्वर्षैर्व्यपोहति
गुणा दश स्नानपरस्य साधो रूपं च तेजश्च बलं च शौचम् ।
आयुष्यमारोग्यमलोलुपत्वं दुःस्वप्नघातश्च तपश्च मेधाः ॥ ११
मनःप्रसादजननं रूपसौभाग्यवर्धनम् । दुःखशोकापहं स्नानं मौनदं ज्ञानदं तथा १४
आग्नेयं भस्मना स्नानमवगाह्य च वारुणम् । आपो हि ष्ठेति च ब्राह्मं वायव्यं गोरजः स्मृतम् १५
यत्तु सातपवर्षे तु तत्स्नानं दिव्यमुच्यते । पञ्च स्नानानि पुण्यानि मनुः स्वायंभुवोऽब्रवीत्
आपस्नानं व्रतस्नानं मन्त्रस्नानं तथैव च । आपस्नानं गृहस्थस्य व्रतमन्त्रे तपस्विनाम् १७
कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च । प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात् १८

---

* इतः परमेतदर्धं विद्यते ख. पुस्तके—" संध्यायां वैश्वदेवान्तं स्वकं कर्म समाचरेत् " इति ।
+ इत आरभ्य उपस्पृशेदित्यन्तं ग्रन्थव्यत्यासः ख. ग. पुस्तकयोः । † इतः परं द्विः प्रमृज्यात्ततो मुखमित्यन्तं ग्रन्थव्यत्यासः, च. छ. पुस्तकयोः ।

---

१ ख. 'स्तमितं याव' । २ ङ. च छ. 'मनं या' । ३ च छ. 'भात्यक्तेन । ४ ख. ग. 'चं कृत्वा यथा' । ५ ख. घ. 'ल्येव दि' । ६ ख. ग. स्रवन्ति । ७ ग. 'तां यान्ति उत्त' । ८ च. छ. दृष्टिप्रीतिक' । ९ ख. ग. पूतात्मा । १० क. 'श्च जप' । ११ क. ङ. मौनदं ।

दानं प्रतिग्रहो होमो भोजनं बलिकं तथा । साङ्गुष्ठं तु सदा कार्यमापत्तेत्तदधोऽन्यथा १९
स्नानादनन्तरं तावदुपस्पर्शनमुच्यते । अनेनैव विधानेन ह्याचान्तः शुचितामियात् २०
उदक एवोदकस्थश्चेत्स्थलस्थश्च स्थले शुचिः । पादौ स्थाप्योभयत्रैव आचम्योभयतः शुचिः २१
प्रक्षाल्य पादौ पाणी च त्रिः पिबेदम्बु वीक्षितम् । संहताङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम् २२
संहत्य तिसृभिः पूर्वमास्यमेवमुपस्पृशेत् । अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् २३
अङ्गुष्ठानामिकाभ्यां च चक्षुःश्रोत्रे पुनः पुनः । नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयं तु तलेन वै
सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् । संध्याकाले च संप्राप्ते मध्याह्ने च ततः पुनः
यो न संध्यामुपासीत ब्राह्मणो हि विशेषतः । स जीवन्नेव शूद्रस्तु मृतः श्वा चैव जायते २६
संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् २७
संध्याकर्मावसाने तु स्वयं होमो विधीयते । स्वयं होमे फलं यत्स्यान्न तदन्येन जायते २८
ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोऽथ विट्पतिः । एभिरेव हुतं यत्तु तद्धुतं स्वयमेव तु २९
देवकार्यं ततः कृत्वा गुरुमङ्गलवीक्षणम् । देवकार्यस्य सर्वस्य पूर्वाह्णो हि विधीयते ३०
देवकार्याणि पूर्वाह्णे मनुष्याणां च मध्यमे । पितॄणामपराह्णे तु कुर्यादेतानि यत्नतः ३१
पौर्वाह्णिकं तु यत्कर्म यदि तत्सायमाचरेत् । न तत्फलमवाप्नोति वन्ध्या स्त्री मैथुनं यथा+
द्वितीये च तथा भागे वेदाभ्यासो विधीयते । वेदाभ्यासो हि विप्राणां विशिष्टं तप उच्यते* ३३
वेदस्त्रीकरणं पूर्वं विचारोऽभ्यसनं जपः । तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा
समित्पुष्पकुशादीनां स कालः परिकीर्तितः । तृतीये च तथा भागे पोष्यवर्गान्नसाधनम्
माता पिता गुरुर्भार्या प्रजा दीनः समाश्रितः । अभ्यागतोऽतिथिश्चाग्निः पोष्यवर्ग उदाहृतः
ज्ञातिर्बन्धुर्जनः क्षीणस्तथाऽनाथः समाश्रितः । अन्योऽपि धनयुक्तस्य पोष्यवर्ग उदाहृतः
सार्वभौतिकमन्नाद्यं कर्तव्यं गृहमेधिना । ज्ञानविभ्यः प्रदातव्यमन्यथा नरकं व्रजेत् ३८

+ इतः परमेतदर्धं ख. ग. पुस्तकयोः—" दिवसस्याऽऽद्यभागे तु सर्वमेतद्विधीयते " इति । * इत उत्तरमेतदर्धमधिकं ख. ग. पुस्तकयोः–" ब्रह्मयज्ञः स विज्ञेयः षडङ्गसहितस्तु सः " इति ।

---

१ घ. ङ. °न ह्याचा° । २ छ. संहिताभिस्त्रिभिः । ३ ख. °श्चादुपस्पृशेत् । अ° । ४ च. श्रोत्रं पुनः पुं । ५ ख ग. °ध्यायां च प्रभात च मं । च. छ. °ध्यान्नानं प्रभाते च म° । ६ ग. °लमश्नुते । सं° । ७ ङ. छ. ज. °तः पश्चात्कुर्यान्मङ्ग° । ८ च. छ ज दृश्यते । ९ ख. ग. परमं । १० ख. °पः । प्रदानं । ११ ग ततो दानं च शि° । १२ ख. °नां द्वितीये(यः)समुदाहृतः । १३ ख. ग. गोधना° । १४ च. छ. दीनस्तथा सुतः । १५ ग. °श्चान्यः पो° ।

भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनम्। नरकः पीडने[1] चास्य तस्माद्यत्नेन तच्चरेत्[2] ३९
जीवत्येकः स लोकेषु बहुभिर्योऽनुजीव्यते। जीवन्तोऽपि मृताश्चान्ये पुरुषाः स्वोदरंभराः[3]
बह्वर्थं[4] जीवते कश्चित्कुटुम्बार्थे तथा परैः*। आत्मार्थे यो न शक्नोति[5] स्वोदरेणापि दुःखितः
दीनानाथविशिष्टेभ्यो दातव्यं भूतिमिच्छता। अदत्तदाना जायन्ते परभाग्योपजीविनः+
चतुर्थेऽह्नस्तथा भागे स्नानार्थं मृदमाहरेत्[6]। तिलपुष्पकुशादींश्च स्नायाच्चाकृत्रिमे[7] जले ४३
=मृत्तिकाः सप्त न ग्राह्या वल्मीकान्मूषकस्थलात्। अन्तर्जलाच्च मार्गान्ताद्वृक्षमूलात्सुरालयात् ४४
परशौचावशिष्टा च श्रेयस्कामैः सदा बुधैः। शुचिदेशात्तु संग्राह्या मृत्तिका स्नानहेतवे ४५
अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुंधरे। मृत्तिके हर मे पापं यन्मया पूर्वसंचितम् ४६
उद्धृताऽसि वराहेण कृष्णेन शतबाहुना। मृत्तिके प्रतिगृह्णामि प्रजया च धनेन च ४७
नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते। तेषां मध्ये तु यन्नित्यं तत्पुनर्भिद्यते त्रिधा
मलापकर्षणं पूर्वं मन्त्रवर्जं जले स्मृतम्। संध्ययोरुभयोः[9] स्नानं स्नानदेशाः प्रकीर्तिताः ४९
मार्जनं जलमध्ये तु प्राणायामो यतस्ततः। उपस्थानं ततः पश्चात्सावित्रीजप उच्यते[10] ५०
सविता देवता यस्या मुखमग्निरुदाहृतः[11]। विश्वामित्र ऋषिश्छन्दो गायत्री सा विशिष्यते
† अङ्गारकदिने प्राप्ते कृष्णपक्षे चतुर्दशी। यमुनायां विशेषेण नियतो नियताशनः ५२
यमाय धर्मराजाय मृत्यवे चान्तकाय च। वैवस्वताय कालाय सर्वभूतक्षयाय[12] च ५३
औदुम्बराय दध्नाय नीलाय परमेष्ठिने। वृकोदराय चित्राय चित्रगुप्ताय[13] वै पुनः ५४
एकैकस्य तिलान्मिश्रान्दद्यात्त्रीनष्ट वाऽञ्जलीन्। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति
पञ्चमे च तथा भागे संविभागो यथार्हतः। देवपितृमनुष्याणां कीटानां चोपदिश्यते ५६
देवैश्चैव मनुष्यैश्च तिर्यग्भिश्चोपजीर्य(व्य)ते। गृहस्थः प्रत्यहं यस्मात्तस्माच्छ्रेष्ठो[14] गृहाश्रमी

---

* एतदुत्तरं—"गुणधर्मपरिभ्रष्टो जीवन्नपि न जीवति" इति च. छ. ज. पुस्तकेषु।

+ एतदनन्तरमेतद्वचनम्—"यद्ददासि विशिष्टेभ्यो यज्जुहोषि दिने दिने। तत्तु वित्तमहं मन्ये शेषं कस्यापि रक्षसि।" इते ख. ग. पुस्तयोः।

= इत आरभ्य धनेन चेत्यन्तग्रन्थो न विद्यते ख. ग. पुस्तकयोः। † इतः प्रभृति तत्क्षणादेव नश्यतीत्यन्तग्रन्थः ख. ग. पुस्तकयोर्नास्ति।

---

१ च. छ. 'ने यस्मात्तस्माद्यत्नेन तं भरे'। २ ग. छ. °त्। स जीवति य एवैको बहुभिश्चोपजीव्य°। ३ ग. °न्तो मृतकाश्चान्ये य आत्मंभरयो नराः। ४ च. छ. ज. °ह्वर्थे जीवितं यस्य कुटु। ५ च. छ. ज. पुनः। ६ घ. ङ. शक्तो हि स्वो'। ७ ख. ग. °शादीनि स्नानं चाकृ°। ८ च छ. °त्रिमैर्जलैः। मृ'। ९ ख. ग. संध्यास्नानमुभाभ्यां च स्नानभेदाः प्र°। १० ग. °वित्र्या ज°। ११ ख छ °मिस्त्रिपादस्थितः। ग. °मिस्त्रिधा स्थितः। १२ क. ङ. च °तहिताय। १३ घ. च. ते। १४ ख. °च्छ्रेष्ठाश्रमो गृही। त्र°।

त्रयाणामाश्रमाणां च गृहस्थो योनिरुच्यते। सीदमानेन तेनैव सीदन्तीहेतरे त्रयः ५८
मूलं प्राणो भवेत्स्कन्धस्तस्माच्छाखाश्च पल्लवाः। मूलेनैकेन नष्टेन सर्वमेव विनश्यति ५९
तस्मात्सर्वप्रयत्नेन रक्षणीयो गृहाश्रमी। राज्ञा चान्यैस्त्रिभिः पूज्यो माननीयश्च सर्वदा
गृहस्थोऽपि क्रियायुक्तो न गृहेण गृही भवेत्। तथैव पुत्रदारैश्च स्वकर्मपरिवर्जितः ६१
अस्नात्वा चाप्यहुत्वा चाप्यदत्त्वा ये तु भुञ्जते। देवादीनामृणी भूत्वा नरकं ते व्रजन्त्यधः
अस्नात्वा शमलं भुङ्क्ते त्वजापी पूयशोणितम्। अहुत्वा च कृमिं भुङ्क्ते ह्यदत्त्वाऽमेध्यमेव च
वृथा तप्तोदकं स्नानं वृथा जाप्यमवैदिकम्। वृथा रतमपुत्रस्य वृथा भुक्तमसाक्षिकम् ६४
एको हि भक्षयत्यन्नमपरोऽन्नेन भक्ष्यते। न भुज्यते स एवैको योऽन्नं भुङ्क्ते ससाक्षिकम् ६५
विभागशीलसंपन्नः क्षमायुक्तो दयालुकः। *स्वकर्मणि सदा युक्तो गृहस्थः स्वर्गभाग्भवेत् ६६
दया लज्जा क्षमा श्रद्धा प्रज्ञा त्यागः कृतज्ञता। एते यस्य गुणाः सन्ति गृहस्थो मुख्य उच्यते ६७
संविभागं ततः कृत्वा गृहस्थः शेषभुग्भवेत्। भुक्त्वाऽथ सुखमास्थाय तदन्नं परिणामयेत्
इतिहासपुराणाद्यैः षष्ठसप्तमकौ नयेत्। अष्टमे लोकयात्रां तु बहिः संध्यां ततः पुनः ६९
होमं भोजनकालं तु यदन्यद्गृहकृत्यकम्। कृत्वा चैवं ततः पश्चात्स्वाध्यायं किंचिदाचरेत्
प्रदोषपश्चिमौ यामौ वेदाभ्यासेन तौ नयेत्। यामद्वयं शयानो हि ब्रह्मभूयाय कल्पते+
अस्मिन्नेव प्रयुञ्जानो ह्यस्मिन्नेव प्रलीयते। तस्मात्सर्वप्रयत्नेन स्वाध्यायं सर्वदाऽभ्यसेत्
नैमित्तिकानि कार्म्याणि निपतन्ति यथा यथा। तथा तथा हि कार्याणि न कालं तु विलम्बयेत् ७३

---

* एतदर्धस्थानेऽयं पाठः ख. ग. पुस्तकयोः—"देवतातिथिभक्तश्च गृहस्थः सः तु धार्मिकः" इति।
+ इतः परं न कालं तु विलम्बयेदित्यन्तं ग्रन्थव्यत्यासः ख. ग. पुस्तकयोः।

---

१ क. ङ. च मूलप्रा°। ख. मूलत्राणे भ°। २ ख. °त्स्कन्धः स्कन्धाच्छा°। घ. °त्स्कन्धं त°। ३ ग गृहाश्रमी। न चैव। ४ ग. चाजप्त्वाऽदत्त्वा च मानवः। दे°। ५ ख. °त्वा दरिद्रश्च भवेन्नरः। एको हि भुञ्जते ह्यन्न°। ६ ख. यो भुङ्क्ते तु स मांशकम्। विभागशीलता यस्य क्ष°। ७ घ. °गयुक्तः सं°। ८ क. °शीलः सं°। ग. °शीलो योनित्यं क्ष°। ९ ख. षष्ठं वा सप्तमं न°। १० ख. घ. संध्या ततः। ११ ख. होमभोजनकृत्यं च य°। ग. होमो भोजनकं चैव य°। १२ ख. °यं च समभ्य°। १३ ख. कर्माणि। १४ ख. ग. कालस्तु विधीयते।

(*सर्वत्र मध्यमौ यामौ हुतशेषं हविश्च यत् । भुञ्जानश्च शयानश्च ब्राह्मणो नावसीदति ७४)

इति दक्षे धर्मशास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः ।)

+देवपितृमनुष्याणां दीनानां च तपस्विनाम् । गुरुमातृपितॄणां च स विभागी विकर्मकृत्
सुधा नव गृहस्थस्य[2] मध्यमानि नवैव च । नव कर्माणि तस्यैव विकर्माणि तथा नव २
प्रच्छन्नानि नवान्यानि प्रकाशा(श्या)नि तथा नव । सफलानि नवान्यानि निष्फलानि
नवैव तु ३
अदेयानि नवान्यानि वस्तुजातानि सर्वदा । नवका नव निर्दिष्टा गृहस्थोन्नतिकारकाः
सुधावस्तूनि वक्ष्यामि शिष्टे च गृहमागते । मनश्चक्षुर्मुखं वाचं[3] सौम्यं दद्याच्चतुष्टयम् ५
अभ्युत्थानमिहाऽऽगच्छेत्[4] पूर्वालापः प्रियान्वितः । उपासनमनुव्रज्या[5] कार्याण्येतानि
यत्नतः ६
ईषद्व्ययानि चान्यानि भूमिरापस्तृणानि च । पादशौचं तथाऽभ्यङ्गं[6] आसनं शयनं तथा ७
किंचिद्रात्रौ यथाशक्ति नास्यानश्नन्गृहे वसेत् । मृज्जलं चार्थिने देयमेतान्यपि सतां[7] गृहे ८
संध्या स्नानं जपो होमः स्वाध्यायो देवतार्चनम् । वैश्वदेवस्तथाऽऽतिथ्यमुद्धृतं चापि
शक्तितः× ९
नव कर्माणि कार्याणि पूर्वोक्तानि मनीषिभिः । कृत्वैवं नव कर्माणि सर्वकर्मा भवेन्नरः १०
अनृतं पारदार्यं[11] च तथाऽभक्ष्यस्य भक्षणम् । अगम्यागमनापेयं[12] हिंसा स्तेयं तथैव च ११
अश्रौतधर्माचरणं[13] मैत्रं[14] धर्मबहिष्कृतम् । नवैतानि[15] विकर्माणि सततं तानि वर्जयेत्† १२
पैशुन्यमनृतं माया कामः क्रोधस्तथाऽप्रियम् । दोषो दम्भः परद्रोहो विकर्माणीति वर्जयेत् ११

---

* धनुश्चिह्नान्तर्गतं ख. ग. पुस्तकयोरेव + अयं श्लोकोऽत्र नास्ति ख. ग. पुस्तकयोः । × इतः सार्धं वचनमधिकं ख. ग. पुस्तकयोः—"पितृदेवमनुष्याणां दीनानाथतपस्विनाम् । मातापितृगुरूणां च संविभागो यथार्हतः । एतानि नव कर्माणि विकर्माणि तथा पुनः" इति । † इतः प्रभृति विकर्म चेत्यन्तं न विद्यते ख. ग. पुस्तकयोः ।

---

१ घ. च संवि° । २ ख. °स्य ईषद्दानानि वै नव । नव क° । ग. °स्य सद्व्ययानि । घ. °स्य सव्ययानि । ३ च. वाचा । ४ ख. दत्त्वा चतु° । ५ ख. ग. °च्छ पृच्छाला° । ६ च. उच्चास° । ७ ख ग. °षद्दानानि । ८ ग. °क्रमाश्रयः श° । ९ ख. °चिद्दद्याद्यथा° । ग. °चिच्चान्नं य° । १०ख. ण. सदा । ११ च. °मनं स्तेयं हिंसा चैव तु पैशुनम् । अ° । १२ ख. ग. °तकर्माच° । १३ ग. °णं मित्रध° । १४ ख. 'मैत्रध' । १५ क. °नि च क° ।

गीतनृत्ये कृषिः सेवा वाणिज्यं लवणक्रिया। द्यूतकर्मायुधान्यात्मप्रशंसा च विकर्म च १४
आयुर्वित्तं गृहच्छिद्रं मन्त्रं मैथुनमौषधम्। पापकर्मापमानश्च धर्मो गोप्यानि यत्नतः १५
*अगोप्यमृणशुद्धिश्च दायादो धनविक्रयः। कन्यादानं वृषोत्सर्गो रहः पापं जुगुप्सितम्
मातापित्रोर्गुरौ मित्रे विनीते चोपकारिणि। दीनानाथविशिष्टेषु दत्तं च सफलं भवेत्
धूर्ते बन्दिनि मल्ले च कुवैद्ये कितवे शठे। चाटचारणचौरेषु दत्तं भवति निष्फलम् १८
सामान्यं याचितं न्यास आधिर्दारा सुहृद्धनम्। भयादितं च निक्षेपः सर्वस्वं चान्वये सति १९
आपत्स्वपि न देयानि नव वस्तूनि सर्वदा। यो ददाति स मूढात्मा प्रायश्चित्तीयते नरः
नवनवकवेत्तारमनुष्ठानपरं नरम्। इह लोके परत्रापि श्रीश्च तं नैव मुञ्चति २१
यथैवाऽऽत्मा परस्तद्वद्द्रष्टव्यः सुखमिच्छता। सुखदुःखानि तुल्यानि यथाऽऽत्मनि तथा परे २२
सुखं वा यदि वा दुःखं यत्किंचित्क्रियते परे। तत्कृतं तु पुनः पश्चात्सर्वमात्मनि तद्भवेत्
न क्लेशेन विना द्रव्यं द्रव्यहीने कुतः क्रिया। क्रियाहीने न धर्मः स्याद्धर्महीने कुतः सुखम्
सुखं च वाञ्छते सर्वस्तच्च धर्मसमुद्भवम्। तस्माद्धर्मः सदा कार्यः सर्ववर्णेन यत्नतः २५
न्यायागतेन द्रव्येण कर्तव्यं पारलौकिकम्। दानं च विधिना देयं काले पात्रे गुणान्विते
समद्विगुणसाहस्रमानन्त्यं च यथाक्रमम्। दाने फलविशेषः स्याद्धिंसायां तद्वदेव हि २७
सममब्राह्मणे दानं द्विगुणं ब्राह्मणव्रुवे। सहस्रगुणमाचार्ये त्वनन्तं वेदपारगे २८
विधिहीने तथाऽपात्रे यो ददाति प्रतिग्रहम्। न केवलं हि तद्दानं शेषमप्यस्य नश्यति
व्यसनप्रतिकारार्थं कुटुम्बार्थं च याचते। एवमन्विष्य दातव्यं सर्वदानेष्वयं विधिः ३०
यद्यदिष्टतमं लोके यच्चास्य दयितं भवेत्। तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ३१
मातापितृविहीनं तु संस्कारोद्वाहनादिभिः। यः स्थापयति तस्येह पुण्यसंख्या न विद्यते
न तच्छ्रेयोऽग्निहोत्रेण नाग्निष्टोमेन लभ्यते। यच्छ्रेयः प्राप्यते पुंसा विप्रेण स्थापितेन वै

इति दाक्षे धर्मशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

---

* एतदर्धस्थानेऽयं पाठः ख. ग. पुस्तकयोः–"प्रायोग्यमृणशुद्धिश्च दानाध्ययनविक्रयाः" इति।

---

१ क. मन्त्रो मैथुनमर्दने। पा। ग. मन्त्रमैथुनभेषजम्। तपोदानावमानौ च नव गो। २ क. ङ. °शुद्धा च दा°। ३ ख. रहस्येतानि वर्जयेत्। मा°। ४ ग. °पापमकुत्सनम्। प्रकाश्यानि नवैतानि गृह-स्थाश्रमिणस्तथा। मा। ५ क. ङ. °तं त्वास। ६ ख. ग. °र्दाराश्च तद्धनम्। अन्वाहितं च। ७ ख. मूर्खस्तु प्रायश्चित्तेन युज्यते। नवन°। ८ ग. परे च श्रीः स्वर्गस्थं च न मु°। ९ ग. °ञ्छति (न्ति) सर्वे हि तच्च। १० ख. ग. °वर्णैः प्रय°। ११ ग. °यां तावदेव तु। स°। १२ ग. °लं तद्विनश्येच्छेष°। १३ ग °राय कु°। १४ ग. °तव्यमन्यथा न फलं भवेत्। मा°।

(अथ चतुर्थोऽध्यायः ।)

*गृहाश्रमात्परं नास्ति यदि भार्या वशानुगा। तया धर्मार्थकामानां त्रिवर्गफलमश्नुते १
(+प्राकाम्ये वर्तमाना तु स्नेहान्न तु निवारिता। अवश्या सा भवेत्पश्चाद्यथा व्याधिरुपेक्षितः २
अनुकूला न वाग्दुष्टा दक्षा साध्वी प्रियंवदा । आत्मगुप्ता स्वामिभक्ता देवता सा न मानुषी ३)
अनुकूलकलत्रस्य स्वर्गस्तस्य न संशयः। प्रतिकूलकलत्रस्य नरको नात्र संशयः ४
स्वर्गेऽपि दुर्लभं ह्येतदनुरागः परस्परम्। रक्तैकं विरक्तं तु तस्मात्कष्टतरं नु किम् ५
गृहवासः सुखार्थं हि पत्नी मूलं च तत्सुखम्। सा पत्नी या विनीता स्याच्चित्तज्ञा वशवर्तिनी ६
दुःखान्विता कलिर्भेदश्छिद्रं पीडा परस्परम्। प्रतिकूलकलत्रस्य द्विदारस्य विशेषतः ७
जलौकेव हि सर्वा स्त्री भूषणाच्छादनाशनैः। सुकृताऽपकृता नित्यं पुरुषं ह्यपकर्षति ८
जलौका रक्तमादत्ते केवलं सा तपस्विनी। अङ्गना तु धनं वित्तं मांसं वीर्यं बलं सुखम् ९
साशङ्का बलभावे तु यौवनेऽभिमुखी भवेत्। तृणवन्मन्यते नारी वृद्धभावे स्वकं पतिम् १०
अनुकूला ह्यवाग्दुष्टा दक्षा साध्वी प्रजावती। एतावद्गुणसंयुक्ता श्रीरेव स्त्री न संशयः ११
प्रहृष्टा मनसा नित्यं स्थानमानविचक्षणा। भर्तुः प्रीतिकरा या तु सा भार्या त्वितरा जरा
जिह्वा भार्या शिशुर्भ्राता मित्रो दासः समाश्रिताः। यस्यैते तु विनीताः स्युस्तस्य लोकेऽपि गौरवम् १३
प्रथमा धर्मपत्नी स्याद्द्वितीया रतिवर्धिनी। दृष्टमेव फलं तत्र नादृष्टमुपलभ्यते १४
धर्मपत्नी समाख्याता निर्दोषा यदि सा भवेत् । दोषे सति न दोषः स्यादन्या कार्या गुणान्विता १५
(† अदुष्टापतितां भार्यां यौवने यः परित्यजेत्। स जीवनान्ते स्त्रीत्वं च वन्ध्यत्वं च समाप्नुयात् १६

* एतदर्धात्प्राक् " पत्नीमूलं गृहं पुसां यदि च्छन्दानुवर्तिनी " इति ख. ग. पुस्तकयोः । + धनुश्चिह्नान्तर्गतं ग. पुस्तक एव । † धनुश्चिह्नान्तर्गतस्थानेऽयं ग्रन्थः—ख ग. पुस्तकातिरिक्तपुस्तकेषु " रूपौदार्यसमायुक्ता विशालकुलसंभवा । सति भर्तरि या नारी उपोष्य व्रतचारिणी । आयुष्यं हरते भर्तुः सा नारी नरकं व्रजेत् " इति ।

१ ग. °लत्रो यस्तस्य स्वर्ग इहैव हि । प्र° । २ ग. क्त एका विरक्तोऽन्यस्तस्मा° । ३ ग. °लं गृहे सुख° । ४ ग. °खाद्यन्या सदा खिन्ना वित्तभेदः प° । ५ ख. सुभृताऽपि कृ° । ६ ग. °म् । सश° । ७ ग. °ने विमु° । ८ ग. °ते पश्चाद्वृद्ध° । ९ क. घ. च. °क्ता सा स्त्रीरेव । १० ग. °यः । या हृष्ट° । ११ ग. शिष्यो १२ ख. °पपद्यते । ग °पजायते ।

दरिद्रं व्याधितं चैव भर्तारं याऽवमन्यते। शुनी गृध्री च मकरी जायते सा पुनःपुनः १७
मृते भर्तरि या नारी समारोहेद्धुताशनम्। सा भवेत्तु शुभाचारा स्वर्गलोके महीयते १८
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्। तथा सा पतिमुद्धृत्य तेनैव सह मोदते १९
चाण्डालप्रत्यवसितपरिव्राजकतापसाः। तेषां जातान्यपत्यानि चाण्डालैः सह वासयेत्)

इति दाक्षे धर्मशास्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः।)

(*उक्तं शौचमशौचं च कार्यं त्याज्यं मनीषिभिः। विशेषार्थं तयोः किंचिद्वक्ष्यामि हितकाम्यया १
शौचे यत्नः सदा कार्यः शौचमूलो द्विजः स्मृतः। शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः २
शौचं च द्विविधं प्रोक्तं बाह्यमाभ्यन्तरं तथा। मृज्जलाभ्यां स्मृतं बाह्यं भावशुद्धिस्तथाऽऽन्तरम् ३
आशौचाद्धि वरं बाह्यं तस्मादाभ्यन्तरं वरम्। उभाभ्यां च शुचिर्यस्तु स शुचिर्नेतरः शुचिः
+एका लिङ्गे गुदे तिस्रो दश वामकरे तथा। उभयोः सप्त दातव्या मृदस्तिस्रस्तु पादयोः
गृहस्थे शौचमाख्यातं त्रिष्वन्येषु यथाक्रमम्। द्विगुणं त्रिगुणं चैव चतुर्थे च चतुर्गुणम्† ६
अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता। द्वितीया च तृतीया च तदर्धार्धा प्रकीर्तिता ७
लिङ्गेऽप्यत्र समाख्याता त्रिपर्वे पूर्यते यया। एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणं तु वनस्थानां यतीनां च चतुर्गुणम्। दातव्यमुदकं तावन्मृद्भावो यथा भवेत्‡ ९
मृदा जलेन शुद्धिः स्यान्न क्लेशो न धनव्ययः। यस्य शौचेऽपि शैथिल्यं चित्तं तस्य परीक्षितम् १०

---

* एतच्चिह्नान्तर्गतग्रन्थः ख. ग. पुस्तकातिरिक्तपुस्तकेषु पूर्वं (अ० ३ श्लो० २१) इत्यस्मादनन्तरं विद्यते। + ख. ग. पुस्तकातिरिक्तपुस्तकेषु अयं श्लोकः "एका लिङ्गे तिस्रः सव्ये उभयोर्मृद्द्वयं स्मृतम्। पञ्चापाने दशैकस्मिन्नुभयोः सप्त मृत्तिकाः" इति वर्तते। † एतदग्रेऽधिकं ख. ग. पुस्तकातिरिक्तपुस्तकेषु "एतच्छौचं द्विजातीनामर्धं शूद्रे विनिर्दिशेत्। ‡ एतदग्रेऽयं श्लोकोऽधिकः ख. ग. पुस्तकातिरिक्तपुस्तकेषु "मृत्तिकानां सहस्रेण उदकुम्भशतेन च। न शुध्यन्ति दुरात्मानो येषां भावो न निर्मलः" इति।

---

१ क. च पुराविद्भिर्मनी°। घ. च पुरा शौचं म°। २ क. °शुध्या तथाऽऽ°। च. छ. 'शुद्धिस्तथा पर°। ३ च. °म्। शौचं त्वल्पतरं बा°। ४ क. °शौचं तु (चात्तु) व°। ५ घ. परं। ६ क. परम्। ७ क. घ. उभयेन शु°। ८ क. घ. °या। दा°। ९ क. घ द्रव्येण। १० क. घ. °शो नैव च व्य°। ११ क. घ. वृत्तं।

यत्किंचिदुष्कृतं तस्य सर्वं नश्यति देहिनः । पञ्च सप्ताष्ट दश वा द्वादशाहोऽपि विंशतिः
म्लेच्छैर्नीतस्य विप्रस्य पञ्चगव्यं विशोधनम्* ॥ ८०
+पञ्चगव्यं च गोक्षीरं दधि मूत्रं घृतं पयः । प्राश्यापरेऽह्न्युपवसेत्कृच्छ्रं सांतपनं चरेत्
पृथक्सांतपनं द्रव्यैः षडहः सोपवासकः । सप्ताहेन तु कृच्छ्रोऽयं महासांतपनः स्मृतः ८२
पर्णोदुम्बरराजीवबिल्वपत्रकुशोदकैः । प्रत्येकं प्रत्यहं पीतैः पू(प)र्णकृच्छ्र उदाहृतः ८३
तप्तक्षीरघृताम्बूनामेकैकं प्रत्यहं पिबेत् । एकरात्रोपवासश्च तप्तकृच्छ्रस्तु पावनः ८४
एकभक्तेन नक्तेन तथैवायाचितेन तु । उपवासेन चैकेन पादकृच्छ्र उदाहृतः ८५
कृच्छ्रातिकृच्छ्रः पयसा दिवसानेकविंशतिम् । द्वादशाहोपवासेन पराकः परिकीर्तितः
पिण्याकशाकतक्राम्बुसक्तूनां प्रतिवासरम् । एकरात्रोपवासश्च कृच्छ्रः सौम्यः प्रकीर्तितः
एषां त्रिरात्रमभ्यासादेकैकस्य यथाक्रमम् । तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ८८
तिथिवृध्या चरेत्पिण्डाञ्शुक्ले शिरुयण्डसंमितान् । एकैकं ह्रासयेत्पिण्डान्कृच्छ्रचान्द्रायणं चरेत् ८९
यथाकथंचित्पिण्डानां चत्वारिंशच्छतद्वयम् । इति देवल(ले) [न]कृतं धर्मशास्त्रं प्रकीर्तितम् ९०

समाप्तेयं देवलस्मृतिः ।

---

* अत्रैव देवलस्मृतेः परिसमाप्तिर्दृश्यते ख. ग. पुस्तकयोः । अग्रिमग्रन्थस्तु न विद्यते । + एतदादिवचनानां पाठो याज्ञवल्क्यस्मृतौ किंचिद्भेदेनोपलभ्यते ।

---

१ घ. °पनं स्मृतम् । पं° । २ क. °षामित्यें° । ३ क. °हिकम् । ति° । ४ घ. स्मृतम् ।

ॐ तत्सद्ब्रह्मणे नमः ।

प्रजापतिस्मृतिः ।

पितुर्वाक्यार्थकारी च रुचिः प्रम्लोचया सह । नमस्योवाच देवेशं ब्रह्माणं जगतः पतिम्
ब्रह्मन्विधे विरिञ्चेति धातः शंभो प्रजापते । त्वत्प्रसादादिमं धर्मं जग्राह पितृवाक्यतः २
अनया सह तीर्थेषु मया श्राद्धान्यनेकशः । कृतानि पितृतुष्ट्यर्थं धनार्थं पुत्रकाम्यया ३
स्मृतयश्च पुराणानि त्वया दृष्टान्यनेकशः । दृष्टस्त्वनेकधा धातः श्राद्धकल्पः सविस्तरः
तथाऽप्यसंशयापन्नं क्रियमाणविधिं वद । येन विज्ञानमात्रेण न मुह्येऽहं कदाचन ५
चतुर्णामपि वेदानां शाखाः सन्ति सहस्रशः । अज्ञानादल्पशास्त्रार्था मोहयन्ति पदे पदे६
कस्मिन्काले च कर्तव्यं कर्ता श्राद्धस्य कीदृशः । द्रव्यं देशः पाककर्ता कदा विप्रान्निमन्त्र-
येत् ७
ब्राह्मणाः कीदृशास्तत्र नियमास्तत्र कीदृशाः । श्राद्धोपहारपात्राणि भक्ष्यं तत्कालदेवता
ततः श्राद्धेषु के मन्त्राः पदार्थादिक्रमः कथम् । आसनावाहनान्यर्घोऽग्नौ होमः पात्रा(त्र)-
लम्भनम् ९
विप्रभोज्यं पिण्डदानं क्षमापनविधिक्रमम् । वैश्वदेवं भृत्यभोज्यं वद सायंतनं विधिम् १०

ब्रह्मोवाच—

पितरस्तव तुष्टा वै रुचे शृणु महामते । मालिन्यां रौच्यनामा वै त्वत्तः पुत्रो भविष्यति ११
नदीं तर्तुमनाः पारं पराचारस्य वि(वे)त्ति कम्(कः) । त(क)ल्पशास्त्र(स्त्राणि)स्मृतयः
श्राद्धकल्पा बुधैर्द्विजाः(कृताः) १२
ममापि संशयस्तत्र श्राद्धकल्पाम्बुधौ रुचे । तथाऽपि शास्त्राण्यालोच्य वक्ष्ये निःसंशयं
वचः १३
शास्त्रनिष्ठैः शुक्रवाक्यैर्मुह्यन्ति द्विजसत्तमाः । भवन्ति बलिनस्तस्माद्राक्षसा बलहारिणः
निरस्य शुक्रवाक्यानि(णि) सिद्धान्तस्मृतिनिश्चयम् । श्राद्धकल्पस्य वक्ष्येऽहं भक्त्या
तुष्टो रुचे तव १५
त्वया पृष्टं कदा श्राद्धं रुचे प्रम्लोचया सह । शृणु संक्षेपतो वच्मि कालकर्तारं ह्यनुक्रमात्

वृद्धौ क्षयेऽह्नि ग्रहणे युगादौ महालये श्राद्धममासु तीर्थे ।
सूर्यक्रमे पर्वसु वैधृतौ च रुचौ व्यतीपातगतेऽष्टकासु ॥ १७
द्रव्यस्य संपत्सु मुन्यं(नी)न्द्रसङ्गे काम्येषु मन्वादिषु सद्व्रते स्यात् ।
छायासु मातंगभवासु नित्यं श्राद्धस्य कालः स च सर्वदोक्तः ॥ १८

---

१ ख. 'क्षसां व°। २ क. °म्ये च म°।

वृद्धौ प्राप्ते च यः कुर्याच्छ्राद्धं नान्दीमुखं पुमान्। तस्याऽऽरोग्यं यशः सौख्यं विवर्धन्ते धनप्रजाः १९

श्राद्धं कृतं येन महालयेऽस्मिन्पित्रोः क्षयाहे ग्रहणे गयायाम्।
किमश्वमेधैः पुरुषैरनेकैः *पुण्यैरिमैरन्यतमैः कृतैः किम् ॥ २०

दर्शश्राद्धं च यः कुर्याद्ब्राह्मणैर्ब्रह्मवादिभिः। पितरस्तेन तुष्टा वै प्रयच्छन्ति यथेप्सितम्
माघे पञ्चदशी कृष्णा नभस्ये च त्रयोदशी। तृतीया माधवे शुक्ला नवम्यूर्जे युगादयः २२

भाद्रे कलिर्द्वापरे चैव माघे त्रेतातृतीया नवमी कृते च।
युगादयः पुण्यतमा इमाश्च दत्तं पितॄणां किल चाक्षयं स्यात् ॥ २३

यावदायाति तत्पर्व वर्धते द्विगुणक्रमम्। दिने दिनेऽखिलं दानं दत्तं वैधृतपर्वणि २४
संक्रान्तौ च व्यतीपाते मन्वादिषु युगादिषु। श्रद्धया स्वल्पमात्रं च दत्तं कोटिगुणं भवेत्
पूर्वजान्मनुजान्देवान्सति द्रव्ये न वै यजेत्। मन्दाग्निरामयावी च दरिद्रश्च प्रजायते २६

छायासु सोमोद्भवजासु पुण्यं देवार्चनं गोतिलभूप्रदानम्।
करोति यो वै पितृपिण्डदानं दूरे न तस्यास्ति विभोर्विमानम् ॥ २७

चन्द्रग्रहे लक्षगुणं प्रदत्तं विवर्धते कोटिगुणं रविग्रहे।
गजाश्वभूरुक्मतिलाज्ययोपिद्दानस्य संख्या न मयाऽत्र गण्यते ॥ २८

पितॄणां नरकस्थानां जलं तीर्थस्य दुर्लभम्। तेन संतर्पिताः सर्वे स्वर्गं यान्तीति मद्वचः
अष्टकासु च सर्वासु तथा चान्वष्टकासु च। पिण्डदानं प्रकर्तव्यमक्षय्यतृप्तिकारकम् ३०
अष्टकासु च सर्वासु साग्निकैर्नवदैवतम्। पित्र्याद्यं मातृमध्यं च कर्तव्यं न निरग्निकैः ३१
महायज्ञरताः शान्ता लौकिकाग्निं च रक्षयेत्। धर्मशास्त्रोक्तमार्गी यः स साग्निकसमो मतः
इष्टे गृहसमायाते पूज्ये यज्वनि मन्त्रदे। वेदज्ञैः सर्वशास्त्रज्ञैर्हृष्यन्त्यखिलपूर्वजाः ३३
व्रतस्थो व्रतसिद्ध्यर्थं श्राद्धं कुर्यादपिण्डकम्। विना श्राद्धेन यत्कर्म तत्सर्वं निष्फलं भवेत्
सपिण्डदानं सौभाग्यं काम्यश्राद्धं त्रिपौरुषम्। कार्यं भार्यासु तेनैतत्सर्वकामफलप्रदम्
नित्यश्राद्धं सदा कार्यं पितॄणां तृप्तिहेतुकम्। स विष्णुरिति विज्ञेयो नित्यं प्रीणाति पूर्वजान् ३६

श्राद्धान्यनेकशः सन्ति पुराणोक्तानि वै रुचे। फलप्रदानि सर्वाणि तेषामग्र्यो महालयः
सत्यवाक्शुद्धचेता यः सत्यव्रतपरायणः। नित्यं धर्मरतः शान्तः स भिन्नालापवर्जितः
अद्रोहोऽस्तेयकर्मा च सर्वप्राणिहिते रतः। स्वस्त्रीरतः सविनया(यो) नयचक्षुरकर्कशः
पितृमातृवचःकर्ता गुरुवृद्धपराष्टि(स्ति)कः। श्राद्धलुर्वेदशास्त्रज्ञः क्रियावान्भैक्ष्य(क्ष)-जीवकः ४०

---

* एतत्प्रयोगस्याऽऽर्षत्वात्साधुत्वं ज्ञेयम्।

स तु श्राद्धं यदा कुर्यात्पत्रपाकेन सद्विजैः। तदा श्राद्धसहस्रैर्यत्प्रीतिस्तज्जायते भृशम्
तिर्यङ्मनुष्ययोनौ हि को भेदः क्षुत्तृषा समाः। सत्यवाङ्मानुषो धर्मः सुखं दुःखं समं स्मृतम् ४२
भैक्ष्यं(क्षं) द्रव्यं हि विप्राणां क्षत्रियाणां प्रजार्पितम्। वैश्यानां कृषिवाणिज्यं शूद्राणां सेवयाऽऽगतम् ४३
धनं पवित्रं विप्राणामस्ति तीर्थसमर्पितम्। तर्पयेत्तेन वै देवान्मृतान्पितृगणातिथीन् ४४
स्वस्तिवाच्य द्विजैर्नीतं धनं दुष्टप्रतिग्रहम्। अग्नितीर्थेषु पतितं सद्यो याति पवित्रताम् ४५
अयाचितं धनं पूतं शुक्लवृत्त्या समागतम्। विवाहलब्धं वेजिनं(विजितं)पैत्र्यं(पित्र्यं)शिष्य-निवेदितम् ४६
ब्राह्मणः क्षत्रियविशां जीव्यवृत्तिं समाश्रयेत्। स्ववृत्तेरुपहानित्वान्न श्ववृत्त्या(त्तिं)कदाचन ४७
वर्णानां तु त्रिधा वृत्तिरुत्तमा मध्यमाऽधमा। हासपुण्यफलांशस्य क्रमात्तद्धनदानलः(तः)
धनं चिकित्सासंबन्धि ग्रामयाच(ज)कगायिनी(नाम्)। कथयत्व(या च)समानीतम-ग्राह्यं पितृकर्मणि ४९
चित्रकृन्नटवेश्यानां धारकार(रे)क्षुमर्दिनाम्। स्वस्त्या अपि न तद्ग्राह्यं धनं कथककूटयोः
मूल्यैश्चिकित्सां कुरुते कथां चित्रां तनोति यः। गीतं गायति भृत्यर्थं विप्रः सन्पुत्रगो मतः
युगधर्मेण वर्णानां धनं ग्राह्यं द्विजातिभिः। प्रकृतिना परिस्वस्त्या न्यायागतमथो यदि
सरित्समुद्रतोयैक्ये वापीकूपसरित्तटे। देवजुष्टे च संप्राप्ते देशे श्राद्धे गृहान्तरे ५३
धात्रीबिल्ववटाश्वत्थमुनिचैत्यगजावि(न्वि)ना। श्राद्धं छायासु कर्तव्यं प्रासादाद्यौ महावने
न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते। गृहे तिष्ठति सा यावत्तावत्तीर्थसमं गृहम् ५५
पत्नी पाकं यदा कुर्यात्पुत्रः पुष्पकुशान्हरेत्। किं गयायां यदि श्राद्धं स्वकाले स्वगृहे भवेत् ५६
स्वगोत्रा सुभगा नारी भ्रातृभर्तृसुतान्विता। गुरुशुश्रूषणोपेता पित्र्यं कर्तुमर्हति ५७
आचार्यानी मातुलानी पितृमातृस्वसा स्वसा। एता ह्यविधवाः कुर्युः पितृपाकं सुता स्नुषा ५८
बहुप्रजास्तु या नार्यो भ्रातृवत्यः कुलोद्भवाः। पञ्चाशत्परितोऽब्दानां यदि वा विधवा अपि ५९
पितृव्यभ्रातृजायाश्च मातरः पितृमातरः। पाकं कुर्युः सदा पित्र्य(त्र्यं)मृदुः(दु) शीला स्व गोत्रिणी ६०
सितार्द्रवाससा युक्ता मुक्तकेशा विकञ्चुकी। शिरोस्नाता व्याधिता स्त्री पाकं कुर्यान्न पैतृकम् ६१

---

१ क. °क्षुरम°। २ ख. °गोत्तमः। यु°। ३ ख. °थोऽपि वा। स°।

भ्राता पितृव्यो भ्रातृव्यः स्वसृपुत्रः स्वयं पचेत्। पित्रानं(ताऽन्नं) च सुतः शिष्यो दौहित्रो दुहितुः पतिः ६२

अक्रोधनैः शौचपरैरिति गाथामुदीरयन्। सायमामन्त्रयेद्विप्राञ्श्राद्धे दैवे च कर्मणि ६३

निमन्त्रणं स्वयं दद्याद्भ्रातृ(ता)शिष्यः सुता अपि । न स्त्रीबालैः स्वगोत्रान्यैर्न श्व्याप्यं न च दूरतः ६४

दैवे वृद्धौ तीर्थकाम्यनदोत्पन्नैः(न्ने)समागतेऽन दुष्यति मनःस्थैर्यात्प्रातः सद्यो निमन्त्रणम् प्रसाद्यतामितीत्युक्त्वा द्विस्त्रिर्देयं निमन्त्रणम् । यत्स्वीकृतं स्त्रिया सम्यक्सत्यं वितथमन्यथा(?) ६६

यतीनामगृहस्थानां ब्राह्मणब्रह्मचारिणाम्। सर्वदानं मन्त्रणं बन्धुभृत्यबालसुहृत्स्त्रिया(?) अदैवान्तरतःश्राद्धेदम्पत्यङ्गी वृथा भवेत्(?)।निमन्त्रणं भवेद्यस्य लोभात्काकत्वमाप्नुयात् निमन्त्रणेऽप्रयातव्यं तं नियुक्तो लघुर्व्रजेत्(?)।सर्वदानलघोर्ज्यैष्ठ्यं वृथापाकीतु वा यतः(?) ब्रह्मकर्मरताः शान्ता अपापा अग्निसंश्रिताः।कर्मनिष्ठास्तपोनिष्ठा वेदार्थज्ञाः कुलोद्भवाः मातृपितृपराश्चैव ब्राह्म्यै(ह्म)वृत्युपजीविनः। अध्यापको ब्रह्मविदो ब्राह्मणाः श्राद्धसंपदि ७१

स्वकीयशाखिनो मुख्याः श्राद्धे वेदविदां वर। पङ्क्तिपावनाः सर्वेषामेको वै सामविद्भवेत् ७२

गुरुश्वशुरजामातृदौहित्रभगिनीसुताः। आसनार्हाः पितृश्राद्धे योग्याः पूज्याश्च मातुलाः भार्या रजस्वला यस्य हृता त्यक्त्वा दिवं गता। अश्राद्धार्हाः सर्वथास्य मृतनुकं गर्भदूषिता(?) ७४

योऽभार्यः सन्बलं चेतः संयम्याविधुरो भवेत्। क्रियापरः श्रुतेर्वेत्ता श्राद्धे वै भोजयेत्पितुः ७५

श्रुतिज्ञं कुलजं शान्तं प्रजावन्तं जितेन्द्रियम्। मृतभार्यमपि श्राद्धे भोजयेदविशङ्कितः ७६

*अप्रजो मृतपत्नीकः सर्वकर्मसु गर्हितः।छन्दो विनाऽपि न स्थेयं दिनमेकं विनाऽऽश्रमम् यस्य पुत्राः सदाचाराः श्रुतिज्ञा धर्मसंमुखाः। पितृभक्तिरता दान्ता न वैधव्यं(धुर्यं)मृतस्त्रियि ७८

तुरीये धाम्नि यस्तिष्ठेत्संधौ मध्यनिशि क्षणम्। अनार्योऽप्यनपत्योऽपि श्राद्धे पुण्यैरवाप्यते ७९

---

* अप्रजा इत्येव भवितुं युक्तम्।

---

१ क. 'दानम'। २ ख. 'द्पत्यङ्गी'।

षोडशाब्दात्परं श्राद्धे विप्राणां सप्तसप्तकैः । भोजयेत्पितृकार्यार्थं ततोऽन्यान्देवकर्मणि

न पुत्रपुत्री तदपत्यभार्या न बन्धुरङ्गीकृतचित्तधारणम् ।
संप्राप्य वैधव्य(धुर्य)मनङ्गसंभवो यस्तिष्ठति व्यक्ततया स वर्ज्यः ॥ ८१

रोगी हीनातिरिक्ताङ्गः काणः पौनर्भवस्तथा । अवकीर्णी कुण्डगोलौ कुनखी श्यावदन्तकः ८२

भृतकाध्यापकः कुष्ठी कन्यादूष्यभिशस्तकः । क्लीबान्धमूकबधिराः कुजङ्घी(नखी) वृषलीपतिः ८३

परपूर्वापतिः स्तेनः कर्मदुष्टश्च निन्दिताः । भोक्तारः षोडशे यस्य(ये च)ते वर्ज्या द्रव्यलोभतः ८४

वृषोत्सर्गस्य कर्तारो वर्जनीयाः सदैव हि । पितुर्गृहेषु या कन्या रजः पश्यत्यसंस्कृता ८५

सा कन्या वृषली ज्ञेया तत्पतिर्वृषलीपतिः । महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी
तान्दोषान्क्षमते यस्तु स वै माहिषकः स्मृतः । अज्ञानादथ वा लोभान्मोहाद्वाऽपि विशेषतः ८७

समर्घं योऽन्नमादाय महार्घं तु प्रयच्छति । स वै वार्धुषिको नाम अनर्हः सर्वकर्मसु ८८

वृषोत्सर्गस्य कर्तारं यदि पश्यन्ति पूर्वजाः । रौरवं नरकं यान्ति कुम्भीपाकं सुदारुणम्
कालालकं वार्धुषिकं मध्ये च वृषलीपतिम् । श्राद्धे माहिषिकं दृष्ट्वा निराशा यान्ति पूर्वजाः
यो लोभादसवर्णानामाद्यश्राद्धान्यनुक्रमात् । स षोडशकं(शं) वृषोत्सर्गं कुर्यात्कालालकः स्मृतः ९१

अथ नियमानाह—

दन्तधावनताम्बूलं स्निग्धस्नानमभोजनम् । दानं प्रतिग्रहो होमः श्राद्धभुगष्ट वर्जयेत् ९२

श्राद्धे निमन्त्रितो विप्रो वर्जयेत्स्त्रीनिषेवणम् । पूर्वेद्युश्च परेद्युश्च वर्जयेद्भोजनद्वयम् ९३

नीचसंभाषणं याज्यं दिवानिद्रां प्रतिग्रहम् । क्षौममुष्णोदकैः स्नानं वर्जयेच्छ्राद्धकृद्ध्रुवम्
न च सीमान्तरं गच्छेन्न श्मशानं जिनालयम् । श्राद्धकृत्सर्वदा पश्येन्नोदक्याः(क्यां) श्वपचं शवम् ९५

श्रीखण्डं दर्भसूत्रं यवतिलतुलसीशतपवित्रा(शातपत्रं च)कर्ता
धूपं(पो) दीपोदपात्रं कुसुम्भ(म)फलजत्यं(लं) पत्रभूम्भोम(म्यास)नानि ।
श्रीशः शाल्वे च पात्रे द्विजमधुसकृदाच्छिन्नहेमार्घपात्रा-
ण्यन्नं श्राद्धोपहाराः सुतगृहगृहिणीशुभ्रवासांसि कालः ॥ ९६

श्रीखण्डमर्चयेच्छ्रेष्ठं सकर्पूरं सकेसरम् । पूर्वजानां तु देवानां नान्यन्मलयजादिकम् ९७

मन्त्रपूता हरिद्वर्णाः प्रातर्विप्रसमुद्धृताः । गोकर्णमात्रा दर्भाः स्युः पवित्राः पुण्यभूमिजाः

---

१ ख. ग. °तवित्त°।

शुक्लः कृष्णः कृष्णतरश्चतुर्थो जर्तिलस्तिलः । उत्तरोत्तरतः श्राद्धे पितॄणां तृप्तिकारकाः तुलस्यः सर्वदेवानां समञ्जर्यः शुभावहाः । पूर्वजानां यथा प्राप्ता सैकोद्दिष्टे विमञ्जरी अगस्त्यं भृङ्गिराजं च तुलसी शतपत्रिका । तिलं च तिलपुष्पं च षडेते पितृवल्लभाः १०१
त्रिगुणं सूत्रमादद्यात्प्रतिपिण्डं नवोद्धृतम् । सामगानां तु संलग्नं सर्वेषामेकतन्तुना १०२
धूपं(पो) गुग्गुलुना कार्यं(र्यो) दीपस्तैलघृतेन तु । तुलसीशतपत्राभ्यां पूजनं पितृवल्लभम्
चम्पको दमनःकुन्दकल्म(र)वीरोऽथ केतकी जातिदर्शनमात्रेण निराशा यान्ति पूर्वजाः
अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च । प्रादेशमात्रं सर्वत्र पवित्रं सर्वकर्मसु १०५
वाससश्चतुर्विधं प्रोक्तं त्वक्सूत्रं कृमिरोमजम् । उत्तरोत्तरतः श्रेष्ठं प्रक्षाल्यं श्राद्धकर्मणि १०६
धौतं सप्ताष्टहस्तैः स्यादुत्तरीयं तदर्धकम् । वाससी सर्वदाचा(धा)र्ये दग्धैरूर्ण्या(र्ण्या)र्द्रव-
र्जिते १०७
त्यजेत्पर्युषितं पुष्पं त्यजेत्पर्युषितं जलम् । न त्यजेज्जाह्नवीतोयं तुलसीदलपङ्कजम् १०८
गोमयेनोपलिप्ता भूः पवित्रा सर्वकर्मसु । गोमूत्रेणोक्षिता तीर्थे विष्णुपादाम्बुसेविता
पात्राण्यर्घ्याणि ख(खा)ड्गानि हेमरूप्यमृदामपि। उ(औ)दुम्बराणि प(पा)र्णानि देवत्वे-
(कृ)त्योद्भवानि च ११०
हेमरूप्यमये पात्रे पिण्डत्रयं विनिक्षिपेत् । शौल्वे कांस्ये खाड्गपात्रे न च मृन्मयकाष्ठजे
पाकपात्राणि शौल्वानि सर्वधातुमयानि वा। सर्वेभ्यो मृन्मयं श्रेष्ठमग्निपूतजलाप्लुतम् ११२
लोहपात्रेषु यत्पक्वं तदन्नं काकमांसवत् । भुक्त्वा चान्द्रायणं कुर्याच्छ्राद्धे नान्येषु कर्मसु
ताम्रपात्रे न गोक्षीरं पचेदन्नं न लोहजे । क्रमेण घृततैलाक्ते ताम्रलोहे न दुष्यतः ११४
रौप्यहैमानि पात्राणि नव्यसौराष्ट्रजानि वा।पत्रावल्यः पवित्राःस्युर्विप्राणांश्राद्धभोजने
कांस्यखर्परशुक्त्राश्ममृत्काष्ठफललोहजैः । नाऽऽचामेद्धैकृतैः पात्रैः श्राद्धे वै चर्मवारिणा
औदुम्बरेण पात्रेण कुर्यादाचमनक्रियाम् । तारताम्रसुवर्णौशीमिश्रधातुसमुद्भवैः ११७
कांस्यपात्राच्च्युतं वारि स्नाने च देवतार्चने । श्वानमूत्रसमं तोयं पुनः स्नानेन शुध्यति
नीवारा मापमुद्गाश्च गोधूमाः शालयस्तथा।यवाश्च चणकाश्चैव श्राद्धे भक्ष्यास्तथा तिलाः
कदलीकन्दफलकं धात्री बिल्वी च तूलकाः । कारकद्रोणपुष्पी च तण्डुली चक्रवर्तिकाः
उपोदकी चर्मफलं कोशातक्याः फलं शमी । जीवन्ती तुण्डिकाऽम्लीका कालशाकस्त-
थाऽऽर्द्रकम् १२१
ऊर्वारुक्षीरिणीपीलुद्राक्षाम्रकदलीफलम् । बीजपूरं कलिम्बुनि चर्भदं जानि चिर्भटम्(?)
कर्कोटकं कारवेल्लं सूरागं मृष्टपिण्डिकाः । कोटिभण्टं तत्त्रिविधं निशाचिह्ली च
वासुकः(?) १२३

---

१ क. ंधमूर्ण्यार्द्र° । २ क. जाति चि° ।

मरीचं हिङ्गुतैलानि सद्रव्याण्यविदाहि च । श्राद्धेष्वेतानि मुख्यानि तथा लवणजीरकैः
गवां क्षीरं दधि घृतं क्षौद्रमिक्षुरसं तथा । शर्करा गुडमत्स्यण्डी तथा मृष्टफलानि च १२५
श्यामाकान्कोद्रवान्कङ्गून्कलञ्जान्राजमाषकान् । निष्पावकान्कदम्बानि वर्जयेच्छ्रा-
द्धकर्मणि १२६
कलिङ्गं चैव वृन्ताकं कूष्माण्डं रक्तनीलकम् । हस्तीमुण्डफलं वर्ज्यमलाबु च तुषाम्रकम्
करीरजं कुमारीजं सार्षपं राजिकोद्भवम् । वर्जयेत्पितृकार्येषु वल्लकौसुम्भपर्परौ १२८
क्षीरं दधि घृतं तक्रमविच्छागसमुद्भवम् । माहिषं च दधि क्षीरं श्राद्धे वर्ज्यं प्रयत्नतः १२९
माहिषं मृतवत्सागोः सूतिकागोश्च वर्जयेत् ॥ १३०
मिश्रितं धेनुपयसा सापत्यमहिषीपयः । मेध्यमभ्युक्षितं गा(ङ्गे)तद्गायत्र्या सर्वकर्मसु
क्षैरं कठिनपक्वं स्याद्घासं स्याद्विलेपकम् । पीशी(रं)द्रवरूपं तत्क्षीरे यन्त्रिविधा मता(?)
पितृमानवदेवानां पाशीरक्षीरपायसैः(?)।जायते परमा तृप्तिः समध्वाज्यैः सशर्करैः १३३
पायसं शूद्रतो ग्राह्यं यद्यम्बुरहितं भवेत् । नव्यमृत्पात्रपक्वं चेत्पित्रर्थेऽपि न दुष्यति १३४
पायसं सक्तवो धानास्तिलपिष्टं तथौषधम् । साम्बून्येतानि गृह्णीयादपि शूद्रान्न दुष्यति
क्रीतं विप्रघृतं नीत्वा यदि विप्रांश्च भोजयेत् । दाता भोक्ता च विक्रेता पूर्वजाश्च पतन्ति ते

लावण्य(क्य)तित्तिरिशकुन्तकपिञ्जलानां
भारण्डसारसमसू(यू)र[क]वी(की)रकाण(णाम्) ।
धूम्याकारिकुटरीदहनाटभार-
द्वा[जा]ख्यलाटशि(कुर?)रीकिकिदीविकानाम् ॥ १३७

सारङ्गशम्बरवराहककृष्णसार* शशसानि(शाशानि) दुर्लभतमानि सदा पितृणाम् १३८
खड्गमांसैर्यदा पिण्डान्कुर्याद्वा भोजयेद्द्विजान् । तदा भवति पूर्वेषां तृप्तिर्द्वादशवार्षिकी
खड्गास्थि यदि विद्येत श्राद्धकाले समीपगम् । गयाश्राद्धेन सा तृप्तिः पितृणां सा भवेत्तदा
कथयन्तीति पितरः कुले कश्चिद्भविष्यति । यः खड्गमांसपिण्डांश्च कुर्याद्वा पितृभोजनम्
कूर्चलो विलमण्डश्च गोधा ककुपजाहकः(?) । पञ्च पञ्चनखा ह्येते दुर्लभाः श्राद्धकर्मणि
व्याधेभ्यो मेध्यमांसानि ग्राह्याणि द्रव्यपर्ययैः । पित्रर्थं स्वगृहे हिंसन्खादन्मांसं न पाप-
भाक् १४१
विना श्राद्धं विना यज्ञं मधुपर्कविधिं विना।पापी स्यात्स्वार्थतः कुर्वञ्जीवघातं बलिं विना
न जीवेन विना तृप्तिर्जीवस्यापि हि सर्वदा । अतः ससर्ज भगवाञ्जीवो जीवेन हिंस्यते
प्रवृत्तिर्ष(त्ति व)चनात्कुर्वन्निवृत्तिर(म)पि कर्मणाम् । एवं व्यवहरेन्नित्यं गृहस्थोऽपि
मुच्यते १४६

* एतदनन्तरं सकलादर्शपुस्तकेषु ' रक्षाह्यखड्ग ' इत्यधिकान्यक्षराणि ।

१ क. 'ररका° ।

न प्रवृत्तेः पुण्यहानिस्तन्निवृत्तेर्महत्फलम् । तदा दातव्यं धर्मज्ञैर्धर्मकारुण्यसंश्रयः(यैः)
कारुण्यं प्राणिषु प्रायः कर्तव्यं पुण्यहेतवे।अहिंसा परमो धर्मस्तस्मादात्मवदाचरेत् १४८
यज्ञेषु पशुहिंसायां सावर्णिव्यवसायवत् । फलं सहस्रगुणितं हिंस्यो राजा भवेदनु १४९
कारुण्यात्सर्वभूतेषु आत्मवतः सतः सतः ।उक्तकर्मसु सर्वत्र तदा मांसनिषेधनम् १५०
मद्यमप्यानृ(प्यमृ)तं श्राद्धे कलौ तत्तु विवर्जयेत्।मांसान्यपि हि सर्वाणि युगधर्मक्रमाद्भवेत्
अतो माखा(षा)न्नमेवैतन्मांसार्थे ब्रह्मणा कृतम् । पितरस्तेन तृप्यन्ति श्राद्धं कुर्व(र्या)न्न
तद्विना १५२
यथा बलिष्ठं मांसत्वान्माखा(षा)न्नमपि तत्समम् । सौगन्धिकं च स्वादिष्ठं मधुरं द्रव्यभे-
दतः १५३
भक्षं भक्षविधौ यत्तु गर्हितं तद्विवर्जयेत् । अभक्ष्यमपि भक्ष्यं स्याद्देशधर्मेण वै मुने १५४
अथ (र्थ)शब्दस्तु रवि भागे जव्यान्ते राजवर्जिते(?) । वाजं देयं प्रयत्नेन काथि(अर्थि)-
भ्यो वज्रमिश्रितम् १५५
त्रिमुहूर्तस्तु प्रातः स्यात्तावानेव तु संगवः । मध्याह्नस्त्रिमुहूर्तः स्यादपराह्णस्तथैव च १५६
सायं तु त्रिमुहूर्तः स्यात्पञ्चधा काल उच्यते । अतोऽपराह्णः पूर्वेषां भोज्यकाल उदाहृतः
आरम्भं कुतपं(पे)कुर्याद्दौहिणं तु न लङ्घयेत् । एतत्पञ्चमुहूर्तान्तः श्राद्धकाल उदाहृतः
मुहूर्तास्तत्र विज्ञेया दश पञ्च च सर्वदा । तत्राष्टमो मुहूर्तो यः स कालः कुतपः स्मृतः १५९
विवृद्धा यत्र पुरतः कुतपस्पर्शिनी तिथिः । श्राद्धे सांवत्सराङ्के च निर्णयोऽयं कृतः सदा
आषाढ्याः पञ्चमे पक्षे यान्यहानि तु षोडश ।क्रतुभिस्तानि तुल्यानि तेषु दत्तं महाफलम्
चतुर्दश्यां समारम्भः पौर्णमासादि पार्वणः । प्रातरन्तमजस्रं स्यादस्यान्तः पार्वणो विधिः
ब्राह्मान्मुहूर्तादारभ्य कुर्यान्मासार्धयामतः।श्राद्धं महालयं नाम तत्तु तीर्थवदाचरेत्१६३
पक्षेऽपरे च भरणी महती सा प्रकीर्तिता ।तस्यां श्राद्धं प्रकुर्वीत गयाश्राद्धसमं फलम्१६४
नन्दायां भार्गवदिने मघा(घा)सु च युगादिषु । पिण्डपातं प्रकुर्वीत ज्येष्ठपुत्रो विनश्यति
पौर्णमास्यादिसंयोगे योऽधिकुर्यान्महालयम् । पिण्डदाननिषिद्धेऽपि न निषिद्धं कदा-
चन १६६
महालये त्रयोदश्यां भवेद्यदि पितुर्दिनम् । पिण्डदानं विप्रभोज्यं श्राद्धं तत्स्याद्गयासमम्
पक्षश्राद्धं वा पञ्चमीप्रभृती(ति)स्यान्महालये।पितुः पितामहस्याप्य(पि?)प्रपितामहमृद्दिने
कालो ह्यन तरूपस्तु कालो वै परमेश्वरः । तस्मात्काले प्रसन्नेन कर्तव्यं कर्म निश्चितम्
गर्भस्थोऽपि[च] दौहित्रो अश्वयुक्प्रतिपद्दिने । कुर्यान्मातामहश्राद्धं पितरौ यदि जीवतः
आज्यप्रतिपदि श्राद्धं नान्दीश्राद्धवदिष्यते(?)। नात्यंसपाकशुद्धिः(?) स्यादा मध्याह्ना-
द्विशिष्यते १७१
सूतकादिनिमित्तेन द्रव्याभावादिभेदतः । स्थितं महालयं कुर्याद्यावद्वृश्चिकदर्शनम् १७२
कन्यागते सवितरि पितरो यान्ति वै गुरु(गृह)म् । तिष्ठन्त्याकाङ्क्षिणस्तावद्यावद्वृश्चिकद-
र्शनम् १७३

कन्दमूलफलैर्वाऽपि कर्तव्यं पितृतर्पणम् । अन्यथा दारुणं शापं दत्त्वा यान्ति बुभुक्षिताः
एकोद्दिष्टं तु मध्याह्ने दिवसस्य विधीयते । आद्ये मुहूर्ते वा(या)मस्य पिण्डदानं च भोजनम्
पितृक्षयाहो संप्राप्तो यदि कश्चिन्महालयः।तदा क्षयाहः कर्तव्योऽपरेऽहनि महालयम्(यः)
पूर्वाह्णे कानि(मि)कं श्राद्धं कुर्यान्नान्दीमुखं तथा । माध्याह्निकं यदा कुर्यान्नित्यश्राद्धं तदा
भवेत् १७७

द्वौ दे(दै)वे च त्रयः पित्र्य एकैकमुभयत्र वा । मातामहानामप्येवं तन्त्रं वा वैश्वदेविकम्
इष्टिश्राद्धे क्रतुदक्षौ काम्ये च ध्वनिरो(धूरिलो)चनौ । पुरूरवार्द्रवसंज्ञौ पार्वणे समुदाहृतौ
सापिण्डे कालकामा(मौ)तौ वृद्धौ सत्यवसू स्मृतौ । यज्ञे च बहवः सन्ति श्राद्धे श्राद्धे पृथ-
क्पृथक् १८०

पितरश्च पितामहास्तथा च प्रपितामहाः । एवं पार्वणसंज्ञा च तथा मातामहेष्वपि १८१
एषां पत्न्यः क्रमाद्ग्राह्यास्तिस्रस्तिस्रश्च पार्वणे । उक्तानि चत्वार्येतानि पार्वणानि न पञ्च-
मम् १८२

वृद्धौ द्वादशदेवत्यान्न चैवान्वष्टकासु च (?)।षड्दर्शे त्रीणि यज्ञे च एक एवक्षयेऽहनि १८३
पार्वणं च क्षयाहे स्याद्वृद्धौ स्यान्नवदैवतम् । दर्शे षड्दैवतं श्राद्धं काम्ये त्रैपौरुषं भवेत्
वसुरुद्रादित्या अमी इज्यन्ते सहमेलने । चतुर्थस्यानिवृत्तिः स्यादाद्यप्रेतो भवेदिति १८५
श्राद्धं स्त्रीपुंसयोः कार्यमेकोद्दिष्टमसंततेः । अतः संततिमन्तोऽमी इज्यन्ते बहुभिः सह
आब्रह्मस्तम्बपर्यन्तं पूर्वजाः सन्ति ये कुले । तृप्ता भवन्ति ते सर्वे पुत्रहस्तेन नान्यथा १८७
अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च । येन केनाप्युपायेन पुत्रमुत्पादयेत्सुधीः १८८
सैकोद्दिष्टं दैवहीनं यतः पुत्रो न विद्यते । आयान्ति पुत्रिणः पूर्वे देवर्षिपितृवेष्टिताः १८९
दर्शे द्वे पार्वणे कार्ये मातुर्मातामहस्य च । क्षयाहे च पितुर्मातुः पार्वणं पार्वणं कृतम् १९०
अन्वष्टकासु नवभिः पिण्डैः श्राद्धमुदाहृतम् । पित्रादौ मातृमध्यस्थं ततो मातामहान्तिकम्
अन्वष्टक्ये पितृभ्यश्च ततस्त्रीभ्यश्च दैवतम् । ताभ्यस्त्वदैवतं वृद्धौ तेभ्यश्चापि सदैवतः(?)
मातरः प्रथमं पूज्याः पितरश्च ततः परम् । मातामहश्च तदनु वृद्धिश्राद्धे त्वयं क्रमः १९३
पार्वणानि मयोक्तानि विपरीतानि तानि ते ।अथर्वणास्तर्पयन्ति तद्वेदोक्तमतं यथा १९४
अतिथिं श्राद्धरक्षार्थमते(न्ते) विष्णुस्वरूपिणम् । निवेशये वि(द्वि)प्णुसमं ब्राह्मणं वेद-
पारगम् १९५

कन्यवाहादयो येऽमी विद्यन्ते ये च पूर्वजाः । सर्वेषामेव वर्णानां श्राद्धे तृप्यन्ति देवताः
साक्षाद्विष्णुर्धर्मराजः श्राद्धदेवश्च कथ्यते ।विश्वे देवाः पितृतिथिः सर्वे विष्णुरिति स्मृ-
पूर्वजास्तुष्टिमायान्ति दाता भोक्ता न संशयः ॥ १९८

इति प्रजापतिस्मृतिः समाप्ता ।

ॐ तत्सद्ब्रह्मणे नमः ।

बृहद्यमस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

अथातो यमधर्मस्य प्रायश्चित्तं व्याख्यास्यामः। चतुर्णामपि वर्णानां[1] प्रायश्चित्तं प्रकल्पयेत्
ब्राह्मणस्तु शुना दष्टो जम्बूकेन वृकेण वा। उदिते ग्रहनक्षत्रे दृष्ट्वा सद्यः शुचिर्भवेत् २
जलाग्निबन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः। विषप्रपन्नगात्राश्च शस्त्राघातहताश्च ये ३
नवैते प्रत्यवसिताः सर्वधर्मबहिष्कृताः। चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन च ४
उभयावसिताः पापा ये श्यामशबलाच्युताः। इन्दुद्वयेन शुध्यन्ति दत्त्वा धेनुं तथा वृषम् ५
गोब्राह्मणहतं दग्धं मृतमुद्बन्धनेन तु। पाशं छित्त्वा ततस्तस्य तप्तकृच्छ्रद्वयं चरेत् ६
कृमिभिर्ब्रह्मसंयुक्तं मक्षिकैश्चोपघातितम्। कृच्छ्रार्धं संप्रकुर्वीत शक्त्या दद्यात्तु दक्षिणाम्
चाण्डालभाण्डसंस्पृष्टं पीत्वा भूमिगतं जलम्। गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति
चाण्डालघटभाण्डस्थं यस्तोयं पिबति द्विजः। तत्क्षाणत्क्षिपते यस्तु प्राजापत्येन शुध्यति
यदि न क्षिपते तोयं शरीरे यस्य जीर्यति। प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनादिकम्
चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ११
चाण्डालान्नं भक्षयित्वा तद्वत्सलिलमेव च। मासं कृच्छ्रं चरेद्विप्रो चान्द्रायणमथापि वा
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् १३
चाण्डालमूर्तिका ये च ये च संकीर्णयोनयः। तेषां दत्त्वा च भुक्त्वा च तप्तकृच्छ्रं समाचरेत् १४
चाण्डालिकासु नारीषु द्विजो मैथुनकारकः। कृत्वाऽघमर्षणं पक्षं शुध्यते च पयोव्रतात्

इति श्रीयाम्ये धर्मशास्त्रे प्रथमोऽध्यायः॥ १ ॥

(अथ द्वितीयोऽध्यायः ।)

नटां[टीं] शैलूषिकां चैव रजकीं वेणुजीविनीम्। गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम् १
कुचालिकान्नभोक्तॄणां तन्नयागामिनां तथा। अज्ञानात्कृच्छ्रमुद्दिष्टं ज्ञात्वा चैव व्रतद्वयम्

---

१ क. ग. °नां धर्मशास्त्रं प्र° । २ ख. °पतनप्राप्ताः श° । ३ ख. ये श्यामशबलच्यु° । ४ क ग. मृतं तद्व° । ५ क. ग. पापं छि° । ६ ख. ग. पिबते । ७ ख. °यः । नारी शैलूषिकीं चै° । ८ ख. तन्नारीगा° ।

सुरायाः संप्रपानेन गोमांसभक्षणे कृते । तप्तकृच्छ्रं चरेद्विप्रो मौञ्जीहोमेन शुध्यति ३
*गोक्षत्रियं तथा वैश्यं शूद्रं चाप्यनुलोमजम् । ज्ञात्वा विशेषेण तप्तश्चरेच्चान्द्रायणं व्रतम् ४
कुक्कुटाण्डकमात्रं तु ग्रासं च परिकल्पयेत् । अन्यथाभावदोषेण नवमेऽहि च शुध्यति ५
एकैकं वर्धयेद्ग्रासं शुक्ले कृष्णे च हासयेत् । अमायां तु न भुञ्जीत एष चान्द्रायणो विधिः ६
प्रायश्चित्तमुपक्रम्य कर्ता यदि विपद्यते । पूतस्तदहरेवाऽऽ(वा)पि इह लोके परत्र च ७
यावदेकैः पृथग्भाव्यः प्रायश्चित्तं न सेवते । अप्रशस्ता न ते स्पृश्यास्ते सर्वेऽपि विगर्हिताः
अभोज्याश्चाप्रतिग्राह्या असंपङ्क्त्या विवाहिकाः । पूयन्ते तु व्रते चीर्णे सर्वे ते रिक्थभागिनः ९

इति श्रीयाम्ये धर्मशास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः ।)

ऊनैकादशवर्षस्य पञ्चवर्षात्परस्य च । प्रायश्चित्तं चरेद्भ्राता पिता वाऽन्योऽपि बान्धवः
अतो बालतरस्यापि नापराधो न पातकम् । राजदण्डो न तस्यास्ति प्रायश्चित्तं न विद्यते २
अशीत्यधिकवर्षाणि बालो वाऽप्यूनषोडशः । प्रायश्चित्तार्धमर्हन्ति स्त्रियो व्याधित एव च
पितृव्यभ्रातृभार्यां च भगिनीं मातुरेव च । श्वश्रूं पितृष्वसारं च तप्तकृच्छ्रं समाचरेत् ४
+राज्ञीमाचार्यशिष्यां वा उपाध्यायस्य योषितः । एता गत्वा स्त्रियो मोहात्षण्मासं कृच्छ्रमाचरेत् ५
द्वौ मासौ भक्ष्यभोज्यं च द्वौ मासौ यावकेन तु । द्वौ मासौ पञ्चगव्येन षण्मासं कृच्छ्रमाचरेत् ६
मातरं गुरुपत्नीं च स्वसारं दुहितां तथा । गत्वा तु प्रविशेदग्निं नान्या शुद्धिर्विधीयते ७
अस्तं गते यदा सूर्ये चाण्डालैर्मृतुमत्स्त्रियः । संस्पृशेत्तु यदा कश्चित्प्रायश्चित्तं कथं भवेत् ८
जातरूप्यं सुवर्णं तु दिवाऽऽहृतं च यज्जलम् । तेन स्नात्वा च पीत्वा च गामालभ्य विशुध्यति ९

---

* एतदर्धस्थानेऽयं पाठः ख. पुस्तके—" यः क्षत्रियस्तथा वैश्यः शूद्रश्चाप्यनुलोमजः " इति ।
+ न विद्यतेऽयं श्लोकः ख. ग पुस्तकयोः ।

---

१ क. °राया मद्यपा°। ख. °रान्यमद्यपा° । २ क. ग. °प्रो मुञ्जी' । ३ क. ग. 'मावस्यां न। ४ क. °त्तव्यवस्थायां क' । ५ ख. 'देकोऽपृथग्द्रव्यः प्रा' । ग. 'देकपृथग्भागः प्रायश्चित्तेन सेव्यते । अ' । ६ क. 'स्तास्तथा तस्य तेषां चैपेह ग° । ७ क. ख. °ज्याश्च प्र' । ८ ख. 'पच्या विवाहिनः । पू° । ९ क. ग. तु श्रुते चीर्णे सर्वे नरकभा° । १० ख. °रजकस्त्रियः ।

दासनापितगोपालकुलमित्रार्धसीरिणः[1]। एते शूद्रास्तु भोज्यान्ना यश्चाऽऽत्मानं निवेदयेत् १०

असच्छूद्रेषु अन्नाद्यं ये भुञ्जन्त्यबुधा द्विजाः। प्रायश्चित्तं तथा प्राप्तं चरेच्चान्द्रायणव्रतम्
यः करोत्येकरात्रेण वृषलीसेवनं द्विजः। तेनैवक्षणे जपेन्नित्यं त्रिभिर्वर्षैर्व्यपोहति १२
वृषलीं यस्तु गृह्णाति ब्राह्मणो मदमोहितः। सदा सूतकिता तस्य ब्रह्महत्या दिने दिने १३
वृषलीगमनं चैव मासमेकं निरन्तरम्। इह जन्मनि शूद्रत्वं पुनः श्वानो भविष्यति १४
वृषलीफेनपीतस्य निःश्वासोपगतस्य[3] च। तस्यां चैव प्रसूतस्य निष्कृतिर्न विधीयते १५
अग्रे माहिषकं दृष्ट्वा मध्ये च वृषलीपतिम्। अन्ते वार्धुषिकं दृष्ट्वा निराशाः पितरो गताः
महिषीत्युच्यते भार्या सा चैव व्यभिचारिणी। तान्दोषान्क्षमते यस्तु स वै माहिषकः स्मृतः
पितुर्गेहे तु या कन्या पश्यत्यसंस्कृता रजः। भ्रूणहत्या पितुस्तस्य(स्याः) कन्या सा वृषली स्मृता १८
यस्तां विवाहयेत्कन्यां ब्राह्मणो मदमोहितः। असंभाष्यो ह्यपाङ्क्तेयः स विप्रो वृषलीपतिः
प्राप्ते द्वादशमे वर्षे कन्यां यो न प्रयच्छति। मासि मासि रजस्तस्याः पिता पिबति शोणितम्
अष्टवर्षा भवेद्गौरी नववर्षा च रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला २१
माता चैव पिता चैव ज्येष्ठभ्राता तथैव च। त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्
समर्घं धनमुत्सृज्य महा(हा)र्घं यः प्रयच्छति। स वै वार्धुषिको ज्ञेयो ब्रह्मवादिषु गर्हितः
शुक्रक्षयकरा वन्ध्या त्याज्येति परिकीर्तिता। तस्यास्तु यो भवेद्भर्ता तं तु विद्यादजाविकम्
दूराच्छ्रान्तं भयग्रस्तं ब्राह्मणं गृहमागतम्। अनर्चयित्वा यो भुङ्क्ते तत्क्षणेऽसौ विधी(ही)यते
अजाविको माहिषश्च तथा च वृषलीपतिः। तृणाग्रेणापि संस्पृष्टा सवासा जलमाविशेत्
यावदुष्णं भवेदन्नं यावद्भुञ्जन्ति वाग्यताः। पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः
हविर्गुणा न वक्तव्याः पितरो यान्त्यतर्पिताः। पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः
यावतो ग्रसते ग्रासान्हव्यकव्येष्वमन्त्रितः। तावतो ग्रसते प्रेत्य दीप्तान्ग्रासानयोमयान्
आसनेष्वासनं दद्यान्न तु हस्ते कदाचन। हस्तेष्वासनदाने च निराशाः पितरो गताः ३०
आसने पादमारूढो वस्त्रस्यार्धमधः कृतम्। मुखेन धमितं भुङ्क्ते द्विजश्चान्द्रायणं चरेत् ३१
अङ्गुल्यां यः पवित्राणि कृत्वा गन्धान्समर्च(र्प)येत्। पितॄणां नोपतिष्ठेत राक्षसैर्विप्रलुप्यति
*हसन्ग्रासं च यो भुङ्क्ते सशब्दं सेङ्गितं तथा। लेहितं वर्तितं चैव षडेते पङ्क्तिदूषकाः ३३

---

* एतद्वचनस्थानेऽयं पाठः क. ग. पुस्तकयोः–"ग्रासाद्ग्रासं च यो भुङ्क्ते सशब्दो लिङ्गिते तथा। लेहितं वर्जनं शण्डे तेषां पङ्क्तिश्च दूषिता" इति।

---

१ क. ग. °र्धशीरि°। २ ख. तल्लक्षेण ज°। ३ ग °नपतनान्निःश्वा°। ४ ख पद्यत°। ५ क. ख. न्ध्या-त्यजेति। ६ क. ग. °राक्रान्तं पदम्°। ७ क. °र्धकृतः शिरः। मु°। ग. °र्धवृतः शिरः। मु°।

श्वित्री कुष्ठी तथा शूली कुनखी श्यावदन्तकः। रोगी हीनातिरिक्ताङ्गः पिशुनो मत्सरी तथा ३४
दुर्भगो हि तथा षण्ढः पाखण्डी वेदनिन्दकः।हैतुकः शूद्रयाजी च अयाज्यानां च याजकः
नित्यं प्रतिग्रहे लुब्धो याचको विषयात्मकः। श्यावदन्तोऽथ वैद्यश्च असदालापकस्तथा
एते श्राद्धे च दाने च वर्जनीयाः प्रयत्नतः। तथा देवलकश्चैव भृतको वेदविक्रयी ३७
एते वर्ज्याः प्रयत्नेन एवमेव यमोऽब्रवीत्। निराशाः पितरस्तस्य भवन्ति ऋणभागिनः
अथ चेन्मत्र(त्र)विद्युक्तो वैष्णवो ज्ञानवान्हि सः।हव्यकव्ये नियोक्तव्य इति प्राह स्वयं यमः
तस्मात्सर्वप्रयत्नेन श्राद्धे यज्ञे च कर्मणि। अदूष्यं चैव विप्रेन्द्रं योजनीयं(येत्तु) प्रयत्नतः
तथैव मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः। वर्जितं च यमः प्राह पङ्क्तिपावन एव सः ४१
निर्मत्सरः सदाचारः श्रोत्रियो ब्रह्मविद्युवा। विद्याविनयसंपन्नः पात्रभूतो द्विजोत्तमः
वेदान्तविज्ज्येष्ठसामा अलुब्धो वेदतत्परः। योजनीयः प्रयत्नेन दैवे पित्र्ये च कर्मणि
यद्दत्तं च हुतं तस्मै ह्यनन्तं नात्र संशयः॥ ४३
उच्छिष्टोच्छिष्टसंस्पृष्टः शुना शूद्रेण वा द्विजः। उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति
उच्छिष्टभाजनं येन विप्रेण चान्नवर्जितम्। स्पृष्टं तेन प्रमादाच्च प्राजापत्यं समाचरेत् ४५
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणो ब्राह्मणेन हि। दशरुद्रीं जपेत्पश्चाद्गायत्र्या शोधनं परम्
उच्छिष्टोच्छिष्टसंस्पृष्टः क्षत्रियो वैश्य एव च। प्रमादोच्छिष्टसंस्पृष्टः शूद्रेण तु यदा द्विजः
उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति। श्वानकुक्कुटमार्जाराः काको वा स्पृशते यदि
उच्छिष्टं तं द्विजं यस्तु अहोरात्रेण शुध्यति। पञ्चगव्येन शुद्धिः स्यादित्याह भगवान्यमः
रजस्वलां स्पृशेद्यस्तु त्रिरात्रं तत्र कारयेत्। उपोष्य द्विजसंस्कारं पञ्चगव्येन शुध्यति५०
उदक्यादृष्टिपातेन श्रुतशब्देन चैव हि। स्नानं देवार्चनं दानं हवनं च प्रणश्यति ५१
रक्तवस्त्रस्य विक्रेता लाक्षारजकमे(ए)व च। वेणुजीवनकैवर्ततक्षचर्मोपजीविनः ५२
एतेषां स्पर्शनात्पापं तथा चैव तु मोहितः। प्रतिग्रहाच्च विप्रो वै नरकं प्रतिगच्छति ५३
उदक्यायाः स्पर्शने चैव ब्राह्मणो वै प्रमादतः। षड्रात्रोपोषितः स्नात्वा पञ्चगव्येन शुध्यति
सूतके वर्तमानेऽपि दासवर्गस्य का क्रिया। स्वामितुल्यं भवेत्तस्य सूतकं तु प्रशस्यते ५५
*यन्न कारयते तत्तन्नान्यं प्रत्यब्रवीद्यमः। विवाहोत्सवयज्ञेषु कार्ये चैवमुपस्थिते ५६

---

* एतदर्धस्थानेऽयं पाठः क पुस्तके—" यद्यन्न कारयेत्तत्तन्नान्यत्रेत्यब्रवीन्मम " इति। एतदर्धस्थानेऽयं-पाठो ग. पुस्तके—"यथा तु कारयेत्तत्र निरोधं प्रब्रवीमि तत् " इति।

---

१ क. ग. चेत्पात्र°। २ क. ग. 'षकैः। व'। ३ क. ग. °रुद्रं ज°। ४ ख. °ति। श्वेतकु°। ५ ख. °ष्टं यं द्विजं सोऽपि अ°। ६ क. ग. °स्त्रविचितारं ला°। ७ क. ग. °स्य वा कि°।

रजः पश्यति या नारी तस्य कालस्य का क्रिया। विपुले च जले स्नात्वा शुक्लवासास्त्वलंकृता ५७

आपोहिष्ठेत्यृगभिषिक्ताऽऽयं गौरिति वा ऋचः(चा)। पूजान्ते होमयेत्पश्चाद्घृताहुत्या शताष्टकम् ५८

गायत्र्या व्याहृतिभिश्च ततः कर्म समारभेत्। यावद्द्विजा न चार्च्यन्ते अन्नदानहिरण्यकैः तावच्चीर्णव्रतस्यापि तत्पापं न प्रणश्यति ॥ ६०

यद्देहकं काकबलाकाचिल्लामेध्येन लिप्तं तु भवेत्कदाचित्।
श्रोत्रे मुखे वा परिमस्तके वा स्ना(स्ना)नेन लेपोपहतस्य शुद्धिः ॥ ६१

अभक्ष्याणामपेयानामलेह्यानां च भक्षणे। रेतोमूत्रपुरीषाणां प्रायश्चित्तं कथं भवेत् ६२

पद्मोदुम्बरबिल्वानां कुशाश्वत्थपलाशयोः। एतेषामुदकं पीत्वा पञ्चगव्येन शुध्यति ६३

स्त्रीणां रजस्वलानां च स्पर्शश्चैव भवेद्यदि। चतुर्णामपि वर्णानां प्रायश्चित्तं कथं भवेत् ६४

+स्पृष्ट्वा रजस्वलाऽन्योन्यं सगोत्रा चान्यगोत्रका। कामादकामतो वाऽपि त्रिरात्राच्छुद्धिरिष्यते ६५

स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी क्षत्रियी तथा। अर्धकृच्छ्रं चरेत्पूर्वा पादकृच्छ्रं तथोत्तरा
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी वैश्यिनी तथा। पादहीनं चरेत्पूर्वा पादमेकं तथोत्तरा
स्पृष्ट्वा रजस्वलाऽन्योन्यं ब्राह्मणी शूद्रिणी तथा। कृच्छ्रेण शुध्यते शूद्री ब्राह्मी दानेन शुध्यति ६८

विप्रः स्पृष्टो निशायां तूदक्यया पतितेन वा। दिवाऽऽनीतेन तोयेन स्नापयेदग्निसंनिधौ
दिवा चैवार्कसंस्पृष्टं रात्रौ नक्षत्रदर्शनात्। संध्ययोरुभयोर्वाऽपि पवित्रं सर्वदा जलम् ७०

इति श्रीयाम्ये धर्मशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

खातं वापी तथा कूपपाषाणे शस्त्रघातिते। यष्ट्या तु घातिते चैव मृत्पिण्डान्येव साधयेत्(?)
गोवधे चैव यत्पापं बलीवर्दस्य चैव हि। प्रायश्चित्तं भवेत्तत्र स्त्रिया वा पुरुषस्य वा २

खाते च पतिता या गौः कूपे वा चावटेऽपि वा। आशा(शै)वालकुडे(ण्डे) वाऽपि शस्त्रघातेन चैव हि ३

यष्ट्या तु पतिता या गौर्बलीवर्दो मृतोऽपि वा। वत्सो वत्सतरो वाऽपि प्रायश्चित्ती भवेन्नरः

+ न विद्यत एतद्वचनं ख. पुस्तके।

---

१ क. ग. ऋचम्। २ ग. °हृतीश्चै। ३ क. ग. °तिश्चैव त°। ४ क. °न्यं स्वगोत्रा चान्यभर्तृका। कामा°। ५ क. ख. ब्राह्मणी दानशु°। ६ क. ख. खातवा°। ७ क. ख. वा। अशावालकुटे वाऽ°। ८ क. °तरी वाऽ°।

नारी वाऽपि कुमारो वा प्रायश्चित्ताद्विशुध्यति । पापी प्रख्यापयेत्पापं दत्त्वा धेनुं तथा वृषम् ५

प्रच्छन्नपापिनो ये स्युः कृतघ्ना दुष्टचारिणः । नरकेषु च पच्यन्ते यावदाभूतसंप्लवम् ६

तस्माच्च पापिना ग्राह्यं प्रायश्चित्तं यथा तथा । प्रमादाच्च हता येन कपिला वा तथेतरा ७

यथा ब्रह्मवधे पापं कपिलाया वधे तथा । बलीवर्देऽपि च तथा प्रायश्चित्तं समं स्मृतम् ८

रोधने बन्धने चैव मृत्पिण्डनवगोमये । उत्कृष्टेनापि गोहन्ता प्रायश्चित्तेन शुध्यति ९

मुष्टयां वा निहता या गौः शकटे धा(वा)रिपङ्क्तयोः । गोवर्तपतिता गावः श्वनद्यामुत्तरेऽपि वा १०

एतत्ते कथितं सर्वं गवां च(वि)घातमुत्तमम्।यत्र यत्र म्रियेद्गौश्च प्रायश्चित्तं पृथक्पृथक् ११

वने च पतिता या गौः पामरत्राट(स)शङ्किता । मृता चैव यदा सा गौः प्रायश्चित्ती भवेच्च सः १२

प्रेषितः पुरुषो वाऽपि प्रायश्चित्तं च यत्स्मृतम् । आब्दिकं चैव शूद्रस्य वैश्यस्य द्विगुणं भवेत् त्रिगुणं क्षत्रियस्यैव विप्रस्यैव चतुर्गुणम् । गोष्ठे निवसनं कार्यं गोघ्नोऽहमिति वाचयेत् १४

कष्टेन वर्तमानोऽपि कालेनैव शुचिर्भवेत् । गवां मध्ये वसेद्रात्रौ दिवा गा वै ह्यनुव्रजेत् १५

न स्त्रीणां वपनं कुर्यान्न च गोव्रजनं स्मृतम् । न च गोष्ठे वसेद्रात्रौ न कुर्याद्वैदिकीं श्रुतिम् सर्वान्केशान्समुच्छ्रित्य च्छेदयेदङ्गुलद्वयम्।एष ए(वमे)व तु नारीणांशिरोमुण्डापनं स्मृतम् सूतके मृतके चैव विधिं ब्रूहि नो यम । जातके वर्तमानेऽपि मृतकं च यदा भवेत् १८

को विधिः स विनिर्दिष्टः कथयस्व यथातथम् । एवमुक्तो हि भगवान्यमः प्राह यथातथम् जातके नैव मृतकं क्षयं याति न संशयः । पूर्वव्रतमनिर्दिष्टं मया च सूतकं भवेत् २०

सूतकेन न लिप्येत इति प्राह स्वयं यमः । सूतकेन न लिप्येत व्रतं संपूर्णतां व्रजेत् २१

श्राद्धं दानं तपो यज्ञो देवताराधनं तथा । ब्रह्महा च सुरापश्च स्वर्णस्तेयी गुरुद्रुहः २२

संसर्गी पञ्चमो ज्ञेयस्तत्समो नात्र संशयः । एतेषु द्वादशाब्दं च प्रायश्चित्तं विधीयते २३

तथा पातकिनां चैव षडब्दं चैव संस्मृतम् । उपपातकिनां चैव त्रिपञ्चाब्दं विधीयते २४

प्राजापत्यैस्त्रिभिः कृच्छ्रं कृच्छ्रं वै द्वादशाब्दिकम् । एकभक्तं तथा नक्तमुपवासमथापि वा एतद्दिनचतुष्केण पादकृच्छ्रश्च जायते । त्रिपादकृच्छ्रो विज्ञेयः पापक्षयकरः स्मृतः २६

धर्मशास्त्रानुसारेण प्रायश्चित्तं मनीषिभिः । दातव्यं पापमुक्त्यर्थं प्राणिनां पापकारिणाम् अनुतापाद्य(पो य)दा पुंसां(सो) भवेद्वै पापिनः किल । प्रायश्चित्तं तदा देयमित्याह भगवान्यमः

---

१ क. °ष्ठ्या वाऽपि ह° । २ ग. °टेधरि° । ३ ख. °तयति या गावोऽश्वनद्यामु° । ४ ख. °ने निप° । ५ ग. गौः परम त्रट(माटन)° । ६ क. °वेत्र सः । ७ क. ख. °दिकीं श्रुतिः । स° । ८ ख. °मुद्गृह्य च्छे° । ९ ख. °था याज्ञकि° । १० क ख. °च्छ्रस्य जा° ।

अज्ञात्वा धर्मशास्त्राणि प्रायश्चित्तं ददाति यः। प्रायश्चित्ती भवेत्पूतस्तत्पापं पर्षदं व्रजेत्
तस्माच्छास्त्रानुसारेण प्रायश्चित्तं विधीयते । अष्टशाल्यां मृता ये च ये च स्त्रीसूतके मृताः
दंष्ट्राभिर्भक्षिता ये च ये च आत्महनो जनाः । अष्टशाल्यां मृतो विप्रः प्रायश्चित्तं तु
बन्धुभिः ३१
कार्यं तु ऑब्दिकं चैव तथा स्त्रीणां च दापयेत् । शुद्ध्यर्थं नान्यथा भाव्यमित्याह
भगवान्यमः ३२
दुर्मृत्युमरणं प्राप्ता येऽप्यधोगतिमागताः। तेषां शुद्ध्यर्थमेवात्र द्वित्र्यब्दं हि विशिष्यते ३३
ब्राह्मणक्षत्रियविशां शूद्राणां चान्त्यजातिनाम्। तारतम्येन दातव्यमिति प्राह स्वयं यमः
पतितानां च विप्राणां तथा स्त्रीणां विगर्हितम्। कथं शुद्धिर्भवेत्तासां तेषां चैव विशेषतः
व्यभिचारादृतौ शुद्धिः स्त्रीणां चैव न संशयः । गर्भे जाते परित्यागो नान्यथा मम
भाषितम् ३६
दुष्टस्त्रीदर्शनेनैव पितरो यान्त्यधोगतिम्। घृतं योन्यां क्षिपेद्धोरं परपुंसगता हि या ३७
हवनं च प्रयत्नेन गायत्र्या चायुतत्रयम्। ब्राह्मणान्भोजयेत्पश्चाच्छतमष्टोत्तरेण हि ३८
विधवा चैव या नारी पुंसोपगतसेविनी। त्याज्या सा बन्धुभिश्चैव नान्यथा यमभाषितम्
पतितस्य च विप्रस्य अनुतापरतस्य च । पापाच्चैव निवृत्तस्य प्रायश्चित्ती भवेत्तदा ४०
तारतम्येन दातव्यं प्रायश्चित्तं यथाविधि । सकामो हि यदा विप्रः पापाचारपरो भवेत्
दृष्ट्वा(दिष्ट्या) निवृत्तपापौघः प्रायश्चित्ती तदाऽर्हति । तथा क्षत्रियवैश्यो वा शूद्रो वाऽपि
यथाक्रमात् ४२
विधवागमने पापं सकृच्चैव तु यद्भवेत्। असकृच्च यदा ज्ञात्वा प्रायश्चित्तं प्रवर्तते ४३
असकृद्गमनाच्चैव चरेच्चान्द्रायणद्वयम्। सकृद्गमने यत्पापं प्राजापत्यद्वयेन हि ४४
पुनर्भूर्विकृता येन कृता विप्रेण चैव हि। विना शाखाप्रभेदेन पुनर्भूर्भण्यते हि सा ४५
सवर्णश्च सवर्णायामभिषिक्तो यदा भवेत्। ब्राह्मणः कामलुब्धोऽपि श्राद्धे यज्ञे च गर्हितः
क्षत्रियो ब्राह्मणीसक्तः क्षत्रिण्यां विश एव वा। वैश्यायां गमने शूद्रः पतितायां भवान्यथा ४७
प्रातिलोम्ये महत्पापं प्रवदन्ति मनीषिणः। प्रायश्चित्तं चाऽऽनुलोम्ये न भवत्येव चान्यथा
मानसं वाचिकं चैव कायिकं पातकं स्मृतम्। तस्मात्पापाद्विशुद्ध्यर्थं प्रायश्चित्तं दिने दिने
प्रातः संध्यां सनक्षत्रामुपास्यामे(सीते)व यत्नतः । मध्याह्ने च तथा रौद्रीं सायं चैव तु
वैष्णवीम् ५०

---

१ क. °ष्टशल्यां। २ ख. ये चापि सू°। ३ क. °ष्टशल्यां। ४ क. ख. °व्यब्दिकं। ५ क. ख. द्घोरां प°। ६ ख. °पापेभ्यः प्रा°। ७ क. °मनय°। ग. °मनात्तु य°। ८ क. ख. °नर्भुवि कृ°। ९ ख. °वर्णा च स°। १० ग. भवन्य°। ११ ख. °त्तं नुलोमेन। १२ क. °व त्रिविधं चैव संस्मृ°।

त्रिविधं पापशुद्ध्यर्थं संध्योपासनमेव च । संध्याहीनो हि यो विप्रः स्नानहीनस्तथैव च
स्नानहीनो मलाशी स्यात्संध्याहीनो हि भ्रूणहा। नैशं पा(नश्येत्पा)पं हि यां ध्यात्वा-
उ(तु)पासनपरो हि सः ५२
ब्रह्मलोकं व्रजत्येव नान्यथा यमभाषितम् ।विद्यातपोभ्यां संयुक्तः शान्तः शुचिरलम्पटः
अलुब्धोऽहादनिष्पापा भूदेवा नात्र संशयः। पात्रीभूताश्च विज्ञेया विप्रास्ते नात्र संशयः
तेभ्यो दत्तमनन्तं हि इत्याह भगवान्यमः । कुकर्मस्थास्तु ये विप्रा लोलुपा वेदवर्जिताः
संध्याहीना व्रतभ्रष्टाः पिशुना विषयात्मकाः । तेभ्यो दत्तं निष्फलं स्यान्नात्र कार्या
विचारणा ५६
*प्रतिग्रहे संकुचिता यदान्यातैयविधृता। भूमिदर्शनात्पापमोचकाकृतत्रेताद्वापरे कलौ
नौवर्वीरोषितः ५७
राजप्रतिग्रहात्सर्वं ब्रह्मवर्चसमेव च। नश्यतीति न संदेह इत्याह भगवान्यमः ५८
राज्ञां प्रतिग्रहस्त्याज्यो लोकत्रयजिगीषुभिः। राज्ञः प्रतिग्रहाच्चैव ब्राह्मण्यं हि विलुप्यते
गावो दूरप्रचारेण हिरण्यं लोभलिप्सया। स्त्री विनश्यति गर्वे(र्भे)ण ब्राह्मणो राजसेवया
सेवकाश्चापि विप्राणां राज्ञां सुकृतनामभिः। कुम्भीपाकेषु पच्यन्ते यावदाभूतसंप्लवम्
असेव्यासेविनो विप्रा अयाज्यानां च याजकाः। अपाङ्क्त्या(ङ्क्त्या)स्ते च विज्ञेयाः
सर्वधर्मबहिष्कृताः ६२

इति श्रीयाम्ये धर्मशास्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः।)

अतः परं प्रवक्ष्यामि शृणुध्वं मुनिपुंगवाः। सर्वेषामन्त्यजातीनां वर्णादीनां यथाक्रमम्
स्त्रीसंपर्कादिकं सर्वं जातमन्त्यजसंज्ञकम्। योनिसंकरजं सर्वं वर्णतश्चापि सर्वशः २
विप्रक्षत्रियविट्शूद्रा वर्णिजात्येष्वनुक्रमात् । एते ब्राह्मणकुत्साः स्युस्तस्माद्ब्राह्म-
ण(ण्य)मुत्तमम् ३
वेदाचाररतो विप्रो वेदवेदाङ्गपारगः। तैरप्यनुष्ठितो धर्म उक्तश्चैव विशेषतः ४
कार्ये चैव विशेषेण त्रिभिर्वर्णैरतन्द्रितः। बलाद्दासीकृता ये च म्लेच्छचाण्डालदस्युभिः

---

* इत आरभ्य उषित इत्यन्तः पाठोऽसंगतः।

---

१ क. हि यो ज्ञात्वा। २ क. ख. शान्ताशुचिरलम्पया। अ°। ३ ख. °ब्धा (ब्धो)ऽहानिं°। ४ ग. °दात्पातै°। ५ ग °लौनोवर्वरो°। ६ ख. °कृतामपि। कु°। ७ ग. °जानां च व°। ८ ग. सर्वजा°। ९ ख जातिम°। १० क °ह्मणा भ्रूणहा स्युः°। ११ ख. °णभुक्त्वा स्यु°। १२ ग. °न्द्रितैः। व°।

अशुभं कारिताः कर्म गवादिप्राणिहिंसनम् । प्रायश्चित्तं च दातव्यं तारतम्येन वा द्विजैः
श्राद्धकाले यदा जाता पत्नी यस्य रजस्वला । प्रसूता वा न कार्ये च दैविकं पैतृकं तथा ७
ब्राह्मणा मन्त्रिताश्चैव क्षणिता वा प्रयत्नतः । उद्दिश्य पितृपाकं च कार्यं पैतृकमेव तत् ८
आशौचं न भवत्येव नात्र कार्या विचारणा । प्रस्थाने वा पिता तस्य पञ्चत्वं च गतो भवेत्
श्राद्धादिकं तु पुत्रेण अज्ञातेन कृतं यदा । कन्याप्रदानसमये श्रुतं च पि(तवान्पि)तरं मृतम्
कन्यादानं च तत्कार्यं वचनाद्देवते(ति) क्षमः । पितुः पात्रादिकं कर्म पश्चात्सर्वं यथाविधि
अज्ञानाच्च कृतं सर्वं दैविकं पैतृकं च यत् । जातके सू(मृ)तके वाऽपि तत्सर्वं सफलं भवेत्
(*व्यासेनोक्तस्मृतौ स्वकीये अज्ञानात्पितरि मृते यदा ज्ञातुसदैवकार्यं पितृकमेव वा)
अनेके यस्य ये पुत्राः संसृष्टा हि भवन्ति च । ज्येष्ठेन हि कृतं सर्वं सफलं पैतृकं भवेत् १४
वैदिकं च तथा सर्वं भवत्येव न संशयः । पृथक्पिण्डं पृथक्श्राद्धं वैश्वदेवादिकं च यत् १५
भ्रातरश्च पृथक्कुर्युर्नाविभक्ताः कदाचन । अपुत्रस्य च पुत्राः स्युः कर्तारः सांपरायणाः
सफलं जायते सर्वमिति शातातपोऽब्रवीत् । न च दत्तो अ(प्य)हीनोऽतिस्नेहेन च तथाऽपरः
बलाद्गृहीतो बद्धश्च बन्धुभिर्दत्त एव च । भ्रातुः पुत्रो मित्रपुत्रः शिष्यश्चैव तथौरसः १८
अपुत्रस्य च विज्ञेया दायादा नात्र संशयः । नवैते पुत्रवत्पाल्याः परलोकप्रदा ह्यमी १९
औरसेन समा ज्ञेया वचसोद्दालकस्य च । इदानीं भागनिर्णयमृषिः शातातपोऽब्रवीत्
ज्येष्ठेन वा कनिष्ठेन विभागस्य विनिर्णयः । समभागप्रदाता च अपुत्रेभ्यो न संशयः २१
समभागो ग्रहीतव्यः पुत्रमर्त्या सदैव हि । पितृभ्यो भ्रातृपुत्रेभ्यो दायादेभ्यो यथाक्रमात्
अधिकस्य च भागौ द्वावितरेभ्यः समासतः । आधौ प्रतिग्रहे क्रान्ते पूर्वा तु बलवत्तरा २३
सर्वेष्वेव विवादेषु बलवत्युत्तरा क्रिया । समविद्योत्तरं चैव प्रत्यवस्कन्दनं तथा २४
पूर्वं न्यासविधिश्चैव उत्तरः स्याच्चतुर्विधः । साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः । असाक्षिष्यवहारेषु दिव्यं देयं यथाविधि+ २६

इति श्रीयाम्ये धर्मशास्त्रे पञ्चमोऽध्यायः ॥ ९ ॥

समाप्तेयं बृहद्यमस्मृतिः ।

---

* धनुश्चिह्नान्तर्गतमधिकं सकलादर्शपुस्तकेषु अंसगतं च । + समाप्तिः संदिग्धा ।

---

१ क. °नाभरवेक्षमाः । पि° । २ ग. °द्भरवेक्षमाः । पि° । ३ ग. कर्म । ४ ख. ग °नोक्तः स्मृ° । ५ ग. ज्ञातुं स° । ६ क. वा । ऐक्ययच्चानयेत्पुत्राः । ख. वा ऐकायच्चानेपु° । ७ क. सनचगो° । ८ क. ख. °मन्वास° । ९ क. अजीगस्य । ख. अजीक° । १० ख. °न्ते तत्पूर्वबलवत्तरः । स° । ११ क.ख. °र्वात्तु ब° । १२ क. ग. °वादेषु । १३ ख. ग. न्यायवि° ।

ॐ तत्सद्ब्रह्मणे नमः ।

बृहस्पतिस्मृतिः ।

*इष्ट्वा क्रतुशतं राजा समाप्तवरदक्षिणम् । भगवन्तं गुरुश्रेष्ठं पर्यपृच्छद्बृहस्पतिम् १
भगवन्केन दानेन सर्वतः सुखमेधते । यदक्षयमहार्थं च तन्मे ब्रूहि महातप २
एवमिन्द्रेण पृष्टोऽसौ देवदेवपुरोहितः । वाचस्पतिर्महाप्राज्ञो बृहस्पतिरुवाच ह+ ३
सुवर्णदानं गोदानं भूमिदानं च वासव । एतत्प्रयच्छमानस्तु सर्वपापैः प्रमुच्यते× ४
सुवर्णं रजतं वस्त्रं मणिरत्नं च वासव । सर्वमेव भवेद्दत्तं वसुधां यः प्रयच्छति ५
फालकृष्टां महीं दत्त्वा सबीजां सस्यशालिनीम् । यावत्सूर्यकृता लोकास्तावत्स्वर्गे महीयते ६
यत्किंचित्कुरुते पापं पुरुषो वृत्तिकर्षि(र्शि)तः । अपि गोचर्ममात्रेण भूमिदानेन शुध्यति ७
दशहस्तेन दण्डेन त्रिंशद्दण्डैर्निवर्तनम् । दश तान्येव विस्तारो गोचर्मैतन्महाफलम् ८
सतृषं गोसहस्रं तु यत्र तिष्ठत्यतन्द्रितम् । बालवत्सासमेतानां तद्गोचर्म इति स्मृतम् ९
विप्राय दद्याच्च गुणान्विताय तपोभियुक्ताय जितेन्द्रियाय ।
यावन्मही तिष्ठति सागरान्ता तावत्फलं तस्य भवेदनन्तम् ॥ १०
यथा बीजानि रोहन्ति प्रकीर्णानि महीतले । एवं कामाः प्ररोहन्ति भूमिदानसमर्जिताः
यथाऽप्सु पतितैः शक्र तैलबिन्दुः प्रसर्पति । एवं भूमि(मेः)कृतं दानं सस्ये सस्ये प्ररोहति
†अन्नदः सुखितो नित्यं वस्त्रदश्चैव रूपवान् । स नरः सर्वदो भूप यो ददाति वसुंधराम्
यथा गौर्भरते वत्सं क्षीरमुत्सृज्य क्षीरिणी । एवं दत्ता सहस्राक्ष भूमिर्भरति भूमिदम् १४

---

* एतद्वचनात्प्राक् च. पुस्तकेऽयं पाठः—"बृहस्पतिकृतं पुण्यं प्रवक्ष्यामि विशेषतः । यच्छ्रुत्वा तु नलो राजा सर्वपापैः प्रमुच्यते" इति । + इतः परं वचनद्वयमधिकं च. पुस्तके—"स्वागतेनाभयः प्रीता आसनेन शतक्रतुः । विष्णुस्तु पादशौचेन अन्नाद्येन प्रजापतिः । पादशौचं तथाऽभ्यङ्गं दीयमानं प्रतिश्रवाम् । ये ददति सहस्राणि नोपसर्पन्ति ते यमम्" इति । × इतः परं वचनद्वयमधिकं च. पुस्तके—"अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः । लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात् । सर्वेषामेव दानानामेकजन्मानुगं फलम् । हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम्" इति । † एतद्वचनस्थानेऽयं पाठश्च. पुस्तके—"इक्षुभिः संततां भूमिं व्रीहिभिर्यवशाद्वलैः । यो ददाति सहस्राक्ष न स प्रच्यवते दिवः" इति ।

---

१ ग. यद्दत्तं यन्महार्घं च । २ च. °हातेजा बृ° । ३ क. ख. °स्यमालि° । ४ क. ख. ङ. °ण्डाग्नि° । च. °ण्डानु° । ५ ग. °वत्सप्र° । ६ ग. °तः सद्यस्तैल° । ७ ग. °न्नदाः सुखिनो नि° ।

शङ्खं भद्रासनं छत्रं[1] चरस्थावरवारणाः। भूमिदानस्य पुण्येन फलं स्वर्गः पुरंदर १५
आदित्यो वरुणो वह्निर्ब्रह्मा सोमो हुताशनः। शूलपाणिश्च भगवानभिनन्दति भूमिदम्*
आस्फोटयन्ति पितरः[3] मँहर्षन्ति पितामहाः। भूमिदाता कुले जातः स नस्त्राता भविष्यति
त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती। तारयन्तीह दातारं[4] जपवापनदोहनैः १८
प्रावृता वस्त्रदा यान्ति नग्ना यान्ति त्ववस्त्रदाः। तृप्ता यान्त्यन्नदातारः क्षुधिता यान्त्यन-
न्नदाः १९
काङ्क्षन्ति पितरः सर्वे नरकाद्भयभीरवः। गयां यास्यति यः पुत्रः स नस्त्राता भविष्यति
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्। यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् २१
लोहितो यस्तु वर्णेन पुच्छाग्रे यस्तु पाण्डुरः। श्वेतः खुरविषाणाभ्यां स नीलो वृष
उच्यते २२
नीलः पाण्डुरलाङ्गूलस्तृणमुद्धरते तु यः। षष्टिवर्षसहस्राणि पितरस्तेन तर्पिताः २३
यच्च शृङ्गगतं पङ्कं कूलात्तिष्ठति चोद्धृतम्। पितरस्तस्य चाश्नन्ति सोमलोक(कं)महाद्यु-
तिम् २४
+पृथोर्ययदोर्दिलीपस्य नृगस्य नहुषस्य च। अन्येषां च नरेन्द्राणां पुनरन्या भविष्यति २५
बहुभिर्वसुधा दत्ता राजभिः सगरादिभिः। यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलम्
यस्तु ब्रह्मघ्नः स्त्रीघ्नो वा यस्तु वै पितृघातकः। गवां शतसहस्राणां हन्ता भवति दुष्कृती २७
स्वदत्तां परदत्तां वा यो हरेत्तु वसुंधराम्। श्वविष्ठायां कृमिर्भूत्वा पितृभिः सह पच्यते २८
आक्षेप्ता चानुमन्ता च तमेव नरकं व्रजेत्। भूमिदो भूमिहर्ता च नापरं पुण्यपापयोः
ऊर्ध्वाधो वाऽवतिष्ठेत यावदाभूतसंप्लवम् ॥ २९

अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात् ॥ ३०

षडशीतिसहस्राणां योजनानां वसुंधराम्[5]। स्वतो दत्ता तु सर्वत्र सर्वकामप्रदायिनी ३१
भूमिं यः प्रतिगृह्णाति भूमिं यश्च प्रयच्छति। उभौ तौ पुण्यकर्माणौ नियतं स्वर्गगामिनौ(नौ)
सर्वेषामेव दानानामेकजन्मानुगं फलम्। हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ३३
यो न हिंस्यादनिन्द्यात्मा[6] भूतग्रामं चतुर्विधम्। तस्य देहाद्विमुक्तस्य भयं नास्ति कदाचन

---

* इतः परमधिकं च. पुस्तके—" सौवर्णा यत्र प्रासादाः सोद्वा(पस्का)राश्च कामदाः। गन्धर्वाप्सरसो यत्र तत्र तिष्ठति भूमिदः " इति। + " सगरस्य दिलीपस्य ययातेर्नहुषस्य च " इति पाठश्च पुस्तके।

---

१ च. °त्रं गजाश्ववरवाहनम्। भू°। २ च. °स्य चिह्नानि फ°। ३ च. °तरो नर्तयन्ति। ४ क. घ. छ. प्रबलान्ति। ५ ग. °रं सर्वात्पापादसंशयम्। प्रा°। ६ क. ख. ग. °राम्। स्व°। ७ ख. ग. घ. °दहं त्यात्मा।

अन्यायेन हृता भूमिर्यैर्नरैरपहारिता । हरन्तो हारयन्तश्च हन्युस्ते सप्तमं कुलम् ३५
हरते हारयेद्यस्तु मन्दबुद्धिस्तमोवृतः । स बद्धो वारुणैः पाशैस्तिर्यग्योनिषु जायते ३६
अंसुभिः पतितैस्तेषां दानानामेवकीर्तनम् । ब्राह्मणस्य हृते क्षेत्रे हन्ति त्रिपुरुषं कुलम् ३७
वापीकूपसहस्रेण अश्वमेधशतेन च । गवां कोटिप्रदानेन भूमिहर्ता न शुध्यति ३८
गामेकां स्वर्णमेकं वा भूमेरप्यर्धमङ्गुलम्ँ । हरन्नरकमायाति यावदाभूतसंप्लवम् ३९
हुतं दत्तं तपोऽधीतं यत्किंचिद्धर्मसंचितम् । अर्धाङ्गुलस्य सीमाया हरणेन प्रणश्यति ४०
गोवीथिं ग्रामरथ्यां च श्मशानं गोपितं तथा । संपीड्य नरकं याति यावदाभूतसंप्लवम्
ऊषरे निर्जले स्थाने प्रास्तं सस्यं विवर्जयेत् । जलाधारश्च कर्तव्यो व्यासस्य वचनं यथा
पञ्च कन्यानृते हन्ति दश हन्ति गवानृते । शतमश्वानृते हन्ति सहस्रं पुरुषानृते ४३
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् । सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदीः
ब्रह्मस्वे मा रतिं कुर्यात्प्राणैः कण्ठगतैरपि । अनौषधमभैषज्यं विषमेतद्धलाहलम् ४५
न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम् ४६
लोहचूर्णाश्मचूर्णं च विषं च जरयेन्नरः । ब्रह्मस्वं त्रिषु लोकेषु कः पुमाञ्जरयिष्यति ४७
*मन्युप्रहरणा विप्रा राजानः शस्त्रपाणयः । शस्त्रमेकाकिनं हन्ति विप्रमन्युः कुलत्रयम् ४८
मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः । चक्रात्तीव्रतरो मन्युस्तस्माद्विप्रं न कोपयेत् ४९
अग्निदग्धाः प्ररोहन्ति सूर्यदग्धास्तथैव च । मन्युदग्धस्य विप्राणामङ्कुरो न प्ररोहति ५०
अग्निर्दहति तेजसा सूर्यो दहति रश्मिभिः । राजा दहति दण्डेन विप्रो दहति मन्युना ५१
ब्रह्मस्वेन तु यत्सौख्यं देवस्वेन तु या रतिः । तद्धनं कुलनाशाय भवत्यात्मविनाशनम्
ब्रह्मस्वं ब्रह्महत्या च दरिद्रस्य च यद्धनम् । गुरुमित्रहिरण्यं च स्वर्गस्थमपि पीडयेत् ५३
ब्रह्मस्वेन तु यच्छिद्रं तच्छिद्रं न प्ररोहति । प्रच्छादयति तच्छिद्रमन्यत्र तु विसर्पति ५४
ब्रह्मस्वेन तु पुष्टानि साधनानि बलानि च । सङ्ग्रामे तानि लीयन्ते सिकतासु यथोदकम्
श्रोत्रियाय कुलीनाय दरिद्राय च वासव । संतुष्टाय विनीताय सर्वभूतहिताय च ५६
वेदाभ्यासस्तपो ज्ञानमिन्द्रियाणां च संयमः । ईदृशाय सुरश्रेष्ठ यद्दत्तं हि तदक्षयम् ५७
आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु । विनश्येत्पात्रदौर्बल्यात्तच्च पात्रं विनश्यति ५८
एवं गां च हिरण्यं च वस्त्रमन्नं महीं तिलान् । अविद्वान्प्रतिगृह्णाति भस्मी भवति काष्ठवत्
यस्य चैव गृहे मूर्खो दूरे चापि बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ६०
कुलं तारयते धीरः सप्त सप्त च वासव ॥ ६१

---

* न विद्यत एतद्वचनं क. पुस्तके ।

---

१ ग. अश्रुभिः । २ ग. °मपर्का° । ३ ग. °म् । रुन्धन्न° । ४ क. घ. उखरे । ५ क. ख. घ. °रस्य क° । ६ ग. कुर्याः प्राणैः । ७ ग. °लक्षयम् । ८ घ. °पो दान° ।

यस्तडागं नवं कुर्यात्पुराणं वाऽपि खानयेत्। स सर्वं कुलमुद्धृत्य स्वर्गे लोके महीयते ६२
वापीकूपतडागानि उद्यानोपवनानि च। पुनःसंस्कारकर्ता च लभते मौलिकं फलम् ६३
निदाघकाले पानीयं यस्य तिष्ठति वासव। स दुर्गविषमं कृत्स्नं न कदाचिदवाप्नुयात् ६४
एकाहं तु स्थितं तोयं पृथिव्यां राजसत्तम। कुलानि तारयेत्तस्य सप्त सप्त पराण्यपि ६५
दीपालोकप्रदानेन वपुष्मान्स भवेन्नरः। प्रोक्षणीयप्रदानेन स्मृतिं मेधां च विन्दति ६६
कृत्वाऽपि पापकर्माणि यो दद्यादन्नमर्थिने । ब्राह्मणाय विशेषेण न स पापेन लिप्यते
भूमिर्गावस्तथा दाराः प्रसह्य ह्रियते यदा। न चाऽऽवेदयते यस्तु तमाहुर्ब्रह्मघातकम् ६८
निवेदितस्तु राजा वै ब्राह्मणैर्मन्युपीडितैः। न निवारयते यस्तु तमाहुर्ब्रह्मघातकम् ६९
उपस्थिते विवाहे च यज्ञे दाने च वासव। मोहाच्चरति विघ्नं यः स मृतो जायते कृमिः ७०
धनं फलति दानेन जीवितं जीवरक्षणात्। रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ७१
फलमूलाशनात्पूज्यं(जां) स्वर्गः सत्येन लभ्यते।प्रायोपवेशनाद्राज्यं सर्वत्र सुखमश्नुते७२
गवाढ्यः शक्र दीक्षायाः स्वर्गगामी तृणाशनः। स्त्रियस्त्रिषवणस्नायी वायुं पीत्वा क्रतुं
लभेत् ७३
नित्यस्नायी भवेदर्कः संध्ये द्वे च जपन्द्विजः। नैवं साधयते राज्यं नाकपृष्ठमनाशके ७४
अग्निप्रवेशे नियतं ब्रह्मलोके महीयते। रसानां प्रतिसंहारे पशून्पुत्रांश्च विन्दति ७५
नाके चिरं स वसते उपवासी च यो भवेत्। सततं चैकशायी यः स लभेदीप्सितां गतिम्
वीरासनं वीरशय्यां वीरस्थानमुपाश्रितः। अक्षय्यास्तस्य लोकाः स्युः सर्वकामगमास्तथा ७७
उपवासं च दीक्षां च अभिषेकं च वासव। कृत्वा द्वादश वर्षाणि वीरस्थानाद्विशिष्यते७८
अधीत्य सर्ववेदान्वै सद्यो दुःखात्प्रमुच्यते। पावनं चरते धर्मं स्वर्गलोके महीयते ७९
बृहस्पतिमतं पुण्यं ये पठन्ति द्विजातयः। चत्वारि तेषां वर्धन्ते आयुर्विद्या यशो बलम्८०

इति बृहस्पतिप्रणीतं धर्मशास्त्रं संपूर्णम् ॥

समाप्तेयं बृहस्पतिस्मृतिः ।

---

१ ग. °डाकं नं। २ घ. मौक्तिकं। ३ घ. °न चक्षुष्मा°। ४ ग. छ. स्वर्गे। ५ ग. छ. न तत्साध°। ६ ख. रसनां। ७ ङ. रमति। ८ क. स्युः स्वर्गकामाग°। ९ ख. ङ. °कामाग°। १० घ. °गतास्त°।

ॐ तत्सद्ब्रह्मणे नमः ।

यमस्मृतिः ।

श्रुतिस्मृत्युदितं धर्मं वर्णानामनुपूर्वशः । प्राब्रवीदृषिभिः पृष्टो मुनीनामग्रणीर्यमः १
यो भुञ्जानोऽशुचिर्वाऽपि चण्डालं पतितं स्पृशेत् । क्रोधादज्ञानतो वाऽपि तस्य वक्ष्यामि निष्कृतिम् २
षड्रात्रं वा त्रिरात्रं वा यथासंख्यं समाचरेत् । स्नात्वा त्रिषवणं विप्रः पञ्चगव्येन शुध्यति ३
भुञ्जानस्य तु विप्रस्य कदाचित्स्रवते गुदम् । उच्छिष्टत्वेऽशुचित्वे च तस्य शौचं विनिर्दिशेत् ४
पूर्वं कृत्वा द्विजः शौचं पश्चादप उपस्पृशेत् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति ५
निगिरन्यदि मेहेत भुक्त्वा वा मेहने कृते । अहोरात्रोषितो भूत्वा जुहुयात्सर्पिषाऽऽहुतीः
यदा भोजनकाले स्यादशुचिर्ब्राह्मणः क्वचित् । भूमौ निधाय तद्ग्रासं स्नात्वा शुद्धिमवाप्नुयात् ७
भक्षयित्वा तु तद्ग्रासमुपवासेन शुध्यति । अशित्वा चैव तत्सर्वं त्रिरात्रेणैव शुध्यति ८
अश्नतश्चेद्विरेकः स्यादस्वस्थास्त्रिशतं जपेत् । स्वस्थस्त्रीणि सहस्राणि गायत्र्याः शोधनं परम् ९
चण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे तु कृते द्विजः । त्रिरात्रं तु प्रकुर्वीत भुक्त्वोच्छिष्टः षडाचरेत् १०
उदक्यां सूतिकां वाऽपि संस्पृशेदन्त्यजो यदि । त्रिरात्रेण विशुद्धिः स्यादिति शातातपोऽब्रवीत् ११
रजस्वला तु संस्पृष्टा श्वमातङ्गादिवायसैः । निराहारा शुचिस्तिष्ठेत्कालस्नानेन शुध्यति
रजस्वले यदा नार्यावन्योन्यं स्पृशते(तः) क्वचित् । शुध्यतः पञ्चगव्येन ब्रह्मकूर्चेन चोपरि
उच्छिष्टेन च संस्पृष्टा कदाचित्स्त्री रजस्वला । कृच्छ्रेण शुद्धिमाप्नोति शूद्रा दानोपवासतः
अनुच्छिष्टेन संस्पृष्टे स्नानं येन विधीयते । तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् १५
ऋतौ तु गर्भशङ्कित्वात्स्नानं मैथुनिनः स्मृतम् । अनृतौ तु स्त्रियं गत्वा शौचं मूत्रपुरीषवत्
उभावप्यशुची स्यातां दंपती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् १७

---

१ ख. ग. °रात्रमशुचिर्भवेत् । अ° । २ ग. भुक्तोच्छि° ।

भर्तुः शरीरशुश्रूषां दौरात्म्यादप्रकुर्वती । दण्ड्या द्वादशकं नारी वर्षं त्याज्या धनं विना
त्यजन्तोऽपतितान्बन्धून्दण्ड्या उत्तमसाहसम् । पिता हि पतितः कामं न तु माता कदा-
चन १९
आत्मानं घातयेद्यस्तु रज्ज्वादिभिरुपक्रमैः । मृतोऽमेध्येन लेप्तव्यो जीवतो द्विशतं दमः
दण्ड्यास्तत्पुत्रमित्राणि प्रत्येकं पणिकं दमम् । प्रायश्चित्तं ततः कुर्युर्यथाशास्त्रप्रचोदितम्
जलाग्न्युद्बन्धनभ्रष्टाः प्रव्रज्यानाशकच्युताः । विषप्रपतनप्रायशस्त्रघातहताश्च ये २२
नवैते प्रत्यवसिताः सर्वलोकबहिष्कृताः । चान्द्रायणेन शुध्यन्ति तप्तकृच्छ्रद्वयेन वा २३
उभयावसितः पापः श्यामाच्छबलकाच्च्युतः । चान्द्रायणाभ्यां शुध्येत दत्त्वा धेनुं तथा
वृषम् २४
श्वशृगालप्लवङ्गाद्यैर्मानुषैश्च रतिं विना । दृष्टः स्नात्वा शुचिः सद्यो दिवा संध्यासु रात्रिषु
अज्ञानाद्ब्राह्मणो भुक्त्वा चण्डालान्नं कदाचन । गोमूत्रयावकाहारो मासार्धेन विशुध्यति
गोब्राह्मणगृहं दग्ध्वा मृतं चो(तश्चो)द्बन्धनादिना । पाशांश्छित्त्वा तथा तस्य कृच्छ्रमेकं
चरेद्द्विजः २७
चण्डालपुक्कसानां च भुक्त्वा गत्वा च योषितम् । कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दव-
द्वयम् २८
कापालिकान्नभोक्तॄणां तन्नारीगामिनां(णां) तथा । कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दव-
द्वयम् २९
अगम्यागमने विप्रो मद्यगोमांसभक्षणे । तप्तकृच्छ्रपरिक्षिप्तो मौर्वी(ञ्जी)होमेन शुध्यति ३०
महापातककर्तारश्चत्वारोऽप्यविशेषतः । अग्निं प्रविश्य शुध्यन्ति स्थित्वा वा महति क्रतौ
रहस्यकरणेऽप्येवं मासमभ्यस्य पूरुषः । अघमर्षणसूक्तं वा शुध्येदन्तर्जले स्थितः ३२
रजकश्चर्मकारश्च नटो बुरुड एव च । कैवर्तमेदभिल्लाश्च सप्तैते अन्त्यजाः स्मृताः ३३
भुक्त्वा चैषां स्त्रियो गत्वा पीत्वाऽपः प्रतिगृह्य च । कृच्छ्राब्दमाचरेज्ज्ञानादज्ञानादैन्दव-
द्वयम् ३४
मातरं गुरुपत्नीं च स्वसृदुहितरौ स्नुषाम् । गत्वैताः प्रविशेदग्निं नान्या शुद्धिर्विधीयते ३५
राज्ञीं(ज्ञीं) प्रव्रजितां धात्रीं तथा वर्णोत्तमामपि । कृच्छ्रद्वयं प्रकुर्वीत सगोत्रामभिगम्य च ३६
अन्यासु पितृगोत्रासु मातृगोत्रगतास्वपि । परदारेषु सर्वेषु कृच्छ्रं सांतपनं चरेत् ३७
वेश्याभिगमने पापं व्यपोहन्ति द्विजातयः । पीत्वा सकृत्सुतप्तं च पञ्चरात्रं कुशोदकम् ३८

---

१ ख. °कं द्विशतं द° । २ ख. ग. पापस्या° । ३ क. दग्ध्वा । ४ क. °रोऽथ वि° । ५ ख. °तेमद° । ६ क. स्वसृर्दुहि° । ७ क. दासीं ।

गुरुतल्पव्रतं केचित्केचिद्ब्रह्महणो व्रतम् । गोघ्नस्य केचिदिच्छन्ति केचिच्चैवावकीर्णिनः
दण्डादूर्ध्वप्रहारेण यस्तु गां विनिपातयेत्। द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विनिर्दिशेत् ४०
अङ्गुष्ठमात्रस्थूलस्तु बाहुमात्रप्रमाणकः। सार्द्रश्च सपलाशश्च गोदण्डः परिकीर्तितः ४१
गवां निपातने चैव गर्भोऽपि [1]संपतेद्यदि। एकैकशश्चरेत्कृच्छ्रं यथापूर्वं तथा पुनः ४२
पादमुत्पन्नमात्रे तु द्वौ पादौ गात्रसंभवे। पादोनं कृच्छ्रमाचष्टे हत्वा गर्भमचेतनम् ४३
अङ्गप्रत्यङ्गसंपूर्णे गर्भे रेतःसमन्विते। एकैकशश्चरेत्कृच्छ्रमेषा गोघ्नस्य निष्कृतिः ४४
बन्धने रोधने चैव पोषणे वा गवां रुजा। संपद्यते चेन्मरणं निमित्ती नैव लिप्यते ४५
मूर्छितः पतितो वाऽपि दण्डेनाभिहतस्तथा । उत्थाय षट्पदं गच्छेत्सप्त पञ्च दशापि वा
ग्रासं वा यदि गृह्णीयात्तोयं वाऽपि पिबेद्यदि। पूर्वव्याधिप्रनष्टानां प्रायश्चित्तं न विद्यते ४७
काष्ठलोष्टाश्मभिर्गावः शस्त्रैर्वा निहता यदि। प्रायश्चित्तं कथं तत्र शास्त्रे शास्त्रे निगद्यते ४८
काष्ठे सांतपनं कुर्यात्प्राजापत्यं तु लोष्टके। तप्तकृच्छ्रं तु पाषाणे शस्त्रे चाप्यतिकृच्छ्रकम् ४९
औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु तु। दीयमाने विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ५०
तैलभैषज्यपाने [2]च भेषजानां च भक्षणे। निःशल्यकरणे चैव प्रायश्चित्तं न विद्यते ५१
वत्सानां कण्ठबन्धेन क्रियया भेषजेन तु। सायं संगोपनार्थं च न दोषो रोधबन्धयोः ५२
पादे चैवास्य रोमाणि द्विपादे श्मश्रु केवलम्। त्रिपादे तु शिखावर्जं मूले सर्वं समाचरेत् ५३
सर्वान्केशान्समुद्धृत्य च्छेदयेदङ्गुलद्वयम्। एवमेव हि नारीणां मुण्डमुण्डापनं स्मृतम् ५४
न स्त्रिया वपनं कार्यं न च वीरासनं तथा।न च गोष्ठे निवासं च(सश्च) न गच्छन्तीमनुव्रजेत्
राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। अकृत्वा वपनं तेषां प्रायश्चित्तं विनिर्दिशेत्
केशानां रक्षणार्थं च द्विगुणं व्रतमादिशेत्। द्विगुणे तु व्रते चीर्णे द्विगुणैव तु दक्षिणा ५७
द्विगुणं चेन्न दत्तं च केशांश्च परिरक्षयेत्। पापं न क्षीयते हन्तुर्दाता च नरकं व्रजेत् ५८
अश्रौतस्मार्तविहितं प्रायश्चित्तं वदन्ति ये। तान्धर्मविघ्नकर्तॄंश्च राजा दण्डेन पीडयेत् ५९
न चेत्तान्पीडयेद्राजा कथंचित्काममोहितः। तत्पापं शतधा भूत्वा तमेव परिसर्पति ६०
प्रायश्चित्ते ततश्चीर्णे कुर्याद्ब्राह्मणभोजनम् । विंशतिं गा वृषं चैव दद्यात्तेषां च दक्षिणाम्
कृमिभिर्व्रणसंभूतैर्मक्षिकाभिश्च पातितैः। कृच्छ्रार्धं संप्रकुर्वीत शक्त्या दद्याच्च दक्षिणाम्
प्रायश्चित्तं च कृत्वा वै भोजयित्वा द्विजोत्तमान्। सुवर्णमाषकं दद्यात्ततः शुद्धिर्विधीयते
चण्डालश्वपचैः स्पृष्टे निशि स्नानं विधीयते । न वसेत्तत्र रात्रौ तु सद्यः स्नानेन शुध्यति
अथ वसेद्यदा रात्रावज्ञानादविचक्षणः। तदा तस्य तु तत्पापं शतधा परिवर्तते ६५
उद्गच्छन्ति हि नक्षत्राण्युपरिष्टाच्च ये ग्रहाः। संस्पृष्टे रश्मिभिस्तेषामुदके स्नानमाचरेत् ६६
कुड्यान्तर्जलवल्मीकमूषिकोत्करवर्त्मसु । श्मशाने शौचशेषे च न ग्राह्याः सप्त मृत्तिकाः

---

१ क. °दूर्ध्वं प्र°। २ ख. ग. संभवेद्य°। ३ क. ख. °षजया°।

इष्टापूर्तं तु कर्तव्यं ब्राह्मणेन प्रयत्नतः । इष्टेन लभते स्वर्गं पूर्तेन मोक्षं समश्नुते ६८
वित्तापेक्षं भवेदिष्टं तडागं पूर्तमुच्यते । आरामश्च विशेषेण देवद्रोण्यस्तथैव च ६९
वापीकूपतडागानि देवतायतनानि च । पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ७०
शुक्लाया मूत्रं गृह्णीयात्कृष्णाया गोः शकृत्तथा । ताम्रायाश्च पयो ग्राह्यं श्वेताया दधि चोच्यते ७१
कपिलाया घृतं ग्राह्यं महापातकनाशनम् । सर्वतीर्थे नदीतोये कुशैर्द्रव्यं पृथक्पृथक् ७२
आहृत्य प्रणवेनैव हुत्वाप्य प्रणवेन च । प्रणवेन समालोड्य प्रणवेन तु संपिबेत् ७३
पलाशे मध्यमे पर्णे भाण्डे ताम्रमये तथा । पिबेत्पुष्करपर्णे वा ताम्रे वा मृन्मये शुभे ७४
सूतके तु समुत्पन्ने द्वितीये समुपस्थिते । द्वितीये नास्ति दोषस्तु प्रथमेनैव शुध्यति ७५
जातेन शुध्यते जातं मृतेन मृतकं तथा । गर्भसंस्रवणे मासे त्रीण्यहानि विनिर्दिशेत् ७६
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति । रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला
स्वगोत्राद्धृश्यते नारी विवाहात्सप्तमे पदे । स्वामिगोत्रेणकर्तव्यास्तस्याः पिण्डोदकं(क)क्रियाः ७८
द्वे पितुः पिण्डदानं(ने)स्यात्पिण्डे पिण्डे द्विनामता । षण्णां देयास्त्रयः पिण्डा एवं दाता न मुह्यति ७९
स्वेन भर्त्रा सह श्राद्धं माता भुक्त्वा सदैवतम् । पितामह्यपि स्वेनैव स्वेनैव प्रपितामही ८०
वर्षे वर्षे तु कुर्वीत मातापित्रोस्तु सत्कृतिम् । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ८१
नित्यं नैमित्तिकं काम्यं वृद्धिश्राद्धमथापरम् । पार्वणं चेति विज्ञेयं श्राद्धं पञ्चविधं बुधैः ८२
ग्रहोपरागे संक्रान्तौ पर्वोत्सवमहालये । निर्वपेत्त्रीन्नरः पिण्डानेकमेव मृतेऽहनि ८३
अनूढा न पृथक्कन्या पिण्डे गोत्रे च सूतके । पाणिग्रहणमन्त्राभ्यां स्वगोत्राद्धृश्यते ततः ८४
येन येन तु वर्णेन या कन्या परिणीयते । तत्समं सूतकं याति तथा पिण्डोदकेऽपि च ८५
विवाहे चैव संवृत्ते चतुर्थेऽहनि रात्रिषु । एकत्वं सा व्रजेद्भर्तुः पिण्डे गोत्रे च सूतके ८६
प्रथमेऽह्नि द्वितीये वा तृतीये वा चतुर्थके । अस्थिसंचयनं कार्यं बन्धुभिर्हितबुद्धिभिः ८७
चतुर्थे पञ्चमे चैव सप्तमे नवमे तथा । अस्थिसंचयनं प्रोक्तं वर्णानामनुपूर्वशः ८८
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः । मुच्यते प्रेतलोकात्स स्वर्गलोके महीयते ९९
*गङ्गातोयेषु यस्यास्थि प्लवते शुभकर्मणः । न तस्य पुनरावृत्तिर्ब्रह्मलोकात्कथंचन ९०
यावदस्थि मनुष्याणां गङ्गातोयेषु तिष्ठति । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ९१

* एतद्वचनद्वयं न विद्यते क. पुस्तके ।

१ ग. °याः । द्विपितुः । २ ग. भुक्ता स° ।

नाभिमात्रे जले स्थित्वा हृदयेनानुचिन्तयेत्। आगच्छन्तु मे पितरो गृह्णन्त्वेताञ्जलाञ्जलीन् ९२

हस्तौ कृत्वा सुसंयुक्तौ पूरयित्वा जलेन च।गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलं क्षिपेत् ९३

आकाशे च क्षिपेद्वारि वारिस्थो दक्षिणामुखः। पितॄणां स्थानमाकाशं दक्षिणा दिक्तथैव च ९४

आपो देवगणाः प्रोक्ता आपः पितृगणास्तथा। तस्मादप्सु जलं देयं पितॄणां हितमिच्छता

दिवा सूर्यांशुभिस्तप्तं रात्रौ नक्षत्रमारुतैः। संध्ययोरप्युभाभ्यां च पवित्रं सर्वदा जलम्

स्वभावयुक्तमव्याप्तममेध्येन सदा शुचि। भाण्डस्थं धरणीस्थं वा पवित्रं सर्वदा जलम्९७

देवतानां पितॄणां च जले दद्याज्जलाञ्जलीन्। असंस्कृतप्रमीतानां स्थले दद्याज्जलाञ्जलीन् ९८

श्राद्धे हवनकाले च दद्यादेकेन पाणिना। उभाभ्यां तर्पणे दद्यादिति धर्मो व्यवस्थितः

इति यमप्रणीतं धर्मशास्त्रं समाप्तम्॥

समाप्तेयं यमस्मृतिः।

ॐ तत्सद्ब्रह्मणे नमः ।

लघुविष्णुस्मृतिः ।

तत्र प्रथमोऽध्यायः ।

*विष्णुमेकाग्रमासीनं श्रुतिस्मृतिविदां[1] वरम् । पप्रच्छुर्मुनयः सर्वेकलापग्रामवासिनः १
कृते युगे ह्यपक्षीणे लुप्तो धर्मः सनातनः[2] । तेन[3] चैश्वर्यमोहेन धर्मो न प्रतिमार्गितः २
त्रेतायुगेऽथ संप्राप्ते कर्तव्यश्चास्य संग्रहः । यथा संप्राप्यतेऽस्माभिस्तत्त्वतो वक्तुमर्हसि ३
वर्णाश्रमाणां यो धर्मो विशेषश्चैव यत्कृतः । भेदस्तथैव चैषां यस्तं नो ब्रूहि द्विजोत्तम ४
ऋषीणां समवेतानां[4] त्वमेव परमो मतः । धर्मस्येह समस्तस्य नान्यो वक्ताऽस्ति सुव्रत ५
श्रुत्वा धर्मं चरिष्यामो यथावत्परिभाषितम् । तस्माद्ब्रूहि द्विजश्रेष्ठ धर्मकामा इमे द्विजाः
इत्युक्तो मुनिभिस्तैस्तु विष्णुः प्रोवाच तांस्तदा । अनघाः श्रूयतां धर्मो वक्ष्यमाणो मया क्रमात् ७
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव तथाऽपरः । एतेषां धर्मसारं यद्वक्ष्यमाणं निबोधत ८
ऋतौ ऋतौ तु संयोगाद्ब्राह्मणो जायते स्वयम् । तस्माद्ब्राह्मणसंस्कारं गर्भादौ तु प्रयोजयेत् ९
सीमन्तोन्नयनं कर्म न स्त्रीसंस्कार इष्यते । गर्भस्यैव तु संस्कारो गर्भे गर्भे प्रयोजयेत् १०
जातकर्म[5] तथा कुर्यात्पुत्रे जाते[6] यथोदितम् । बहिर्निष्क्रमणं[7] चैव तस्य कुर्याच्छिशोः शुभम्
षष्ठे मासे च संप्राप्ते अन्नप्राशनमाचरेत् । तृतीयेऽब्दे च संप्राप्ते केशकर्म[8] च कारयेत् १२
गर्भाष्टमे तथा कर्म ब्राह्मणस्योपनायनम् । द्विजत्वे त्वथ संप्राप्ते सावित्र्यामधिकारभाक्
गर्भादेकादशे सेके कुर्यात्क्षत्रियवैश्ययोः । कारयेद्द्विजकर्माणि ब्राह्मणेन यथाक्रमम् १४
शूद्रश्चतुर्थो वर्णस्तु सर्वसंस्कारवर्जितः । उक्तस्तस्य तु संस्कारो द्विजेष्वात्मनिवेदनम् १५
यो यस्य विहितो दण्डो मेखलाजिनधारणम् । सूत्रं वस्त्रं च गृह्णीयाद्ब्रह्मचर्येण यत्नितः
ब्राह्मे मुहूर्ते चोत्थाय चोपस्पृश्य पयस्तथा । त्रिरायम्य ततः प्राणांस्तिष्ठेन्मौनी समाहितः
अब्दैवतैः पवित्रैस्तु कृत्वाऽऽत्मपरिमार्जनम् । सावित्रीं च जपंस्तिष्ठेदासूर्योदयनात्[9]पुरा
अग्निकार्यं ततः कुर्यात्प्रातरेव व्रतं चरेत् । गुरवे तु ततः कुर्यात्पादयोरभिवादनम् १९

* "ऋषिमेकाग्रमासीनं विष्णुं मातिमतां वरम्" इति पाठः ख. छ. पुस्तकयोः ।

१ च. °विशारदम् । २ ङ. °नः । कृते चै° । ३ छ. °न वै शीर्यमाणेन धर्मेण परमार्थतः । ४ च. छ. °स्तत्त्वं नो व° । ५ ख. छ. °मचित्तानां । ६ क. परे । ए° । ७ ख. छ. °तकं कर्म कु° । ८ ख. छ. °ते तु वैदिकम् । ९ ख. छ. °णं कुर्यान्नामकर्म दशोर्ध्वतः । ष° । १० ख. छ. °नान्मुनिः । अ° ।

समित्कुशांश्चोदकुम्भमाहृत्य गुरवे व्रती[1] । प्राञ्जलिः सम्यगासीन उपस्थाय ततः सदा
यं यं ग्रन्थमधीयीत तस्य तस्य व्रतं चरेत् । सावित्र्युपक्रमात्सर्वमावेदग्रहणोत्तरम् २१
द्विजातिषु चरेद्भैक्षं भिक्षाकाले समागते[3]। निवेद्य गुरवेऽश्नीयात्संमतो गुरुणा व्रती २२
सायं संध्यामुपासीनो गायत्र्यष्टशतं जपेत् । द्विकालभोजनार्थं च तथैव पुनराहरेत् २३
वेदस्वीकरणे हृष्टो गुर्वधीनो गुरोर्हितः । निष्ठां तत्रैव यो गच्छेन्नैष्ठिकः स उदाहृतः २४
अनेन विधिना सम्यक्[4]कृत्वा वेदमधीत्य च । गृहस्थधर्ममाकाङ्क्षन्गुरुगेहादुपागतः २५
अनेनैव विधानेन कुर्याद्दारपरिग्रहम् । कुले महति संभूतां सवर्णां लक्षणान्विताम् २६
परिणीय तु षण्मासान्वत्सरं वा न संविशेत् । औदुम्बरायणो नाम ब्रह्मचारी गृहे गृहे
ऋतुकाले तु संप्राप्ते पुत्रार्थी संविशेत्तदा । जाते पुत्रे तथा कुर्यादग्न्याधेयं गृहे वसन् २८
पुत्रे जातेऽनृतौ गच्छन्संप्रदुष्येत्सदा गृही । चतुर्थे ब्रह्मचारी च गृहे तिष्ठन्[6]अपि स्मृतः २९

इति वैष्णवे धर्मशास्त्रे प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयोऽध्यायः ।)

अतः परं प्रवक्ष्यामि गृहिणां धर्ममुत्तमम् । प्राजापत्यपदस्थानं सम्यक्कृत्यं निबोधत १
सर्वः कल्ये समुत्थाय कृतशौचः समाहितः । स्नात्वा संध्यामुपासीत सर्वकालमतन्द्रितः
अज्ञानाद्यदि वा मोहाद्रात्रौ यद्दुरितं कृतम् । प्रातः स्नानेन तत्सर्वं शोधयन्ति द्विजोत्तमाः
प्रविश्याथाग्निहोत्रं तु हुत्वाऽग्निं विधिवत्ततः । शुचौ देशे समासीनः स्वाध्यायं शक्ति.
तोऽभ्यसेत् ४
स्वाध्यायान्ते समुत्थाय स्नानं कृत्वा तु मन्त्रवित् । देवानृषीन्पितॄंश्चैव तर्पयेत्तिलवारिणा
मध्याह्ने त्वथ संप्राप्ते शिष्टं भुञ्जीत वाग्यतः।भुक्तोपविष्टो विश्रान्तो ब्रह्म किंचिद्विचारयेत्
इतिहासं प्रयुञ्जीत त्रिकालसमये गृही ॥ ७
काले चतुर्थे संप्राप्ते गृहे वा यदि वा बहिः । आसीनः पश्चिमां संध्यां गायत्रीं शक्तितो
जपेत् ८
हुत्वा चाथाग्निहोत्रं तु कृत्वा चाग्निपरिक्रियाम् । बलिं च विधिवद्दत्त्वा भुञ्जीत विधिपू-
र्वकम् ९
दिवा वा यदि वा रात्रावतिथिस्त्वाव्रजेद्यदि । तृणभूवारिवाग्भिस्तु पूजयेत्तं यथाविधि
कथाभिः प्रीतिमाहृत्य विद्यादीनि विचारयेत् । संनिवेश्याथ विप्रं तु संविशेत्तदनुज्ञया

---

१ क. ङ. °सीत उ° । २ छ. °त्सर्वोऽध्येतव्योऽङ्गसा तथा । द्वि° । ३ ख छ. °माहितः । नि° । ४ ख. छ. °म्यगभक्त्या वे° । ५ छ. °र्यान्नामधे° । ६ ख. छ. तिष्ठेन्न विस्मयेत् । इ° ।

यदि योगी तु संप्राप्तो भिक्षार्थी समुपागतः।योगिनं पूजयेन्नित्यमन्यथा किल्बिषी भवेत्
पुरे वा यदि वा ग्रामे योगी संनिहितो भवेत् । पूता नित्यं भवन्त्येवं सर्वे चैव निवासिनः
तस्मात्संपूजयेन्नित्यं योगिनं गृहमागतम् । तस्मिन्प्रयुक्ता पूजा या साऽक्षयायोपकल्पते
गृहमेधिनां तु यत्प्रोक्तं स्वर्गसाधनमुत्तमम्। ब्राह्मे मुहूर्ते चोत्थाय तत्सर्वं सम्यगाचरेत् १५
*चतुष्प्रकारं भिद्यन्ते गृहिणो धर्मसाधकाः। वृत्तिभेदेन सततं ज्यायांस्तेषां परः परः १६
कुसूलधान्यको वा स्यात्कुम्भीधान्यक एव वा । त्र्यहैहिको वाऽपि भवेत्सद्यःप्रक्षाल-
कोऽथ वा १७
श्रौतं स्मार्तं च यत्किंचिद्विधानं धर्मसाधनम्। गृहे तद्वसता कार्यमन्यथा दोषभाग्भवेत् १८
एवं विप्रो गृहस्थस्तु शान्तः शुक्लाम्बरः शुचिः। +प्रजापतेः परं स्थानं संप्राप्नोति न
संशयः १९

इति वैष्णवे धर्मशास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः।)

गृहस्थो ब्रह्मचारी वा वनवासं यदाऽऽचरेत्। चीरवल्कलधारी स्यादकृष्टान्नाशनो मुनिः
गत्वा च विजनं स्थानं पञ्च यज्ञान्न हापयेत्। अग्निहोत्रं च जुहुयादन्ननीवारकादिभिः २
श्रावणेनाग्निमादाय ब्रह्मचारी वने स्थितः। पञ्चयज्ञविधानेन यज्ञं कुर्यादतन्द्रितः ३
संचितं तु यदारण्यं भुक्त्यर्थं विधिवद्वने। त्यजेदाश्वयुजे मासि वन्यमन्यत्समाहरेत् ४
आकाशशायी वर्षासु हेमन्ते च जलेशयः। ग्रीष्मे पञ्चाग्निमध्यस्थो भवेन्नित्यं वने वसन् ५
कृच्छ्रं चान्द्रायणं चैव तुलापुरुषमेव च। अतिकृच्छ्रं प्रकुर्वीत त्यक्त्वा कामाञ्शुचिस्ततः
त्रिसंध्यं स्नानमातिष्ठेत्सहिष्णुर्भूतजान्गुणान्। पूजयेदतिथींश्चैव ब्रह्मचारी वनं गतः ७
प्रतिग्रहं न गृह्णीयात्परेषां किंचिदात्मवान्। दाता चैव भवेन्नित्यं श्रद्दधानः प्रियंवदः ८
रात्रौ स्थण्डिलशायी स्यात्पपदैस्तु दिनं क्षिपेत्। वीरासनेन तिष्ठेद्वा क्लेशमात्मन्यचिन्त-
यन् ९

---

* एतदर्धस्थानेऽयं पाठश्च पुस्तके—" चतुष्प्रकाराञ्शिक्षेत गृही च धर्मसाधनान् " इति। +एतदर्धस्थानेऽयं पाटश्च. पुस्तके—"प्राजापत्यं परं स्थानं प्राप्नोति विजितेन्द्रियः " इति।

---

१ क. ग. ङ. चैतमिवा° २ क. °क्षय्या या प्रकल्पयेत्। गृ°। ३ ख. छ. °याच्छयामनी°। ४ ख. छ. संगृह्य श्रावणे मासि भु°। ५ ख. छ. °वद्गृही। त्यजेदाश्वयुजे मासि धान्यं वन्यं समा°। ६ क. °ने। स तदा°। ७ छ. °क्त्वा मानं शुचि°। ८ ख. छ. वशं। ९ छ. 'नेनोपतिष्ठेत्क्लेशान्नाऽऽत्मनि चिन्त-येत्। के°।

केशरोमनखश्मश्रु न च्छिन्द्यान्नापि कर्तयेत्। त्यजञ्शरीरसौहार्दं वनवासरतः शुचिः १०
चतुष्प्रकारं भिद्यन्ते मुनयः संशितव्रताः। अनुष्ठानविशेषेण श्रेयांस्तेषां परः परः ११
वार्षिकं वन्यमाहारमाहृत्य विधिपूर्वकम्। वनस्थधर्ममातिष्ठन्नयेत्कालं जितेन्द्रियः १२
भूरिसंवार्षिकश्चायं वनस्थः सर्वकर्मकृत्। आदेहपतनं तिष्ठेत्काङ्क्षन्मोक्षं दृढव्रतः १३
षण्मासांस्तु ततश्चान्यः पञ्चयज्ञक्रियापरः। काले चतुर्थे भुञ्जानो देहं त्यजति धर्मतः १४
त्रिंशद्दिनार्थमाहृत्य वन्यान्नानि मुनिव्रतः। निर्वर्त्य सर्वकार्याणि स्याच्च षष्ठान्नभोजनः
दिनार्थमन्नमादाय पञ्चयज्ञक्रियारतः। सद्यःप्रक्षालको नाम चतुर्थः परिकीर्तितः १६
एवमेते हि वै मान्या मुनयः संशितव्रताः ॥ १७

इति वैष्णवे धर्मशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

यथोक्तमानि स्थानानि प्राप्नुवन्ति दृढव्रताः। ब्रह्मचारी गृहस्थो वा वानप्रस्थो मुनिस्तथा
विरक्तः सर्वकामेषु पारिव्राज्यं समाचरेत् ॥ १
आत्मन्यग्नीन्समारोप्य दत्त्वा वाऽभयदक्षिणाम्। चतुर्थमाश्रमं गच्छेद्ब्राह्मणः प्रव्रजन्मृ-
हात् २
आचार्येण समादिष्टं लिङ्गं यत्नात्समाश्रयेत्। शौचमाश्रयसंबद्धं यतिधर्मांश्च शिक्षयेत् ३
अहिंसा सत्यमस्तेयं ब्रह्मचर्यमफल्गुता। दया च सर्वभूतेषु नित्यमेतद्यतिश्चरेत् ४
ग्रामान्ते वृक्षमूले च नित्यकालनिकेतनः। पर्यटेत्कीटवद्भूमिं वर्षास्वेकत्र संविशेत् ५
वृद्धानामातुराणां च भीरूणां सङ्गवर्जिनाम्। ग्रामे वाऽपि पुरे वाऽपि वासो नैकत्र दुष्यति
कौपीनाच्छादनं वासः कन्थां सं(शी)तापहारिणीम्। पादुके चापि गृह्णीयात्कुर्यान्नान्य-
स्य संग्रहः(म्) ७
संभाषणं सह स्त्रीभिरालम्भप्रेक्षणे तथा। नृत्यं गानं संभासेवां परिवादांश्च वर्जयेत् ८
वानप्रस्थगृहस्थाभ्यां प्रीतिं यत्नेन वर्जयेत्। एकाकी विचरेन्नित्यं त्यक्त्वा सर्वपरिग्रहम्
याचितायाचिताभ्यां तु भिक्षया कल्पयेत्स्थितिम्। साधुकारं याचितं स्यात्प्राक्प्रणीत-
मयाचितम् १०

---

१ ख. छ. भिक्षन्ति। २ ख. श्रेयाञ्श्रेयांस्ततः परः। वा°। ३ ख. °नस्थैर्मौनमा°। ४ छ. °धर्मे वा ति°। ५ छ. भूभिजं वार्षिकं वाऽपि व°। ६ क. ग. घ. °रिसवा°। ७ क. °र्भवित्। ८ छ. °तनास्तिष्ठेन्मृत्युं चैव न काङ्क्षयेत्। ९ ख. ङ. °यापरः। स°। १० ङ च. °स्थो यतिस्त°। ११ क. °वर्तिना°। १२ छ. समाजं वा दिवा निद्रां विवर्जये°।

चतुर्विधा भिक्षुकाः स्युः कुटीचकबहूदकौ । हंसः परमहंसश्च पश्चाद्यो यः स उत्तमः ११
एकदण्डी भवेद्वाऽपि त्रिदण्डी चापि वा भवेत् । त्यक्त्वा सर्वसुखास्वादं पुत्रैश्वर्यसुखं त्यजेत् १२
अपत्येषु वसन्नित्यं समत्वं यत्नतस्त्यजेत् । नान्यस्य गेहे भुञ्जीत भुञ्जानो दोषभाग्भवेत्
कामं क्रोधं च लोभं च तथेर्ष्यासत्यमेव च । कुटीचकस्त्यजेत्सर्वं पुत्रार्थं चैव सर्वतः १४
भिक्षाटनादिकेऽशक्तो यतिः पुत्रेषु संन्यसेत् । कुटीचक इति ज्ञेयः परिव्राट्त्यक्तबान्धवः
त्रिदण्डं कुण्डिकां चैव भिक्षाधारं तथैव च । सूत्रं तथैव गृह्णीयान्नित्यमेव बहूदकः १६
प्राणायामेऽप्यभिरतो गायत्रीं सततं जपेत् । विश्वरूपं हृदि ध्यायन्नयेत्कालं जितेन्द्रियः
ईषत्कृतकषायस्य लिङ्गमाश्रित्य तिष्ठतः । अन्नार्थं लिङ्गमुद्दिष्टं न मोक्षार्थमिति स्थितिः
त्यक्त्वा पुत्रादिकं सर्वं योगमार्गव्यवस्थितः । इन्द्रियाणि मनश्चैव कर्षन्हंसोऽभिधीयते
कृच्छ्रैश्चान्द्रायणैश्चैव तुलापुरुषसंज्ञकैः । अन्यैश्च शोषयेद्देहमाकाङ्क्षन्ब्रह्मणः पदम् २०
यज्ञोपवीतं दण्डं च वस्त्रं जन्तुनिवारणम् । अयं परिग्रहो नान्यो हंसस्य श्रुतिवेदिनः २१
आध्यात्मिकं ब्रह्म जपन्प्राणायामांस्तथाऽऽचरन् । वियुक्तः सर्वसङ्गेभ्यो योगी नित्यं चरेन्महीम् २२
आत्मनिष्ठः स्वयं युक्तस्त्यक्तसर्वपरिग्रहः । चतुर्थोऽयं महानेषां ध्यानभिक्षुरुदाहृतः २३
त्रिदण्डं कुण्डिकां चैव सूत्रं चाथ कपालिकाम् । जन्तूनां वारणं वस्त्रं सर्वं भिक्षुरिदं त्यजेत् २४
कौपीनाच्छादनार्थं च वासोऽर्धस्य परिग्रहम् । कुर्यात्परमहंसस्तु दण्डमेकं च धारयेत्
आत्मन्येवाऽऽत्मना बुद्ध्या परित्यक्तशुभाशुभः । अव्यक्तलिङ्गो व्यक्तश्च चरेद्भिक्षुः समाहितः २६
प्राप्तपूजो न संतुष्येदलाभे त्यक्तमत्सरः । त्यक्ततृष्णः सदा विद्वान्मूकवत्पृथिवीं चरेत्
देहसंरक्षणार्थं तु भिक्षामीहेद्विजातिषु । पात्रमस्य भवेत्पाणिस्तेन नित्यं गृहानटेत् २८
अतैजसानि पात्राणि भिक्षार्थं कल्पयेन्मुनिः । सर्वेषामेव भिक्षूणां दार्वलाबुमयानि च २९
कांस्यपात्रे न भुञ्जीत आपद्यपि कथंचन । मलाशाः सर्व उच्यन्ते यतयः कांस्यभोजिनः
कांसिकस्य तु यत्पापं गृहस्थस्य तथैव च । *कांस्यभोजी यतिः सर्वं तयोः प्राप्नोति किल्बिषम् ३१

---

* एतदर्धस्थानेऽयं पाठः ख. छ पुस्तकयोः-"कांस्यपात्रेषु भुञ्जानः प्राप्नुयात्किल्बिषं सदा" इति ।

---

१ ख. छ. °चरब° । २ छ. °श्च श्रेयश्चैषां यथोत्तरम् । ए° । ३ ख. छ. °दण्डो गुरवे चै° । ४ ख. छ. समाहितः । ५ छ. °पं स्मरेन्नित्यं तथा च विजि° । ६ ख. छ. वासोभिक्षापरिग्रहः । कु° । ७ ख. छ. °द्रिक्षां स° । ८ ग. ङ. °र्थं कृतवान्मनुः । स° । ९ क. °भोजनाः । कां° । १० ख. छ कांस्यकंस्यापि यत्पात्रं गृ° ।

ब्रह्मचारी गृहस्थश्च वानप्रस्थो यतिस्तथा। उत्तमां वृत्तिमाश्रित्य पुनरावर्तयेद्यदि २२
आरूढपतितो ज्ञेयः सर्वधर्मबहिष्कृतः। निन्द्यश्च सर्वदेवानां पितॄणां च तथोच्यते २३
त्रिदण्डं लिङ्गमाश्रित्य जीवन्ति बहवो द्विजाः। न तेषामपवर्गोऽस्ति लिङ्गमात्रोपजीविनाम् २४
त्यक्त्वा लोकांश्च वेदांश्च विषयाणीन्द्रियाणि च। आत्मन्येव स्थितो यस्तु प्राप्नोति परमं पदम् २५

इति वैष्णवे धर्मशास्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः।

राज्ञां तु पुण्यवृत्तानां त्रिवर्गपरिकाङ्क्षिणाम्। वक्ष्यमाणस्तु यो धर्मस्तत्त्वतस्तं निबोधत
तेजः सत्यं धृतिर्दाक्ष्यं सङ्ग्रामेष्वनिवर्तिता। दानमीश्वरभावश्च क्षत्रधर्मः प्रकीर्तितः २
क्षत्रियस्य परो धर्मः प्रजानां परिपालनम्। तस्मात्सर्वप्रयत्नेन रक्षयेन्नृपतिः प्रजाः ३
त्रीणि कर्माणि कुर्वीत राजन्यस्तु प्रयत्नतः।दानमध्ययनं यज्ञं ततो(पो) योगनिषेवणम् ४
ब्राह्मणानां च संतुष्टिमाचरेत्सततं तथा। तेषु तुष्टेषु नियतं राज्यं कोशश्च वर्धते ५
वाणिज्यं कर्षणं चैव गवां च परिपालनम्। ब्राह्मणक्षत्रसेवा च वैश्यकर्म प्रकीर्तितम् ६
खलयज्ञं कृषीणां च गोयज्ञं चैव यत्नतः। कुर्याद्वैश्यश्च सततं गवां च शरणं तथा ७
ब्राह्मणक्षत्रवैश्यांश्च चरेन्नित्यममत्सरः। कुर्वंस्तु शूद्रः शुश्रूषां लोकाञ्जयति धर्मतः ८
पञ्चयज्ञविधानं तु शूद्रस्यापि विधीयते। तस्य प्रोक्तो नमस्कारः कुर्वन्नित्यं न हीयते ९
शूद्रोऽपि द्विविधो ज्ञेयः श्राद्धी चैवेतरस्तथा। श्राद्धी भोज्यस्तयोरुक्तो ह्यभोज्यो हीतरः स्मृतः १०
प्राणानर्थांस्तथा दारान्ब्राह्मणाय निवेदयेत्। स शूद्रजातिर्भोज्यः स्यादभोज्यः शेष उच्यते ११
कुर्याच्छूद्रस्तु शुश्रूषां ब्रह्मक्षत्रविशां क्रमात्। कुर्यादुत्तरयोर्वैश्यः क्षत्रियो ब्राह्मणस्य तु

---

१ ख. छ. °रिरक्षणम्। रक्षमा°। २ छ. °ष्वपलायनम्। दा°। ३ ख. छ. ज्ञेय आज्ञश्चैवेतरस्तथा। आज्ञो भोज्यः स विज्ञेयो भोज्यो हीनं त°। ४ ख. छ. °तू। न शूद्रो जातिभोज्यः। ५ क. सच्छूद्राजाति°।

आश्रमास्तु त्रयः प्रोक्ता वैश्यराजन्ययोस्तथा । पारिव्राज्याश्रमप्राप्तिर्ब्राह्मणस्यैव चोदिता ॥ १३

आश्रमाणामयं धर्मो मया प्रोक्तः सनातनः । यदत्राविदितं किंचित्तदन्येभ्यो गमिष्यथ[1]

इति श्रीवैष्णवे धर्मशास्त्रे पञ्चमोऽध्यायः ॥ ९ ॥

समाप्तेयं लघुविष्णुस्मृतिः ।

---

१ ब. °भ्यो विनिश्चयेत् ।

ॐ तत्सद्ब्रह्मणे नमः ।

लघुशङ्खस्मृतिः ।

+इष्टापूर्तौ तु कर्तव्यौ ब्राह्मणेन विशेषतः । इष्टेन लभते स्वर्गं मोक्षं पूर्तेन विन्दति १
एकाहमपि कौन्तेय भूमिष्ठमुदकं कुरु । कुलानि तारयेत्सप्त यत्र गौर्विवृषा भवेत् २
भूमिदानेन ये लोका गोदानेन च कीर्तिताः । ताल्लोकान्प्राप्नुयुर्मर्त्याः पादपानां प्ररोहणे ३
वापीकूपतडागानि देवतायतनानि च । पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ४
अग्निहोत्रं तपः सत्यं वेदानां चैव धारणम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ५
इष्टापूतौ(र्तै) द्विजातीनां सामान्यौ(न्ये) धर्मसाधने । अधिकारी भवेच्छूद्रः पूर्तधर्मे न वैदिके ६
यावदस्थीनि गङ्गायां तिष्ठन्ति पुरुषस्य च । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ७
देवतानां पितॄणां च जले दद्याज्जलाञ्जलिम् । असंस्कृतमृतानां च स्थले दद्याज्जलाञ्जलिम् ८
एकादशाहे प्रेतस्य यस्य चोत्सृज(ज्य)ते वृषः । मुच्यते प्रेतलोकाच्च स्वर्गलोकं स गच्छति
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत चाश्वमेधेन नीलं वा वृषमुत्सृजेत् १०
लोहितो यस्तु वर्णेन मुखे पुच्छे तु पाण्डुरः । श्वेतः खुरविषाणाभ्यां स वै नीलवृषः स्मृतः
नवश्राद्धं त्रिपक्षे च षण्मासे मासिकेऽब्दिके । पतन्ति पुरुषास्तस्य यो भुङ्क्तेऽनापदि द्विजः
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोडश । प्रेततो न(त्वान्न) विमुच्येत कृतैः श्राद्धशतैरपि १३
एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः । अमूलं तद्विजानीयात्स मातृपितृघातकः १४
सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं सुतैः । प्रतिमासं यथा तस्य प्रतिसंवत्सरं तथा १५
सपिण्डीकरणादूर्ध्वं यत्र यत्रोपदीयते । तत्र तत्र त्रयं कुर्याद्वर्जयित्वा मृतेऽहनि १६
अमावास्यां क्षयो यस्य प्रेतपक्षे तथा यदि । सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः
त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते । प्राप्ते चैकादशदिने पार्वणं तु विधीयते १८
मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः । पितामहीसह(ह्यादिभि)स्तस्याः सपिण्डीकरणं स्मृतम् १९

+ लिखितस्मृतिश्लोकैः साम्यमस्यां दृश्यते ।

---

१ ख. °कान्प्रययु° । २ ख. गा दे° ।

कर्तव्यं प्रत्युपं(तु प्रमी)तायाः सपिण्डीकरणं स्त्रियाः । मृताऽ(भर्त्राऽ?)पि हि न कर्तव्यं चरुमन्त्राहुतिव्रतैः २०

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः । द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः २१

अथ चेन्मन्त्रविधुक्तः शारीरैः पङ्क्तिदूषणैः । अदोषं तं यमः प्राह पङ्क्तिपावन एव सः २२

यानि यस्य पवित्राणि कुक्षौ तिष्ठन्ति भारत । तानि तस्यैव पूज्यानि न शरीराणि देहिनाम् २३

अग्नौकरणशेषं तु पितृपात्रे प्रदापयेत् । प्रतिपद्य पितॄणां च न दद्याद्वैश्वदेविके २४

मृन्मयेषु च पात्रेषु श्राद्धं भोजयते द्विजः । *अन्नदाताऽपहर्ता च भोक्ता च नरकं व्रजेत्

हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनादयः । दातारं नोपतिष्ठन्ति भोक्ता भुङ्क्ते च किल्बिषम् २६

आयसेन तु पात्रेण यदन्नमुपदीयते । भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत् २७

श्राद्धं कृत्वेतरश्राद्धे यस्तु भुङ्क्तेऽतिविह्वलः । पतन्ति पितरस्तस्य तं मासं रेतपायिनः २८

पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहो होमः श्राद्धं भुक्त्वाऽष्ट वर्जयेत्

व्याममात्रं समुत्सृज्य पिण्डांस्तत्र प्रदापयेत् । यत्र संस्पर्शनं वाऽपि प्राप्नुवन्ति न बिन्दवः

अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा । तेभ्यश्चापि प्रकर्तव्यमेकोद्दिष्टं न पार्वणम्

मातुः श्राद्धं तु पूर्वस्मात्पितॄणां तदनन्तरम् । ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्

दशकृत्वः पिबेच्चापः सावित्र्याः श्राद्धभुग्द्विजः । ततः संध्यामुपासीत शुध्यते तदनन्तरम्

चान्द्रायणं नवश्राद्धे पराको मासिकेन तु । पक्षत्रयेऽपि कृच्छ्रः स्यादेकाहं पुनराब्दिके

अत ऊर्ध्वं न दोषः स्याच्छङ्खस्य वचनं त(य)था ॥ ३४

सर्वविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत्

उदकं पिण्डदानं च विप्रेभ्यो यच्च दीयते । नोपतिष्ठति तत्सर्वमन्तरिक्षे प्रलीयते ३६

नारायणबलिः कार्यो लोकग्रहभयान्नरैः । तथा तस्य भवेच्छ्रेयो नान्यथा वाऽब्रवीन्मनुः

गोभूहिरण्यहरणे क्षेत्रापणगृहस्य च । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ३८

उद्यताः सह धावन्त एककार्येष्ववस्थिताः । यद्येकोऽपि +हनेत्तत्र सर्वे ते ब्रह्मघातकाः

बहूनामेककार्येषु यद्येको मर्मघातकः । सर्वे तेशुद्धिमि(मृ)च्छन्ति स एको ब्रह्मघातकः

महापातकसंस्पर्शे स्नानमेव विधीयते । संस्पृष्टस्तु यदा भुङ्क्ते कृच्छ्रं सांतपनं चरेत् ४१

चाण्डालभाण्डसंस्पृष्टं वापीकूपगतं जलम् । गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति ४२

---

* अन्नदाता पुरोधाश्चेति पाठः क्वचिदुपलभ्यतेऽन्यत्र । + इदमार्ष ज्ञेयम् । हन्यादिति भाव्यम् ।

---

१ ख. °पत्यायाः । २ क. °तकम् । ग°।

चाण्डालघटमध्यस्थं यस्तोयं पिबति द्विजः। तत्क्षणात्क्षय(क्षिप)ते यस्तु प्राजापत्यं समाचरेत् ४३

यदि न क्षिपते तोयं शरीरे यस्य जीर्यति।प्राजापत्यं न दातव्यं कृच्छ्र(च्छ्रं)सांतपनं स्मृतम् चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः। तदर्धं तु चरेद्वैश्यः पादं शूद्रस्य दापयेत् ४५

यस्य चाण्डालि(ली)संयोगो भवेत्कश्चि(त्कचि)दकामतः। तस्य सांतपनं कृच्छ्रं स्मृतं शुद्ध्यर्थमात्मनः ४६

चाण्डालोदकसंस्पृष्टः स्नात्वा विप्रो विशुध्यति। [+तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ४७

आजानु स्नानमात्रं स्यादानाभेश्च विशोधनम्। अत ऊर्ध्वं त्रिरात्रं स्याच्छरीरस्पर्शने मलम् ४८

रजस्वला तु संस्पृष्टा श्वानचाण्डालवायसैः। तावच्छिष्टेस्त्रिराहारः(रा) स्नात्वा कालेन शुध्यति] ४९

अस्थिभङ्गं गवां कृत्वा चाण्डालस्य च च्छेदनम्। पातनं चैव शूद्रस्य मासार्धं व्याप(याव)कं चरेत् ५०

यवसस्रावणोट्यो यावद्रोहेत तद्गृहे(?)। तद्वर्णा च सुगां दत्त्वा ततः पापात्प्रमुच्यते ५१

हले वा शकटे चैव दुर्बलं यो नियोजयेत्। प्रत्यवाये समुत्पन्ने ततः प्राप्नोति गोवधम् ५२

अतिवाह्यातिदोहाभ्यां नासिकाभेदने तथा। नदीपर्वतसंरोधे पादोनं व्रतमाचेत् ५३

[1]एकं च बहुभिः कैश्चिदेवाव्यापादितं क्वचित्। कृच्छ्रपादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक् एकपादं चरेद्रोधे द्वौ पादौ बन्धने चरेत्। योक्त्रे च पादहीनं स्याच्चरेत्सर्वं निपातने ५५

रोमाणि प्रथमे पादे द्वितीये[2] च(चा) श्मघातनम्। तृतीयं(ये) तु शिखा धार्या सशिखं तु निपातने ५६

केशानां रक्षणार्थाय द्विगुणं व्रतमाचरेत्। द्विगुणव्रते समादिष्टे द्विगुणे(णा)दक्षिणा भवेत् राजा वा राजपुत्रो वा ब्राह्मणो वा बहुश्रुतः। अकृत्वा वपनं तेषां प्रायश्चित्तं न विद्यते अन्येषां नखकर्णानां बाहोर्निर्मोचने तथा। सायं संगोपनार्थाय न दुष्येद्रोधबन्धयोः५९

यन्त्रिते गोचिकित्साया मूढगर्भाविमोचने। यत्ने कृते विपद्येत प्रायश्चित्तं न विद्यते ६०

औषधं स्नेहमाहारं दत्तं गोब्राह्मणाय च। यदि कश्चि(काचि)द्विपत्तिः स्यात्प्रायश्चित्तं न विद्यते ६१

स्नेहाद्वा यदि वा लोभाद्भयादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति६२

+ एतच्चिह्नान्तर्गतं न विद्यते क. पुस्तके।

---

१ ख. एकवद्बहु'। २ क. 'ये श्म'।

बालस्त्वन्तर्दशाहे तु प्रेतत्वं यदि गच्छति । सद्य एव विशुद्धिः स्याच्चाशौचं नैव सूतकम्
आदन्तजन्मनः सद्य आचूडाच्चैशिकी स्मृता । त्रिरात्रं तु व्रतादेशा दशरात्रमतः परम् ६४
*अहस्त्वदत्तकन्याया बालेषु च विशोधनम् ।कुर्वन्नैवाशनौ यात मातुलश्रोत्रिये यथा(?)
ज्येष्ठो भ्राता यदा तिष्ठेदाधानं नैव कारयेत् । अनुज्ञातस्तु कुर्वीत शङ्खस्य वचनं यथा ६६
आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः । म्लेच्छभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः
स्मृताः ६७
दिवा कपित्थच्छायासु रात्रौ दधिशमीषु च । धात्रीफलेषु सप्तम्यामलक्ष्मीर्वसते सदा६८
सू(शू)र्पवातनखाग्रान्तकेशबन्ध[प]टोदकम् । मार्जनीरेणुसंस्पर्शो हन्ति पुण्यं दिवाकृतम्
अर्धवासास्तु यः कुर्याज्जपहोमक्रिया द्विजः । तत्सर्वं राक्षसं विद्याद्बहिर्जानु च यत्कृतम्
यत्र यत्र च संकीर्णं पश्यत्यात्मन्यसंशयम् । तत्र तत्र तिलैर्होमो गायत्र्यावर्तनं तथा ७१

इति लघुशङ्खस्मृतिः ॥

समाप्तेयं लघुशङ्खस्मृतिः ।

---

* एतद्वचनं न विद्यते ख. पुस्तके ।

ॐ तत्सद्ब्रह्मणे नमः ।

[लघु]शातातपस्मृतिः ।

शातातपस्य महर्षेर्धर्मशास्त्रं व्याख्यास्यामः ॥ १ ॥ ब्राह्मणं हत्वा तस्य शिरः-कपालमादाय तीर्थान्तरं संचरेदात्मनः पापकीर्तनं कुर्वन्द्वादशाब्दैर्विशुध्यति ॥ २ ॥ अथाश्वमेधं पश्यति तद्दर्शनाच्छुद्धो भवति ॥ ३ ॥ सुरापस्य तप्तसुरापाने शुद्धिः स्यात् ॥ ४ ॥ ब्राह्मणसुवर्णहरणे राजसंनिधानात्सोमपानेन शुद्धिः स्यात् ॥ ५ ॥ गुरुदाराभिगामिनस्तप्तायसीपरिष्वञ्जनेनैव शुद्धिः ॥ ६ ॥ एषां यो येन संबध्यते तस्य तदेव प्रायश्चित्तं भवति ॥ ७ ॥ यावकीयं चतुर्थकालं संविशेत् ॥ ८ ॥ नकुलभोजने लशुनपलाण्डुगृञ्जनभक्षणे तप्तकृच्छ्रम् ॥ ९ ॥ उष्ट्रीखरीमानुषीक्षीरपाने पुनरुपनयनं कृच्छ्रं च ॥ १० ॥ शूद्रोच्छिष्टभोजने त्रिरात्रम् ॥ ११ ॥ सुराभाण्डोदकपाने छर्दनं घृतप्राशनमहोरात्रं च ॥ १२ ॥ अनुदकमूत्रपुरीषकरणे श्व(श्व)काकस्पर्शने सचैलस्नानं महाव्याहृतिमाचरेत् ॥ १३ ॥ काकविष्ठोपघाते हव्यकव्याभिगमने तदेव व्रतम् ॥ १४ ॥ मृतवत्सायाः क्षीरप्राशने वृथामांसस्य भक्षणे प्राजापत्यम् ॥ १५ ॥ अग्नेरुत्सादने मांसस्यर्थे(स्पर्शे) काकश्वानमण्डूकमूषकेदर्दुरनकुलादीन्हत्वा यानि चान्यानि भूतानि एषामनुक्तप्रायश्चित्तेषु वधं कृत्वा प्राजापत्यं समाचरेत् ॥ १६ ॥

अस्नाताशी अयाजी च विप्रकीर्णो भवेद्द्विजः । न तारयति दातारं नाऽऽत्मानन्त-(नं स)परिग्रहम् १७

अस्नाताशी मलं भुङ्क्ते अयाजी पूयशोणितम् । अहू(हु)ताशी कृमिं भुङ्क्ते अदाता विषमश्नुते १८

पक्वं वा यदि वा चाऽऽमं यस्य नाश्नाति वै द्विजः । भुक्त्वा दुरात्मनस्तस्य द्विजश्चान्द्रायणं चरेत् १९

अथोपपातकान्याहुः ॥ २० ॥ अग्न्युत्सादी कन्यादूषी स्त्रीघाती[वृषणाभिघाती] गोघ्नः शूद्रघाती कुमारघाती यमि(पति)तव्यवहारी ये तेषां प्रायश्चित्तानि ॥ २१ ॥ अग्न्युत्सादने कृच्छ्रम् ॥ २२ ॥ कन्यादूषणेऽर्धपादम् ॥ २३ ॥ स्त्रीघाती षण्मासान्कृच्छ्रेण ॥ २४ ॥ वृषणाभिघाते प्राजापत्यम् ॥ २५ ॥ गोघ्नस्त्रीन्मासा-

---

१ क. °ह्मणो ब्राह्मणं । २ ख. ग. °कदुर्दु° । ३ घ. °जः । नाता° ।

न्प्राजापत्यं कुर्याद्धोमतीं च जपेद्द्विजाम् ॥ २६ ॥ शूद्रवधे तप्तकृच्छ्रेण मासं वर्तयेत् ॥ २७ ॥ कुमारघाती पयोभक्षो मासं गोष्ठे वसेत् ॥ २८ ॥ पतितव्यवहारी तप्तकृच्छ्रेण शुध्यति ॥ २९ ॥ +आहस्त्यश्वदातरि वधे शूद्रवदकामकृते प्रायश्चित्तं समाचरेत् ॥३०॥
प्राणायामास्त्रयस्तस्य घृ(घृ)तं प्राश्य विशुध्यति ॥ ३१
विवाहयेन्न सगोत्रां समानप्रवरां तथा । तस्याः[कथंचित्] संबन्धेऽ[प्य]तिकृच्छ्रं चरेद्द्विजः ३२
य उद्वहेत्सगोत्रां *दुहितरं चैव मातुलाम्(?) । पितृभिः सह तुल्यः स्यात्स तु चान्द्रायणं चरेत् ३३
नोद्वहेत्कपिलां कन्यां नाधिकाङ्गीं न रोगिणीम् । नातिलोमिकां नालोमिकां न वाचाटां न पिङ्गलाम् ३४
नर्क्षवृक्षनदीनाम्नीं न च भीषणनामिकाम् ॥ ३५
यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता।नोपयच्छेत तां कन्यां पुत्रिकाधर्मशङ्कया ३६
असपिण्डा तु या मातुरसगोत्रा च या पितुः । सा विवाह्या द्विजातीनां दारकर्मणि मैथुने
हंसस्वनां मेघवर्णां मधुपिङ्गललोचनाम् । तादृशीमुद्वहेत्कन्यां स चैल(वं) सुखमृच्छति ३८
दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते । परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ३९
पारिविक्तिः परिवेत्ता यया च परिविद्यते । सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ४०
क्लीबे देशान्तरस्थे पतिते प्रव्रजिते तथा । दाराग्निहोत्रसंयोगे न दोषः परिवेदने ४१
नाग्नयः परिविन्दन्ति वेदा न च तपो न च । न च श्राद्धं कनिष्ठस्य विरूपा या च कन्यका
यस्मिंस्तु कुलशीलानि न दृश्येरन्कदाचन । न सत्याकरणं तत्र न च कन्यानृतं भवेत् ४३
उद्वाहिता च या कन्या न संप्राप्ता च मैथुनम् । भर्तारं पुनरभ्येति यथा कन्या तथैव सा
समुद्वृह्य तु तां कन्यां सा चेदक्षतयोनिका । कुलशीलवते दद्यादिति शातातपोऽब्रवीत् ४५
प्रख्यापनं प्र(प्रा)ध्ययनं प्रश्नपूर्वं प्रतिग्रहम् । दानाध्ययनवादार्थं षड्विधो वेदविक्रयः
यत्तद्विक्रयनिर्दिष्टं स्त्रीषु यच्चार्पितं धनम् । न देयं पितृदेवेभ्यो यच्च क्लीबादुपार्जितम् ४७
अनियोगेन यो दद्याद्ब्राह्मणाय प्रतिग्रहम् । स पूर्वं नरकं याति ब्राह्मणस्तदनन्तरम् ४८
वेदाक्षराणि यावन्ति नियुक्तादनुकारणात् । तावता ब्रह्महत्यैव ब्रह्मविक्रयनिर्दिशेत्(?)
वैश्वदेवेन ये भीता आतिथ्याच्च बहिष्कृताः । सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः
येषामध्ययनं नास्ति ये च केचिदनग्नयः । न कुलं श्रोत्रियं येषां सर्वे ते शूद्रधर्मिणः ५१
अकृत्वा वैश्वदेवं तु ये भुञ्जन्त्यधार्मिकाः । वृथा तेनान्नपाकेन काकयोनिं व्रजन्ति ते

+ इत आरभ्य विशुध्यतीत्यन्तग्रन्थो ग. पुस्तके न विद्यते * तदुहितरामिति सकलपुस्तकपाठः ।

१ क. ङ. °म् । तद्देयं । २ क. ग. °न्त्यन्त्यधा° । ३ क. °काः । व्यथा ।

प्रियो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च । वैश्वदेवे तु संप्राप्तः सोऽतिथिः स्वर्गसंक्रमः
नैकग्रामीणमतिथिं पूर्वसंगतिकं तथा। उपस्थितं गृहे विद्याद्भार्या यत्राग्नयोऽपि वा ५४
अनिमित्तमनाहूतं देशकालमुपस्थितम् । अतिथिं तं विजानीयान्नातिथिः पूर्वसंगतः ५५
यावन्मात्राशनो वा स्याद्भुताशी स्नातको द्विजः। तस्यान्नस्य चतुर्भागं हन्तकारं विदुर्बुधाः
ग्रासमात्रं भवेद्भिक्षा पुष्कलं तु चतुर्गुणम्। पुष्कलानि च चत्वारि हन्तकारो विधीयते५७
आरूढो नैष्ठिकं धर्मं यस्तु व्यावर्तयेत्पुनः । चान्द्रायणं चरेन्मासमिति शातातपोऽब्रवीत्
आरूढपतितोत्पन्नो ब्राह्मणो वृषलेन च। उभौ तावंतिचाण्डालौ सगोत्रायां तु जायते
यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनम्। षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ६०
चाण्डाल्यां विशतो विप्राः परिव्राजकतापसाः । तैर्जातानि अपत्यानि चाण्डालैर्नरकं
वसेत्(?) ६१
स्पन्दिते बुद्धिजातीनां भिन्नभाजनभोजने । पञ्चगव्येन शुद्धिः स्यादिति शातातपोऽ-
ब्रवीत् ६२
अभोज्यं ब्राह्मणस्यान्नं वृषलेन निमन्त्रितम्। तथैव वृषलस्यान्नं ब्राह्मणेन निमन्त्रितम्६३
ब्राह्मणान्नं ददच्छूद्रः शूद्रान्नं ब्राह्मणो ददत्। उभावेतावभोज्यान्नौ भुक्त्वा चान्द्रायणं
चरेत् ६४
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता । भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली
स्मृता ६५
उपनिक्षेपधर्मेण शूद्रान्नं पचति द्विजः। अभोज्यं तु भवेदन्नं स च विप्रः पुरोहितः ६६
शूद्रान्नं शूद्रसंकल्पः शूद्रेण सह वासनम्।शूद्राह्वा(ज्ञा) नागमः कश्चिज्ज्वलन्तमपि पातयेत्
शूद्रान्नोपहता विप्रा विह्वला रतिलालसाः । भ(धा)रिताः किं करिष्यन्ति निर्विषा इव
पन्नगाः ६८
शूद्रादाहृत्य विण्मूत्रं ये पचन्ति द्विजातयः। ते यान्ति नरकं घोरं ब्रह्मतेजोविवर्जिताः ६९
अग्निहोत्रफलं नित्यं वैश्वदेवतरोर्गतम्। सर्वं तु नश्यते चैव शूद्रान्नपचने कृते ७०
हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनादयः। दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बि-
षम् ७१
आयसेन तु पात्रेण यदन्नमुपनीयते। भोक्ता विष्ठासमं भुङ्क्ते दाता च नरकं व्रजेत् ७२
दन्तधावनमक्रुत्वा प्रत्यक्षलवणं च यत्। मृत्तिकाभक्षणं चैव तुल्यं गोमांसभक्षणैः ७३
मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः। तस्मात्सर्वप्रयत्नेन भक्षयेद्दन्तधावनम् ७४
पुष्पाणि क्षारवस्त्राणि गन्धमाल्यानुलेपनम् । उपवासे न शुध्यन्ति दन्तधावनमञ्जनम्

---

१ क. ग °वपि च्या°। २ ख. ग. °ञ्जनोद°। ३ ख. ग. घ. °तारो नरकं यान्ति।

अन्यतो[1] वसते मूर्खो दूरेणापि बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः ७६
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते
संनिकृष्टमधीयानं ब्राह्मणं यो व्यतिक्रमेत् । भोजने चैव दाने च दहत्यासप्तमं कुलम् ७८
देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ७९
देवद्रव्यं द्विजप्रोक्तं ब्रह्मस्वं ब्राह्मणेन्द्रियम् । वियोन्यां क्रियते यच्च तेन नास्ति व्यतिक्रमः
मा ददस्वेति यो ब्रूयाद्दह्येष्वग्निर्ब्राह्मणेषु च । तिर्यग्योनिषु गत्वा वै चाण्डालेष्वभिजायते
यत्तु वाचा प्रतिज्ञातं कर्मणा नो(चो)पपादितम् । त्राणं तद्धर्मसंयुक्तमिह लोके परत्र च
वेदविद्याव्रतस्नाते[2] श्रोत्रिये गृहमागते । मोह(द)न्त्योषधयः सर्वा यास्यामः परमां गतिम्
नचा(वा)शौचे परिभ्रष्टे विप्रे वेदविवर्जिते । दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम्
मन्त्रपूतं तु यत्त्वन्नममन्त्राय च दीयते । हस्तं कृन्तति दातुस्तु भोक्तुर्जिह्वां निकृन्तति ८५
यावतो ग्रसते पिण्डान्हव्यकव्येष्वमन्त्रवित्[3] । तावतो ग्रसते प्रेत्य दीप्तान्स्थूलानयोगुडान्
मधुमांससुरासोमं लाक्षालवणमेव च । एतेषां विक्रयेणैव द्विजश्चान्द्रायणं चरेत् ८७
गवां श्वासोदकस्नाने महानद्याश्च संगमे । समुद्रदर्शने चैव शुना दष्टः शुचिर्भवेत् ८८
अव्रती सव्रती चापि शुना दष्टो द्विजोत्तमः । हिरण्योदकमिश्रं तु घृतं प्राश्य विशुध्यति
यदा न दृश्यते सोमः प्रायश्चित्तं कथं भवेत् । यां दिशं व्रजते सोमस्तां दिशं त्ववलोकयेत्
सोममार्गेण सा पूता पञ्चगव्येन शुध्यति ॥ ९०
ब्राह्मणब्रह्मणो(णो)द्वारे[4] पूयशोणितसंभवे । कृमिरुत्पद्यते यस्य प्रायश्चित्तं कथं भवेत् ९१
गवां मूत्रपुरीषेण त्र्यहं स्नात्वा यथाक्रमम् । ततः क्षीरघृतं प्राश्य कृमिदष्टो विशुध्यति ९२
वृथान्नमधुमांसानि यस्तु नाश्नाति स व्रती । त्रीण्यहानि उपवसेदेकाहमुदके वसेत् ९३
रात्रौ श्राद्धं न कुर्वीत राहोरन्यत्र दर्शनात् । संध्ययोरुभयोश्चैव न कुर्वीत कदाचन ९४
अकृत्वा मातुलायां तु यः श्राद्धं प्रविवेशयेत् । तस्य क्रोधसमाविष्टा हिंसामिच्छन्ति मातरः
सदैवं[5] भोजयेद्विप्राञ्श्राद्धमेव प्रवर्तते । अश्नन्ति चान्यथा धर्मं सदैवासुरराक्षसाः ९६
पूर्वं पा(पा)णिषु यद्दत्तं यच्चान्नमुपकल्पितम् । तेनैव सह भोक्तव्यं पृथक्श्राद्धं न विद्यते ९७
द्वौ दैवे पार्वणे विप्रः(प्रौ) प्राङ्मुखा उपवेशयेत् । त्रीन्पित्र्ये च उदङ्मुखान्पितॄणां तृप्तिहेतवे ९८
यत्नेन भोजयेच्छ्राद्धे बह्वृचं वेदपारगम् । शाखान्तगमथाध्वर्युं[6] छन्दोगं वा सभाप्तिकम्[7]
छन्दोगं भोजयेच्छ्राद्धे वैश्वदेवे तु बह्वृचम् । शान्तिकर्माणि चाध्वर्युं खरं(र)कर्मण्यथर्वणम्

---

१ क. ख. ड. अश्नतो । २ क. ख. °स्नाने श्रो° । ३ क. ड. °व्येषु म° । ४ ख. °ह्मरेषु पू° । ५ घ. °रेषु पू° । ६ ड. °दैव भो° । ७ ग. °र्धु छान्दो । ८ ग. सवीमा° ।

अतिथिरहिते[1] श्राद्धे ये भुञ्जन्त्यविचक्षणाः । वृथा तेनान्नपाकेन काकयोनिं व्रजन्ति ते
दूरादेव परीक्षेत ब्राह्मणं वेदपारगम् । तीर्थे तद्द्रव्यकव्यानां प्रदाने सोऽतिथिः स्मृतः
यावदुष्णं पिबेदन्नं यावदश्नन्ति वाग्यताः । पितरस्तावदश्नन्ति यावन्नोक्ता हविर्गुणाः
हविर्गुणा न वक्तव्या न यावत्पितरोऽर्चिताः । पितृभिस्तर्पिते स्त(त्व)स्य वक्तव्यं
शोभनं हविः १०४
परदारेषु जायेते द्वौ पुत्रौ कुण्डगोलकौ। पत्यौ जीवति कुण्डस्तु मृते भर्तरि गोलकः १०५
तौ जातौ(येते) परक्षेत्रे प्रकृत्य[2](त्या) चेष्टते कृतिः । दत्तानि हव्यकव्यानि नाश्नन्ति
सां(स)प्रदायिनः १०६
त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपस्तिलाः। त्रीणि चात्र प्रशंसन्ति सत्यमक्रोधमार्जवम्
दौहित्रं प्रोच्यते खड्गं ललाटे यस्य दृश्यते। तस्य खड्गस्य यत्पात्रं तद्दौहित्रमिति स्मृतम्
दिवसस्याष्टमे भागे मन्दी भवति भास्करः । स कालः कुतपो ज्ञेयः पितॄणां दत्तमक्षयम्
पवित्रकं करे कृत्वा गन्धैराणि पठे(लेपये)द्विजः(जान्) । पितृयज्ञस्य तच्छिद्रं निराशाः
पितरो गताः ११०
सव्यादंसात्परिभ्रष्टं नाभिदेशे धृताम्बरम्। एकवस्त्रं तु तं वि(तद्वि)द्यादैवे पित्र्ये च वर्ज-
येत् १११
हस्तौ प्रक्षाल्य गण्डूषं यः पिबेदविचक्षणः। स हि दैवं च पित्र्यं च आत्मानं चापि घातयेत्
भो(भा)जनेषूपतिष्ठत्सु स्वस्ति कुर्वन्ति ये द्विजाः।आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते
गृहेषु तत्समा संध्या गोष्ठे दशगुणा स्मृता। नद्यां शतगुणा प्रोक्ता अनन्ता शिवसंनिधौ
अनृतं मद्यगन्धं च दिवामैथुनमेव च। पुनाति मन्त्रतत्त्वं च तत्संध्योपासनाद्द्विजः ११५
गणान्नं गणिकान्नं च यच्चान्नं बहुयाचितम्। नारीप्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत्
पुनर्भूः परिवेत्ता च रेतोधाः कामचारिणी। आसां प्रथमगर्भेषु भुक्त्वा चान्द्रायणं चरेत्
*कामचारिणीरतस्य परपाकरतस्य च। लोलुपस्य च यच्चान्नं भुक्त्वा चान्द्रायणं चरेत्
पञ्चयज्ञानुपासित्वा परान्नं यस्तु भुञ्जति। सततं ब्राह्मणो विद्वान्परपाकरतः स्मृतः ११९
गृहमेधे प्रवर्तन्ते वेदशास्त्रबहिष्कृताः। ऋषिभिस्तत्र(स्ते तु) सर्वे वै श्वपचाः समुदाहृताः
अज्ञानाद्भुञ्जते विप्राः सूतके मृतकेऽपि च। गायत्र्यष्टसहस्रेण शुध्यते(न्ते) प्रेतसूतके १२१
वैश्यस्य सूतके भुक्त्वा गायत्र्याः पञ्चभिः शुचिः। सूतके क्षत्रियस्यैतद्विंशतो जप उच्यते
सत्रिणां दीक्षितानां च यतीनां[3] ब्रह्मचारिणाम् । एतेषां सूतकं नास्ति कर्म कुर्वन्ति
ऋत्विजः १२३

---

*एतद्वचनं न विद्यते घ. पुस्तके ।

---

१ ङ ते विप्रा ये । २ क. ख. प्रत्य । ३ क. ङ. यतिनां ।

यज्ञप्रकरणे चापि जायते स्वयमेव तु । [1]अर्थो(थो) पदापयेदन्नं [3]भोज्यं तद्द्विजसत्तमैः १२४
चितिवृक्षश्चितियूपश्चण्डालो वेदविक्रयी । एतान्वै ब्राह्मणः स्पृष्ट्वा सचैलो जलमाविशेत्
अग्न्यगारे गवां गोष्ठे देवतानां च संनिधौ । आहारे जपकाले च पादुकां च विवर्जयेत्
शिरः प्रावृत्य कण्ठं वा अप्सु मुक्तशिखोऽपि वा । अकृत्वा पादशौचं तु आचान्तोऽप्य-
शुचिर्भवेत् १२७
खलक्षेत्रगतं धान्यं वापीकूपगतं जलम् । अभोज्यादपि तद्ग्राह्यं यच्च गोष्ठगतं पयः १२८
अनाम्नातेषु [च]कथं कथं चिदिति चेद्वदेत् । यामाशिषं द्विजा ब्रूयुः स धर्मः परमः स्मृतः
यो वेष्टितशिरा भुङ्क्ते यो भुङ्क्ते दक्षिणामुखः । सोपानत्कश्च यो भुङ्क्ते तद्वै रक्षांसि भुञ्जते १३०
यातुधानाः पिशाचाश्च राक्षसाः क्रूरकर्मिणः । हरन्ति[4] रसमन्नस्य मण्डलेन विवर्जितम्
ब्रह्मा विष्णुश्च रुद्रश्च श्रीर्हुताशन एव च । मण्डलान्युपजीवन्ति तस्मात्कुर्वन्ति मण्डलम्
ब्राह्मणस्य चतुष्कोणं त्रिकोणं क्षत्रियस्य च । वैश्यस्य मण्डलं प्रोक्तं शूद्रस्य प्रोक्षणं स्मृतम्
दन्तलग्ने फले मूले भुक्तशेषानुलेपने । ताम्बूले चेक्षुखण्डे च नोच्छिष्टो भवति द्विजः १३४
न स्नानमाचरेद्भुक्त्वा नाऽऽतुरो न महानिशि । न वासोभिः सहाजस्रं नाविज्ञाते जला-
शये १३५
नोत्सङ्गे भाजनं कृत्वा भुञ्जीत स्नातको द्विजः । न च पाणितले कृत्वा शयने न च
मा[5](आ)तने १३६
अशुचिं स्पृशते यस्तु एक एव स दुष्यति । तं स्पृष्ट्वाऽन्यो न दुष्येत सर्वद्रव्येष्वयं विधिः
बहूनामेकलग्नानां यद्येकोऽप्यशुचिर्भवेत् । अशौचं तस्य मात्रस्य नेतरेषां कदाचन १३८
नाश्नीयादेकवस्त्रेण न नग्नः स्नानमाचरेत् । न विण्मूत्रं पथि कुर्यान्न भस्मनि न गोमये
भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा पुनः । शुष्कवैरं विवादं च न कुर्यात्केनचित्सह १४०
गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च । शुध्यन्ति दशभिः क्षारैः श्वकाको-
पहतानि च १४१
अयने दानमादौ स्याद्विषुवे मध्यवर्तिनि । षडशीतिमुखेऽतीते समन्ताच्चन्द्रसूर्ययोः १४२
कुर्याद्ग्राह्याणि कर्माणि स्वभार्यापोषणं परम् । ऋतुकालाभिगामी च प्राप्नोति परमां गतिम्
ऋतुमतीं तु यो भार्यां संनिधौ नोपगच्छति । तस्या रजसि तन्मासं पितरस्तस्य शेरते
अयनादौ तदा दद्याद्द्रव्यमिष्टं गृहे वसन् । षडशीतिमुखे चैव विमुक्ते चन्द्रसूर्ययोः १४५
अर्वाक्षोडश विज्ञेया नाड्यः पश्चाच्च षोडश । कालः पुण्योऽर्कसंक्रान्त्यां विद्वद्भिः परि-
कीर्तितः १४६

---

१ घ. अर्थो पदा' । २ क. ग. °र्थो दा° । ३ ख. घ. भोज्ये । ४ क. °रन्ति र' । ५ क. ग. माशने ।

संक्रान्त्यां[1] यानि दत्ता च(नि) कव्यानि ब्राह्मणैः सह। तानि नित्यं ददात्यर्कः पुनर्जन्मनि जन्मनि १४७

अधिगम्य तु यज्ज्ञानं यच्च दानमुपार्जितम्। विद्यते सागरस्यान्तो दानस्यान्तो न विद्यते
प्रत्यक्षाणि च दत्तानि ज्ञानं च निरहंकृतम्। तपांसि च सुगुप्तानि तेषां फलमनन्तकम्
शतमिन्दुक्षये दानं सहस्रं तु दिनक्षये। विषुवे +शतसाहस्रमाकाचैत्यनन्तकम्? १५०
अयनेषु च यद्दत्तं षडशीतिमुखे तथा। चन्द्रसूर्योपरागे च दत्तं भवति चाक्षयम् १५१
चन्द्रसूर्यग्रहे नाद्यादद्यात्तु प्रतिमुक्तयोः। अमुक्तयोरस्तगयोः स्नात्वा दृष्ट्वा परेऽहनि
नष्टं देवलके दत्तमप्रतिष्ठं वार्धुषिके। सोमविक्रयिणे विष्ठाऽभि(दत्तं)जायते पूयशोणितम्
यत्र(च्च) देवलके दत्तं ते(ने) ह ता(ना)मुत्र तद्भवेत्॥ १५४
चण्डालान्त्यस्त्रियो गत्वा भुक्त्वा च प्रतिगृह्य च। पतत्यज्ञानतो विप्रो ज्ञानात्साम्यं तु गच्छति १५५

ब्रह्मकूर्चं प्रवक्ष्यामि सर्वपापप्रणाशनम्। अनादिष्टेषु सर्वेषु ब्रह्मकूर्चं विधीयते १५६
नदीप्रस्रवणे तीर्थे ह्रदे चान्तर्जलेऽपि वा। धौतवासा विशुद्धात्मा जपेच्चैव जितेन्द्रियः
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। निर्दिष्टं पञ्चगव्यं च पवित्रं कायशोधनम्
गोमूत्रैकपलं दद्यादर्धाङ्गुष्ठेन गोमयम्। क्षीरं सप्तपलं दद्यात्पलमेकं कुशोदकम्* १५९
गायत्र्याऽऽमृग्वं गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि १६०

तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम्। ब्रह्मकूर्चं भवेदेतमापो हि ष्ठेति ऋग्जपेत्
मध्यमेन पलाशेन पद्मपत्रेण वा पिबेत्। अथ वा ताम्रपात्रेण ब्रह्मपात्रेण वा द्विजः १६२
अग्नये स्वाहा सोमाय स्वाहा इरावती इदं विष्णुः। मा नस्तोके गायत्रीं च जुहुयात्
॥ १६३ ॥ प्रजापते न त्वदेतान्यन्य इत्यालोड्य प्रणवेन पिबेत्॥ १६४ ॥
आहृत्य प्रणवेनैव उद्धृत्य प्रणवेन च। आलोड्य प्रणवेनैव पिबेच्च प्रणवेन च १६५
एतद्द्विजनिमित्तं हि सर्वपापप्रणाशनम्। मलं कोष्ठगतं सर्वं दहत्यग्निरिवेन्धनम् १६६
दुर्बलेऽनुग्रहः प्रोक्तस्तथा चैवानवृत्त(थैव बालवृद्ध)योः। अतोऽन्यथा भवेद्दोषस्तस्मान्माऽनुग्रहः स्मृतः १६७
स्नेहाद्वा यदि वा मोहाद्भयादज्ञानतोऽपि वा। कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति
शरीरस्यात्यये कार्यः सदैव नियमो द्विजैः। महत्कार्योपचारे च न च स्वस्थैः कदाचन

+ अत्राऽऽदर्शपुस्तकेषु एवमेव पाठो व्यासवचने त्वत्र शतसाहस्रं व्यतीपाते त्वनन्तकमिति पाठो दृश्यते। * अत्र दधिघृतयोः प्रमाणाप्रदर्शनादपूर्णं वचनमिदं भाति।

१ ग. संक्रान्त्या। २ ग. °ख्यते मू।

स्वस्थः सन्कु(स्थो न कु?)रुते मूढो व्रतनियमौ यो द्विजः । तद्दशास्ते तु कर्तारः पतन्ति नरकेषु वै १७०

धर्मशास्त्रं समारूढो वेदखड्गधरो द्विजः । विद्वान्स्वयं तु यद्ब्रूयात्स धर्मः परमः स्मृतः अच्छिद्रमिति यद्वाक्यं वदन्ति क्षितिदेवताः । प्रणम्य शिरसा ग्राह्यमग्निष्टोमफलैः सह शातातपमिति ख्यातं धर्मशास्त्रोत्तमोत्तमम् । एतज्ज्ञात्वा द्विजः सम्यग्याति ब्रह्म सनातनम् १७१

इति श्रीशातातपमहर्षिप्रोक्तं धर्मशास्त्रं संपूर्णम् ॥

समाप्तेयं [लघु]शातातपस्मृतिः ।

ॐ तत्सद्ब्रह्मणे नमः ।

लघुहारीतस्मृतिः ।

हारि(री)[1]तेनैवमाख्यातं लोकानां हितकाम्यया । प्रायश्चित्तं[2] चिकित्सार्थमेतत्प्राहुर्मनीषिणः १

श्वविष्ठां काकविष्ठां वा कङ्कगृध्रनरस्य च । अधोच्छिष्टं तु संस्पृश्य सचैलो जलमाविशेत् ऊर्ध्वोच्छिष्टं तु संस्पृश्य प्रायश्चित्तं विनिर्दिशेत् । उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति रजस्वला तु या नारी श्वानं काकमथ स्पृशेत् । प्रायश्चित्तं कथं तस्या येन शुद्धिमवाप्नुयात् अतिक्रान्ते त्रिरात्रे तु स्नानं कृत्वाऽऽर्द्रवाससा । त्रिरात्रं क्षपयेदूर्ध्वमेकरात्रमधः क्षिपेत् ५ नियमस्था व्रतस्था स्त्री रजः पश्येत्कथंचन । त्रिरात्रं[3] तु क्षिपेदूर्ध्वं व्रतशेषं समाचरेत् ६ उच्छिष्टस्तु द्विजातिश्च रजस्त्रीं यदि संस्पृशेत् । उपवासस्त्वधोच्छिष्ट ऊर्ध्वोच्छिष्टे त्र्यहं क्षिपेत् ७

विण्मूत्रं यस्तु गृह्णाति वाचा वा दायको भवेत् । ग्रहणे तप्तकृच्छ्रं स्यादेकाहश्चेतरे स्पृशेत् यद्रजः श्लेष्मणः स्वेदो गात्राणां च मलानि च । प्रमादान्मुखसंस्पृष्टे पञ्चगव्येन शुध्यति ९ उच्छिष्टस्तु यदा स्पृष्टश्चण्डालैर्वैः[4] कथंचन । ऊर्ध्वोच्छिष्टं तु संस्पृश्य द्विजः सांतपनं चरेत् १०

*अधोच्छिष्टो यदा स्यात्तु प्रायश्चित्तं भवेदिदम् । त्रिरात्रमुपवासेन पञ्चगव्येन शुध्यति उच्छिष्टः संस्पृशेद्यस्तु नटं रजकं[5]मेदकान् । अधोच्छिष्टो यदा स स्यादेकरात्रमभोजनम् ऊर्ध्वोच्छिष्टो यदा तु स्यात्प्रायश्चित्तं भवेदिदम् । उपवासस्त्रिरात्रं स्याद्घृतं प्राश्य विशुध्यति ११

+अन्त्यजः पतितो वाऽपि निगूढो यत्र तिष्ठति । विज्ञाते तु ततः पश्चात्त्रिभिः कृच्छ्रैर्विशोधनम् १४

उद्धृतं दधिसंस्कारं जघ्रात्स्पृष्टं च मृन्मयम् । कृच्छ्रं चान्द्रायणं कुर्यात्पावनीयं पुनर्द्विजः चण्डालस्य तु पानीयं ब्राह्मणश्च यदा पिबेत् । षड्रात्रमुपवासेन पञ्चगव्येन शुध्यति १६ रजस्वला तु संस्पृष्टा ग्राम्यसूकरकुक्कुटैः । स्नानं कृत्वा क्षिपेत्तावद्यावच्चन्द्रस्य दर्शनम् १७

---

* इतः प्रभृति मेदकानित्यन्तं न ख. पुस्तके । + इत आरभ्य पञ्चगव्येन शुध्यतीत्यन्तं न विद्यते घ. पुस्तके ।

---

१ घ. 'तेन च व्याख्या° । २ घ. °त्तं विशुध्यर्थमेवमाहु° । ३ ख. °त्रं क्षपयेदू° । ४ ख. ग. 'च्छिष्टं तु यदा स्पर्शे चाण्डालाग्नं क' । ५ क. 'लाग्नं क° । ६ घ. 'कमोचिका' । ७ क. अत्यन्तः ।

शिखां छिन्दन्ति ये केचिद्रैराग्याद्वैरतोऽपि वा। पुनःसंस्कारमर्हन्ति त्रयो वर्णा द्विजातयः
मोहाच्छिन्दन्ति ये केचिद्द्विजातीनां शिखां नराः। चरेयुस्ते दुरात्मानः प्राजापत्यं विशु-
द्धये १९
स्त्रीशूद्रौ तु शिखां छित्त्वा क्रोधाद्वैराग्यतोऽपि वा। प्राजापत्यं प्रकुर्यातां निष्कृतिर्नान्यथा
भवेत् २०
विना यज्ञोपवीतेन द्विजातिर्यद्युपस्पृशेत्। *प्राजापत्यं प्रकुर्वीत निष्कृतिर्नान्यथा भवेत्
नोपस्पृष्टं भवेत्तेन उच्छिष्टस्तु स उच्यते॥ २२
विना यज्ञोपवीतेन भुङ्क्ते तु ब्राह्मणो यदि। स्नानं कृत्वा जपं[2] कुर्वन्नुपवासेन शुध्यति[3] २३
अगुरूच्छिष्टमश्नीयाद्ब्रह्मचारी कथंचन। स्नात्वा मौनोपवासेन पञ्चगव्येन शुध्यति २४
ब्रह्मचारी यदा भुङ्क्ते शूद्रान्नं ज्ञानदुर्बलः। परोकृण विशुद्धिः स्यान्निष्कृतिर्नान्यथा भवेत्
उच्छिष्टं क्षत्रियविशोः शूद्रस्यापि कथंचन। ब्रह्मचारी यदाऽश्नीयात्तस्य शुद्धिः कथं
भवेत् २६
उपवासं नरः कृत्वा द्वादशाहं पृथक्पृथक्। कृत्वा शुद्धिमवाप्नोति ब्रह्मचारी न संशयः
+औषधं स्नेहमाहारं ददद्वोब्राह्मणेषु च। दीयमाने विपत्तिः स्यात्पुण्यमेव न पातकम्
अस्थिभङ्गं गवां कृत्वा लाङ्गूलस्य च कर्तनम्[4]। पातनं शृङ्गकर्णानां मासार्धं यावकं
पिबेत् २९
वोढव्यस्तु पशुस्तावद्यावद्दूढव्रणो[5] भवेत्। तद्रूपां दक्षिणां दत्त्वा ततः पापाद्विमुच्यते ३०
यत्र[6] यत्र स्थितो गोघ्नः प्रायश्चित्तं प्रकल्पयेत्। दशरात्रमनाहारः पञ्चगव्येन शुध्यति ३१
ब्राह्मणानां स्पृशेत्पादान्गां च दद्यात्पयस्विनीम्। प्रायश्चित्तमिदं तस्य मुच्यते नात्र
संशयः ३२
अशीतिर्यस्य वर्षाणि बालो वाऽप्यूनषोडशः। प्रायश्चित्तार्धमर्हन्ति स्त्रियो रोगिण एव च
असमर्थस्य बालस्य माता वा यदि वा पिता। तमुद्दिश्य चरेत्कृच्छ्रं व्रतं तस्य न लुप्यते ३४
गर्भस्थः पञ्चवर्षः स्यात्कामचारस्तु स स्मृतः। न[7] भावयति तत्तस्मात्प्रायश्चित्तं न विद्यते
अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोऽपि वा। विना यज्ञोपवीतेन आचान्तः पुनराचमेत्
अन्ने भोजनसंपन्ने मक्षिकाकेशदूषिते। तदुद्धृत्य स्पृशेच्चापस्तच्चान्नं भस्मना स्पृशेत् ३७
हस्तेऽश्नन्ती मृन्मये वा निशि स्यात्क्षतिशायिनी। रजस्वला चतुर्थेऽह्नि स्नाता शुद्धिम-
वाप्नुयात् ३८

---

* एतदर्धं न विद्यते ख. ग. पुस्तकयोः। + एतद्वचनं न क. पुस्तके।

---

१ घ. °वित्केचिद्वैराग्यतो। २ क. जपे सर्वमुप°। ३ क. ख. ग ति। स्वगु°। ४ क. घ. °र्तने। पातने शृ°। ५ ख. °वद्दूढ°। ६ ख. ग. तत्र। ७ घ. विद्यते। ८ घ. न भवेत्पतितस्तस्मा°।

ताम्बूले कटुकषाये भुक्तस्नेहानुलेपने। मधुपर्के च सोमे च नोच्छिष्टं मनुरब्रवीत् ३९
आहारे मैथुने चैव प्रस्रवे दन्तधावने। स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ४०
स्नानं कृत्वा तु ये केचित्पुष्पं गृह्णन्ति वै द्विजाः। देवतास्तन्न गृह्णन्ति भस्मी भवति काष्ठवत् ४१
पृथक्पानं पुनःस्नानं सामिषं पयसा निशि। दन्तच्छेदनमुष्णं च समसक्तूपवर्जयेत् ४२
दधिसर्पिःपयःक्षौद्रभाण्डे दोषो न विद्यते। मार्जारश्चैव दर्वी च मारुतश्च सदा शुचिः ४३
आमिषस्य तु यो भाण्डे पक्वमश्नाति मोहितः। कुशमूलविपक्वेन त्र्यहं क्षीरेण वर्तयेत् ४४
वर्धितं द्विगुणं यत्स्यात्पुनस्तेनैव वर्धते। या मातुः कुरुते वृद्धिर्न सा वृद्धिर्विधीयते ४५
मूले तु द्विगुणीभूते रिक्ते सिद्धे तथोदिते। मूलतस्तु भवेद्वृद्धिश्चतुर्भागेन (ण)नान्यथा ४६
स्वादुको वित्तहीनः स्याल्लुब्धको विर्सेवान्यदि। मूलं तस्य भवेद्देयं न वृद्धिर्दा(द्धि दा)तुमर्हति ४७
द्विगुणं त्रिगुणं वाऽपि यः साधयति लुब्धकम्। राजग्राह्यं च तद्द्रव्यं साधको दण्डमर्हति ४८
उच्छिष्टमेव भोक्तव्यं *स्त्रीपशुर्वापिनस्तथा(?)। अनुच्छिष्टं तु यो भुङ्क्ते तं भोगं दापयेन्नृपः ४९
अनुच्छिष्टं तु यद्द्रव्यं दासक्षेत्रगृहादिकम्। स्वबलेनैव भुञ्जानश्चौरवद्दण्डमर्हति ५०
अनड्वाहं च धेनुं च दासीदासं तथैव च। फलभुक्प्रत्यहं दद्याद्भोगं पणचतुष्टयम् ५१
एकाहमेव गोक्षीरं ब्रह्मस्वं ये तु भुञ्जते। पच्यन्ते ते पुरीषे तु जन्तवो दंशसंज्ञिते(?) ५२
हलं वाहयते यस्तु गां चैव पापकृन्नरः। रौरवे द्वादशाब्दानि पितृभिः सह पच्यते ५३
उभ[य]मुखीं तु यो गां †वै ब्राह्मणायोपपादयेत्। उद्धरेत्तु स आत्मानं सप्त सप्त कुलानि वै ५४
कालं देशं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च ज्ञात्वा शौचं समाचरेत् ५५
व्रतोत्सवविवाहेषु तत्क्षणं सूतकं भवेत्। अम्बुपानं न कर्तव्यं कर्तव्यं सर्वकर्म वै ५६
सूतके मृतके चैव दिवा रात्रौ तथैव च। न वर्धते तथा पापं क्षेपणं सद्य उच्यते ५७
जातके मृतकं वा स्यान्मृतके सूतकं तथा। सूतके मृतके शुद्धिर्मृते शुद्धिस्तु सूतके ५८
+प्रथमं पतितस्त्रीणां दशरात्रेण शुध्यति। इतरेषु तु सर्वेषु प्राणत्यागेन शुध्यति ५९

---

* अत्राऽऽदर्शपुस्तकेषु एवमेव पाठः प्रदृश्यते। + एतदर्धस्थानेऽयं पाठः ख. ग. पुस्तकयोः— "दहनादग्निहोतॄणां दशरात्रेण शुध्यति" इति। † वैशब्दोऽधिकः।

---

१ घ. °टु खाद्ये च भु°। २ क. ये नुक्त°। ख. °ये च भु°। ग. °ये मुक्त। ३ घ. मानवाः। ४ क. देवास्तत्र न गृ°। ५ क °थक्स्नानं पु°। ६ घ. पुनर्दानं। ७ क. ख क्षौद्रं भा°। ८ ख. भाण्डदो°। ९ क. तु यद्भाण्डं प°। घ तु यद्भाण्डे। १० ख. मातुः कु°। घ. मानकु°। ११ ख. ग. °ते। मृष्टाभिस्तु। १२ ख. °था। श्वादको। १३ क ख स्यान्नग्न°। १४ घ. °त्तदो यदि। १५ घ. °ते। भुञ्जते स्वपुरीषं तु। १६ घ. °शनानि। १७ क. ख. ग. उभेमु°। १८ क. °वैमग्नलम्। मू°। १९ ख. °व दशरा°। २० ख. ग. °केन मृते शुद्धिर्मृ°।

अन्यगोत्रोपसंबन्धः प्रेतस्याग्निं ददाति यः । पिण्डं चोदकदानं च स दशाहं समाचरेत्
परिणीता यदा कन्या मृतयोनिः कथं भवेत् । पितृगोत्रं परित्यज्य भर्तुः प्रविशते कुलम्
विवाहादीनि कर्माणि स्मरणात्पितृगोत्रतः । संवत्सरे व्यतीते तु तद्गोत्रं नीयते पुनः ६२
त्रिः परिक्रमणादग्नेर्हृदयालंभनात्तथा । स्वामिगोत्रेण कर्तव्या पिण्डदानोदकक्रिया ६३
पुत्रिका तु हरेद्वित्तमपुत्रा सर्वमर्हति । पत्नी दुहितरश्चैव पितरौ भ्रातरस्तथा ६४
तत्सुतो गोत्रजो बन्धुः शिष्यः सब्रह्मचारिणः ॥ ६५
भार्याऽभ्यभिचारिणी यावद्यावच्च नियमे स्थिता । तावत्तस्या भवेद्द्रव्यमन्यथाऽस्या विलुप्यते ६६
विधवा यौवनस्था वा नारी भवति कर्कशा । आयुषः क्षपणार्थं तु दातव्यं जीवनं सदा
म्रियमाणोऽशनाभावात्पतितो भुवि तिष्ठति । ब्रूयाद्यः साधु जीवामि सर्वैरङ्ग इति स्मृतः
उद्धृत्य यत्रतत्रस्थं रत्नं संवर्धयेत्तु यः । कार्षापणात्स(न्स) पञ्चाशद्दत्त्वा मुच्येत दांस्यतः
अष्टाङ्गुलानि खनित्वा उद्धृत्य च मृदं ततः । एवं च मृन्मयं ग्राह्यमेध्यं त्वन्यथा भवेत्
अरण्ये वसुधा मेध्या ग्रामे मेध्या क्वचित्क्वचित् । सर्वत्र वसुधा मेध्या यत्र लोको न दृश्यते
अनूख(ष)रामसिकतामनार्द्रां स्नेहवर्जिताम् । सकङ्करां सवल्मीकां दुर्दान्तजलगामिनीम्
अनातपामनुत्कीर्णां तथा वै कृष्णवर्णिकाम् । परशौचावशिष्टां च त्यजेयुर्दश मृत्तिकाः
उदकं च तृणं भस्म द्वारः पन्थास्तथैव च । एभिरन्तरितं कृत्वा पङ्क्तिदोषो न विद्यते ७४
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहो होमः श्राद्धभुगष्ट वर्जयेत् ७५
अध्वनीनो भवेदश्वः पुनर्भोक्ता तु वायसः । कर्मकृज्जायते दासो दरिद्रत्वं प्रतिग्रहे ७६
होमं कृत्वा तु रोगी स्यात्सूकरो मैथुनी भवेत् । पाठादायुः क्षयं याति दानं निष्फलतामियात् ७७
एकोद्दिष्टं तु योऽश्नीयाद्बन्धो लेपनमेव च । विप्रस्य विदुषो देहे तावद्ब्रह्म न कीर्तयेत् ७८
एकोद्दिष्टं तु यच्छ्राद्धमदैवं तत्तु भोजयेत् । वामप्रदक्षिणं कृत्वा पिण्डमेकं तु निर्वपेत् ७९
शावाशौचे समुत्पन्ने सूत्याशौचं ततः पुनः । शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ८०

---

१ ख. ग. °णि मर° । २ घ. °लम्बनानि च । ३ क. °नादि च । स्वा° । ४ क. ख. °तरो भ्रा° । ५ क. ग. घ. °णः । अव्य° । ६ क. °युषक्षेप° । ७ ख. °सवैरन्वामिति । घ सखेरङ्ग इं° । ८ क. घ. °ल्पतितं भर्तुरङ्गं सं° । ९ क. °येत्तथा । का° । १० क. दास्मृतः । ११ घ. °तः । खनित्वा त्र्यङ्गुलान्यष्टावुद्ध° । १२ ख. °नि खानि° । १३ ख. ग. विद्यते । १४ ख. सशर्करां । १५ ख. ग. °ल्मीकामप्राह्याम। नूरब्रवीत् । अ° । १६ घ. दुर्दान्तर्जल° । १७ ख. ग. °र्णां स्वक्षरां कृ° । १८ ख. ग. श्राद्धे भुक्त्वाऽष्ट । १९ ख. ग. °नर्भुक्त्वा तु । २० ख. ग. दासः प्रतिग्राही दरिद्रताम् । हो° । २१ घ. °त्वाऽतिरो° । २२ ख. °पश्च तिष्ठति । वि° । २३ क. ख. ग. सूत्या शुध्यते शवः । म° ।

मरणं मरणेनैव सूतकं सूतकेन तु। उभयोरपि यत्पूर्वं तेनाशौचेन शुध्यति ८१
क्षत्रविट्शूद्रदायादा ये तु विप्रस्य बान्धवाः। तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते
राजन्यवैश्यौ च तथा हीनयोनिषु बन्धुषु। स्वमाशौचं प्रकुर्यातां विशुद्ध्यर्थं न संशयः ८३
दशाहाच्छुध्यते विप्रो जन्महानौ स्वयोनिषु। षड्भिस्त्रिभिरथैकेन क्षत्रविट्शूद्रयोनयः
सर्वेषामेव वर्णानां त्रिभागात्स्पर्शनं भवेत्। यथोक्तेनात्र शुद्धिः स्यात्सूतके मृतके तथा
त्रिचतुष्पञ्चदशभिः स्पृश्या वर्णाः क्रमेण तु। भोज्यान्नो दशभिर्विप्रः शेषां शुद्धिर्यथोत्तरैः ८६
दशाहं दापयेत्पिण्डं प्रत्यहं नात्र संशयः। अग्नौ हुत्वा ततो विप्रान्भोजयेदपरेऽहनि ८७
विद्युताऽभिहतानां च राज्ञा सिंहेन वा पुनः। मृते ग्राहगृहीते वा एकरात्रमशौचकम् ८८
ब्राह्मणार्थे विपन्नानां दीनानां गोग्रहेषु च। एकरात्रमशौचं स्यादिति शातातपोऽब्रवीत्
दुर्भिक्षे राष्ट्रसंपाते आगतायां तथाऽऽपदि। उपसर्गमृतानां च सद्यःशौचं विधीयते ९०
अहस्त्वदत्तकन्यासु प्रदत्तासु भवेदहम्। पक्षिणी संस्कृतस्त्रीषु स्वस्रादिषु विधीयते ९१
आचार्यं स्वमुपाध्यायं पितरं मातरं गुरुम्। निर्हृत्य तु व्रती प्रेतान्न व्रतेन वियुज्यते ९२
मातापित्रोस्तु यत्प्रोक्तं ब्रह्मचारी तु पुत्रकः। व्रतस्थोऽपि हि कुर्वीत पिण्डदानोदकक्रियाः ९३
भवेदशौचं नैतस्य न चाग्निस्तस्य लुप्यते। स्वाध्यायं च प्रकुर्वीत विधिवत्पूर्वचोदितम्
एकादश्यां त्रिपक्षे च मासे संवत्सरे तथा। अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् ९५
पितॄन्यजति यः पूर्वं देवांस्त्यक्त्वा तपोधिकः। पितरस्तस्य तच्छ्राद्धं वर्जयन्त्यशुचिं यथा ९६
माता पितामही चैव तथैव प्रपितामही। एतास्तिस्रः स्त्रियो योज्याः पितृवन्मातृकर्मणि
ब्राह्मणाः कम्बला गावः सूर्योऽग्निरतिथिर्गुरुः। तिला दर्भाश्च कालश्च दशैते कुतपाः स्मृताः ९८
दिवसस्याष्टमे भागे मन्दी भवति भास्करः। स कालः कुतपो नाम पितॄणां दत्तमक्षयम्
श्राद्धं कृत्वा परश्राद्धे यो भुङ्क्ते स दुर्बलः। पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः
यदेव दत्तं विप्रेभ्यः श्रुतं वा यदि वाऽश्रुतम्। तेनाग्नौकरणं कुर्यात्पिण्डांस्तेनैव निर्वपेत्
रात्रौ श्राद्धं न कुर्वीत राक्षसी कीर्तिता हि सा। संध्ययोरुभयोश्चैव सूर्ये चैवाचिरोदिते

---

१ क. घ. °मभावे वि°। २ घ. °जन्ये च तथा वैश्ये ही। ३ ख. ग. यानिषु। स°। ४ घ. °भागं स्पर्श°। ५ ग. °पा द्वित्रिःषडुत्त°। ६ ख. ग. वन्दीनां। ७ ख. ग. °र्गविपन्नानां स°। ८ क. °ते। पञ्चयज्ञं प्र°। ९ क. °त पूर्ववद्विदेशकृत्। ए°। १० क. ख. ग. °च्छ्राद्धे पि°। ११ घ. तथा वृद्धपि°। १२ ख. ग. °पो ज्ञेयः पि°। १३ क. घ. दत्त्वा। १४ ख. घ. °त सदु°।

सर्वस्वेनापि कर्तव्यमक्षय्यं राहुदर्शने। दानं यज्ञस्तपः श्राद्धं प्राहुर्धर्मविदो जनाः १०३
क्रतुयज्ञविवाहेषु संक्रान्तिग्रहणेषु च। सर्वदानं तदस्तीति सर्वत्रैव तदुच्यते १०४
वर्षे वर्षे तु कर्तव्या मातापित्रोस्तु सत्क्रिया। अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत्
जनन्यां संस्थितायां तु सपिण्डीकरणान्तिकम्। पैतृकं तु भवेद्गोत्रमूर्ध्वं तु पितृपैतृकम्
कृत्वा मातुः स(स्व)गोत्रेण पिण्डनिर्वपणं सुतः। कुर्यान्मातामहा(ही)नां च मातुलेन विधानवित् १०७

चतुर्थे पञ्चमे चैव नवमैकादशेऽहनि। यदन्नं दीयते जन्तोर्नैवश्राद्धं तदुच्यते १०८
सप्तमात्परतो यस्तु नवमात्पूर्वतः स्थितः। उभयोरपि मध्यस्थः कुतपः प्रोच्यते बुधैः १०९
मध्याह्ने समये क्षीणे क्षीणशेषे दिवाकरे। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति ११०
पूर्वमर्धाङ्गुलच्छायामुहूर्तं रौहिणं स्मृतम्। तस्मात्सर्वप्रयत्नेन रौहिणं तु न लङ्घयेत्
रौहिणं लङ्घयेज्ज्ञानादज्ञानाद्वा विचक्षणः। आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति
कौलोत्सवविभक्तेऽपि न कश्चित्प्रभुतां व्रजेत्। भाग एव हि कर्तव्यो न दानं न च विक्रयः
अविभज्यसगोत्राणामासहस्राद्धनादपि। *यज्ञं क्षेत्रं च पत्रं च कृत्वाऽन्नमुदकं स्त्रियः
ये जाता येऽपि चाजाता ये च गर्भे व्यवस्थिताः। वृत्तिं तेऽपि हि काङ्क्षन्ति वृत्तिदानं न सिध्यति ११५
पितृप्रसादाद्भुञ्जन्ते धनानि विविधानि च। स्थावरं न तु भुञ्जेत प्रसादे सति पैतृके ११६
स्थावरं द्विपदं चैव यद्यपि स्वयमर्जितम्। असंभूय सुतान्सर्वान्न दानं न च विक्रयः ११७

इति हारीतप्रणीतं धर्मशास्त्रं समाप्तम्॥

समाप्तेयं लघुहारीतस्मृतिः।

---

* एतदर्धस्थानेऽयं पाठो घ. पुस्तके—"ग्राह्ये क्षेत्रे च पात्रे च भुत्वाऽन्नमुदकं स्त्रियः" इति।

१ ख. ग. श्राद्धमक्षय्यं राहुदर्शने। क्रतु°। २ क. घ. ति न सर्वत्र त°। ३ ख. ग. °च्छ्राद्धे पि°। ४ क. घ. 'न्नं जाय'। ५ ख. ग. 'ति। एको विभक्तोऽविभक्तोऽपि। ६ क. °हस्रं धना°। ७ क- ग्राह्यं। ८ क. कृतान्न°। ९ ख. विद्यते। १० ग. घ. 'यमार्जि°।

ॐ तत्सद्ब्रह्मणे नमः ।

लघ्वाश्वलायनस्मृतिः ।

तत्र प्रथममाचारप्रकरणम् ।

आश्वलायनमाचार्यं नत्वाऽपृच्छन्मुनीश्वराः । द्विजधर्मान्वदास्माकं स्वर्गप्राप्तिकरान्मुने
इति तद्वचनं श्रुत्वा स धर्मान्मुनिरब्रवीत् ।*धर्मान्वः पुरतो वक्ष्ये ध्यात्वाऽहं भो मुनीश्वराः
लोकस्य च हितार्थाय ब्रह्ममार्गरतस्य च ॥ २
स्नानं संध्या जपो होमः स्वाध्यायाभ्यसनं तथा । माध्याह्निकी क्रिया पञ्चयज्ञाद्यतिथिपूजनम् ३
दानशिष्टप्रतिग्राहौ पोष्यवर्गैः सहाशनम् । सत्कथाश्रवणं सायंसंध्याहोमादिकं च हि ४
शयनं च यथाकाले धर्मपत्न्या सह गृही । ब्रह्मचारी स्वधर्मस्थो गुरुसेवापरो वसेत् ५
यजनं याजनं चैव वेदस्याध्ययनं च हि । अध्यापनं तथा दानं प्रतिग्रहमि(इ)ष्टोच्यते ६
एतानि ब्राह्मणः कुर्यात्षट्कर्माणि दिने दिने । अतः प्रातः समुत्थाय चिन्तयेदात्मनो हितम् ७
निर्गुणं निरहंकारं नारायणमनामयम् । सगुणं च श्रिया युक्तं देवं देवीं सरस्वतीम् ८
यथाविधि ततः कुर्यादुत्सर्गं मलमूत्रयोः । ब्रह्मचारी गृहस्थश्च शौचमद्भिर्मृदाऽऽचरेत् ९
एका लिङ्गे करे तिस्रः करयोर्मृद्द्वयं गुदे । पञ्च वामे दश प्रोक्ताः करे सप्ताथ हस्तयोः १०
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतेश्चैव चतुर्गुणम् ११
स्वपादं पाणिना विप्रो वामेन क्षालयेत्सदा । शौचे दक्षिणपादं तु पश्चात्सव्यकरावुभौ
शौचं विना सदाऽन्यत्र सव्यं प्रक्षाल्य दक्षिणम् । एवमेवाऽऽत्मनः पादौ परस्याऽऽदौ तु दक्षिणम् १३
गण्डूषैः शोधयेदास्यमाच(चा)मेद्दन्तधावनम् । काष्ठैः पर्णैस्तृणैर्वाऽपि केचित्पर्णैः सदा तृणैः १४
नवमी द्वादशी नन्दा पर्व चार्कमुपोषणम् । श्राद्धाहं च परित्यज्य दन्तधावनमाचरेत् १५
आचम्याथ द्विजः स्नायान्नद्यां वा देवनिर्मिते । तीर्थे सरोवरे चैव कूपे वा द्विजनिर्मिते
त्रिराप्लुत्य समाचम्य शिखाबन्धं समाचरेत् । प्राणानायम्य संकल्प्य त्रिवारं मज्जयेत्पुनः ।
आचम्य वारुणं जाप्यं जपेत्सूक्तं च मार्जनम् । कुर्यादापो हि सूक्तेन ऋतमित्यघमर्षणम्

---

* एतदर्धं न विद्यते क. पुस्तके ।

---

१ ख. दानं शिष्टप्रतिग्राहोपो° ।

मार्जयेदथ चाङ्गानि गायत्र्या चाभिमन्त्रितम् । मस्तके च मुखे बाहोर्हृदये पृष्ठदेशके १९
ब्रह्मादयश्च ये देवाः कृष्णद्वैपायनादयः । सोम इत्यादयः प्रोक्ताः पितरो जलतर्पणे २०
यन्मया दूषितं तोयं शारीरमलसंभवम् । तस्य पापस्य शुद्ध्यर्थं यक्ष्माणं तर्पयाम्यहम् २१
स विप्रः स शुचिः स्नातो ह्यस्पर्शस्पर्शनं विना । कालत्रयेऽपि कर्मार्हः स्वाध्यायनिरतोऽपि च २२
अशक्तश्चेज्जलस्नाने मन्त्रस्नानं समाचरेत् । आपोहिष्ठादिभिर्मन्त्रैस्त्रिभिश्चानुक्रमेण तु २३
गच्छः पादशिरोहृत्सु शिरोहृत्पत्सु चार्धतः । हृत्पादमस्तकेष्वेवं प्रत्यृचा मार्जयेदथ २४
मस्तके मार्जनं कुर्यात्पादैः प्रणवसंयुतैः । बाह्यशुद्धिरनेन स्यादन्तःशुद्धिरथोच्यते २५
प्रणवेन पिबेत्तोयं गायत्र्या चाभिमन्त्रितम् । सद्यस्तेन भवेच्छुद्धः स्नातोऽपि हि सरित्सु च २६
समाहितमना भूत्वा ब्राह्मणः सर्वदाऽपि हि । स्मरेन्नारायणं शुद्धो धारयेदम्बरं शुचि २७
परिधाने सितं शस्तं वासः प्रावरणे तथा । पट्टकूलं तथा लाभे ब्राह्मणस्य विधीयते २८
प्राविकं त्रसरं चैव परिधाने परित्यजेत् । शस्तं प्रावरणे प्रोक्तं स्पर्शदोषो न हि द्वयोः २९
भोजनं च मलोत्सर्गं कुर्वते त्रसरावृतः । प्रक्षाल्य त्रसरं शुद्धं दुकूलं च सदा शुचि ३०
आवृत्य परिधायाथ प्राङ्मासीनः समाचरेत् । कुशपाणिर्द्विराचान्तस्तीरे सलिलसंनिधौ
प्रणवेन द्विराचामेद्दक्षिणेन तु पाणिना । उभौ हस्तौ च गल्लौ द्वावोष्ठौ पाणिद्वयं स्पृशेत् ३२
*पादद्वयं शिरश्चाऽऽस्यं नासारन्ध्रे च चक्षुषि(षी) । श्रोत्रे नाभिं च हृदेशं शिरश्चांसौ स्पृशेत्क्रमात् ३३
प्राणानायम्य संकल्प्य ततः संध्यामुपास्महे(सयेत्) ॥ ३४
आप इत्यादिभिः पादैर्नवभिर्मार्जनं चरेत् । जलं यस्य क्षयायेति प्रक्षिपेत महीतले ३५
आपो जनयथानेन स्वशिरः परिषेचयेत् । सूर्यश्चेत्यनुवाकेन प्रातःकाले पिबेदपः ३६
आपः पुनन्तु मध्याह्ने सायमग्निश्च मन्त्रतः । आद्यमन्त्राथ पुनश्चाप इत्येभिर्नवभिः क्रमात्
[1]गन्ते मार्जनं कुर्याद्विधिनाऽनेन बह्वृचः । ऋतं चेत्यभिमन्त्र्यापः समाघ्राय क्षिपेदधः
ऋतं चेति त्र्यृचं वाऽपि जप्त्वा तदनवेक्षितः । समाचम्य ततस्तिष्ठेदिशश्चाभिमुखो रवेः
नलमञ्जलिनाऽऽदाय गायत्र्या चाभिमन्त्रयेत् । दद्यादर्घत्रयं तिष्ठंस्त्रिषु कालेषु बह्वृचः
प्रातर्मध्याह्नयोरप्सु क्षिपेत्सायं महीतले । मध्याह्ने तु विशेषोऽयं प्रदद्याद्धंस इत्यृचा ४१
आकृष्णेन द्वितीयार्घ्यं गायत्र्या च तृतीयकम् । उपतिष्ठन्समाचम्य तिष्ठेदभिमुखो रवेः

---

* नेतदर्धं क. पुस्तके ।

---

१ ख. °युतः । बा° । २ ख. °वेनापि° । ३ क. अनेन ।

उदुत्यं चित्रमित्येतज्जपेत्सूक्तद्वयं च हि । तुष्टस्तेन भवेत्सूर्यः स आत्मा जगतो हि वै ४३
तेनैव सूक्तजाप्येन हरेरर्चनकृद्भवेत् । आच(चा)मेदुपविश्याथ प्राणायामत्रयं चरेत् ४४
ध्यात्वा देवीं कुमारीं च तत्तत्कालानुरूपिणीम् । जपेत्प्रणवपूर्वाभिर्व्याहृतीभिः सहैव तु ४५
तिसृभिर्भूःप्रभृतिभिर्गायत्रीं ब्रह्मरूपिणीम् । ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ४६
कालत्रयेऽप्यशक्तश्चेदष्टाविंशतिमेव वा । ततः कुर्यादुपस्थानं जातवेदस इत्यृचा ४७
तच्छंयोरनुवाकेन शान्त्यर्थं जप ईरितः । प्रागादिं च दिशं नत्वा मन्त्रस्थाश्चैव देवताः ४८
स्तुत्वा नत्वा ततः संध्यां सा मां संध्याऽभिरक्षतु । ब्रह्माणं हरिमीशानं तत्तच्छक्तिं क्रमेण तु ४९
नत्वा स्वयमथाऽऽत्मानं(मुक्त) गोत्रोऽहमभिवादयेत् । अग्नेरुद्धरणं कुर्यात्पूर्वमेवोदयाद्रवेः
आदित्यमुदितं पश्येन्नत्वा होमान्तिकं व्रजेत् । आदित्येऽभ्युदिते चैव प्रातर्होमो विधीयते
आहिताग्निस्तथैकाग्निः स्वस्वोक्तविधिना तथा । ध्यात्वा समिध्य चाभ्यर्च्य स्वस्थानस्थं हुताशनम् ५२
संस्कुर्यात्साग्निना हौम्यं पयआदि कुशेन च । मन्त्रेणानेन सूर्याय स्वाहेति जुहुयादथ ५३
द्वितीयामाहुतिं तद्वत्प्रजापतिपदं स्मरेत् । स्वाहान्तां चाऽऽहुतिं हुत्वा तथेदं न ममोच्चरेत्
सर्वत्रैवाग्निहोमोऽयं विधिः सकृदुदाहृतः ॥ ५४
उक्त्वेदं परिषिञ्चामि तमग्निं परिषेचयेत् । जलेनैवाऽऽज्यहोमे तु यत्र चैतदुदीरितम् ५५
सूर्यो न इति सूक्तेन कुर्यात्प्रातरुपासनम् । उपासनं च सूर्यस्य प्रजापतिरतः परम् ५६
अग्ने त्वं चाग्न आयूंषि सायमग्नेरुपासनम् । कुर्यात्तिष्ठन्नुपस्थानं पूर्ववच्च प्रजापतेः ५७
प्रातः सायं जपेन्मन्त्रमों च मे स्वर इत्यथ । अभिवाद्य जपेद्देवीं विभूतिं चैव धारयेत् ५८
विभूतिधारणे मा नस्तोकेऽयं मन्त्र उच्यते । बृहत्सामेति वा होमे नैत्यके च महामखे ५९
कर्मकाले तु सर्वत्र स्मरेद्विष्णुं हविर्भुजम् । तेन स्यात्कर्म संपूर्णं तस्मै सर्वं निवेदयेत् ६०
अग्निसंरक्षणे शक्तिर्यस्य चैव न वर्तते । तदाऽरण्यामजस्राग्निं स्थापयेद्विधिपूर्वकम् ६१
समित्प्रतपनेऽयं ते योनिर्मन्त्र उदीरितः । या ते अग्ने भवेन्मन्त्रः पाण्यारोपे स्मृतो बुधैः
होमकालः प्रपद्येत पुनश्चैवं विधीयते । मन्त्रेणान्वाहिते वह्नावजस्राग्निं क्षिपेदथ ६३
उपस्थानादिकं चैव सर्वं पूर्ववदाचरेत् ॥ ६४
कालद्वये यदा होमं द्विजः कर्तुं न शक्यते । सायमाज्याहुतिं चैव जुहुयात्प्रातराहुतिम्
सायंकाले समस्तं स्यादाज्याहुतिचतुष्टयम् । हुत्वा कुर्यादुपस्थानं समंस्येत्यग्निसूर्ययोः

---

१ ख. 'योमित्यनु' । २ ख. मा । ३ ख. 'थैवाग्निः । ४ ख. होम्यं । ५ ख. 'हान्ते चा' । ६ ख. उपस्थान । ७ ख. 'मस्तेत्य°' ।

होमश्चेत्पुरतः काले प्राप्तः स्यात्काल उत्तरः । हुत्वा व्याहृतिभिश्चाऽऽज्यं कुर्याद्धोम-
द्वयं च हि ६७
[+विच्छिन्नवह्निसंधानमपराह्णे विधीयते । सायमौपासनं कुर्यादस्तादुपरि भास्वतः]
नैव गच्छेद्विना भार्यां सीमामुल्लङ्घ्य योऽग्निमान् । यत्र तिष्ठति वै भार्या तत्र होमो
विधीयते ६९
गत्वा भार्यां विना होमं सीमामुल्लङ्घ्य यो द्विजः । कुरुते तत्र चेन्मोहाद्धुतं तस्य हुता
भवेत् ७०
यथा जातोऽग्निमान्विप्रस्तन्निवासालये सदा । तस्या एवानुचारेण होमस्तत्र विधीयते
धर्मानुचारिणी भार्या सवर्णा यत्र तिष्ठति । कुर्यात्तत्राग्निहोत्रादि प्रवदन्ति महर्षयः ७२
ततश्चैवाभ्यसेद्वेदं शिष्यानध्यापयेदथ । पोष्यवर्गार्थमन्नादि याचयेत यथोचितम् ७३
माता पिता गुरुर्भार्या पुत्रः शिष्यस्तथैव च । अभ्याश्रितोऽतिथिश्चैव पोष्यवर्ग इति
स्मृतः ७४
मध्याह्ने च पुनः स्नायाद्धौतशुक्लाम्बरावृतः । श्रुत्युक्तविधिनाऽऽचम्य प्राङ्मासीनः
कुशासने ७५
गायत्र्याऽपश्यतसृणां पादे व्याहृतयः स्मृताः । सप्त मन्त्रशिरोमन्त्राः षड्भिराचमनं
स्मृतम्(?) ७६
गायत्र्याश्च पिबेत्पादैरापो हि नवभिः स्पृशेत् । व्याहृतिभिः शिरोमन्त्रैरङ्गानि ब्रह्मयज्ञके
पाणिगण्डूषकावोष्ठौ पाणिपादौ शिरोमुखम् । +नासाबिलेऽक्षिणी श्रोत्रे नाभिहृन्मस्त-
केंऽसकौ ७८
आद्यन्तौ प्रणवौ मन्त्रौ पुरतः पृष्ठतो द्युभौ । ब्रह्मको मध्यतो मन्त्रो गायत्र्या शिरसः स्मृतः
कम्बले वाऽजिने पीठे कुशासनविनासने । न कुर्यादुपविष्टो वै ब्रह्मयज्ञं द्विजार्चनम् ८०
न कुर्यात्तर्पणं श्राद्धं धृत्वा भालेऽनुलेपनम् । कदाचित्कुरुते मोहान्नरकं प्रतिपद्यते ८१
दक्षिणं चोपविश्योरुं वामगुल्फोपरि न्यसेत् । वामोरौ दक्षिणं गुल्फं तच्चोपस्थमुदीरितम्
प्राणानायम्य संकल्प्य कुशपाणिधरः करम् । कृत्वा तु सव्यमुत्तानं न्यसेदुपरि दक्षिणम्
सव्यस्य पाणेरङ्गुष्ठप्रदेशिन्योस्तु मध्यतः । दक्षिणस्याङ्गुलीर्न्यस्य चतस्रोऽङ्गुष्ठवर्जिताः
तथा सव्यकराङ्गुष्ठं दक्षिणाङ्गुष्ठवेष्टितम् । संबद्धमेवं कुर्वीत न्यसेदक्षिणसक्थनि ८५
प्रागग्रे द्वे पवित्रे तु धृत्वाऽन्तःसंपुटौ करौ । संन्यसेदक्षिणे जानौ ब्रह्मयज्ञं समाचरेत् ८६
ॐपूर्वा व्याहृतीस्तिस्रः स्वरतः सकृदुच्चरेत् । गायत्रीमुच्चरेत्सम्यक्पादमर्धमृचं क्रमात्

+ एताच्चह्नान्तर्गतं वचनं न विद्यते क पुस्तके । * अत्र संधिरार्षः ।

१ ख. 'ऱ्या च पिबेदापो(चाप) आपो हीन° । २ क. पाणी ग°। ३ ख. °षके चौष्ठौ । ४ क. °ले तु ले'।

ऋषिदैवतच्छन्दांसि प्रणवं ब्रह्मयज्ञके । मन्त्रादौ नोच्चरेच्छ्राद्धे यागकालेऽपि चैव हि ८८
अग्निमीळ इषेत्यादि वेदांश्चैव स्वशक्तितः । अध्यायमनुवाकं वा पठेत्सूक्तमृचं च वा ८९
उपवीतं यथा यस्मिन्धत्ते कर्मणि वैदिके । ब्रह्मचारी गृहस्थश्च तद्वद्वासोऽपि धारयेत् ९०
सव्यांसे च स्थिते सूत्रे तत्सव्यं चाथ दक्षिणे । अपसव्यं भवेत्कण्ठे लम्बे सूत्रे निवीतकम्
न्यञ्जानु दक्षिणं कृत्वा देवान्संतर्पयेदृषीन् । तद्वज्जानुद्वयं चाथ जानूर्ध्वं दक्षिणं पितॄन्
सव्येन तर्पयेद्देवानृषींश्चैव निवीतिना । पितॄंश्चैवापसव्येन विधिरेष उदाहृतः ९३
तर्पयेद्विधिनाऽनेन देवांश्चैवाङ्गुलाग्रतः । ऋषींश्च वामभागेन पितॄन्दक्षिणभागतः ९४
एकैकं चाथ द्वौ द्वौ वै त्रींस्त्रीनेकैकमञ्जलीन् । अर्हन्त्येते क्रमाश्चै(चै)व देवर्षिपितरस्त्रयः ९५
प्रत्यञ्जलि समुच्चार्य मन्त्रं दद्यादथाञ्जलिम् । देवर्षिपितृनामानि प्रोक्ता मन्त्रा महर्षिभिः
पित्रादयस्त्रयश्चाऽऽदौ तिस्रो मात्रादयस्ततः । सापत्नजननी मातामहादयस्त्रयस्तथा
मातामह्यादयस्तिस्रः स्त्रीसुतभ्रातरस्तथा । पितृव्यो मातुलश्चैव दुहिता भगिनी तथा ९८
दौहित्रो भागिनेयश्च पितुर्मातुश्च वै स्वसा । श्वशुरो गुरवश्चैव मित्रं चैवेति केचन ९९
पुत्रादयः सपत्नीकाः स्त्रियश्चैवाह(थ) केवलाः । तर्पणेऽभिहितास्तीर्थे गयायां च महालये
उक्त्वा पित्रादिसंबन्धं नामगोत्रं स्वधानमः । बह्वृचस्तु क्रमेणैव तर्पयामीति तर्पयेत्
संबन्धं नामगोत्रं च स्वधामुच्चारयेत्ततः । श्राद्धेऽपि विधिरेष स्यादाश्वलायनशाखिनाम्
सव्यहस्तानुलग्नेन दक्षिणेन तु पाणिना । कुर्याद्बह्वृच एवं तु देवर्षिपितृतर्पणम् १०३
बह्वृचस्तर्पणं कुर्याज्जले वाऽप्यथ बर्हिषि । तर्पयेद्देवतादींश्च बर्हिष्येव तु याजुषः १०४
स्मृत्युक्तविधिनाऽऽचम्य ब्रह्मयज्ञं समाचरेत् । संतर्प्य देवतादींश्च बह्वृचस्तत आचमेत्
मध्याह्ने ब्रह्मयज्ञो वै नानुबन्धवशाद्भवेत् । प्रातरौपासनादूर्ध्वं कुर्यादस्तमयावधि १०६
नैत्यकं तर्पणं कुर्याद्ब्रह्मयज्ञपुरःसरम् । तच्चैव देवतादीनां यदा वा स्नानपूर्वकम् १०७
स्नानं वारुणिकं चैव क्वचित्कर्तुं न शक्यते । तत्राऽऽदौ ब्रह्मयज्ञार्थं मन्त्रस्नानं विधीयते
पुण्यकालनिमित्तं यत्तर्पणं क्रियते यदि । पितॄणां केवलं तद्धि प्रवदन्ति महर्षयः १०९
निमित्तं चोपरागादे रात्रावपि तथैव च । तीर्थान्तरेऽपि तद्वत्स्यादेकाहेऽप्यसकृद्भवेत्
नैत्यकं तर्पणं कुर्यादहन्येव तु बह्वृचः । तर्पणं च तथा सौरं नैव रात्रौ कदाचन १११
श्राद्धाङ्गं तर्पणं यामे प्रथमे मधुवद्भवेत् । पयो नीरं च रुधिरं क्रमाद्यामेषु च त्रिषु ११२
न कुर्याद्ब्रह्मयज्ञं च श्राद्धात्पूर्वं मृतेऽहनि । पित्रोः श्राद्धं विधायाथ वैश्वदेवं च तर्पणम्
ब्रह्मयज्ञं च वै कुर्यात्संध्यां मध्यंदिनस्य च । उपस्थानं च सूर्यस्य पूर्वोक्तमिह तद्भवेत्

---

१ ख. 'णे विहि' ।

कृत्वाऽऽदौ तर्पणं संध्यां कुर्याद्बह्वृच एव हि । आवर्तने परे संध्यां कृत्वा कुर्याच्च तर्पणम्
शुद्ध्यर्थं चाऽऽत्मनोऽन्नस्य वैश्वदेवं समाचरेत् । सिद्धान्नेन च गृह्याग्नावन्यस्मिन्नलेऽ-
पि च ११६

एकपाकाशिनः पुत्राः संसृष्टा भ्रातरोऽपि च । वैश्वदेवं न ते कुर्युरेकं कुर्यात्पितैव हि
वैश्वदेवं क्वचित्कर्तुं न शक्नोति पितैव हि । पितुरेवाऽऽज्ञया कुर्यात्पुत्रो भ्राता परोऽपि हि
एकान्नाशिषु पुत्रेषु भ्रातृष्वेकत्र सत्सु च । तत्रैको वैश्वदेवः स्याद्बह्वृचानामयं विधिः
पुत्रः स्वार्जितमेकाशी स्याच्चेत्पितरि जीवति । वैश्वदेवं पृथक्कुर्याद्यत्र कुत्रापि वा वसन्
वैश्वदेवं द्विजः कुर्यात्सदा कालद्वयेऽपि च । आरम्भो वैश्वदेवस्य दिवा चैव विधीयते
अलंकृत्यानलं चान्नमधिश्रित्यानले चरेत् । सिद्धमादाय सूर्याय घृताक्तं जुहुयाद्धविः
प्रजापतय इत्युक्त्वा सोमायेत्यादितः क्रमात् । हुत्वा दशाऽऽहुतीः सायंकाले चाग्नय
आदितः १२३

परिषिच्यानलं चैव जुहुयाद्व्याहृतीरथ । एताभ्यो देवताभ्योऽग्नेः पृथग्दद्याद्बलिं भुवि
प्राक्संस्थानन्तरालं स्यादद्य इत्यादितः क्रमात् । एता देयास्तथैव स्युः सूत्रोक्ता देवता
इह १२५

प्रागादिष्वाहुती द्वे द्वे इन्द्रायेत्यादितः क्रमात् । प्राक्संस्थे वाऽप्युदक्संस्थे चतुर्दिक्षु
यथाक्रमम् १२६

अग्रभागेऽन्तरालस्य दक्षिणे मूल उत्तरे । दिग्देवताहुतीनां च समायतनं स्मृतम् १२७
ब्रह्मादयोऽन्तरालस्य मध्ये शिष्टाश्च देवताः । प्राक्संस्थाश्चापि वै ताः स्यू रक्षोभ्य इति
चोत्तरे १२८

स्वधा पितृभ्य इत्यन्नं दद्यान्मन्त्रेण भूतले । दक्षिणे चापसव्यं च पितृभ्योऽथ स्वधा नमः
वैवस्वतकुलोत्पन्नौ महावीरौ सुरोत्तमौ । शुनौ द्वौ शा(श्या)मशबलौ पितृभागार्थिनौ सदा
ताभ्यां चापि बलिं दद्याद्याम्ये चोदक्पृथक्पृथक् । सव्येनानेन मन्त्रेण शा(श्या)माय
शबलाय च १३१

हविश्च जुहुयादग्नावुद्देशत्यागपूर्वकम् । स्वाहान्ते चैव सर्वत्र होमकर्मणि चात्र तु १३२
स्वाहा स्याद्भूतयज्ञेऽपि पितृयज्ञे स्वधा स्मृता । यज्ञे मानुषके चैव हन्तकारो विधीयते
अतो मनुष्ययज्ञार्थं दद्याद्विप्राय वाऽनले । सनकादिभ्य इत्युक्त्वा हन्तकारेण वै हविः
कृत्वा मनुष्ययज्ञान्तमुपस्थायों च मे स्वरः । हविर्भुजं नमस्कृत्य गोत्रनामपुरःसरम् १३५
जप्त्वा चैव तु गायत्रीं धारयेद्धोमभस्म च । स्मृत्वा यज्ञपतिं देवं हुतं तस्मै निवेदयेत् १३६
एवं चापि दिवा कृत्वा सायं चापि तथैव हि । दिवाचारिभ्य इत्यत्र नक्तंचारिभ्य इष्यते
उक्तं कर्म यथाकाले यदि कर्तुं न शक्यते । अकाले वाऽपि तत्कुर्यादुल्लङ्घ्य वाऽपकृष्य च

वैश्वदेवे तथा ब्रह्मयज्ञे चैव(ष) विधिः स्मृतः । संध्ययोरुभयोश्चैव वाऽपकर्षणमिष्यते
देवादिपितृयज्ञान्तं सायं चापि यथाक्रमम्। भूतेभ्योऽपि बलिं रात्रौ दद्यात्पात्रेण वै भुवि
द्वारादिदेवताभ्योऽन्नं दद्यात्पितामहादितः । हुतशेषं च भूतेभ्यो ये भूता इति मन्त्रतः
प्रक्षाल्य पाणिपादं च समाचम्य यथाविधि। शान्ता पृथिवीति मन्त्रेण गृहं संप्रोक्षयेज्जलैः
कुर्यात्पञ्च महायज्ञान्नित्यशः सूतकं विना। अर्घ्यान्ता सूतके संध्या स्नानं स्यादपि किंचन
वैश्वदेवं पुरा कृत्वा नित्ये चाभ्युदये तथा । स्वाभीष्टदेवतादिभ्यो नैवेद्यं विनिवेदयेत्
अकृत्वा देवयज्ञं च नैवेद्यं यो निवेदयेत्। तदन्नं नैव गृह्णन्ति देवताश्चापि सर्वथा १४५
पादप्रक्षालनं कुर्याद्विप्राणां देवरूपिणाम् । स्वयं चापि समाचम्य विप्रांस्तानुपवेशयेत्
मधुपर्कं विना रात्रौ द्विजपादाभिषेचनम्। न कुर्यात्पूजयेद्विप्रान्गन्धपुष्पाक्षतादिभिः
ततो विप्रान्समभ्यर्च्य यथाविभवसारतः । दद्याद(देयम)न्नं यथाशक्ति भिक्षाऽति-
थिभ्य एव च १४८
अन्नमामं च वै भिक्षां दद्यादहरहर्द्विजः।स सर्वत्र(वि)द्रुतः पाकादन्नाद्य(द)पि च यद्भवेत्
नित्यं ददाति यः साधुरन्नं वेदविदो मुखे । मुक्तः स्याद्दुरितात्पापाद्ब्रह्मसायुज्यमश्नुते
परान्नत्यागिनामेव दद्यादामं विशेषतः। अन्नादशगुणं पुण्यं लभेद्दाता न संशयः १५१
भिक्षां ददाति विप्राय यतये ब्रह्मचारिणे । स सर्वाल्लँभते कामांस्ततो याति परां गतिम्
दत्तं नैव पुनर्दद्यादपक्वं पक्वमेव वा। पुनश्च दीयते मोहान्नरकं प्रतिपद्यते १५३
पोष्यवर्गसमोपेतो भुञ्जीयात्सह बन्धुभिः । भोजने परिविष्टान्नं गायत्र्या चाभिमन्त्रयेत्
सत्यं त्वर्तेन मन्त्रेण जलेन परिषेचयेत्। ततो बलित्रयं कुर्यान्मन्त्रेणापः पिबेदथ १५५
यमायाथ च चित्राय भूतेभ्यो नम उच्चरेत् । दत्त्वाऽमृतोपस्तरणमसीत्युक्त्वा पिबेदपः
गृह्णीयादाहुतीः पञ्च सपवित्रेण पाणिना । त्यक्त्वा पवित्रमश्नीयाद्धृत्वा तत्पुनराचमेत्
पुत्रवान्पितृमांश्चैव भुक्त्वा श्राद्धीयभोजनम्। न कुर्याद्भोजने मौनं पञ्च प्राणाहुतीर्विना
पङ्क्तिभेदेन यो भुङ्क्ते ग्रासमात्रमपि द्विजः। अघं स केवलं भुङ्क्ते हतश्रीर्जायते ध्रुवम् १५९
उत्तराचमनं पीत्वा मुखं प्रक्षालयेच्छुचिः । भुञ्जीतैभ्यस्ततो दद्यात्ताम्बूलं मुखशुद्धये
भुक्त्वा चैव स्वयं विप्रः कुर्यात्ताम्बूलचर्वणम्। ततो नयेदहःशेषं श्रुत्यादिश्रवणादिभिः
स्पृशेदुच्छिष्टमुच्छिष्टः श्वानं शूद्रमथापि च । उपोष्य रजनीमेकां पञ्चगव्यं पिबेच्छुचिः
श्वानं शूद्रं तथोच्छिष्टमनुच्छिष्टो न संस्पृशेत् । मोहाद्विप्रः स्पृशेद्यस्तु स्नानं तस्य विधी-
यते १६३
उच्छिष्टस्पर्शने स्नायाद्ब्राह्मणो विधिवर्जितम्। ब्रह्मविद्भोजनोच्छिष्टपात्रचालं विनैव तु

---

१ ख. °र्वबहुतः। २ ख. °विद्भावनोच्छिष्टं पात्रचालं व्यपोहतु।

विप्रश्चैव स्वयं कुर्याद्द्विजभुक्तपात्रचालनम् । प्रक्षाल्य पाणिपादं च द्विराचान्तः शुचिर्भवेत्
पात्राणि चालयेच्छ्राद्धे स्वयं शिष्योऽथ वा सुतः । असंस्कृतो न च स्त्री च न चान्यश्चाल-
येत्क्वचित् १६६
परपाकरुचिर्न स्यादनिन्द्यामन्त्रणादृते । कदाचित्स्यादापदि तु नैव नित्यं कदाचन
उच्छिष्टस्पर्शने चैव भुञ्जानश्च भवेद्यदि । पात्रस्थं चापि[1] वाऽश्नीयादन्नं पात्रस्थितं च यत्
गायत्र्या संस्कृतं चान्नं न त्यजेदभिमन्त्रितम् । गृहीतं चेत्पुनश्चाद्याद्गायत्रीं च शतं जपेत्
अन्नं पर्युषितं भोज्यं स्नेहाक्तं चिरसंचितम् । अस्नेहा अपि गोधूमा यवगोरसविक्रियाः
अपूपसक्तवो धानास्तक्रं दधि घृतं मधु । एतत्पण्येषु भोक्तव्यं भाण्डलेपो न चेद्भवेत्
अन्नाक्तभाजनस्थानि दुष्यन्ते तानि चैव हि । शुद्धभाण्डस्थितानीह ग्राह्याण्याहुर्मनी-
षिणः १७२
ग्राह्यं क्षा(क्षी)रविकारं स्यात्सर्वं चैवेक्षुसंभवम् । तैलक्षीराज्यपक्वं च जलसंमिश्रितं न हि
परान्नं नैव भुञ्जीयात्स्वकीयं चान्यपाचितम् । संस्काररहितं चैव नाश्नीयाद्ब्राह्मणः
क्वचित् १७४
ब्राह्मणो नैव भुञ्जीयाद्धविरन्नं कदाचन । अज्ञानाद्यदि भुञ्जीत रौरवं नरकं व्रजेत् १७५
पत्नी स्नुषा स्वयं पुत्रः शिष्योऽथ वा गुरुः सुतः । आचार्यो वा पचेदन्नं भुञ्जीयात्तन्न
दुष्यति १७६
शाकपाकादिकं निन्द्यं योऽन्नमद्यात्स्वकीयकम् । क्वचिच्छिष्टान्नमश्नीयाद्वत्सराभ्यन्तरे
द्विजः १७७
यद्येकत्र पचेदाममात्मनश्चापरस्य च । यस्तदन्नं द्विजो भुङ्क्ते प्राजापत्येन शुध्यति १७८
न चैकत्र पचेदामं बहूनामथ वा द्वयोः । निषेधोऽयं परेषां तु पुत्रादीनां न हि क्वचित् १७९
एवं भुक्त्वा द्विजश्चैव श्रुत्वा श्राद्धस्य वै कथाम् । श्रुतिस्मृतिपुराणोक्तमितिहासं पुरातनम्
घटिकैकाऽवशिष्टा स्याद्रवेरस्तमितस्य च । प्रक्षाल्य पाणिपादं च द्विराचान्तः शुचिर्भवेत्
प्राङासीनः समाचम्य प्राणायामपुरःसरम् । पूर्वोक्तविधिना चैव सायंसंध्यां समाचरेत्
आदित्येऽस्तमिते यावत्तारकादर्शनं न हि । सायंहोमं तदा कुर्यान्नो चेत्स्युर्नव नाडिकाः
वैश्वदेवं पुनः सायं कुर्याद्यज्ञत्रयं च हि । दैवं भूतं तथा पै(पि)त्र्यं भुक्त्वा स्वाध्यायम-
भ्यसेत् १८४
ततः स्वपेद्यथाकामं न कदाचिदुदक्शिराः[2] । एतावन्नैत्यकं कर्म प्रवदन्ति मनीषिणः १८५
अनेन विधिना यस्तु नैत्यकं कुरुते द्विजः । स याति परमं स्थानं पुनरावृत्तिदुर्लभम् १८६

---

१ ख. °पि नाश्नी° । २ ख. °किशरः । ए° ।

प्रत्यहं कर्मको(णो) योगः स्वाध्यायाभ्यसनं तथा । मनःस्वस्थतया योगः स एवाऽऽत्म-
प्रकाशकः* १८७

त्यक्त्वेन्द्रियसुखं लोके यस्तिष्ठेद्यत्रकुत्रचित् । स एव योगी मुक्तः स्यात्सर्वसङ्गविवर्जितः
यः कचिन्मानवो लोके वाराणस्यां त्यजेद्वपुः । स चाप्येको भवेन्मुक्तो नान्यथा मुनयो
विदुः १८९

इत्याश्वलायनधर्मशास्त्रे ब्रह्ममार्गाचाराध्यायः (१प्रकरणम्) ॥ १ ॥

(अथ स्थालीपाकप्रकरणम् २)

स्थालीपाकस्य चाऽऽरम्भः पौर्णमास्यां विधीयते । अग्निमान्प्रतिपद्येव प्रातरौपासनं
चरेत् १

प्रातरौपासनं हुत्वा ततोऽन्वाधानमाचरेत्।स्थालीपाकं करिष्येऽहं होमः श्वः प्रातरेव हि
सद्यस्कालो भवेद्यद्वा कुर्याद्यत्र द्वयं न हि । अन्वाधानं ततः कुर्यात्स्थालीपाकं तथैव हि ३

प्राणानायम्य संकल्प्य विधाय स्थण्डिलं शुचिः । हस्तमात्रं चतुष्कोणं गोमयेन विलिप्य
च ४

तण्डुलान्प्रकिरेद्रेखामुदक्संस्थां लिखेदथ । प्राक्संस्थे पार्श्वयोर्मध्ये तिस्रश्चैवोदगायताः
निदध्याच्छकलं तत्र प्रोक्ष्य प्राग्रं निरस्य च । संप्रोक्ष्य पुनरद्भिश्च तथा चानलमानयेत् ६

एहीत्याग्निं समादाय स्थापयेद्भूर्भुवःस्वरोम्। अग्निनाऽग्निस्ततो जुष्टः प्रनूनं तिस्र एव च ७

ध्यानं चत्वारि शृङ्गेति कुर्यादग्नेर्यथाविधि । विज्योतिषेत्यनेनैव मन्त्रेणाग्निं समिन्धयेत् ८

ध्यात्वा रूपं ततो वह्नेर्दर्शयेदेष हीत्यथ । धृत्वा तु समिधौ चाग्निमग्नीषोमौ च देवते ९

प्रधानदेवते चोक्त्वा तथा चैवाङ्गदेवताः । क्रमेण चरुणाऽऽज्येन सद्यो यक्ष्य इति क्षिपेत्
पर्यूहनं ततः कुर्याज्जलेन परिषेचयेत् । अनादेशे तु सर्वत्र दक्षिणः पाणिरुच्यते ११

पाणिना सोदकेनाग्नेः समन्तात्परिमार्जनम् । अनुलेपमुदक्संस्थं कुर्यादीशानकोणतः
पर्युक्षणेऽप्युदक्संस्थं पाणिनेशानकोणतः । पुनरावर्तयेत्प्रत्यगीशानान्तं हविर्भुजम् १३

प्रसारयेदुदक्संस्थान्पूर्वपश्चिमयोः कुशान् । दक्षिणोत्तरतश्चैव प्राक्संस्थान्पूर्वतः क्रमात्
मुष्टिमात्रैः कुशैरग्नेः समन्ताद्धोमकर्मसु । परिस्तृणीयात्प्रागग्रैश्चतुर्दिक्षु यथाक्रमम् १५

विन्यसेत्कुशमूलानां कुशाग्रानुपरि क्रमात् । दक्षिणोत्तरयोश्चैव चतुष्कोणेषु चैव हि १६

---

* इतः परं ख. पुस्तकेऽधिकमेतत्—"प्रत्यहं कर्मयोगेन स्वाध्यायाभ्यसनं तपः । मनःस्वास्थ्यं तथो-
र्योगः स एवाऽऽत्मप्रकाशकः" इति ।

---

१ ख. 'क्संस्थं पा' ।

आस्तीर्याग्नेरुदग्दर्भान्प्रागग्रान्रत्निसंमितान्। द्वंद्वमासादयेन्युग्मं यज्ञपात्राणि तत्र तु
स्थाली च प्रोक्षणी दर्वी स्रुवः पूर्णाज्यभाजने। इध्मं चैव तथा बर्हि चरुहोमे विधीयते
चौलोपनयनोद्वाहे पुनराधान एव च। प्रोक्षणीं स्रुवपूर्णाज्यमिध्मबर्हिस्रुवाज्यके १९
अष्टाङ्गुलमितस्थालीं प्रोक्षणीं च षडङ्गुलाम्। चमसं चाऽऽज्यपात्रं च षडङ्गुलमिति
स्मृतम् २०
स्रुक्स्रुवौ हस्तमात्रौ तु स्यातां तौ यज्ञकर्मणि। द्विप्रादेशो भवेदिध्मो बर्हिः प्रादेशसंमितः
आदायाऽऽदौ कुशांस्त्रींस्त्रीन्मूलैर्मूलानि वेष्टयेत्। सव्यावृत्तान्कुशान्कुर्यादधस्तात्तान्न-
येदुदक् २२
वामस्थानितरांस्तद्वत्कुर्याद्रज्जुं त्रिसंधिताम्। उपविष्टां नयेत्तद्वत्तृतीयावर्तनं च हि २३
रज्ज्वेध्मं सकृदावेष्ट्य रज्जुमूलं तथैव च। वेष्टितायाश्च पूर्वाया रज्ज्वग्रं च नयेदधः २४
रज्जुग्रन्थिमधः कृत्वा प्रागग्रान्साध(द)येदथ। स्याच्चेत्ताम्रमयी स्थाली होमे कांस्यमयी
पि वा
तथा स्युः प्रोक्षणादीनि यथालाभानि वाऽपि वा॥ २५
दण्डपा(मा)त्रयुतौ शस्तौ स्रुक्स्रुवौ यागदारुजौ। तदभावेऽथ वाऽश्वत्थपर्णकौ वाऽप्यु-
दुम्बरौ २६
प्रोक्षणं न्यक्पवित्राभ्यां प्रोक्षयेत्सलिलं ततः। कृत्वोत्तानं पवित्रे ते निधायापः प्रपूजयेत्
सोदकाभ्यां पवित्राभ्यां त्रिः समुत्पूय चैव हि। कुर्यादेकैकमुत्तानं द्वंद्वं च प्रोक्षयेत्पुनः
विस्रस्येध्मं तथा बर्हिर्निदध्याच्चमसे च ते। पवित्रे पूरयेद्वारि गन्धपुष्पाणि च क्षिपेत् २९
निरस्य नैर्ऋतान्दर्भान्निरस्त इति मन्त्रतः। कर्ताऽऽचरेदिमं मन्त्रमुक्त्वा विष्टः कुशासने
ब्रह्माणं वरयेदस्मिन्कर्मणि त्वं भवेरिति। ब्रूयाद्ब्रह्माऽहमस्मीति ततः कर्ता तमर्चयेत् ३१
धृत्वा पूर्णं करे सव्ये पिधायोपरि दक्षिणम्। ब्रह्मन्नित्युच्चरन्मन्त्रं नीत्वा तन्नासिकाग्रतः
निदध्यादुदगग्रे तन्मन्त्रेणों प्रणयेति च। कुशैराच्छादितं कुर्यात्पूर्णपात्रं तदुच्यते ३३
शूर्पे पश्चान्निधायाग्नेः पवित्रे स्थापयेच्च ते। निर्वपेच्चतुरो मुष्टींस्तानेव प्रोक्षयेदथ ३४
तण्डुलानवहंस्त्रींस्त्रीन्कृत्वा तांस्त्रिः फलीकृतान्। त्रिः प्रक्षाल्य पचेदग्नेरुदक्चैवाऽऽज्य-
भाजने ३५
सपवित्रे निषिच्याऽऽज्यं ततोऽङ्गारानपोह्य च। तत्राऽऽज्यभाजनं स्थाप्य संस्कुर्यादु-
लमुकेन च ३६
निक्षिपेत्कुशयोरग्नेः पर्याग्निकरणं ततः। त्रिः कुर्याज्ज्वलता तेन तत्प्राक्परिहरेदथ ३७
कर्षन्निवोदगुद्वास्य भाजनं घृतपूरितम्। कुशाग्रे निक्षिपेदग्नौ स्कन्दायेत्युच्चरन्नथ ३८

१ ख. येत्पचय°। २ ख. °णं च पवि°। ३ क. °र्कृतीन्द°। ४ ख. °तः। कृतोत्तत्तादि°।

धृत्वा तूत्तानपाणिभ्यां पवित्रे चोदगग्रके। सवितुष्टेति मन्त्रेण सकृत्तूष्णीं द्विरिष्यते ३९
उत्पूयाऽऽज्यं पवित्रे ते प्रोक्ष्याग्नौ प्रहरेदथ। प्रत्यगासादयेदग्नेर्बर्हिस्तच्चाऽऽज्यभाजनम्
प्रताप्य सकुशौ दर्वीस्रुवौ[1] दर्वीं निधाय च। सव्येन स्रुवमादाय कुशानितरपाणिना ४१
स्रुवस्य बिलमारभ्य यावदग्रं भवेदथ। अग्रतो बिलपृष्ठं तु तदारभ्य भवेद्बिलम् ४२
निमृजेत्त्रिस्त्रिरेकं तु कुशाग्रैः सव्यवच्च हि। कुशमूलैश्च वै दण्डं कुशैः प्रोक्ष्य प्रतापयेत् ४३
आसादयेत्स्रुवं[2] चाऽऽदौ बर्हिष्युत्तरतो घृतात्। संस्कुर्यात्पूर्ववद्दर्वीं निदध्यादुत्तरे स्रुवात
संमार्जितान्कुशान्प्रोक्ष्य प्रहरेदनले च तान्। सम्यगाज्यं निरीक्ष्याथ चरुं पक्वमवेक्षयेत्
अभिघार्य स्रुवेणाऽऽज्यं चरुमुद्वासयेदुदक्। हविर्भुगात्मनोश्चैव मध्यतश्चरुमानयेत् ४६
निदध्यात्तां चरोः स्थालीं बर्हिष्याज्यं च दक्षिणे। अभिघार्य चरुं चाम्यत्पात्रं स्यादुत्तरे चरोः ४७
देवतायै हविः स्थाप्य तत्र तद्विभजेत्क्रमात्। अमुष्यै चेदमित्युक्त्वा यथालिङ्गं यथाक्रतु
विश्वानीत्यष्टभिः पादैः पूर्व(र्वा)तो दिक्षु चाष्टसु। अर्चयेद्गन्धपुष्पाद्यैरग्निं स्तुयाद्बृ(द्व)-
चाऽन्त्यया ४९
अलंकृत्याभिघार्येध्ममादायायं त इत्यथ। हुत्वेध्मं जुहुयादाज्यं तूष्णीं वायव्यकोणत'
ततश्चाऽऽग्नेयपर्यन्तं प्रजापतिमिदं स्मरेत्।स्वाहेत्युक्त्वाऽथ निर्ऋतिमारभ्येशानकोणतः
गृह्यवद्धिरिमौ मन्त्रावाघारावितिभाषितौ। होमे चैव तु सर्वत्र विधिरेष उदाहृतः ५२
अग्निश्चैव तथा सोमश्चक्षुषी जातवेदसः। भवेदुत्तरमाग्नेयं सौम्यं चैवाक्षि दक्षिणम् ५३
सकृलाजान्नहोमे तु जुहुयादेव चक्षुषी। अनुप्रवचनीये च वर्जयेदाज्यहोमके ५४
अभिघार्य स्रुवेणेदमाग्नेयं मध्यतो हविः। दर्वीं च हविरादाय विधिना स्थापयेदिह ५५
तर्जनीमध्यमाङ्गुष्ठपर्वमात्रं च वै स्रुचि। तत्पुरस्तात्तथाऽऽदाय निदध्यात्तत्तथैव हि ५६
पात्रस्थं चापि दर्वीस्थं पुनरप्यभिघारयेत्। पश्चावत्ती तु पश्चार्धादादाय च हविस्तथा[3] ५७
जुहुयादग्नये स्वाहा दर्व्या मध्ये तु नेत्रयोः। आदाय चाग्नीषोमाभ्यामुत्तरस्थं च पूर्ववत्
मन्त्रमुच्चार्य सर्वत्र स्वाहान्ते जुहुयाद्धविः। समुच्चार्य चतुर्थ्यन्तं नामेदं न ममेति च ५९
द्वयोश्चापि हविःशेषं द्वयोश्चापि अवद्य च। दर्व्यां सकृदवद्याच्च द्विस्ततो वाऽभिघारयेत्
यदस्येत्यनया हुत्वा प्रागुदक्तु हविर्भुजः। रुद्राय जुहुयाद्रज्जुं विस्रंस्याच्चेध्मबन्धिनीम्
स्रुक्स्रुवाज्याहुतेः शेषं विश्वेभ्यो जुहुयादथ। सर्वत्र जुहुयाद्धोमे प्रायश्चित्ताहुतीरथ६२
अयाश्चाग्न इदं विष्णुश्चतस्रो व्याहृतीश्च हि।ब्रह्माऽपि जुहुयादेताः प्रायश्चित्ताहुतीरिमाः
अनाज्ञातामिति द्वाभ्यां ज्ञाताज्ञातनिवृत्तये। सर्वत्रापि हि चैवं स्याद्विधिरेष उदाहृतः६४
यत्पाकत्रेति मन्त्रेण न्यूनाधिकनिवृत्तये। मन्त्रतन्त्राधिकन्यूनविपर्यांश्च(स)विकर्मणः ६५

---

१ ख °र्बर्हिस्त'। २ ख. °स्रुक्पात्रे विनि°। ३ ख. °त्स्रुवं चा°। ४ ख. °व पश्चादग्नेस्तमा°।

स्वरवर्णादिलोपोत्थपापानिर्हरणाय च। *यद्व इत्यनेनात्रैकामाहुतिं जुहुयादथ ६६
सम्यक्पूर्णफलप्राप्त्यै होमस्येह कृतस्य च। कर्तैव जुहुयादाज्यं व्याहृतीभिश्चतसृभिः६७
स्थाल्यादीनि च पात्राणि नीत्वा तूष्णीं निधाय च। चमसं पुरतः कृत्वा निधायाथ च बर्हिषि ६८
पूर्णमसीत्यनेनैव तत्पूर्णमभिमन्त्रयेत्। दिशः प्रागायतो दर्भैः प्राच्यां मन्त्रेण मार्जयेत्६९
आपो अस्मानिदमापः सुमित्र्या न इति त्रिभिः। शिरसि स्वस्य पत्न्याश्च मार्जयेद्विष्म इत्यधः ७०
स्वस्य वामेऽञ्जलौ पत्न्या आसीनाया निषिञ्चयेत्। माऽहं प्रजामनेनैव चमसस्थं जलं च हि ७१
जलेन तेन वै होता प्रोक्षयेच्छिरसी तयोः। तत्रस्थानक्षतांश्चैव क्षिपेत्प्रणवमुच्चरेत् ७२
परिस्तरणदर्भांश्च विसृजेदुत्तरे हि तान्। ओं च म इत्यनेनाग्निं नत्वा पूर्ववदुच्चरेत् ७३
पर्यू(र्यु)क्ष्य परिषिच्याथ गन्धपुष्पाक्षतांश्च हि। धूपं दीपं च नैवेद्यं दद्यात्ताम्बूलदक्षिणाः तिष्ठन्नग्नेरुपस्थानं कुर्यादों च म इत्यथ। अभिवाद्य जपेद्देवीं कृतं कर्म निवेदयेत् ७५
शुभाशुभक्रियार्थं च दत्तं विप्राय यद्धनम्। तत्सर्वं जगदीशस्य प्रीतये निश्चितं भवेत् ७६
हुतशेषं हविश्चाऽऽज्यं होत्रे दद्याच्च दक्षिणाम्।सुवर्णं च यथाशक्ति होमसाद्गुण्यहेतवे७७
होमान्ते ब्रह्मणे दद्याद्यज्ञपात्राणि चैव हि। होमे चैव तु सर्वत्र प्रवदन्ति मनीषिणः ७८
दर्शके पूर्ववत्सर्वं विशेषस्त्वथ कथ्यते। अग्नीषोमपदस्थान इन्द्राग्नी(ग्नि)पदमुच्चरेत् ७९
पालाशैखादिराश्वत्थशम्युदुम्बरजास्तथा। समिधः खादिराः शस्ता होमकर्मसु चैव हि

इत्याश्वलायनधर्मशास्त्रे स्थालीपाकप्रकरणम् ॥ २ ॥

(अथ गर्भाधानप्रकरणम् ३)

गर्भाधानं द्विजः कुर्याद्हतौ प्रथम एव हि। चतुर्थदिवसादूर्ध्वं पुत्रार्थी दिवसे समे १
चरं दारुणभं पौष्णं दस्राग्नी च द्विदैवतम्। श्राद्धाहं चैव रिक्तां च हित्वाऽन्यस्मिन्विधीयते २
नान्दीश्राद्धं पतिः कुर्यात्स्वास्तिवाचनपूर्वकम्। उपलेपादिकं कृत्वा प्रातरौपासनादितः
प्रजापतेश्चरोरेकां हुत्वा चाऽऽज्याहुतीरथ। विष्णुर्योनिं नेजमेष षडेका च प्रजापतेः ४

---

* इत आरभ्य कृतस्य चेत्यन्तग्रन्थो न विद्यते ख. पुस्तके।

---

१ ख. च। कृतेन जु'। २ ख स्वयं। ३ ख. 'शखदि'। ४ ख. पितुः।

आसीनायाः शिरः स्पृष्ट्वा प्राङ्मुख्याः पाणिना पतिः। तिष्ठञ्जपेदिमे सूक्ते त्वप नश्च वधेन च ५
अग्निस्तुविश्रवस्तमामित्यृचौ द्वे तथैव च। सूर्यो नो दिव इत्येतैः स्तुत्वा सूर्यं च पञ्चभिः ६
अश्वगन्धारसं पत्न्या दक्षिणे नासिकापुटे। उदीर्ष्वेति पठन्मन्त्रं सिञ्चेत्तद्वस्त्रशोधितम् ७
ततः स्विष्टकृदादि स्याद्वाससी च नवे तयोः। फलानि च पतिस्तस्यै प्रदद्यात्फलमञ्जतः
मातुलिङ्गं नारिकेलं रम्भाखर्जूरपूगकम्। शस्तानि स्युरथाम्यानि नारिङ्गादीनि वाऽपि च ९
वृषभं गां सुवर्णं च होत्रे दद्याच्च दक्षिणाम्। पुत्रवान्धनवांस्तेन भवेत्कर्ता न संशयः १०
भोजयित्वा द्विजान्सम्यक्तोषयेद्दक्षिणादिभिः। संतुष्टा देवताः सर्वाः प्रयच्छन्तीप्सितं फलम् ११
स्थालीपाकं चाऽऽज्यहवणं गर्भसंस्कारकर्मसु। प्रातरौपासने कुर्यादग्नौकरणमेव च १२
प्रसन्नात्मा भवेत्कर्ता भुञ्जीत सह बन्धुभिः। तस्मिन्नेव दिने रात्रौ गर्भारोपणमिष्यते
पतिवत्या(त्न्या)श्च दुर्भेद्यं प्रथमं स्याद्रजो यदि। पत्युस्तस्या भवेन्मृत्युः स्त्री(स्त्रि)पूर्वाहियमेषु च १४
मघाशक्रशिवादित्यवह्निभेषु च वा भवेत्। तत्रापि स्यान्महाशोको दरिद्रं चानपत्यता
तद्दोषपरिहारार्थं कुर्याच्छान्तिं यथाविधि। तोषयेज्जपहोमाभ्यां तत्तद्दक्षादिदेवताः १६
आचार्यादीन्समभ्यर्च्य भोजयेच्छक्तितो द्विजान्। तदुद्दिश्य कृतेनाऽऽशु सर्वारिष्टं प्रणश्यति १७
शान्तिकर्मविधानेन कृत्वाऽन्यस्मिन्दिने शुभे। गर्भाधानं ततः कुर्यादित्याचार्योऽब्रवीद्वचः १८
अकृत्वा शान्तिकं कर्म न कुर्याद्गर्भसाधनम्। सर्वेषां शाखिनामेव विधिरेष उदाहृतः १९

इत्याश्वलायनधर्मशास्त्रे गर्भाधानप्रकरणम्॥ २॥

(अथ पुंसवनानवलोभनसीमन्तोन्नयनप्रकरणम् ४)

कुर्यात्पुंसवनं मासि तृतीयेऽनवलोभनम्। सीमन्तोन्नयनं चैव चतुर्थे मासि तद्भवेत् १
नो चेत्षष्ठेऽष्टमे वाऽपि कर्तव्यं तद्भयं च हि। तावदेव भवेत्केचिद्यावत्स्याद्गर्भधारणम् २
पुष्यादित्याश्विनीहस्तविधिमूलोत्तरामृगः। हरिपूषानुराधाश्च शस्तं पुंसवनादिकम् ३

---

१ ख. 'ङ्मुखं पा°। २ ख. 'गन्धिरसं पत्न्या निक्षिपेन्नासि'। ३ क. 'दित्यश्वि'। ४ ख. 'रिपुष्यानु°।

कृत्वाऽऽभ्युदयिकं श्राद्धं चतुर्थ्यन्तं च पूर्ववत्। दधिमाषौ यवं तस्या निधाय प्रसृतौ च तान् ४

स्त्रिः पिबेत्किं पिबसीति पतिः पुंसवनं हि सा। प्रोक्ष्यापः पुनरेव स्यात्स्त्रिवारं पुनराचमेत् सिञ्चेदूर्वारसं तस्या दक्षिणे नासिकापुटे। आ ते गर्भ इति द्वाभ्यां सूक्ताभ्यां तावदुच्यते प्रजापतये स्वाहेति जुहुयादाहुतिं चरोः। गुर्विण्या हृदयं स्पृष्ट्वा यत्ते मन्त्रमुदीरयेत् ७

धाता ददातु मन्त्रौ द्वौ तथा राकामहं च तौ। नेजमेषत्रयो मन्त्रा एको मन्त्रः प्रजापतेः ८

अष्टावाज्याहुतीर्हुत्वा त्रिशुक्लशलली[1]कुशैः। औदुम्बरेण युग्मेन ग्लप्स्थे(द्रप्से)न सफलेन च(?) ९

पूर्णसूत्रावृतेनेह सहैवैकत्र मेव च। त्रिरुन्नयेति गर्भिण्याः सीमन्तेन समूलतः(?) १०

कृतकेशविभागं स्याद्योषिद्भालाग्रभागतः। सीमन्तं सधवाचिह्नं सदा सौभाग्यदायकम्

तिष्ठन्पश्चात्प्राङ्मुखोऽग्नेरुच्चरन्भूर्भुवः स्वरोम्। चतुर्थ्योमूढतं कृत्वा विद्धायां तु निरुध्यते(?) १२

सामस्वरेण मन्त्रं च सोमं राजानमुच्चरेत्। समीपस्थनदीनाम समुच्चार्य नमेदथ १३

पतिपुत्रवती नारी गर्भिण्या(णी)मुपदेशयेत्। मा कुरु क्लेशदं कर्म गर्भसंरक्षणं कुरु १४

ततः स्विष्टकृदादि स्याद्धोमशेषं समापयेत्। पूर्ववत्फलदानानि कृत्वाऽऽचार्याय दक्षिणाम् १५

वृषभं धेनुसंयुक्तं दद्याद्विभवसारतः। भोजयेच्छक्तितो विप्रान्कर्मसाङ्गुण्यहेतवे १६

प्राशनं यत्पुंसवनं होमश्चानवलोभनम्। प्रतिगर्भमिदं कुर्यादाचार्येणेह भाषितम् १७

आज्यहोमश्च शलली[2]कुशल्यप्सु निमज्जनम्। सीमन्तोन्नयनं तच्च प्रतिगर्भे न हि स्मृतम्

प्रधानं पुंसवनं न स्यादङ्गं चानवलोभनम्। सीमन्तं च तथैव स्यात्केचिदुन्नयनं तथा १९

इत्याश्वलायनधर्मशास्त्रे पुंसवनानवलोभनसीमन्तोन्नयन[प्रकरण]म् ॥ ४ ॥

(अथ जातकर्मप्रकरणम् ५)

जाते सुते पिता स्नायान्नान्दीश्राद्धं विधानतः। जातकर्म ततः कुर्यादैहिकामुष्मिकप्रदम्

सौवर्णे राजते वाऽपि पात्रे कांस्यमयेऽपि वा। मधुसर्पिर्निषिच्याथ हिरण्येनावघर्षयेत्

प्राश्नयेत्तं हिरण्येन कुमारं मधुसर्पिषी। प्रतिमन्त्रं पठेत्कर्णे हिरण्यं स्याप्य दक्षिणे ३

तथा वामे जपेन्मेधां स्पृशेदंसावतः परम्। अश्मा भव जपेदिन्द्रः श्रेष्ठान्यस्मै प्रयन्धि च ४

एवं कुर्यात्सुतस्यैव तूष्णीमेव च योषितः। केचिदिच्छन्त्यनादिष्टहोममन्त्रादिना परे ५

इत्याश्वलायनधर्मशास्त्रे जातकर्मप्रकरणम् ॥ ५ ॥

---

१ ख. ग्लास्येन। २ ख. 'तुर्थो मू°। ३ ख. °लीशल्यप्सुनिजम°।

(अथ नामकरणप्रकरणम् ६)

अहन्येकादशे कुर्यान्नामकर्म विधानतः। कृत्वाऽऽभ्युदयिकं श्राद्धं द्वादशे षोडशेऽपि वा १
मार्गशीर्षं समारभ्य मासानां नाम निर्दिशेत्। नक्षत्रपादतो जातजन्मनाम तदुच्यते २
यद्वा तातपितानाम(तुर्ना)म भवेत्संव्यावहारिकम्। क्रमेणानेन संलिख्य नामानि च समर्चयेत् ३
समाक्षरयुतं नाम भवेत्पुंसः सुखप्रदम्। विषमं यदि तत्र श्रीः(श्री) समेतं च विनिर्दिशेत् ४
आचार्येणात्र मन्त्रोऽयं नामानि तु उदाहृतः। नमस्करोत्यसौ देवं ब्राह्मणेभ्यः पिता वदेत् ५
त्रिस्त्रिः स्यात्प्रतिनामैवं ततः स्वस्तीति निर्दिशेत्। भवन्तोऽस्य ब्रुवन्त्येवं प्रतिब्रूयुस्तथा द्विजाः ६
तत्तन्नाम शिशोस्त्रिस्त्रिर्ब्रूयात्तत्र तथाऽऽशिषः। ब्राह्मणान्भोजयेच्छक्त्या भुञ्जीयात्सह बन्धुभिः ७

इत्याश्वलायनस्मृतौ नामकरण[प्रकरण]म् ॥ ६ ॥

(अथ निष्क्रमणप्रकरणम् ७)

मासे चैवं चतुर्थे तु कुर्यान्निष्क्रमणं शिशोः। कृत्वाऽऽभ्युदयिकं श्राद्धमादायाङ्के शिशुं पिता १
स्वस्ति नो मिमीतां सूक्तं जपन्देवादिकं नयेत्। आशुः शिशान इत्येतत्पठेत्तं श्वशुरालयम् २
नीत्वाऽन्यस्य गृहं वाऽपि प्राङ्गणे वाऽर्कमीक्षयेत्। तच्चक्षुरिति मन्त्रेण दृष्ट्वाऽर्कं प्रविशेद्गृहम्

इत्याश्वलायनस्मृतौ निष्क्रमण[प्रकरण]म् ॥ ७ ॥

(अथान्नप्राशनप्रकरणम् ८)

षष्ठेऽन्नप्राशनं कुर्यान्मासे पुंस्यष्टमेऽथ वा। दशमे द्वादशे मासि केचिदेवं वदन्ति हि १
कृत्वाऽऽभ्युदयिकं श्राद्धं शुभे चैव दिने पिता। सौवर्णे राजते पात्रे कांस्ये वाऽथ नवे शुभे २
सर्पिराज्यमधुदध्यन्नं विधाय प्राशयेच्छिशून्। मन्त्रेणान्नपतेऽन्नस्य हिरण्येन स्रुवेण च ३
पाणिना सपवित्रेण जलं चापि हि पाययेत्। दत्त्वा विप्राय तत्पात्रं तूष्णीमेव च योषितः ४
ततो विभवसारेण ब्राह्मणांश्चापि भोजयेत्। स्वयं चैव तु भुञ्जीयात्समाहितमना भवेत् ५

इत्याश्वलायनस्मृतावन्नप्राशन[प्रकरण]म् ॥ ८ ॥

(अथ चौलकर्मप्रकरणम् ९)

तृतीये वत्सरे चौलं बालकस्य विधीयते । शुभे चैव दिने मासि विहितं चोत्तरायणे १
कृत्वाऽऽभ्युदयिकं श्राद्धं पूर्वेद्युरपरेऽहनि । प्रातःसंध्यादिकं कृत्वा नान्दीश्राद्धं परेऽहनि
प्राणानायम्य संकल्प्य कुर्वीत स्थण्डिलादिकम् । पात्रासादनपर्यन्तं कृत्वा धान्यानि
पूरयेत् २
उदग्रेः शरावेषु प्राक्संस्थेषु नवेषु च । तेषु वै क्रमतो व्रीहियवमाषतिलांश्च हि ४
पुरतःस्थे शरावे च विन्यसेद्वृषगोमयम् । तदुत्तरे नवेऽन्यस्मिञ्शमीपर्णानि पूरयेत् ५
आघारान्तं ततः कुर्यात्कृत्वोत्तानानि पूरयेत् । ततश्च जुहुयादाज्यमग्नेश्चेति चतसृभिः ६
अग्न आयूंषि पवस इत्येका च प्रजापतेः । एता एवोपनयने गोदाने च विवाहिके ७
मातुरङ्कोपविष्टस्य कुमारस्य तु चैव हि । पश्चात्स्थित्वा पिता शीतं जलमादाय पाणिना ८
दक्षिणेनाथ सव्येन पाणिनोष्णं जलं तथा । दक्षिणोत्तरयोस्तत्र निनयेत्केशपक्षयोः ९
उष्णेन वायमन्त्रेण जलधारे तयोश्च ते । अनामिकया चाऽऽदाय नवनीतं तथा दधि १०
प्रदक्षिणप्रकारेण वामकर्णप्रदेशतः । सकेशान्धारयेद्धुत्वा त्रींस्त्रीन्प्रागग्रकान्कुशान् ११
आचार्यश्छेदयेदेतानोषधे मन्त्रमुच्चरेत् । छेदयेद्वामकर्णान्तं त्र्यम्बकेवादितिरुच्चरेत् १२
क्षुरेणेति च तीक्ष्णेन ताम्रयुक्तेन चैव हि । छेदितान्सुत आदाय मातुर्हस्ते निवेदयेत् १३
विन्यसेत्ताञ्शमीपर्णैः सहाऽऽनडुहगोमये । येनावपत्प्रथमं स्याद्येन धाता द्वितीयकः १४
तृतीये येन भूयश्च सर्वैरेव चतुर्थकम् । एवं च दक्षिणे कृत्वा त्रिवारं तूत्तरे तथा १५
यत्क्षुरेणेति मन्त्रेण क्षुरधारां जलेन च । निमृज्येन्मर्म तत्कृत्वा नापिताय प्रदापयेत् १६
यावन्तः प्रवरास्तस्य शिखा मध्ये च पार्श्वयोः । पश्चात्पूर्वे तथा पञ्चप्रवराणां शिखाः
स्मृताः १७
अभ्यञ्जयेत्कुमारं तमानयेदग्निसंनिधौ । ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत् १८
यदुक्तं च यथाकाले कुर्यात्संस्कारकर्म च । असामर्थ्यात्कृतं नो चेद्विधिस्तस्य कथं भवेत्
प्रायश्चित्तं विधायाऽऽदावेकैकस्य च कर्मणः । कृत्वाऽऽदौ कृच्छ्रमेकैकं लुप्तकर्माणि
कारयेत् २०
मन्त्रमेकं जपेत्तत्र तत्तत्कर्मणि एव हि । विधिवच्चौलकर्मैवं कृत्वा स्यादुपनायनम् २१
चौलकर्मादितश्चैवं यावद्वैवाहिकं भवेत् । तावत्स्याल्लौकिको ह्यग्निरिति वेदविदो विदुः

इत्याश्वलायनस्मृतौ चौलकर्मप्रकरणम् ॥ ९ ॥

---

१ ख. °र्मसु । अ° ।

(अथोपनयनप्रकरणम् १०)

ब्राह्मणस्याष्टमे वर्षे विहितं चोपनायनम्। सप्तमे चाथ वा कुर्यात्सर्वाचार्यमतं भवेत् १
कृत्वाऽऽभ्युदयिकं श्राद्धमावाह्य कुलदेवताः। मण्डपार्चनं कृत्वा भोजयेच्च द्विजान्स्वयम् २
अथापरेद्युरभ्यङ्ज्य कुमारं भोजयेत्ततः। वपेद्गुक्तवतः केशान्मात्रा सहैकभाजने ३
चौलाग्नस्थापिते ये च शिखे द्वे *तेऽपि वापयेत्। सकेशेऽपि कुमारस्य हित्वैकां मध्यमस्थिताम् ४
आसीनस्यान्तिके स्नातं कुमारमुपवेशयेत्। पितुश्च प्राङ्मुखस्येह प्रत्यङ्मुखमलंकृतम् ५
धृत्वाऽञ्जलिं कुमारस्य सुवर्णफलसंयुतम्। मुहूर्तकालपर्यन्तमसमीक्ष्य परस्परम् ६
ध्यायन्देवान्मुमुहूर्ते मुहूर्ते पितुरञ्जलौ दत्त्वा फलमसौ तस्य निदध्यात्पादयोः शिरः ७
शिरः स्पृशेत्पिता तस्य स्वाङ्के तमुपवेशयेत्। ये यज्ञेन पठेत्सूक्तमाचार्यो ब्राह्मणैः सह ८
आज्यसंस्कारपर्यन्तं प्राणायामादिपूर्वकम्। कृत्वा नवं ततो दद्यात्कौपीनं कटिसूत्रकम् ९
धारयित्वा ततो दद्याद्वाससी युवमित्यृचा। एकं स्यात्परिधानार्थमेकं प्रावरणाय हि
इच्छन्ति केचिदैणेयमृक्सामाभ्यां तथाऽजिनम्। उपवीतं ततो दद्याद्यज्ञोपवीतमन्ततः
आचम्याथ बटुर्गच्छेत्पुरतश्चोत्तरे गुरोः। दृष्ट्वा पात्रं तथाऽऽगत्य दक्षिणे तूपवेशयेत् १२
कृत्वाऽऽज्याहुतिपर्यन्तं बहिरास्तरणादिकम्। कुमारः पूर्ववद्गच्छेदुदगग्रेषु(ग्रेगु)रोश्च हि
आचार्यः प्राङ्मुखस्तिष्ठेद्बटुः प्रत्यङ्मुखस्तथा। आचार्यः पूरयेत्तत्र कुमारस्याञ्जलौ जलम्
सजले चाञ्जलौ तस्य गन्धपुष्पाणि चाऽऽवपेत्। सुवर्णं च यथाशक्ति फलैः क्रमुकजैः सह
आचार्यस्याञ्जलौ ब्रह्मा पूरयेत्सलिलं च तत्। आचार्यो मन्त्रमुच्चार्य तत्सवितुर्वृणीमहे
कुमारस्यांजलौ चैव निनयेत्स्वस्य चाञ्जलिम्। ध्यायन्कुमार आदित्यमर्घ्यपात्रे निवेदयेत् १७
देवस्य त्वेति गृह्णीयात्साङ्गुष्ठं करमस्य च। असौ शर्मेति दीर्घायुर्भवत्विति वदेत्पिता
अथ वाऽसौ पदे नाम संबुद्ध्या वाऽस्य नामकम्। उच्चार्य शर्म दीर्घायुर्भवेत्येके वदन्ति हि
एवं त्रिः पूर्ववच्चैव मन्त्रोऽन्यः स्यात्करग्रहे। सविता तेऽयमेकः स्यादग्निराचार्य एव च २०
ईक्षयेद्बटुरादित्यं देवं सवितृमन्ततः। आवर्तयेत्कुमारं तं पूर्वार्धेनैव हि २१
पाणिभ्यामुत्तरेणांसौ पाणी वाऽस्य हृदि स्पृशेत्। एवं कृत्वा पुनश्चामुं दक्षिणे बटुमानयेत् २२

* अत्र संधिरार्षः।

१ ख. 'न्तिकस्यान्तं कु'। २ ख. जले। ३ ख. चाचयेत्। ४ ख. पाणिनाऽस्य।

तूष्णीं समिधमादाय निदध्यादनले च ताम् । मन्त्रेणाग्नय इत्यत्र वदन्त्येके महर्षयः २३
ओष्ठौ विलोमकौ कृत्वा पाणिद्वयतलेन च । त्रिवारं प्रतिमन्त्रेण तेजसा मेति चैव हि २४
सूत्रोदितान्मयीत्यादीन्मन्त्रांस्तिष्ठञ्जपेदथ।मानस्तोकेऽनया भाले त्रिपुण्ड्रं धारयेत्क्रमात्[1]
हृदि नाभौ तथा बाहोर्मस्तके चापि केचन । त्र्यायुषं ताञ्जपेन्मन्त्रानुपस्थायौ च मे स्वरः
पुरतः पितुरासीनो ब्रह्मचारी कुशासने । गायत्रीमनुगृह्णीयादुपांशु प्रत्यगाननः २७
पूर्ववदुपविश्यांसावन्वाच्य जानु दक्षिणम् । फलाक्षतसुवर्णं च गुरवे तन्निवेदयेत् २८
अधीहीत्यादिकं मन्त्रं समुच्चार्य यथाविधि । नमस्कुर्याद्गुरोः पादौ धृत्वा हस्तद्वयेन च २९
ब्राह्मणोऽहं भवानीह गुरोऽहं ते प्रसादतः । गायत्री(त्रीं)मामनुब्रूहि शुद्धात्मा सर्व-
दाऽस्मि हि ३०
संगृह्य पाणी पाणिभ्यां स्वस्य च ब्रह्मचारिणः । वाससाऽऽच्छादनं कृत्वा गायत्रीमनु-
वाचयेत् ३१
उच्चार्य प्रणवं चाऽऽदौ भूर्भुवः स्वस्ततः परम् । पच्छ(पाद)मर्धमृचं चैव तं यथाशक्ति
वाचयेत् ३२
पाणिना हृदयं तस्य स्पृष्ट्वा मम व्रतं जपेत् । प्राणायामं ततः कृत्वा ब्रह्मचार्येव नेतरः ३३
आबध्य मेखलां तस्य प्रावेपामेत्यृचं जपेत् । एषक्षेत्यनया दण्डं धारयित्वा दिशेद्व्रतम्
ब्रह्मचर्यादिकं भिक्षां ददात्वित्यन्त एव च। ततः स्विष्टकृतं हुत्वा होमशेषं समाप्य च ३५
याचयेत्प्रथमां भिक्षां पितरं मातरं च वा । पितरं यदि याचेत भवान्भिक्षां ददात्विति ३६
भवतीति पदं चोक्त्वा भिक्षां देहीति याचयेत् । मातरं चाग्र एवेति गत्वा पात्रं करान्तिके
तण्डुलान्सफलान्दद्याद्भिक्षार्थं जननी तु च । होमार्थं तण्डुलान्मात्रे दत्त्वा शेषं गुरोरथ ३८
याचिता तत्र या भिक्षा गुरवे तां निवेदयेत् । पितैव गुरुराचार्यो भवेत्सञ्ज्ञिरुदाहृतः ३९
यस्मात्पुरोहितो ब्रह्मा होता च सह याज्ञिकम् । उक्त्वा वेदमधीष्वात्र यस्मादिशति वै
पिता ४०
तदाचार्यपदं तत्र जायते ब्राह्मणेऽपि हि।पिता माता तथाऽऽचार्यास्त्रयो मान्याः सदैव हि
अन्येऽपि श्रोत्रिया वृद्धा वेदविद्याप्रदास्तथा । दद्याद्विभवसारेण कर्माङ्गत्वेन दक्षिणाम्
सुवर्णाम्बरधान्यानि सद्योऽनन्तफलं लभेत्।न ददाति द्विजो होत्रे लोभाद्यश्चाङ्गदक्षिणाम्
वित्ते सति कृतं कर्म निष्फलं स्याद्धनक्षयः । धनिनोऽयं निषेधः स्याद्व्रतहीनस्य चैव हि
असमर्थो नमेत्सद्यो दत्त्वाऽक्षतफलादिकम् । विप्रेभ्यो दक्षिणां दत्त्वा गृह्णीयादाशिषः
स्वयम् ४९

---

१ क. °न्मयित्वादी°। २ ख° °केति वा। ३ ख. °त्रं चरा°।

यथाविभवसारेण हेतवे यज्ञसाक्षिणः । आसायं न हि किंचित्स्यान्नैत्यकं कर्म चैव हि ४६
ब्रह्मचारिण एवात्र सायं संध्या विधीयते । ब्रह्मचारी ततः कुर्यात्सायंसंध्या यथाविधि
अग्निकार्यं तथा होमं तस्मिन्नग्नौ विधीयते । नो चेत्स्यात्पूर्ववत्कुर्यादाचार्यः स्थण्डि-
लादिकम् ४८
पूर्णपात्रनिधानान्तमनलस्थापनादिकम् । निर्वपेन्मातृतः प्राप्तांस्तण्डुलान्सदसस्पते
सवितुश्च ततस्तूष्णीमृषीणां मन्त्रतः क्रमात् ॥ ४९
श्रपयित्वौदनं कुर्यादाघारान्तं *हुनेदथ । सदसस्पतिमन्त्रेण गायत्र्यर्षिभ्य एव च ५०
चर्वाहुतित्रयं दत्त्वा कुर्यात्स्विष्टकृदादिकम् । भोजयित्वा द्विजान्वेदसमाप्तिरस्य चोत्तरे
र्निर्विघ्नेन त्रिवारं तु पिताऽस्य ब्रह्मचारिणः । वसेदसौ त्रिरात्रं तु क्षारादिव्रतमाचरेत्५२
प्रातः संध्यामुपास्याग्निकार्यं कृत्वा परेऽहनि । मध्याह्ने चाऽऽचरेत्संध्यां ब्रह्मयज्ञाद-
नन्तरम् ५३
उपाकरणपर्यन्तं सावित्र्या ब्रह्मयज्ञकम् । ततोऽग्निमीळ इत्यादि जपेद्वेदान्स्वशक्तितः५४
चतुर्थदिवसे कुर्यान्मेधाजननकं च हि । संध्यादिकं विधायाथ गच्छेत्पालाशसंनिधौ ५५
कलशान्स्थापयेत्तत्र चतुष्कोणेषु चैव हि । पलाशं पूजयेत्तत्र वसन्तं च यथाविधि ५६
श्रद्धां मेधां च वै प्रज्ञां पूजयेच्छ्रद्धयेत्यृचा । गन्धपुष्पाक्षतैश्चैव धूपदीपादिभिस्तथा ५७
प्रदक्षिणात्रयं कुर्यादाचार्यः सुश्रवं पठन् । निनयेज्जलधाराश्च सहैव ब्रह्मचारिणा ५८
मेखलामजिनं दण्डं वस्त्रं यज्ञोपवीतकम् । एकैकं धारयेत्तत्र क्रमेणैवं त्यजेदथ ५९
आचार्याय च ते दद्याद्वाससी ब्रह्मचार्यथ । नवं चैवात्र कौपीनं धारयेत्पुनरेव हि ६०
विप्रेभ्यः कलशान्दद्याद्गृह्णीयादाशिषः शुभाः । यथाचारं तथा कुर्याद्वृक्षोत्थापनं च
हि ६१

इत्याश्वलायनस्मृतावुपनयनप्रकरणम् ॥ १० ॥

(अथ महानाम्न्यादिव्रतत्रयप्रकरणम् ११)

महानाम्नीव्रतं कुर्यात्पूर्णाब्दे चोत्तरायणे । शुक्लपक्षे शुभेऽह्नि स्यादुपनायनवच्च हि १
महाव्रतं द्वितीये तु भवेत्तत्पूर्ववच्च हि । संपूर्णे च तृतीयेऽब्दे तथा चोपनिषद्व्रतम् २
मासे पूर्णे तथा कुर्यात्क्रमाच्चैतद्व्रतत्रयम् । कुर्यात्परिददाम्यात(म्यन्त)मुपनायनहोमवत्
चर्वाहुतित्रयं हुत्वा जुहुयात्तिलमिश्रितम् । अनुप्रवचनीयोक्ता देवताश्च ततः स्मृताः४
महानाम्नीभ्यः स्वाहेति सावित्र्यां स्नानमिष्यते । महाव्रताय चाथोपनिषदे तैत्र तत्र तु५

---

* अस्याऽऽर्षत्वात्साधुत्वम् ।

---

१ ख. °न्सप्तसप्तते । २ ख. पठेत् । ३ ख. °दामासुमु° । ४ क. °ख्यास्थान° । ५ ख. तच्च ।

वस्त्रादीनि तथाऽन्यत्र दत्त्वा चाऽऽज्याहुतीरथ। चर्वाहुतित्रयं हुत्वा मौञ्जीं दण्डं च धारयेत् ६

ततः स्विष्टकृतं हुत्वा होमशेषं समापयेत्। विदामघवनाथान्त(?) इत्यारम्भे जपेदथ ७

नत्वा गुरुमथाऽऽदित्यमीक्षयेद्ब्रह्मचार्यथ। उक्त्वाऽऽचार्यमधीहीति भोजयेच्छक्तितो द्विजान् ८

इत्याश्वलायनस्मृतौ महानाम्नीव्रतत्रय[प्रकरण]म् ॥ ११ ॥

(अथोपाकर्मप्रकरणम् १२)

श्रवणे स्यादुपाकर्म हस्ते वा श्रावणस्य तु। नो चेद्भाद्रपदे वाऽपि कुर्याच्छिष्यैर्गुरुः सह १

ग्रहदोषादुपाकर्म प्रथमं न भवेद्यदि। उक्तकालेऽथ वाऽऽषाढे कुर्याच्छरदि वाऽपि वा २

अकाले नैव तत्कुर्यादुपाकर्म कथंचन। अकृत्वा नोद्वहेत्कन्यां मोहाच्चेत्पतितो भवेत् ३

अनारभ्योक्तकाले च वेदान्कन्यां य उद्वहेत्। नूतनो ब्रह्मचारी स्यात्सर्वकर्मबहिष्कृतः ४

स्नात्वा नित्यक्रियां कुर्यादर्षींश्चैव समर्चयेत्। उपाकर्मणि चोत्सर्गे गौतमादींश्च सप्त वै ५

आज्यसंस्कारपर्यन्तमुपलेपादि पूर्ववत्। सक्तूंस्तेनाथ संस्कुर्यात्स्थालीस्थान्दधिसंयुतान्

त्रिः प्रोक्ष्य स्थापयेत्स्थालीं बर्हिष्याज्यस्य दक्षिणे। क्षुर्यादग्निमलंकृत्य चक्षुष्यन्तं च पूर्ववत् ७

सावित्र्यादीन्दशाऽऽज्येन जुहुयादाहुतीरथ। केचिद्यज्ञोपवीतस्य होममिच्छन्ति चाग्र हि ८

उत्सर्गेऽप्येवमेवं स्याद्बह्वृचानामयं विधिः। ततः स्विष्टकृतं हुत्वा दधिसक्तुभिरेव च ९

प्राशयेद्दधिसक्तूंश्च गुरुः शिष्यान्समाशयेत्। दानं यज्ञोपवीतस्य धारणं च विधीयते १०

ब्रह्मचारी च मौञ्जीवद्धारयेदजिनादिकम्। निषिच्यापः शरावे तु अभिमार्जनमुच्यते

प्रणवेन च वै सर्वे कुर्युस्ते दर्भपाणयः। विधिनाऽनेन तां ब्रूयादादावों भूर्भुवः स्वरोम् १२

त्रिवारं चैव सावित्रीं पादमर्धमृचं क्रमात्। अग्निमीळे इदं सूक्तं वाचयेद्ब्रह्मचारिणम् १३

क्रमेण संहितारण्यं ब्राह्मणं सूत्रमेव च। याजुषं साम चाथर्वमङ्गानि च यथाक्रमम् १४

अध्यापयित्वा रुद्रादिर्होमशेषं समापयेत्। ततश्चाभ्यासयेद्वेदं स्वाध्याये ब्रह्मचारिणम्

तत आरभ्य षण्मासं गुरुसेवान्तरं च हि(?)। उपनीतोऽभ्यसेद्वेदं यथाश्रुत्युक्तमार्गतः १६

---

१ ख. °र्मं प्र'। २ ख. °र्गे गोत° ३ ख. °न्समर्चये°। ४ क °होमं शे°।

नियमेन च षण्मासमृग्वेदादिकमेव हि ॥ १७

इत्याश्वलायनस्मृतावुपाकर्म[प्रकरण]म् ॥ १२ ॥

(अथोत्सर्जनप्रकरणम् १३)

उत्सर्गे च द्विजः कुर्यात्षण्मास इदमादितः । दार्ढ्यार्थं च हितं चैतदधीतानां च छन्दसाम्
पुष्पे चैवोपलेपादि कृत्वा चोत्पवनावधि । संस्कृत्य सक्तुवच्चान्नं चक्षुष्यन्तं च पूर्ववत् २
सप्त चाऽऽज्याहुतीर्हुत्वा सक्तुस्थाने हुनेच्चरुम् । हुत्वा स्विष्टकृतं चैव अभिघार्य यथा-
विधि ३
कर्मोत्सर्गे भवेत्सर्वमुपाकरणवच्च हि । प्रतिवर्षं द्विजैः कार्यं प्राशनं मार्जनं विना ४
तर्पयेद्देवताः सर्वाः सावित्र्यादि य(दीर्य)थाक्रमम् । अत्र चैवापि सर्वेऽपि ब्रह्मयज्ञाङ्गदे-
वताः ५
जुहुयाद्रुद्रभागादीन्होमशेषं समापयेत्[1] । विशेषं चाऽऽहुराचार्याः केचिद्यज्ञविदो विदुः ६
उपाकर्मणि चोत्सर्गे पुनश्चापि यथाविधि । नैत्यकं तर्पणं कृत्वा ब्रह्मयज्ञपुरःसरम् ७

इत्याश्वलायनस्मृतावुत्सर्जन[प्रकरण]म् ॥ १३ ॥

(अथ गोदानादित्रयम् १४)

गोदानं षोडशे वर्षे कुर्यात्तदुदगायने । केचिद्विवाहकाले च शुभे मासि वदन्ति हि १
कृत्वाऽऽभ्युदयिकं श्राद्धमुपलेपेन पूर्ववत् । विधायोपरि समिधमन्वाधानादिकं च हि २
चौलोक्ताज्याहुतीर्हुत्वा चौलवच्छ्मश्रुवापनम् । स्नापयेद्वाससी दद्याद्युवं वस्त्राणि-
मन्त्रतः ३
अञ्जनं कुण्डलादीनि दण्डान्तानि च धारयेत् । आयुष्यमिति वै सूक्तं पठन्गच्छेच्छिवा-
लयम् ४
पुनरागत्य संतिष्ठेदाधाय समिधं च ताम्[2] । स्मृतमित्यादिकान्मन्त्राञ्जपित्वा प्रक्षिपेत्स्वयम्[3]
कृत्वा तु स्नातकः पश्येत्समावर्तनकं भवेत् । समाग्ने प्रत्यृचं हुत्वा समिधश्च दश स्वयम् ६
स्पृष्ट्वा पादौ नमस्कुर्याद्रुरोर्दत्त्वेति तत्फलम् । न नक्तमिति चानुज्ञालब्धस्तेन यथोदितम्
ततः स्विष्टकृतं कृत्वा होमशेषं समापयेत् । लभेदाज्ञां विवाहार्थं गुरुर्निर्मुच्य मेखलाम् ८

---

१ ख. दीर्घार्थं । २ ख त् । शेषं चाऽऽहुतिराचार्यः के° । ३ ख. °म् । क्रतुस्नातक पश्येत ससमा° ।

समावृत्तस्य वै मौञ्जीं होमान्ते चैव वह्वृचः। उदुत्तमं मुमुग्धीति मन्त्रे गानेन मोचयेत् ९

इत्याश्वलायनस्मृतौ गोदानादित्रय[प्रकरण]म् ॥ १४ ॥

(अथ विवाहप्रकरणम् १५)

सर्वेषामाश्रमाणां च गृहस्थाश्रम उत्तमः। तमेवाऽऽश्रित्य जीवन्ति सर्वे चैवाऽऽश्रमा इह
कुलजां सुमुखीं स्वा(स्व)ङ्गीं सुवासां च मनोहराम्। सुनेत्रां सुभगां कन्यां निरीक्ष्य
वरयेद्बुधः २
स्नातकाय सुशीलाय कुलोत्तमभवाय च। दद्याद्वेदविदे कन्यामुचिताय वराय च ३
आचार्यः स्नातकादीनां मधुपर्कार्चनं चरेत्। स्वगृह्योक्तविधानेन विवाहे च महामखे ४
मधुनाऽऽज्येन वा युक्तं मधुपर्काभिधं दधि। दध्यलाभे पयो ग्राह्यं मध्वलाभे तुवै गुडः५
निदध्यात्तं नवे कांस्ये तस्योपरि पिधाय च। वेष्टयेद्विष्टरेणैव मधुपर्कं तदुच्यते ६
प्राणानायम्य संकल्प्य विष्टराद्यर्चनं भवेत्। त्रिस्त्रिर्ब्रूयादहं वर्ष्म मन्त्रेणानेन विष्टरम् ७
पाद्यमर्घ्यं तथा दत्त्वा दद्यादाचमनीयकम्। पिबेज्जलं चामृतोपस्तरणमसीति मन्त्रतः ८
आच(चा)मेन्मधुपर्कोऽयं मित्रस्येति निरीक्षयेत्। देवस्य त्वेति तद्दद्यादञ्जलौ प्रतिगृह्य च
तदवेक्ष्य करे सव्ये धृत्वा मन्त्रं जपेन्मधु। अङ्गुष्ठानामिकाभ्यां त्रिस्तदेवाऽऽलोडयेद्वरः
मधुपर्कं क्षिपेत्किंचिद्वसवस्त्वेति पूर्वतः। भूतेभ्यस्त्वोत्क्षिपेत्त्रिस्तं निदध्याद्भुवि भाजनम्
कर्ताऽऽदाय सकृद्धस्ते मधुपर्कं वरस्य च। जपेदथ विराजोऽथ प्राशयेत्पुनराचमेत् १२
पूर्ववच्च विधानं स्यान्मन्त्रोऽन्यः प्राशने भवेत्। उक्तं[1] सूत्रे विजानीयात्तृतीये प्राशने तथा
उत्तराचमनं पीत्वा सत्यमित्युदकं पिबेत्। द्विराचम्योत्सृजन्माता रुद्राणां मन्त्रतो वरः
ततः कर्ताऽर्चयेदेनं गन्धपुष्पाक्षतादिभिः। वराय वाससी दद्यादुपवीतादिकं च हि १५
वरयेच्चतुरो विप्रान्कन्यकावरणाय च। कन्यासमीपमागत्य विप्रगोत्रपुरःसरम् १६
नाम ब्रूयुर्वरस्याथ प्रपितामहपूर्वकम्। प्रपौत्रपौत्रपुत्रेषु चतुर्थ्यन्तं वराय च १७
गोत्रे चैवाथ संबन्धे षष्ठी स्याद्वरकन्ययोः। वरे चतुर्थी कन्यायां विभक्तिर्द्वितीयैव हि १८
श्रावयेयुः प्रसुग्मन्तामूक्तं कन्या कनिक्रदत्। देवीमृचं पठन्तश्च नयेयुस्ते हि वै वरम् १९
प्राङ्मुखी कन्यका तिष्ठेद्वरः प्रत्यङ्मुखस्तथा। वस्त्रान्तरं तयोः कृत्वा मध्ये तु वरकन्ययोः
परस्परमुखं पश्यन्मुहूर्ते चाक्षतान्क्षिपेत्। वरमूर्ध्नीति कन्याऽऽदौ कन्यामूर्ध्नि वरस्तथा २१
गाथामिमां पठेयुस्ते ब्राह्मणा ऋक च वा इदम्। क्षिपेयुस्तेऽक्षतान्विप्राः शिरसोरुभयोरपि

---

[1] ख. उक्ते।

तिष्ठेत्प्रत्यङ्मुखी कन्या प्राङ्मुखः स्याद्वरस्तथा । मन्त्रेणानृक्षराश्चैव भवेत्स्थानविपर्ययः
अक्षतारोपणं कुर्यात्पूर्ववच्चैव कन्यका । श्रियो मे कन्यका ब्रूयात्प्रजायै स्याद्वरस्तथा २४
त्रिवारमेवं कृत्वा तु कन्यां दद्यात्ततः पिता । शिष्टाचारानुसारेण वदन्त्येके महर्षयः २५
लक्ष्मीरूपामिमां कन्यां प्रददेद्वि(वि)ष्णुरूपिणे । तुभ्यं चोदकपूर्वां तां पितॄणां तारणाय च
वरगोत्रं समुच्चार्य कन्यायाश्चैव पूर्ववत् । एषा धर्मार्थकामेषु न त्याज्या स्वीकृता श्रुतः २७
दाता वदेदिमं मन्त्रं कन्या तारयतु स्वयम् । अक्षतारोपणं कार्यं मन्त्र उक्तो महर्षिभिः २८
इहापि पूर्ववत्कुर्यादक्षतारोपणं सकृत् । यज्ञो मे कन्यकामन्त्रः पशवो मे वरस्य च २९
ईशानकोणतः सूत्रे वेष्टयेत्पञ्चधा तयोः । परि त्वेत्यादिभिर्मन्त्रैः कुर्यात्तच्च चतुर्गुणम् ३०
रक्षार्थं दक्षिणे हस्ते बध्नीयात्कङ्कणे तयोः । विश्वेत्ता सावि[तेतिवै] पुंसः कन्यायास्तं-
द्ध्वीतथा(?) ३१
कन्यायै वाससी दद्याद्युवमित्यनया वरः । तयोरुभे ते बध्नीयान्नीललोहितमित्यृचा ३२
बध्नीयात्कन्यकाकण्ठे सूत्रं मणिसमन्वितम् । माङ्गल्यतन्तुनाऽनेन मन्त्रेण स्यात्सदा[3] सती
पुण्याहं स्वस्ति वृद्धिं च त्रिस्त्रिर्ब्रूयाद्वरस्य च । अनाधृष्टमुभौ मन्त्रावापो ह्यानः प्रजां तथा
नमस्कुर्यात्ततो गौरीं सदा मङ्गलदायिनीम् । तेन सा निर्मला लोके भवेत्सौभाग्यदायिनी
दंपती तु व्रजेयातां होमार्थं चैव वेदिकाम् । वरस्य दक्षिणे भागे तां वधूमुपवेशयेत् ३६
आघारान्तं ततः कुर्यादुपलेपादि पूर्ववत् । सूत्रोक्तविधिना कर्म सर्वं कुर्यात्तु चैव हि ३७
अग्न आयूंषि तिस्रोऽत्र त्वमर्यमा प्रजापते । हुत्वा त्वाज्याहुतीरेवं सूत्रोक्तं पाणिपीडनम्
वरस्त्रिः प्रोक्षयेल्लाजाञ्शूर्पस्थानभिघारयेत् । अभिघार्याञ्जलिं तस्याः पूरयित्वाऽभिघा-
रयेत् ३९
अञ्जलीन्पूरयेद्धृत्वा लाजान्वध्वा विवाहिके । विच्छिन्नग्रन्थिसंधाने पतिर्लाजान्द्विरावपेत्
हुत्वा लाजांस्तथा होमं हुत्वा कुर्यात्प्रदक्षिणम् । सोदकुम्भस्य चैवाग्नेरश्मानमवरोहयेत्
विधिरेष विवाहस्य प्रत्याहुतिप्रदक्षिणम् । मन्त्रोऽर्यमणं वरुणं पूषणं लाजहोमके ४२
अवशिष्टान्वरो लाजाञ्शूर्पकोणेन चैव हि । अभ्यात्मं जुहुयात्तूष्णीमिति यज्ञविदां मतम्
यदि बद्धे शिखे स्यातां कन्यकावरयोरपि । प्रत्यृचं च शिखे बद्ध्वा तूष्णीं वरस्य मोचयेत्
इष इत्यादिभिर्मन्त्रैरीशान्यां चालयेद्ध्रुवम् । गत्वा पदानि सप्ताथ संयोज्य शिरसी च ते
कुम्भस्य सलिलं सिञ्चेदुभयोः शिरसोः स्वयम् । सौभाग्यजननीं देवीं स्मृत्वा दाक्षा-
यणीं शिवाम् ४६
ततः स्विष्टकृदादि स्याद्धोमशेषं समापयेत् । अहःशेषं च तिष्ठेतां मौनेनैव तु दंपती ४७

---

१ ख °ज्या स्त्रीकृ° । २ ख °स्तद्ध्वास्तथा । ३ ख. °दा शुचि । पुं° ।

ध्रुवं चारुन्धतीं दृष्ट्वा विसृजेतामुभौ वचः । पतिपुत्रवती चाऽऽ*शीस्तयोर्दद्याद्यथोचितम्
अनेन विधिनोत्पन्नो विवाहाग्निरिति स्मृतः । स एव स्यादजस्राख्य इति यज्ञविदो विदुः
दिवा वा यदि वा रात्रौ कन्यादानं विधीयते । तदानीमेव होमं तु कुर्याद्वैवाहिकं च हि

(इति विवाहहोमः ।)

वध्वा सह गृहं गच्छेदादायाग्निं तमग्रतः । सूत्रोक्तविधिना चेह प्रियामूढां प्रवेशयेत् ५१
प्रतिष्ठाप्यानलं कुर्याच्चक्षुष्यन्तं च पूर्ववत् । ऋग्भिश्च जुहुयादाज्यमानः प्रजां चतसृभिः
समञ्जन्त्वेतया प्राश्य दधि तस्यै प्रयच्छति । अनक्ति हृदये तस्या दध्नाऽलाभे घृतं च तत्
मन्त्रलोपादि होमान्तं कृत्वा स्विष्टकृदादिकम् । हुत्वा व्याहृतिभिश्चात्र पत्नीं वामे समा-
नयेत् ५४
नवोढामानयेत्पत्नीं वामं वामं त इत्यृचा । वाममद्येत्यृचा चैके ततः पूर्णमसीति च ५५
यदि कालवशात्कर्तुं पृथग्घोमद्वयं न चेत् । द्वयमप्येककाले वा कर्तव्यं कर्म केचन ५६
कुम्भस्य जलसिक्तान्तं कृत्वा सर्वं तदादितः । प्रत्यृचं जुहुयादाज्यमानः प्रजां चतसृभिः
समञ्जन्त्विति चाऽऽरभ्य सर्वं पूर्ववदाचरेत् । स्वस्थानीयवधूं वामे पूर्णमस्यादिकं चरेत्
रात्रावहनि वा दानं कन्यायाः स्वीकृतं यदा । तदानीमेव होमः स्याद्विवाहस्य च सिद्धये
यावत्सप्तपदीमध्ये विवाहो नैव सिध्यति । अद्योऽतो होममिच्छन्ति सन्तः सायमुपासनम्
विवाहश्चेद्भवेद्रात्रौ सार्धयामद्वयादधः । तदैवोपासनं कुर्यात्केचिद्ब्रह्मविदो विदुः ६१
नित्यहोमे तु कालः स्याद्रात्रौ नाडीनवात्मकः । द्विगुणः स्याद्विवाहे तु प्रवदन्ति महर्षयः
दंपती नियमेनैव ब्रह्मचर्यव्रतेन तु । वैवाहिकगृहे तौ च निवसेतां चतुर्दिनम् ६३
चतुर्थी(र्थे)त्रिदिव(न)स्यान्ते यामे वा चैव दंपती । उमामहेश्वरौ नत्वा वंशदानं प्रदा-
पयेत् ६४
भोजनं शयनं स्नानं तथैकत्रोपवेशनम् । गृहप्रवेशपर्यन्तं दंपत्योर्मुनयो विदुः ६५
वध्वा सह वरो गच्छेत्स्वगृहं पञ्चमे दिने । गृह्योक्तविधिना चैव देशधर्मेण वाऽपि च ६६
नान्दीश्राद्धं द्विजः कुर्यात्स्वस्तिवाचनपूर्वकम् । गृहप्रवेशमारभ्य पितर्यपि च जीवति ६७
स जीवत्पितृको नान्दीश्राद्धं चेत्कुरुते द्विजः । पितुश्चैव पितुर्णां तु प्रवदन्ति महर्षयः ६८
प्रथमोद्वाहपर्यन्तं पुत्रस्यैव क्रियासु च । नान्दीश्राद्धं पिता कुर्यादत ऊर्ध्वं सुतः स्वयम् ६९
चत्वारो ब्राह्मणा दैवे पित्र्ये चाष्टादश स्मृताः । नान्दीश्राद्धं वदन्त्येके मुनयः पञ्च
वाऽपि च ७०

---

* आशीशब्दश्चात्र क्विप्प्रत्ययान्तो बोध्यः ।

---

१ ख. चरेत् । म० । २ ख. °र्ममेव च ।

विवाहे चोपनयने गर्भाधानादिके तथा । अन्वाधाने शतं विप्रान्भोजयेद्दक्षिणान्वितान्
विवाहोत्सवयज्ञेषु दैवे पित्र्ये च कर्मणि। प्रारब्धे सूतकं नास्ति प्रवदन्ति महर्षयः ७२
प्रारम्भकर्मणश्चैव क्रियाप्रारम्भकस्य[1] च। क्रियावसानपर्यन्तं न तस्याशौचमिष्यते ७३
प्रारम्भो वरणं यज्ञे संकल्पे व्रतसत्रयोः । नान्दीश्राद्धं विवाहादौ श्राद्धे पाकपरिक्रिया
नान्दीश्राद्धे कृते चैव विवाहे चोत्सवादिषु। न कुर्यादुपवासं च छन्दसां वै तपोव्रतम् ७५
अपसव्यं स्वधाश्राद्धं नदीस्नानं शवेक्षणम्। वर्जयेत्तर्पणं चैव देवकोत्थापनावधि ७६
नान्दीश्राद्धे कृते मोहाच्छ्राद्धं प्रत्याब्दिकादिकम् । सपिण्डः कुरुते यश्चेदपमृत्युं व्रजेद्ध्रुवम् ७७
अलाभे सुमुहूर्तस्य विघ्नं यः कुरुते यदि । स्वधया तु विवाहस्य न स पश्येच्छुभं क्वचित्७८
*विघ्नमाचरते यस्तु यज्ञस्योद्वाहकस्य च। यात्रायाश्चैव धर्मस्य स याति नरकं ध्रुवम्७९
ऊढाया दुहितुश्चान्नं नाद्याद्विप्रः कथंचन। अज्ञानाद्यदि भुञ्जीत नरकं प्रतिपद्यते ८०

इत्याश्वलायनस्मृतौ विवाहप्रकरणम् ॥ १५ ॥

(अथ पत्नीकुमारोपवेशनप्रकरणम् १६)

संस्कार्यः पुरुषो वाऽपि स्त्री वा दक्षिणतो भवेत्। संस्कारकस्तु सर्वत्र तिष्ठेदुत्तरतः सदा
धर्मकार्येषु सर्वेषु व्रतोद्यापनशान्तिषु। वामे स्त्री दक्षिणे कर्ता स्थालीपाके तथैव च २
मार्जने चाभिषेके च कन्यापुत्रविवाहके। आशीर्वचनकाले च पत्नी स्यादुत्तरे सदा ३
विच्छिन्नवह्निसंधाने कन्यादाने वरार्चने। नवोढाप्रवेशे पत्नी दक्षिणे स्वयमुत्तरे ४
आरभ्याऽऽधानकं कर्म यावन्मौञ्जीनिबन्धनम्। कर्ता स्यादुत्तरे तावत्पत्नी पुत्रस्य दक्षिणे ५
पत्नीं विना न तत्कुर्यात्संस्कारं कर्म यच्छिशोः। पत्न्यां चैव तु जीवन्त्यां विधिरेष उदाहृतः ६

इत्याश्वलायनस्मृतौ पत्नीकुमारोपवेशन[प्रकरण]म् ॥ १६ ॥

(अथाधिकारिनियमप्रकरणम् १७)

सुतसंस्कारकर्माणि पिता कुर्यात्सभार्यकः। तदभावेऽधिकारी च कुर्यादेव स चापि हि?

---

* एतद्वचनं न विद्यते ख. पुस्तके ।

---

१ क. °यामार' । २ ख. °वासश्च छ' ।

पिता यस्य मृतश्चेत्स्यादधिकारी पितामहः। तदभावे तु वै भ्राता पितृव्यो गोत्रजो गुरुः
व्रतबन्धे विवाहे च कन्यायाश्चापि वै तथा। सपत्नीको वाऽपत्नीकः सोऽधिकारी भवेदिह १
संस्कार्यस्य च वै यस्य यदि माता विपद्यते। पत्नीं[1] विनेति नियमः सद्भिश्चैवात्र नोच्यते
गृहस्थो ब्रह्मचारी वा[2] योऽधिकारी स एव हि।संस्कुर्यादथ वा[तत्र] ब्राह्मणो ब्रह्मसंभवम्
इत्याश्वलायनस्मृतावधिकारिनियम[प्रकरण]म् ॥ १७ ॥

(अथ नान्दीश्राद्धे पितृप्रकरणम् १८)

---

*अथ नान्दीश्राद्धपूर्वककर्माण्याह।

आधाने पुंसि[3] सीमन्ते जातनामनि निष्क्रमे। अन्नप्राशनके चौले तथा चैवोपनायने १
ततश्चैव महानाम्नि तथैव च महाव्रते। अथोपनिषद्व्रोदाने समावर्तनकेषु च २
विवाहे नियतं नान्दीश्राद्धमेतेषु शस्यते। प्रवेशं च नवोढायाः स्वस्तिवाचनपूर्वकम् ३
अन्यान्यत्र वदन्त्येके नान्दीश्राद्धं महर्षयः। यागे च प्रथमे वेदस्वीकारे च महामखे ४
मातृवर्गादितः कुर्यात्पितुर्मातामहस्य च। नवैते पितरो वृद्धिश्राद्धे सद्भिरुदीरितम् ५
कन्यादाने च वृद्धौ च प्रपितामहपूर्वकम्। नाम संकीर्तयेद्विद्वांस्तच्चावरोहणं(ण) क्रमात्
इति नान्दीश्राद्धे पितरः (तृप्रकरणम्) ॥ १८ ॥

(अथ विवाहहोमोपरिवर्ज्यप्रकरणम् १९)

नान्दीश्राद्धे कृते यावद्देवकोत्थापनं भवेत्। ब्रह्मयज्ञश्च वै श्राद्धं वेदाध्ययनमेव च १
शवेक्षणं स्वधाकारं श्मश्रुकेशनिकृन्तनम्। सीमातिक्रमणं चैव श्राद्धभोजनमेव च २
न कुर्याच्छुभकर्ता च सपिण्डा अपि चैव हि। यस्तु वै कुरुते मोहादशुभं स च वै लभेत् ३
विवाहे चोपनयने कृते चौले सुतस्य च। त्यजेत्पिण्डांस्तिलाञ्श्राद्धे करकं चाब्दमध्यतः
मातापित्रोर्मृताहे च गयाश्राद्धे महालये। दद्यात्पिण्डान्कृतोद्वाहः श्राद्धेष्वन्येषु वर्जयेत् ५
नान्दीश्राद्धे कृते विप्रस्तथा चैव तु पैतृके। प्रेतपिण्डे प्रदत्ते तु नैव कुर्यादुपोषणम् ६
इति विवाहहोमोपरिवर्ज्य[प्रकरण]म् ॥ १९ ॥

---

* इदं गद्यमधिकमिव भाति।

---

१ ख. 'त्नीं नयेति। २ ख. वा त्रा°। ३ ख. पुंससी'।

(अथ प्रेतकर्मविधिप्रकरणम् २०)

प्रेतकर्मौरसः पुत्रः पित्रोः कुर्याद्यथाविधि। तदभावेऽधिकारी स्यात्सपिण्डो वाऽन्यगोत्रजः १

याम्ये चैव तु विप्रस्य शिरः कृत्वा मृतस्य च । प्राच्यां वाऽथ दहेदेष विधिः स्याद्बह्वृचस्य तु २

दहनादि सपिण्डान्तं कुर्याज्ज्येष्ठोऽनुजैः सह । ज्येष्ठश्चेत्संनिधौ न स्यात्कुर्यात्तदनुजोऽपि वा ३

ईषद्वस्त्रावृतं प्रेतं शिखासूत्रसमन्वितम्। दहेन्मन्त्रविधानेन नैव नग्नं कदाचन ४

प्रथमेऽहनि कर्ता स्याद्यो दद्यादग्निमौरसः। सर्वं कुर्यात्सपिण्डान्तं नान्योऽन्यं द(न्यद्द)हनं विना ५

स्वगोत्रो वाऽन्यगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत् ६

अपुत्रश्चेन्मृतस्यै(श्चै)वं विधिरुक्तो महर्षयः। दाहं पुत्रवतः कुर्यात्पुत्रः स्या(त्रश्चे)त्संनिधौ भवेत् ७

पुत्रं विनाऽग्निदोऽन्यश्चेदसगोत्रो यदा भवेत्[1]। कुर्याद्दशाहमाशौचं स चापि हि सपिण्डवत्

पुत्राभावेऽग्निदः कुर्यात्सकलं प्रेतकर्म चे[2]। तस्मात्पुत्रवतोऽन्यश्चेद्विना दाहाग्निसंचयम् ९

अस्थिसंचयनादर्वाग्ज्येष्ठश्चेदागतः सुतः । वासो धृत्वाऽऽदितः कर्म ज्येष्ठः कुर्याद्यथाविधि १०

अस्थिसंचयनादूर्ध्वं ज्येष्ठश्चैवाऽऽगतोऽपि चेत्। कुर्यादग्निप्रदः पुत्रो दशाहान्तं स कर्म च

संस्कृतस्यानुमन्त्रेण येन केनापि चैव हि। संस्कुर्याच्च पुनः प्रेतं तिलाल्लाँजा(ञ्जल्या)दिकं चरेत् १२

नवश्राद्धानि वै पञ्च विषमाहेषु पञ्चसु। दशाहाभ्यन्तरे कुर्युर्बह्वृचाश्चैव याजुषाः १३

अतीतानञ्जलीन्पिण्डान्दत्त्वा चैव तदादितः। अथ वाऽऽद्याह्निकं सर्वं ज्येष्ठः कुर्याद्यथाविधि १४

क्रियमाणे सुते पित्रोः प्रेतकर्माणि दूरतः। दशाहाभ्यन्तरे पुत्रस्तथाऽन्यत्र स्थितो यदि

श्रुतस्थाने सुतः कुर्यात्सकलं प्रेतकर्म च । षोडशं च सपिण्डं च दहनास्थिक्रियां विना

नैव तत्र शवोत्पत्तिर्दर्भग्रन्थिर्विधीयते। तस्यामेवाञ्जलिं दद्यादशाहान्तं यथाविधि[3] १७

दग्धस्य विधिना चान्तर्दशाहानि कृतानि चेत् । प्रेतकर्माण्यथैकस्मिन्कुर्यात्सर्वाणि वै दिने १८

---

१ ख. °ग्निदाहश्चेदसपुत्रो । २ ख. घ। तान्यपुत्रवतो नश्चे° । ३ ख. तत्स्थोयो वाऽन्तरंद° ।

समाप्य तु दशाहान्तं सकलं प्रेतकर्म च। अपरेद्युस्ततः कुर्यात्षोडशं च सपिण्डनम् १९
पुत्रः पौत्रः प्रपौत्रः स्त्री भ्राता तज्जश्च दत्तकः। प्रेतकार्येऽधिकारी स्यात्पूर्वाभावेऽथ गोत्रजः २०
कृत्वाऽऽदौ वपनं स्नानं शुद्धाम्बरधरः शुचिः। धृत्वा चैवाऽऽदिकं(म) वासः प्रेतकार्यं समाचरेत् २१
प्रेतकर्म द्विजः कुर्याद्गोत्रनामपुरःसरम्। बह्वृचो विधिनाऽनेन तत्तन्मन्त्रेण चैव हि २२
मौञ्जीबन्धनकाले च व्रताचरणकर्मसु। यज्ञे च मरणे पित्रोर्गयायां क्षौरमिष्यते २३
सपिण्डमरणे चैव पुत्रजन्मनि वै तथा। स्नानं नैमित्तिकं शस्तं प्रवदन्ति महर्षयः २४
सपिण्डमरणे स्नायादुदक्यां च प्रसूतिकाम्। इत्युक्तो मुनिभिश्चैव सर्ववर्णेष्वयं विधिः
कस्यापि मुक्तिः प्रेतत्वाद्वृषोत्सर्गं विना न हि। स्त्रीणां चैव वृषोत्सर्गं कुर्यादेकादशेऽहनि
वृषोत्सर्गं विना प्रेतः पिशाचत्वान्न मुच्यते। पुमांश्चाप्यथ वा नारी विधवा सधवाऽपि वा
एकोद्दिष्टविधानेन कुर्याच्छ्राद्धानि षोडश। ततो रुद्रगणाख्यानि वस्वाख्यानि तथैव च
धर्माख्यं चैव षट्त्रिंशच्छ्राद्धान्येकादशेऽहनि। कुर्याद्विधिवदेतानि द्वादशाहे सपिण्डनम्
यावन्न क्रियते पित्रोर्दाहादि प्रेतकर्म च। संध्यामात्रं विना कर्म नान्यत्कुर्यात्कदाचन
ऊर्ध्वमेतद्दशाहाच्चेत्पितुः[1] स्याद्दहनं यदि। दहनाहस्तदारभ्य पुत्राणां दशरात्रकम् ३१
विना पुत्रवतोऽन्येषामाशौचं त्रिदिनं भवेत्। प्राग्न्यादीनां तु नैव स्यात्कर्तुः स्याद्ग्राहिणोऽपि च ३२
पितृत्वं च प्रयातस्य श्रूयते मरणं पितुः। श्रवणादिदशाहं स्यादाशौचं मुनयो विदुः ३३
सपिण्डीकरणं पित्रोर्भवेत्कालान्तरेऽपि चेत्। अतीतान्यपि वै कुर्यान्मासिकानि यथाविधि ३४
कालप्राप्तानि चान्यानि कुर्यात्प्रथमवत्सरे। न कुर्याद्वत्सरादूर्ध्वं प्रवदन्ति महर्षयः ३५
प्रपितामहपर्यन्तं प्रेतस्यैव सुतादयः। सपिण्डीकरणं कुर्युस्तदूर्ध्वं न हि सर्वथा ३६
पितुः सपिण्डनं कुर्यात्त्रिभिः पितामहादिभिः। तदेव हि भवेच्छस्तं प्रवदन्ति मनीषिणः
पिता विपद्यते चैव विद्यमाने पितामहे। तत्र देयास्त्रयः पिण्डाः प्रपितामहपूर्वकाः ३८
पिण्डौ दत्त्वा तु द्वावेव पितुः पितामहस्य च। ततस्तु तत्पितुश्चैकं प्रेतस्यैकं विधीयते ३९
त्रयाणामपि पिण्डानामेकेनापि सपिण्डने। पितृत्वमश्नुते प्रेत इति धर्मो व्यवस्थितः ४०
पितामहस्तथा वाऽपि विद्यते प्रपितामहः। तृतीयस्यैव ते देयास्त्रयः पिण्डाः सपिण्डने
प्रेतश्च पितरश्चैव विद्यन्तेऽपि त्रयो यदि। षोडशश्राद्धपर्यन्तं कुर्यात्सर्वं यथाविधि ४२

---

१ ख. कृत्वा। २ ख. 'गङ्गायां। ३ क. 'र्ध्वमन्तर्दशा'। ४ ख 'त्पिता चैवं प्रे°।

पितॄणां मध्य एकश्चेन्म्रियते चेत्सपिण्डनम्(?) । सह कुर्यात्तदाऽने(न्ये)न नान्यथा मुनयो विदुः ४३

सपिण्डीकरणं न स्याद्यावन्नोपनयादिकम् । अब्दादूर्ध्वं न दुष्येत केचिदाहुर्ऋतुत्रयात् निषेधो मुनिभिः प्रोक्तः सपिण्डानयनं च हि। चौलोपनयनादौ चेन्नाधिकारः सुतस्य च यथा पितुस्तथा मातुः सपिण्डीकरणे विधिः। स यथा स्यादपुत्रायाः पत्या सह सपिण्डने पुत्रेषु विद्यमानेषु दूरतः प्रेतसत्क्रियाम्। असपिण्डः सपिण्डो वा न कुर्याद्दहनं विना४७ जीवत्स्वेव हि पुत्रेषु प्रेतश्राद्धानि यानि च। स्नेहेन वाऽर्थलाभेन कुरुतेऽन्यो वृथा भवेत् येन केनापि पुत्रेण कृतं चेदौरसं(सो) न चेत्। सपिण्डीकरणे चैव शस्तं स्यान्मुनयो विदुः पितुः पुत्रेण चैकेन पिण्डसंयोजने कृते। पुनः संयोजनं तस्य न कुर्याद्दूरगः सुतः ५० येन केन विना पुत्रं प्रेतकर्म कृतं यदि। पुत्रः कुर्यात्पुनः सर्वं विना दाहास्थिसंचयम् ५१ चाण्डालेन हतो विप्रः षडब्देनैव शुध्यति। यदि तेन शवं स्पृष्टं तदर्धेनैव शुध्यति ५२ शवं चैव स्पृशेच्छूद्रो यदि चापि प्रमादतः । आप्नुयाच्छुद्धिमब्देन वहम(न्न)ब्दत्रयेण च प्रायश्चित्तं विधायाऽऽदौ दहेत्प्रेतं यथाविधि। अन्यथा[3] कुरुते यस्तु स च गच्छेदधोगतिम् खद्वोपर्यन्तरिक्षे वा विप्रश्चेन्मृत्युमाप्नुयात्। तस्माब्दमाचरेदेकं तेन पूतो भवेत्तथा ५५ प्रायश्चित्तं विना यस्तु क्रिय(कुरु)ते दहनक्रियाम् । निष्फलं प्रेतकार्यं स्याद्वदन्त्येवं महर्षयः५६

कर्तुं चेदस्थिसंस्कारं प्रमादान्न हि शक्यते। अस्थिशुद्धिकरान्मन्त्रान्धृत्वा दर्भानुदीरयेत् दग्धस्य विधिनाऽशीति(स्थीनि) भावयित्वा जले क्षिपेत्। तिलाञ्जल्यादिकं सर्वं कुर्यात्प्रेतस्य कर्म च ५८

साग्निकं सधवां चैव दहेदौपासनाग्निना। विधुरं विधवां ब्रह्मचारिणं च कुशाग्निना ५२ पत्नी वाऽथ पतिर्वा स्यान्मृत्युकाले न संनिधौ। प्रायश्चित्तेन सद्योऽग्निमुत्पाद्य तेन संदहेत् ६०

प्रायश्चित्तविधिर्नोक्तो यत्र स्याद्दृष्टकर्मणि । चतुर्गृहीतेनाऽऽज्येन होमव्याहृतिभिश्च हि दर्शमारभ्य शुक्ले स्यान्मृतश्चोपासनाहुतीः। चतुश्चतुस्तिलैः सद्यो जुहुयात्तद्दिनावधि६२ कृष्णे मृताहमारभ्य दर्शावधि तदाहुतीः । हुत्वा स्यात्पूर्ववत्कर्ता दहेदौपासनाग्निना निधनं च सहात्मेनं दंपत्योर्गतयोश्च हि । वासनाग्निशिलाचित्तिचतुश्चैकेन मन्त्रणम्(?) तिलोदकं तथा पिण्डान्नवश्राद्धं पृथक्पृथक् । अस्थिशुद्धिर्वृषोत्सर्ग एक एव भवेद्द्वयोः षोडशं च सपिण्डं च तथा मासानुमासिकम्। एकस्मिन्नेव काले तु तयोः कार्यं पृथक्पृथक्

---

१ ख. सतत्कुतुकदा° । २ ख. °ण्डानाय° । ३ ख. अथान्यत्कुरु° ।

भर्त्रा सह मृता नारी सह तेन सपिण्डनम्। द्विधा कृत्वा त्रिधा चैकं द्वितीयं च त्रिधा तथा
भागांस्त्रीन्प्रथमे पिण्डे पितॄणां सह योजयेत्। संयोजयेत्तथा भागान्मातृपिण्डैः सहान्त-
रान् ६८
सपिण्डीकरणादूर्ध्वं क्रमात्पित्रादयस्त्रयः। मात्रादयस्तथा तिस्रः श्राद्धकर्मसु चैव हि ६९
सहानुमृतयोः पित्रोः श्राद्धे चैव क्षयाहके। शाकपाकादिकं चान्नं तयोः कुर्यात्पृथ-
क्पृथक् ७०
यदि कर्तुं न शक्येत कालातीतभयादपि। अन्नपात्रं पृथक्कुर्यादिति वेदविदो विदुः ७१
एकमेव भवेदत्र प्रायश्चित्तं तिलोदकम्। एकस्मिन्नेव काले तु द्विजः स्तुतिप्रदक्षिणम् ७२
विश्वदेवादिकं सर्वमर्चयन्तु पृथक्पृथक्। पितुरादौ ततो मातुः कुर्यात्संकल्पपूर्वकम् ७३
अमा चाप्यष्टकापे(प)क्षमनुक्रान्तियुगादयः। वैधृतिश्च व्यतीपातः श्राद्धकालाः प्रकी-
र्तिताः ७४
गजच्छायोपरागादि श्रोत्रियागमनं च हि। नवधान्यफलोत्पत्तिरन्यश्चालभ्ययोगता
नैमित्तिका इमे प्रोक्ताः श्राद्धकाला महर्षिभिः। शक्तितः कुरुते श्राद्धं स याति परमां
गतिम् ७६
महानदीषु सर्वासु पुण्यतीर्थासु(र्थेषु)चैव हि। श्राद्धं विधीयते तच्च नैमित्तिकमुदाहृतम्
पुत्रवर्गादिकामेष्टिस्तत्तत्काले विधीयते। पञ्चम्यां प्रोष्ठपद्यादि वर्षर्तौ चैव वार्षिकम् ७८
नित्यं नैमित्तिकं काम्यं यत्र कामप्रचोदितम्। सूतके मृतके चैव नैव कुर्यात्कथंचन ७९
सूतकं मृतकं चैव पुत्रादीनां च संनिधौ। त्रिदिनं पक्षिणी चाथ सद्य इत्यनुवर्तते ८०
स्मृतितस्तु न जानीयादितरेषां महर्षिणाम्। दशाहं तावदाशौचं सापिण्ड्यमनुवर्तते ८१
भवेत्तदूर्ध्वमेकाहं तत्पश्चात्स्नानतः शुचिः। पित्रादयस्त्रयश्चैवं तथा तत्पूर्वजास्त्रयः ८२
सप्तमः स्यात्स्वयं चैव तत्सापिण्ड्यं बुधैः स्मृतम्। सापिण्ड्यं चो(सो)दकं चैव सगोत्रं तच्च
वै क्रमात् ८३
एकैकं सप्तकं चैकं सापिण्ड्यकमुदाहृतम् ॥ ८४
सपिण्डानां तथाऽऽशौचं संनिधौ स्याद्यथोदितम्। दूरतस्थाद्विजानीयाद्देशकालान्तरा-
दपि ८५
यासत्रये त्रिरात्रं स्यात्षण्मासं पक्षिणी भवेत्। अहस्तु नवमादर्वागूर्ध्वं स्नानेन शुध्यति
पर्वतश्च (स्य) महानद्या व्यवधानं भवेद्यदि। त्रिंशद्योजनदूरं वा सद्यः स्नानेन शुध्यति
यत्र वाऽपि श्रुतं पित्रोर्मरणं दूरतोऽथ वा। भवेद्दशाहमाशौचं पुत्राणामेव निश्चितम् ८८
संनिधौ सोदकाशौचं भवेन्न स्यादसंनिधौ। अतश्चानुपनीतस्य मृत(ता)शौचं न हि
क्वचित् ८९

दीक्षितश्चा(स्याऽऽ)ऽऽहिताग्नि(ग्ने)श्च स्वाध्यायनिरतस्य च । वृतस्याऽऽमन्त्रितस्येह नाशौचं विद्यते क्वचित् ९०

संप्रक्षालितपादस्य श्राद्धे विप्रस्य चैव हि । गृहानुव्रजपर्यन्तं न तस्याशौचमिष्यति(ते) बन्धं त(ग)तस्य विप्रस्य नित्यशौर(च)पद(र)स्य च । सदा चैवाऽऽत्मनिष्ठस्य नाशौचं विद्यते क्वचित् ९२

इत्याश्वलायनस्मृतौ प्रेतकर्मविधिप्रकरणम् ॥ २० ॥

(अथ लोके निन्द्यप्रकरणम् २१)

क्रियाहीनस्य मूर्खस्य पराधीनस्य नित्यशः । नीचसेवारतस्यैतस्त(वं स)दाऽशौचं तदो-च्यते १

सदाचारपरिभ्रष्टो विप्रस्यै(श्चै)व भवेद्यदि । कर्मभ्रष्टः स विज्ञेयो निन्द्यकर्मरतः सदा २

माहिषेयश्च वैकुण्ठो वृषलेयश्च गोलकः । निन्द्याश्च ते हि लोके स्युः कथं जातीस्तदो-(तिरथो)च्यते ३

महिषी सोच्यते भार्या भगेनार्जति या धनम् । तस्यां यो जायते पुत्रो माहिषेयः सुतः स्मृतः ४

रजस्वला च या कन्या यदि स्यादविवाहिता । वृषली वार्षलेयः स्याज्जातस्तस्यां स्य-(स)चैव हि ५

विवाहितामसंयोगां मोहाच्चेदुद्वहेद्द्विजः । भूयन्तीमुद्वर्तीं चाभिगोमयेनानुलेपयेत्(?) ६

सूत्रमशंवरादीनि परिहृत्याभिषेचयेत् । पल्लवैः पञ्चभिर्गव्यैः पावमानीभिरेव च (?) ७

प्रायश्चित्तं विधातव्यं कूश्मा(ष्मा)ण्डं होममाचरेत् । पुनस्तामुद्वहेत्प्रोक्तां विधिवत्पूर्वजः पतिः ८

संभोगात्पूर्व एव स्यादुक्तोऽयं मुनिभिर्विधिः । व्रात्यस्तोमं जपेदन्यः प्रायश्चित्तपुरःसरम् ऊर्ध्वं चेत्पतिसंयोगो जायते तां परित्यजेत् । संतानश्चेद्भवेत्तस्यां निन्द्यः स्यात्पतितः पतिः १०

अज्ञातश्च द्विजो यस्तु विधवामुद्वहेद्यदि । परित्यज्य च वै तां च प्रायश्चित्तं समाचरेत् ११

अब्दमेकं विधायाऽऽदावक्रीर्ण(र्णि) व्रतं चरेत् । पुत्रश्चेज्जायते तस्यामेको गोलक उच्यते विधवायाः सुतस्यै(श्चै)व गोलकः कुण्ड इत्यथ । त्रयश्चैव हि निन्द्याः स्युः सर्वधर्मबहि-ष्कृताः १३

संस्कार्य(र्यौ)विधिवच्चोक्तं(क्तौ) मुनिभिः कुण्डगोलकौ । युगान्तरे समर्थः(धर्मः) स्या-त्कलौ निन्द्य इति स्मृतः १४

परिव(वि)त्त्यां सुतः कुण्डो व्यभिचारसमुद्भवः। गोलको विधवायां च निषिद्धः स्यात्कलौ स्मृतः ११५

वार्षलेयश्च वै कुण्डो गोलकः शूद्रयोनिजः। तज्जश्चापि हि निन्द्यः स्युर्माहिषेयश्च विप्रजः एभिः सह वसेदेषां याजनं कुरुतेऽथ वा। वित्तमेषां द्विजो यस्तु भुङ्क्ते सोऽपि हि तत्समः एतेषां याजनं यस्तु ब्राह्मणः कुरुते यदि। स याति नरकं घोरं यावदिन्द्राश्चतुर्दश ११८

अद्विजानां चाध्ययनं याजनं च प्रतिग्रहम्। ब्राह्मणो नैव गृह्णीयादिति प्राहुर्मुनीश्वराः

इति[आश्वलायनस्मृतौ]लोके निन्द्यप्रकरणम् ॥ २१ ॥

(अथ वर्णधर्मप्रकरणम् २२)

सर्वेषां चैव वर्णानामुत्तमो ब्राह्मणो यतः। क्षेत्रस्य(क्षत्रस्तु) पालयेद्विप्रं विप्राज्ञामतिपालकः १

सेवां चैव तु विप्रस्य शूद्रः कुर्याद्यथोदितम्। सर्वेषां चापि वै मान्यो वेदविद्द्विज एव हि यजनादीनि कर्माणि कुर्यादहरहर्द्विजः। धर्मोऽयं द्विजवर्यस्य परमानन्ददायकः ३

रणे धीरो भवेत्क्षत्री(त्रो)जयाद्राज्यं च वैरिणः। पालयेद्ब्राह्मणान्सम्यक्परं तेनैव जेष्यति शूद्रः कुर्याद्द्विजस्यैव सेवामेव कृषिं तथा। सुखं तेन लभेन्नूनं प्रवदन्ति महर्षयः ५

ब्राह्मणः क्षत्रियो वाऽपि स्वधर्मेणानुवर्तयेत्। नाऽऽचरेत्परधर्मं च धर्मनाशाय चाऽऽत्मनः ६

स्नानेन च बहिः शुद्धिरात्मज्ञानेन चान्तरा। सत्कर्मणा द्विजः शुद्धः सर्वकर्मसु चैव हि ७

स्वधर्मनियतो विप्रः कुरुते पातकं यदि। स्वधर्मेणैव शुद्धेन(ध्येत) नान्यथा शुचितामियात् ८

न स्पृशन्तीह पापानि ब्राह्मणं वेदपारगम्। कदाचित्कुरुते मोहात्पद्मपत्रे यथा जलम् ९

अशुचिं वै स्पृशेत्स्नातः कर्मकाले क्वचिद्द्विजः। प्रक्षालिताङ्घ्रिराचम्य कर्म कर्तुमथार्हति जृम्भकारविकारः स्यात्क्षुत्वाऽधोवातनिर्मितः। श्लेष्मोत्सारो भवेत्कर्मकाले चाभ्यज्य शुध्यति(?) ११

न च तस्या(स्मा)दधोवायुः कर्मकाले द्विजस्य यत्। कृत्वा शौचं द्विराचम्य शिष्टं कर्म समापयेत् १२

ऊषरां शूतिकां चैव पतितं शवमन्त्यजम्। श्वकाकरासभान्स्पृष्ट्वा सवासा जलमाविशेत् तत्स्पृष्टिनः स्पृशेद्यस्तु स्नानं तस्य विधीयते। तदूर्ध्वं तु समाचम्य व्यवहारे शुचिः स्मृतः उच्छिष्टस्पर्शनं चेत्स्यादश्नतो याजकस्य च। अन्नं पात्रस्थमश्नीयान्नान्यदद्यात्कथंचन

---

१ ख. °रात । सं ।

कुरुते व्रतभङ्गं यो द्विजश्चैव विशेषतः । स गच्छेन्नरकं चाऽऽशु प्रवदन्ति महर्षयः १६
वेदविद्द्विजहस्तेन सेवां(वा) संगृह्(ह्य)ते यदि । न तस्य वर्धते धर्मः श्रीरायुः क्षीयते ध्रुवम्
यस्य कस्य नरो यस्तु व्रते निष्ठुरभाषणम् । द्विजस्येह विशेषं च स च गच्छेदधोगतिम् १८
कुरुते योऽपमानं च ब्राह्मणस्य विशेषतः । तस्याऽऽयुः क्षीयते नूनमायुर्लक्ष्मीश्च संततिः
उच्चासनोपविष्टस्य मा(ष्टः स्यान्मा)न्यानां पुरतो यदि । गच्छेत्स विपदं नूनमिह चामुत्र चैव हि २०
परदेवार्चको विप्रस्तदधीनो भवेद्यदि । मासत्रयं तदन्नाशी जीवञ्शूद्रत्वमाप्नुयात् २१
यश्च कर्मपरित्यागी पराधीनस्तथैव च । अधीतोऽपि द्विजश्चैव स च शूद्रसमो भवेत् २२
अनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः २३
संतुष्टो येन केनाह(पि) सदाचारपरायणः । पराधीनो द्विजो न स्यात्स तरेद्भवसागरम्

इत्याश्वलायनधर्मशास्त्रे वर्णधर्मप्रकरणम् ॥ २२ ॥

(श्राद्धप्रकरणम् २३)

अथ चैव द्विजः कुर्याच्छ्राद्धं पित्रोर्मृतेऽहनि । तत्पार्वणविधानेन पितृयज्ञः स उच्यते १
होमं कृत्वाऽथ पूर्वेद्युः सायं विप्रान्निमन्त्रयेत् । प्रातश्चैत्तान्परेद्युर्वा श्राद्धाहे वेदपारगान् २
प्रातरौपासनाग्नेस्तु श्राद्धपाकार्थमुल्मुकम् । नीत्वाऽग्निं सकलं कृत्वा पुनः संमीलयेदुभौ
ततो म(मा)ध्याह्निकं स्नानं कृत्वा संध्यामुपास्य च । निमन्त्रितान्समाहूय क्रमाद्देवपितृन्द्वि(तृद्वि)जान् ४
प्राणानायम्य संकल्प्य श्राद्धार्थमनुवेदयेत् । कुशाक्षततिलैर्युक्तं जलपात्रे प्रपूर्य च ५
आत्मनश्चैव शुद्ध्यर्थं द्रव्यस्य गृहशुद्धये । द्विजैः सह पठेत्सूक्तं प्रायश्चित्तार्थमेव हि ६
नतं सूक्तं शुचीवोऽग्निः शुचिव्रततमश्च हि । *उदग्न इत्यथैतानु त्रयो मन्त्राः क्रमेण तु ७
केचिद्यज्ञविदो ज्ञात्वा सूक्तानि कथयन्ति हि । पुरुषं चास्य वामस्य ममाग्ने वर्च इत्यथ ८
सौम्यं च वैष्णवं रुद्रं पावमान्यमथापि वा । ऋग्भिश्च पावमानीभिर्जलं चैवाभिमन्त्रयेत् ९
श्राद्धोपयोगिकं द्रव्यमपक्वं पक्वमेव वा । सर्वं चैव स्मरेद्वि(रन्वि)ष्णुं जलेन प्रोक्षयेच्च रुम् १०
ततः संस्तूय तान्विप्रान्समस्तेतिपठन्नयेत्[1] । पुरतश्चार्पयेत्तेषां हिरण्यं सकुशं च हि ११
लब्धाज्ञामपसव्येन श्राद्धं कर्तुं पितुर्मम । आचम्यासूत्रियम्याथ दद्यात्संकल्प्य वै क्षणम्
देवानां क्षालयेत्पादौ मण्डले चतुरस्रके । पितॄणां वर्तुलं(ले) चैव प्राङ्गणे रविदीपके १३
ईशान्यां त्वाचमेत्कर्ता देवाः प्राच्यामथोत्तरे । पितरश्च पवित्राणि स्वस्वस्थाने त्यजेदथ

---

* इत आरभ्य कथयन्ति हीत्यन्तग्रन्थो न विद्यते ख. पुस्तके ।

---

१ क. °गृह्णते । २ ख. °स्तेसूक्तपाठयेत् । पु° ।

आचम्य गृहमागत्य ब्राह्मणानुपवेशयेत्। प्राङ्मुखौ द्वा उदक्संस्थौ प्राक्संस्थांस्त्रीनुदङ्मुखान् १४

निरुध्य प्रकिरेद्वायुं तिलान्निर्ऋतिकोणतः। पठन्नपहतामन्त्रमपसव्येन चाष्टसु १६

पितृणां पुरतः सिञ्चेज्जलं पठन्नुदीरताम्। सव्येन पुरतो देवे गायत्र्या चैवमेव हि १७

श्राद्धकाले गयां ध्यात्वा ध्यात्वा देवं गदाधरम्। वस्वादींश्च पितॄन्ध्यात्वा ततः श्राद्धं समाचरेत् १८

देवानामासनं दद्यात्क्षणे चाऽऽवाहयेदथ। कुशाञ्छिरसि देवानां विश्वे देवास इत्यृचा विश्वे देवा सकृन्मन्त्रमुच्चार्य प्रोक्षयेद्भुवम्। अर्घ्यार्थं चाऽऽसादयेद्वै पात्रे दैवे कुशान्विते आगच्छन्तु महाभागा विश्वे देवा महाबलाः। ये चात्र विहिताः श्राद्धे सावधाना भवन्तु ते पूर्वाग्रै(ग्रं)र्दैविके पात्रे दक्षिणाग्रं तु पैतृके(कम्)। अधश्चोपरि पात्राणां कुशान्दैवे च पैतृके गायत्र्या प्रोक्षयेत्पात्रे कृत्वा तान्निक्षिपेद्यवान्॥ २१

यवोऽसि धान्यराजो वा वारुणो मधुसंयुतः। निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतम् २४

गन्धाक्षतकुशांश्चैव क्षिपेदर्घ्ये निवेदयेत्। या दिव्या इति मन्त्रेण हस्ते हस्तं पिधापयेत् निदध्यादर्घ्यपात्रेषु देवानामभिसंमुखे। पितॄणामर्घ्यपात्राणि तानि वै पै(पि)तृसंमुखे देवार्चा दक्षिणादि स्यात्पादजान्वंसमूर्धनि। शिरोंसजानुपादेषु वामाङ्गादिषु पैतृके २६

अर्चतानेन मन्त्रेण गन्धादिभिरथार्चयेत्। युवासुवासामन्त्रेण दद्यादाच्छादनं ततः २७

यथोक्तविधिना देवान्समभ्यर्च्य तदाज्ञया। पितॄणामर्चनं कुर्यादपसव्येन चैव हि २८

आसनं च क्षणं दत्त्वा पितॄनावाहयेदथ। उशन्तस्त्वेति मन्त्रेण प्रति पितरमिष्यथ(ते)२९

आयन्तु न इमं मन्त्रमुच्चरेत्सकृदेव हि। सव्येन प्रोक्ष्य गायत्र्या पात्रान्यु(ण्यु)त्तानि कारयेत् क्षिप्त्वा तिलानपः पूर्य शं नो देवीं समुच्चरेत्। पुनस्तेषु च पात्रेषु तिलोऽसीत्यावपेत्तिलान् ३१

गन्धपुष्पकुशादीनि क्षिप्त्वा चैव तु पूर्ववत्। स्वधाऽर्घ्य इति ब्रूयात्त्रिः सव्येन तु निवेदयेत् ३२

सव्यं कृत्वा गृहीतेन पाणिना दक्षिणेन तु। दद्यात्पितरिदं तेऽर्घ्यं या दिव्यामन्त्रमुच्चरेत् एवं पितामहे चैव तथैव प्रपितामहे। दत्त्वाऽर्घ्यं सलिलं दद्यात्पुनस्त्रिषु करेषु च ३४

पात्रद्वयं(य) कृतं तोयं पितृपात्रे प्रसिच्य च। पात्रस्थं पुत्रकामी चेन्मुखं तद(तेना)नुलेपयेत् ३५

---

१ ख. °क्संस्थांस्त्रीश्चोदङ्मुखान्द्विजान्। नि°। २ ख. °पेत्पश्चा कृत्वा तानि क्षि°। ३ ख. °स्तं च पार्घये°। ४ ख. °मभिसं°। ५ ख. °णादेर्या पाद°। ६ ख. सतिलं।

पितृभ्यः स्थानमसीति न्युब्जं वोत्तानमेव वा । तृतीयं पिहितं कुर्यादुत्तानोपरि भाजनम्
स्थापितं प्रथमं पात्रं तत्स्थानं न हि चालयेत्। जलसेचनपर्यन्तं पिण्डदानं पुनश्च हि ३७
पितृपाणिष्वपो दद्यादपसव्येन वै ततः। नमो व इति मन्त्रेण पितॄंश्चैवार्चयेत्तिलैः ३८
गन्धादिभिः समभ्यर्च्य पितृपूजां समापयेत् । मण्डलानि समानानि कारयेद्देवपूर्वकम्
दैवे तु चतुरस्रे तु ततो वृत्तानि पैतृके। प्रमाणं मण्डलस्योक्तं यावत्पात्रमितं भवेत् ४०
अन्तर्धाय कुशांस्तेषु प्रक्षिपेच्च यवांस्तिलान् । पात्राण्यासादयेत्तेषु हेमराौप्यमयानि च
तदभावे तु पर्णानि कदल्यानि शुभानि च। परिस्तरेत्कुशाद्यैश्च पात्राणि पितृपूर्वकम् ४२
पितृयज्ञचरोरन्नमादायाक्तं घृतेन तु। *अग्नौ करिष्य इत्येतान्पृष्ट्वोक्तः क्रियतामिति ४३
न भवेत्पितृयज्ञश्चेद्गृह्याग्नौ पचनं भवेत्। अग्नौकरणहोमं तु कुर्यादौपासनानले ४४
गृह्याग्नौ पचनं पिण्डं पितृयज्ञो न चैव हि। अग्नौकरणं गृह्याग्नौ न कुर्यादिति केचन ४५
कालद्वयेऽपि कुरुते नित्यहोमं द्विजो यदि। स चाग्नौकरणं कुर्यात्प्रातर्होमो विधीयते ४६
गृह्याग्निर्यस्य चेन्न स्यात्तस्याग्नौकरणं कथम् । श्राद्धार्थमन्नमादाय जुहुयात्पितृपाणिषु
संगृह्याऽऽहुतिमेकां च घृताभ्यक्तां विगृह्य च । सोमायेति तु मन्त्राभ्यां जुहुयात्कुशपाणिना ४८
स्रुवेण चाऽऽज्यमादाय तदभावेऽथ वा कुशैः।पितृणामेव पात्राणि तूष्णीमेवाभिघारयेत्
अन्नं पाणिहुतं यच्च निदध्यात्तत्स भाजने। गत्वाऽन्यत्र समाचम्य पुनश्चोपविशेदथ ५०
देवपात्रादितश्चाऽऽज्यं सव्येनैवाभिघारयेत्।मूर्धानामिति मन्त्रेण सर्वपात्राणि चैव हि५१
आमास्विति(त्यादिकान्मन्त्रान्स्वयमेव जपन्न हि।पेदथ)। पत्नी चाप्यथ वा पुत्रः शिष्यो वा परिवेषयेत् ५२
अन्नं च पायसं भक्ष्यमाज्यं च व्यञ्जनादिकम्। दद्यादेवाऽऽदितः सर्वं सूपमन्ते च पैतृके
पात्रस्थं प्रोक्षयेदन्नं गायत्र्या चाभिमन्त्र्य च। पाणिभ्यां भाजनं धृत्वा पृथ्वी ते पात्रमुच्चरेत् ५४
इदं विष्णुरनेनान्ने द्विजाङ्गुष्ठं निवेद(श)येत्। स्वाहादितः समुच्चार्य गयायां दत्तमस्त्विति
ये देवास इमं मन्त्रमुच्चार्याथ च पैतृके। संप्रोक्ष्य पूर्ववच्चान्नं प्राचीनावीत्यतः परम् ५६
परिविष्टेषु चान्नेषु हुतशेषं निधाय च। दद्यादन्नं पितृभ्योऽपि पूर्ववत्पितृनामभिः ५७
ये चेहेति च वै मन्त्रं समुच्चार्य ततः परम्। देवांस्तुत्वा पितॄंश्चैव ब्रह्मनिष्ठान्मुनीश्वरान्५८
परिवेषे च(षेचन) पर्यन्तं कारयित्वा यथाविधि। स्मृत्वा हरिहरौ चैव पितृणां मुक्तिहेतवे

---

* इत आरभ्य भवेदित्यन्तं न ख. पुस्तके।

---

१ ख. °क्ष्यमलं च।

देवान्पितॄन्समुद्दिश्य क्रियमाणं हि कर्म यत्। पितॄणां मुक्तये सर्वं ब्रह्मणे विनिवेदयेत् ६०
न्यूनं चैवातिरिक्तं च मन्त्रादीनां भवेद्यदि। तद्दोषपरिहारार्थं गायत्रीं समुदीरयेत् ६१
ततश्चैवापसव्येन मधु वाता जपेदथ। आपोशनार्थमुदकं पितृपूर्वं निवेदयेत् ६२
ईशानादिपदं स्तुत्वा तिष्ठन्नुदङ्मुखश्च हि। दैवे पित्र्ये समुच्चार्य तत्सच्चामृतमस्त्विति ६३
निनयेत्सलिलं चैव द्विजानां पुरतो जलम्। प्रीयतामिति मन्त्रेण पितृरूपी जनार्दनः ६४
अमृतोपस्तरणमसीत्युक्त्वा मन्त्रं पिबेज्जलम्।प्राणाहुतिं च गृह्णीयात्क्रमान्मन्त्रैश्च पञ्चभिः
नासदासीति सूक्तानि भुञ्जानाञ्श्रावयेद्द्विजान्। कृणुष्वेत्यादिसूक्तानि राक्षोघ्नानि
च पञ्च वै ६६
अग्निमीळेऽनुवाकश्च पितृस्तुतिमुदीरताम्। पवित्राणि च सूक्तानि यावद्ब्राह्मणभोजनम्
इच्छातृप्तेषु विप्रेषु गायत्रीं समुदीरयेत्। तृप्ताः स्थ इति तान्पृष्ट्वा ह्यपसव्येन पैतृके ६८
मध्वक्षन्निति मन्त्रं वै मधु संपन्नमित्यथ। पृथग्भुक्तवतो विप्रानन्नं पिण्डार्थमुद्धरेत् ६९
तान्पृच्छेदन्न(थ)संपन्नं शेषं किं क्रियतामिति। लब्ध्वा चैषामनुज्ञां च सहैष्टैर्भुञ्ज(ज्य)ता-
मिति* ७०
उच्छिष्टपुरतो भूमौ जलदर्भास्तिलान्क्षिपेत्। +ये अग्निदग्धामन्त्रेण सर्वान्नं किंचिदु-
त्क्षिपेत् ७१
उत्तराचमनात्पूर्वं पिण्डदानं विधीयते। ऊर्ध्वं वा केचिदिच्छन्ति तच्च संकल्पपूर्वकम् ७२
आग्नेयप्रवणे रेखां लिखेदपहता इति। तामभ्युक्ष्य जलेनाथ कुशानास्तीर्य तच्च तु ७३
अपस्तत्रापसव्येन शुन्धन्तामिति सेचयेत्। तत्र पिण्डत्रयं दद्याद्ये च त्वा पितृपूर्वकम् ७४
अत्रेति चानुमन्त्र्याथ यथोव (थावद्व)र्तयेदुदक्। अप्रदक्षिणमावर्त्य कुर्याद्वायुनिरोधनम्
पुनश्चाऽऽवर्तयेत्तद्वदमी मदन्त चैव हि। भक्षयेच्च चरोः शेषमाघ्रायेदिति केचन ७६
उपवीती समाचम्य प्राचीनावीत्यतः परम्। पिण्डोपरि जलं सिञ्चेच्छुन्धन्तामिति पूर्ववत्
अभ्यङ्क्ष्वेति च वै तैलं दद्यादङ्क्ष्वेति चाञ्जनम्।नामसंबन्धगोत्रादि समुच्चार्य यथाक्रमम्
एतद्व इति मन्त्रेण प्रतिपिण्डं वरं शुभम्। सव्येन चार्चयेत्पिण्डान्गन्धपुष्पाक्षतादिभिः ७९
धूपं दीपं च नैवेद्यं ताम्बूलं चैव दक्षिणाम्। दत्त्वा तिष्ठन्नुपस्तुयात्प्राचीनावीतिना ततः
नमो व इति मन्त्रो वै मनश्चैव पठेदिति। मनोन्विति त्रिभिर्मन्त्रैः किंचित्पिण्डान्प्रवाहयेत्
परेतनेति मन्त्रं वै जपः पिण्डान्तिके ततः। औपासनान्तिके गत्वा जपेदग्नेतमित्यृचम् ८२

---

* इतः परमेतदर्धं ख. पुस्तके–"तामभ्युक्ष्य जलेनाथ कुशानास्तीर्य तच्च तु" इति। + एतदर्धं न विद्यते ख. पुस्तके।

---

१ ख. यथा चेत्यावसेदु°।

पिण्डं तं प्राशयेत्पत्नीं पुत्रार्थी मध्यमं हि चेत्। आधत्तेति च मन्त्रेण धत्ते गर्भं कुमारकम्
नो चेदग्निप्रणीतेऽम्भस्यप्सु वा तान्निक्षिपेदथ। पिण्डप्राशनपक्षे तु विशेषः कथ्यतेऽधुना ८४
तावन्न प्राशयेत्पिण्डं न हि श्राद्धविसर्जनम्। पिण्डप्रक्षेपणं चाम्भस्यप्सु चापि तथैव हि ८५
पिण्डदानं च वै श्राद्धे यत्र कुत्रापि वा भवेत्। गयायां च कृतं मत्वा ह्यात्मनेति निवेदयेत्
प्रक्षालितकरान्विप्रानाचान्तानुपवेशयेत्। जलदर्भाक्षतान्दत्त्वा तथैव पैतृके तिलान् ८७
तत्पाणिष्वक्षतान्दत्त्वा ततो विप्राशिषो भवेत्। स्वस्तीत्युक्त्वा मया दत्तं श्राद्धमक्षय्यमस्त्विति ८८
दक्षिणां च ततो दद्याद्यथाविभवसारतः। दक्षिणारहितं यच्च तच्छ्राद्धं निष्फलं भवेत्
चालयित्वा तु पात्राणि स्वस्तीत्युक्त्वाऽक्षतांस्तिलान्। तत्तत्स्थाने क्षिपेदेषु प्रकिरेदन्नमप्यथ ९०
असंस्कृतेति वै पित्र्ये दैवे चासोमपा इति। दक्षिणां च ततो दत्त्वा पितृसंतुष्टिहेतवे ९१
विसृजेत्पितृपात्रस्थं पिण्डानां पुरतो जलम्। स्वधोच्यतामनेनैव ततः पिण्डान्समुच्चरेत्
वाजे वाजेऽथ मन्त्रेण कुर्याच्छ्राद्धविसर्जनम्। अव्यमंसं पितॄणां च देवानां दक्षिणं स्पृशेत्
पठेदुच्चैरिमं मन्त्रमामा वाजस्य चैव हि। प्रदक्षिणत्रयं कुर्वन्भुञ्जतः पितृसेवितान् ९४
जलमर्चनपात्रस्थान्विसृजेदीक्षतादिकान्। पुरतस्तेन पुत्राः स्युर्याति ब्रह्मपदं च हि ९५
ब्रह्मत्वं च प्रयातेभ्यो गृह्णीयादाशिषः शुभाः। भवत्प्रसादतो भूयाद्धनधान्यादिकं मम
दातारो नोऽभिवर्धन्तां वेदाः सन्ततिरेव नः। श्रद्धा च नो मा व्यगमद्बहु देयं च नोऽस्त्विति ९७
अन्नं च नो बहु भवेदतिथींश्च लभेमहि। याचितारश्च नः सन्तु मा च याचिष्म कंचन ९८
ततो विप्रास्तथेवेति प्रतिवचनमादरात्। वःपदं निर्दिशेयुस्ते ब्राह्मणाश्चैव नःपदे ९९
स्वादुपं सह इत्युक्त्वा मन्त्रानुच्चैः पठेदथ। दक्षिणाभिमुखस्तिष्ठेद्विप्राणां पुरतश्च हि १००
इहैवेति पठेन्मन्त्रं भुंक्तवद्भिर्द्विजैः सह। संतुष्टा आशिषो दद्युर्भुक्तिमुक्तिप्रदाः शुभाः १०१
आयुः प्रजां धनं विद्यां स्वर्गं मोक्षं सुखानि च। प्रयच्छन्तु तथा राज्यं प्रीता नृणां पितामहाः १०२
तेभ्यश्चैवाऽऽशिषो लब्ध्वा नमस्कुर्याद्द्विजांस्तथा। अभ्यज्याऽऽज्य द्विजानां च पादान्प्रक्षालयेत्क्रमात् १०३
अद्य मे सफलं जन्म भवत्पादाब्जवन्दनात्। अद्य मे वंशजाः सर्वे याता वोऽनुग्रहादिवम्

---

१ ख. 'वन्तं प्रा°। २ ख °पि भावयेत्। ग°। ३ ख. 'त्मनि निवे'। ४ ख. °त्त्वा यथा। ५ ख. जेष्वम°। ६ ख. 'ञ्च तान्पितृ°। ७ ख 'दक्षिणादि'।

ताम्बूलं च ततो दद्याद्यथाविभवसारतः । कृताञ्जलिपुटो भूत्वा प्रार्थयेत्ताननेन च*
पत्रशाकादिदानेन क्लेशिता यूयमीदृशाः । तत्क्लेशजातं चित्तात्तु विस्मृत्य क्षन्तुमर्हथ
वसिष्ठसदृशा यूयं सूर्यपर्वसमा तिथिः । आसनादि नमस्कारो भवत्सत्कार एव हि
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम् १०८
मन्त्रहीनं क्रियाहीनं भक्तिहीनं द्विजोत्तमाः । श्राद्धं भवति संपूर्णं प्रसादाद्भवतां मम
अनेन पितृयज्ञेन प्रीयतां भगवानिह । मया भक्त्या कृतं सर्वं तत्सद्ब्रह्मार्पणं भवेत् ११०
वसिष्ठासस्ततो देवा वसिष्ठश्च जपेदिमौ । पितृस्तुतिकरां गाथामिदं पितृभ्य एव च १११
मन्त्राञ्शृण्वत(न्त) इत्येतान्संतुष्टाः पितरो गृहे । दत्त्वाऽभीष्टफलं कर्तुं(र्तुः) प्रयान्तीदमनुत्तमम् ११२
अनेन विधिना चैव यः श्राद्धं कुरुते द्विजः । भुक्त्वेह सकलान्कामान्सोऽपि सायुज्यमाप्नुयात् ११३

इत्याश्वलायनधर्मशास्त्रे श्राद्धप्रकरणम् ॥ २३ ॥

(अथ श्राद्धोपयोगिप्रकरणम् २४)

पितृयज्ञमकृत्वा तु पित्रोरेकाब्दिकं यदि । यज्ञान्यः कुरुते पश्च स याति नरकं ध्रुवम् १
कुरुते ब्रह्मयज्ञं च श्राद्धात्पूर्वं मृतेऽहनि । निराशाः पितरस्तस्य श्राद्धान्नं न लभन्ति ते २
तर्पणं कुरुते पित्रोः श्राद्धात्पूर्वं मृतेऽहनि । निराशाः पितरस्तस्य स च गच्छेदधोगतिम्
कुर्यात्पञ्च महायज्ञान्निवृत्ते श्राद्धकर्मणि । पित्रोराब्दिक एवाऽऽहुराचार्याः शौनकादयः ४
अनग्निको यदा ज्येष्ठः कनिष्ठः साग्निको यदि । अग्नौकरणहोमं तु ज्येष्ठः कुर्यात्कथंचन ५
कनिष्ठस्य च गृह्याग्नावग्नौकरणहोमकम् । तदाज्ञयाऽग्रजः कुर्यादिति केचिद्वदन्ति हि ६
संसृष्टा भ्रातरो यत्र श्राद्धे स्युर्यदि चैव हि । तत्रायं मुनिभिः प्रोक्तो विधिर्नैवान्यथा भवेत् ७
बह्वृचो ब्रह्मचारी वा तथैवानग्निकोऽपि वा । अग्नौकरणहोमाख्यं कुर्याच्चैव पितुः परे ८

---

* इत उत्तरमेतदर्धं ख. पुस्तके—"ततो विप्रास्तथैवेति प्रतिवचनमादरात्" इति ।

---

१ ख. भवेत्सत्का° ।

पञ्चै(च)वा स्युर्द्विजाः शस्ता द्वौ च पित्रोर्मृतेऽहनि। द्वौ दैवेऽथ त्रयः पित्र्य एकैको वोभयत्र तु ९

चत्वारश्चेद्विजाः श्राद्धे दैवे चैको भवेत्तदा। त्रयः पित्र्ये भवन्त्येके वदन्त्येव हि संकटे अथ वाऽपि त्रयो वाऽपि एकः स्यात्पितृषु त्रिषु। द्वौ दे(दै)वौ चैव तु स्यातां विप्रावेके वदन्ति हि ११

द्वितीयाऽऽवाहने षष्ठी संकल्पे चाऽऽसने क्षणे। चतुर्थ्याच्छादने चान्ने शेषाः संबुद्धयः स्मृताः १२

अन्नदाने विशेषः स्यात्संबुद्धिः प्रथमाऽथ वा। अन्ते(न्ये) चैव चतुर्थी तु वदन्त्येके महर्षयः देवानामासनं दद्याद्दक्षिणे चाऽऽविकं कुशान्। कृत्वा द्विगुणभुग्नांस्तान्पितॄणां वाम एव हि १४

विप्रान्निमन्त्रयेच्छ्राद्धे वह्वृचान्वेदपारगान्। तदभावे तु चैवान्यशाखिनो वाऽपि चैव हि मन्त्रैश्चैव स्वशाखोक्तैः कर्म कुर्याद्यथाविधि। अन्यथा कर्महानिः स्याद्बह्वृचानामयं विधिः १६

कर्मणां याजुषादीनां स्वस्वशाखा न विद्यते। ऋक्शाखाविहितं कर्म समानं सर्वशाखिनाम् १७

बह्वृचानां तु यत्कर्म यदि स्यादन्यशाखया। पुनश्चैवापि तत्कर्म कुर्याद्बह्वृचशाखया १८

हित्वा स्वस्य द्विजो वेदं यस्त्वधीते परस्य तु। शाखाखण्डः स विज्ञेयः सर्वकर्मबहिष्कृतः रोगादिरहितो विप्रो धर्मज्ञो वेदपारगः। भुञ्जीयादमलं श्राद्धे साग्निकः पुत्रवानपि २०

पितृमानेव भुञ्जीयाच्छ्राद्धमिन्दुक्षये द्विजः। तृप्ताः स्युः पितरस्तेन दाता स्वर्गमवाप्नुयात् २१

श्राद्धकर्ता न भुञ्जीयात्परश्राद्धे विधुक्षये। भुङ्क्ते चेत्पितरो यान्ति दाता भोक्ताऽप्यधोगतिम् २२

दर्शेष्टि(र्शाष्ट)काव्यतीपातो(ता) वैधृतिश्च महालयः। युगाश्च मनवः श्राद्धकालाः संक्रान्तयस्तथा २३

गजच्छायोपरागश्च षष्ठी या कपिला तथा। अर्धोदयादयश्चैव श्राद्धकालाः स्मृता बुधैः २४

संभूते च नवे धान्ये श्रोत्रिये गृहमागते। आचार्याः केचिदिच्छन्ति श्राद्धं तीर्थे च सर्वदा श्राद्धकालेषु सर्वेषु कुर्याच्छ्राद्धं च शक्तितः। विशेषतो मृताहे तु पित्रोश्चैव विधीयते २६

मोहान्न कुरुते श्राद्धं मातापित्रोर्मृतेऽहनि। निराशाः पितरो यान्ति दुर्गतिं चापि वै सुतः अज्ञानाद्वा प्रमादाद्वा यो मृताहमतिक्रमेत्। स याति नरकं घोरं यावदाभूतसंप्लवम् २८

अतिक्रमं(मो) मृताहस्य दोषः स्यात्सूतकं विना। न कुर्याच्छ्राद्धमाशौचे प्रवदन्ति महर्षयः २९

आचरेद्विधिवच्छ्राद्धं मातापित्रोर्मृतेऽहनि। पितरस्तेन तृप्यन्ति गच्छन्ति पदमुत्तमम् ३०
सदाचारपरो विप्रः कृपालुः श्राद्धकृत्तथा। आत्मनिष्ठोऽर्थलोकेषु तारयेत्तरति स्वयम्*
इत्याश्वलायनधर्मशास्त्रे श्राद्धोपयोगिप्रकरणम् ॥ २४ ॥

समाप्तेयं लघ्वाश्वलायनस्मृतिः।

---

* इत उत्तरं कानिचिद्वचनानि ख. पुस्तक उपलभ्यन्ते—"श्राद्धभुग्द्विजपङ्क्तौ च यो भुङ्क्ते श्राद्धकृद्द्विजः। स याति नरकं घोरं पितरो यान्त्यधोगतिम्। निर्वर्त्य विधिवच्छ्राद्धं दर्शादिषु युगादिषु। इष्टैः सह द्विजो भुङ्क्ते स याति परमां गतिम्। ब्राह्मणः कुरुते कर्म श्रुतिस्मृत्युपपादितम्। स तरेत्तारयत्यन्यान्प्रवदन्ति महर्षयः। न कुर्यात्कर्मणो लोपं न न्यूनं नैत्यकस्य च। उपर(द्र)वं विना विप्रः कर्मकृत्स्यात्सुव्रती। कर्म कर्तुमशक्तश्चेद्यथा लोके तु वैदिकम्। कुर्याद्धर्मान्पुराणोक्तानसमर्थोऽपि वैदिके। अनमयस्तु ये विप्रास्तेषां श्रेयोऽभिधीयते। व्रतोपवासनियमैर्नानादानैस्तथा नृप" इति।

ॐ तत्सद्ब्रह्मणे नमः ।

लिखितस्मृतिः ।

इष्टापूर्ते तु कर्तव्ये ब्राह्मणेन प्रयत्नतः । इष्टेन लभते स्वर्गं पूर्तं मोक्षमवाप्नुयात् १
एकाहमपि कर्तव्यं भूमिष्ठमुदकं शुभम् । कुलानि तारयेत्सप्त यत्र गौर्विंतृषी(षा) भवेत् २
भूमिदानेन ये लोका गोदानेन च कीर्तिताः । ताँल्लोकान्प्राप्नुयान्मर्त्यः पादपानां प्ररोपणे ३
वापीकूपतडागानि देवतायतनानि च । पतितान्युद्धरेद्यस्तु स पूर्तफलमश्नुते ४
अग्निहोत्रं तपः सत्यं वेदानां चैव पालनम् । आतिथ्यं वैश्वदेवं च इष्टमित्यभिधीयते ५
इष्टापूर्ते द्विजातीनां सामान्यो धर्म उच्यते । अधिकारी भवेच्छूद्रः पूर्ते धर्मे न वैदिके ६
यावदस्थि मनुष्यस्य गङ्गातोयेषु तिष्ठति । तावद्वर्षसहस्राणि स्वर्गलोके महीयते ७
देवतानां पितॄणां च जले दद्याज्जलाञ्जलीन् । असंस्कृतमृतानां च स्थले दद्याज्जलाञ्जलिम् ८
एकादशाहे प्रेतस्य यस्य चोत्सृज्यते वृषः । मुच्यते प्रेतलोकात्तु पितृलोकं स गच्छति ९
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत् । यजेत वाऽश्वमेधेन नीलं वा वृषमुत्सृजेत् १०
वाराणस्यां प्रविष्टस्तु कदाचिन्निष्क्रमेद्यदि । हसन्ति तस्य भूतानि अन्योन्यं करताडनैः ११
गयाशिरे तु यत्किंचिन्नाम्ना पिण्डं तु निर्वपेत् । नरकस्था दिवं यान्ति स्वर्गस्था मोक्षमाप्नुयुः १२
आत्मनो वा परस्यापि गयाकूपे यतस्ततः । यन्नाम्ना पातयेत्पिण्डं तं नयेद्ब्रह्म शाश्वतम् १३
लोहितो यस्तु वर्णेन शङ्खवर्णखुरः स्मृतः । लाङ्गूलशिरसोश्चैव स वै नीलवृषः स्मृतः १४
नवश्राद्धं त्रिपक्षं च द्वादशैव तु मासिकम् । षण्मासौ(से)चाऽऽब्दिकं चैव श्राद्धान्येतानि षोडश १५
यस्यैतानि न कुर्वीत एकोद्दिष्टानि षोडश । पिशाचत्वं स्थिरं तस्य दत्तैः श्राद्धशतैरपि १६
सपिण्डीकरणादूर्ध्वं प्रतिसंवत्सरं द्विजः । मातापित्रोः पृथक्कुर्यादेकोद्दिष्टं मृतेऽहनि १७
वर्षे वर्षे तु कर्तव्यं मातापित्रोस्तु संततम् । अदैवं भोजयेच्छ्राद्धं पिण्डमेकं तु निर्वपेत् १८
संक्रान्तावुपरागे च पर्वोत्सवमहालये । निर्वाप्यास्तु त्रयः पिण्डा एकतस्तु क्षयेऽहनि १९
एकोद्दिष्टं परित्यज्य पार्वणं कुरुते द्विजः । अकृतं तद्विजानीयात्स मातृ(ता)पितृघातकः

---

१ क. °र्तेन मोक्षमाप्नु° । २ ख. ग. °ञ्जलिम् । अ° । ३ ख. ग °याक्षेत्रे य° । ४ ख. ग. °खुरस्तथा । लां । ५ ख. °रसश्चै° । ६ क. °वृषस्तु सः । न° । ७ क. ख. ग. त्रिपक्षे । ८ ख. ग. °दशस्वेव मा° । ९ क. घ. °ष्मासश्चाऽऽब्दि° । १० ख. ग. पर्वण्यपि म° । ११ क. निर्वपेत्तत्र यः पिण्डानेक° ।

अमावास्यां(यां तु) क्षयो यस्य प्रेतपक्षेऽथ वा यदि । सपिण्डीकरणादूर्ध्वं तस्योक्तः पार्वणो विधिः २१

त्रिदण्डग्रहणादेव प्रेतत्वं नैव जायते । अहन्येकादशे प्राप्ते पार्वणं तु विधीयते २२

यस्य संवत्सरादर्वाक्सपिण्डीकरणं स्मृतम् । *प्रत्यहं तत्सोदकुम्भं दद्यात्संवत्सरं द्विजः
पत्या चैकेन कर्तव्यं सपिण्डीकरणं स्त्रियाः ॥ २३

+पितामह्याऽपि तत्तस्मिन्सत्येवं तु क्षयेऽहनि । तस्यां सत्यां प्रकर्तव्यं तस्याः श्वश्रूरिति निश्चितम् २४

विवाहे चैव निर्वृत्ते चतुर्थेऽहनि रात्रिषु । एकत्वं सा गता भर्तुः पिण्डे गोत्रे च सूतके २५

स्वगोत्राद्भ्रश्यते नारी उद्वाहात्सप्तमे पदे । भर्तृगोत्रेण कर्तव्यं(व्या) दानं पिण्डोदक-क्रिंयाः २६

द्विमातुः पिण्डदानं[1] तु पिण्डे पिण्डे द्विनामतः । षण्णां देयास्त्रयः पिण्डा एवं दाता न मुह्यति २७

अथ चेन्मन्त्रविधुक्तः शारीरैः पङ्क्तिदूषणैः । अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः २८

अग्नौकरणशेषं तु [†विश्वेदेवादि हूयते । अग्न्यभावे तु विप्रस्य पाणावेवोपपादयेत् २९

यो ह्यग्निः स द्विजो विप्रैर्मन्त्रदर्शिभिरुच्यते ॥ ३०

अजस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे । रजते च सुवर्णे च नित्यं वसति पावकः ३१]

यत्र यत्र प्रदातव्यं श्राद्धं कुर्वीत पार्वणम् । तत्र मातामहानां च कर्तव्यमुभयं सदा ३२

अपुत्रा ये मृताः केचित्पुरुषा वा स्त्रियोऽपि वा । एभ्य एव प्रदातव्यमेकोद्दिष्टं न पार्वणम्

यस्मिन्नाशिगते सूर्ये विपत्तिः स्याद्द्विजन्मनः । तस्मिन्नहनि कर्तव्यं दानं पिण्डोदकक्रिया

वर्षवृध्यभिषेकादि कर्तव्यमधिके न तु । अधिमासे तु पूर्वं स्याच्छ्राद्धं संवत्सरादपि ३५

स एवं[2] हेयोद्दिष्टस्य येन केन तु कर्मणा । अभिघातान्तरं कार्यं तत्रैवाहः कृतं भवेत्(?) ३६

शालाग्नौ पच्यते ह्यन्नं लौकिके वाथ संशयः । यस्मिन्नेव पचेदन्नं तस्मिन्होमो विधीयते

---

* एतदर्धं न क घ. पुस्तकयोः । + एतद्वचनस्थानेऽयं पाठः क. घ पुस्तकयोः—" पितृमह्यादि परस्तेनैव प्रपितामही " इति । † धनुश्चिह्नान्तर्गतग्रन्थस्थाने ख. ग. पुस्तकयोरयं पाठः—" पितृपात्रे प्रदापयेत् । प्रतिपाद्ये पितॄणां च न दद्याद्वैश्वदेविके । अनग्निको यदा विप्रः श्राद्धं करोति पार्वणम् " इति ।

---

१ ख. ग. °क्रिया । द्वि° । २ क. °नं स्यात्पिण्डेपि° । घ. °नं चेत्पिण्डेऽपि° । ३ ख. ग. °अदोषं । ४ ख. ग. °व्यमभ° । ५ क. °व्यमपि तद्दिने । अ° । ६ घ. एवाहोरादिष्ट° । ७ क. °वहोरादिष्ट° । ८ ख. पचते । ९ ख. °के नापि निश्चशः । य° ।

वैदिके लौकिके वाऽपि नित्यं हुत्वा ह्यतन्द्रितः। वैदिके स्वर्गमाप्नोति लौकिके हन्ति किल्बिषम् ३८

अग्नौ व्याहृतिभिः पूर्वं हुत्वा मन्त्रैस्तु शाकलैः। संविभागं तु भूतेभ्यस्ततोऽश्नीयादनग्निमान् ३९

उच्छेषणं तु नोत्तिष्ठेद्यावद्विप्रविसर्जनम्। ततो गृहबलिं कुर्यादिति धर्मो व्यवस्थितः ४०

दर्भाः कृष्णाजिनं मन्त्रा ब्राह्मणाश्च विशेषतः। नैते निर्माल्यतां यान्ति नियोक्तव्याः पुनः पुनः ४१

पानमाचमनं कुर्यात्कुशपाणिः सदा द्विजः। भुक्त्वाऽप्युच्छिष्टतां याति एष एव विधिः स्मृतः ४२

पान आचमने चैव तर्पणे दैविके सदा। कुशहस्तो न दुष्येत यथा पाणिस्तथा कुशः ४३

वामपाणौ कुशं कृत्वा दक्षिणेन उपस्पृशेत्। आच(चा)मन्ति च ये मूढा रुधिरेणाऽऽचमन्ति ते ४४

नीवीमध्येषु ये दर्भा ब्रह्मसूत्रेषु ये कृताः। पवित्रांस्तान्विजानीयाद्यथा कायस्तथा कुशाः

पिण्डे कृतास्तु ये दर्भा यैः कृतं पितृतर्पणम्। मूत्रोच्छिष्टपुरीषं च तेषां त्यागो विधीयते

दैवपूर्वं तु यच्छ्राद्धमदैवं चापि यद्भवेत्। ब्रह्मचारी भवेत्तत्र कुर्याच्छ्राद्धं तु पैतृकम् ४७

मातुः श्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम्। ततो मातामहानां च वृद्धौ श्राद्धत्रयं स्मृतम्

क्रतुर्दक्षो वसुः सत्यः कालकामौ धुरिलोचनौ। पुरूरवार्द्रवाश्चैव विश्वे देवाः प्रकीर्तिताः

आगच्छन्तु महाभागा विश्वे देवा महाबलाः। ये यत्र विहिताः श्राद्धे सावधाना भवन्तु ते

इष्टिश्राद्धे क्रतुर्दक्षो वसुः सत्यश्च वैदिके। कालः कामोऽग्निकार्येषु काम्येषु धुरिलोचनौ

पुरूरवार्द्रवश्चैव पार्वणेषु नियोजयेत्॥ ५२

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता। नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम्। अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ५४

मातुः प्रथमतः पिण्डं निर्वपेत्पुत्रिकासुतः। द्वितीयं तु पितुस्तस्यास्तृतीयं तु पितुः पितुः

मृन्मयेषु च पात्रेषु श्राद्धे यो भोजयेत्पितॄन्। अन्नदाता पुरोधाश्च भोक्ता च नरकं व्रजेत

---

१ घ. नोद्दिष्टेया°। २ ख. ग °क्त्वा नोच्छि°। ३ घ. वैदिके। ४ ख. ग. कुशान्कृत्वा। ५ ख. ग. °त्°। विनाचमषन्तिये। ६ घ. °धिरानाच°। ७ क. स्थिताः। ८ क. °रीषे च। ९ क. कामकालौ°। १० क. °वाद्रवश्चै°। ख. ग. °वामाद्रवा°। ११ क. कामकालोऽग्नि°। १२ ख. °षु अध्वरे धु°। १३ ख. ग. °वामाद्रवाश्च पा°। १४ ग. °काकर्म°।

अलाभे मृन्मयं दद्यादनुज्ञातस्तु तैर्द्विजैः । घृतेन प्रोक्षणं[1] कुर्यान्मृदः पात्रं पवित्रकम् ५७
श्राद्धं कृत्वा परश्राद्धे यस्तु भुञ्जीत विह्वलः । पतन्ति पितरस्तस्य लुप्तपिण्डोदकक्रियाः
श्राद्धं दत्त्वा च भुक्त्वा च अध्वानं योऽधिगच्छति । भवन्ति पितरस्तस्य तन्मासं पांसु-
भोजनाः ५९
पुनर्भोजनमध्वानं भाराध्ययनमैथुनम् । दानं प्रतिग्रहं होमं श्राद्धभुक्त्वष्ट वर्जयेत् ६०
अध्वगामी भवेदश्वः पुनर्भोक्ता[2] च वायसः । कर्मकृज्जायते दासः स्त्रीसङ्गेन[3] च सूकरः ६१
दशकृत्वः पिबेदा(चा)पः सावित्र्या चाभिमन्त्रिताः । ततः संध्यामुपासीत शुध्येत तद-
नन्तरम् ६२
आर्द्रवासास्तु यत्कुर्याद्बहिर्जानु च यत्कृतम्[4] । तत्सर्वं निष्फलं कुर्याज्जपहोमप्रतिग्रहम्
चान्द्रायणं नवश्राद्धे पराको मासिके तथा । पक्षत्रये तु कृच्छ्रं स्यात्षण्मासे कृच्छ्रमेव च
ऊनाब्दिके त्रिरात्रं स्यादेकाहः[5] पुनराब्दिके । श्वावे मासस्तु भुक्त्वा वा पादकृच्छ्रो विधी-
यते ६५
सर्पविप्रहतानां च शृङ्गिदंष्ट्रिसरीसृपैः । आत्मनस्त्यागिनां चैव श्राद्धमेषां न कारयेत्६६
गोभिर्हतं तथोद्धृद्धं ब्राह्मणेन तु घातितम्[6] । तं स्पर्शयन्ति ये विप्रा गोजाश्वाश्च भवन्ति ते
अग्निदाता तथा चान्ये पाशच्छेदकराश्च ये । तप्तकृच्छ्रेण शुध्यन्ति मनुराह प्रजापतिः
त्र्यहमुष्णं पिबेदा(चा)पस्त्र्यहमुष्णं पयः पिबेत् । त्र्यहमुष्णं घृतं पीत्वा वायुभक्षो दिनत्र-
यम् ६९
गोभूहिरण्यहरणे स्त्रीणां क्षेत्रगृहस्य च । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ७०
उद्यताः सह धावन्ते सर्वे ये शस्त्रपाणयः । यद्येकोऽपि हनेत्तत्र सर्वे ते ब्रह्मघातकाः ७१
बहूनां शस्त्रघातानां यद्येको मर्मघातकः । सर्वे ते शुद्धिमि(मृ)च्छन्ति स एको ब्रह्मघातकः
पतितान्नं यदा भुङ्क्ते भुङ्क्ते चण्डालवेश्मनि । स मासार्धं चरेद्वारि मासं कामकृतेन तु ७३
यो येन पतितेनैवं संसर्गं याति मानवः । स तस्यैव व्रतं कुर्यात्तत्तत्स(त्संस)र्गविशुद्धये
ब्रह्महा(ह) पातकिस्पर्शे स्नानं येन विधीयते । तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत्
ब्रह्महा च सुरापायी तथैव गुरुतल्पगः । महान्ति पातकान्याहुस्तत्संसर्गी[7] च पञ्चमः ७६
स्नेहाद्वा यदि वा[8] लोभाद्भयादज्ञानतोऽपि वा । कुर्वन्त्यनुग्रहं ये तु तत्पापं तेषु गच्छति७७
उच्छिष्टोच्छिष्टसंस्पृष्टो ब्राह्मणस्तु कदाचन । तत्क्षणात्कुरुते स्नानमाचमेन[9] शुचिर्भवेत्

---

१ ख. ग. °णं कार्यं मृ° । २ क. घ. °ध्वना च भ° । ३ क. घ. °नर्भुक्तेन वा° । ४ ख. ग. घ. °म् । सर्वं तन्निष्फ° । ५ घ. ङ. °काहं पु° । ६ ख. ग. तं स्पृशन्ति च ये । ७ ख. ग. °न्ते यद्येको धर्म-घातकः । ८ ख. ग. °व स्पर्शे स्नानं विधी° । ९ क. घ. °संयोगी च । १० क. वा मोहाद्भ° । ११ क. °माचामेन विशुध्यति । कु° ।

कुब्जवामनष(प)ण्डेषु गद्गदेषु जडेषु च। जात्यन्धे बधिरे मूके न दोषः परिवेदने ७९
क्लीबे देशान्तरस्थे पतिते प्रव्रजितेऽपि वा। योगशास्त्राभियुक्ते च न दोषः परिवेदने ८०
पूरणे कूपवापीनां वृक्षच्छेदनपातने। विक्रीणीते अपि ह्यश्वं[1] गोवधं तस्य निर्दिशेत् ८१
पादेऽङ्गरोमवपनं द्विपादे श्मश्रु केवलम्। तृतीये तु शिखावर्जं[2] शिखाछेदश्चतुर्थके ८२
चण्डालोदकसंस्पर्शे स्नानं येन विधीयते। तेनैवोच्छिष्टसंस्पृष्टः प्राजापत्यं समाचरेत् ८३
चण्डालघटभाण्डस्थं यत्तोयं पिबते द्विजः। तत्क्षणात्क्षिपते यस्तु प्राजापत्यं समाचरेत् ८४
यदि[3] न क्षिपते तोयं शरीरे तस्य जीर्यति। प्राजापत्यं न दातव्यं कृच्छ्रं सांतपनं चरेत् ८५
चरेत्सांतपनं विप्रः प्राजापत्यं तु क्षत्रियः। तदर्धं तु चरेद्वैश्यः पादं शूद्रे तु दापयेत् ८६
रजस्वला यदा स्पृष्टा श्वानसूकरवायसैः। उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति[4] ८७
आजानुतः स्नानमात्रमानाभेस्तु विशेषतः। अत ऊर्ध्वं त्रिरात्रं स्यान्मदिरास्पर्शने मतम्[5] ८८
बालश्चैव दशाहे तु पञ्चत्वं यदि गच्छति। सद्य एव विशुध्येत नाशौचं नोदकक्रिया ८९
शावसूतक उत्पन्ने सूतकं तु यदा भवेत्। शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी ९०
षष्ठेन शुध्येतैकाहं पञ्चमे त्व(त्र्य)हमेव तु। चतुर्थे सप्तरात्रं स्यात्त्रिपुरुषं दशमेऽहनि[6] ९१
मरणारब्धमाशौचं संयोगो यस्य नाग्निभिः। आदाहात्तस्य विज्ञेयं यस्य वैतानिको विधिः ९२
आममांसं घृतं क्षौद्रं स्नेहाश्च फलसंभवाः। अन्त्यभाण्डस्थिता ह्येते निष्क्रान्ताः शुचयः स्मृताः ९३
मार्जनीरजमेष(षा)ण्डं[7] स्नानवस्त्रघटोदकम्[8]। नवाम्भसि तथा चैव हन्ति पुण्यं दिवाकृतम्[9] ९४
दिवा कपित्थच्छायायां रात्रौ दधिशमीषु च। धात्रीफलेषु सर्वत्र अलक्ष्मीर्वसते सदा[10] ९५
यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमो गायत्र्यष्टशतं जपेत् ९६

इति लिखितर्षिप्रोक्तं धर्मशास्त्रं समाप्तम्॥

समाप्तेयं लिखितस्मृतिः।

---

१ ख. ग. °णीत गोजं चाश्वं। २ क. °र्जे चतुर्थे तु शिखा छिदेत्। च°। ख. ग. °र्जे चतुर्थे तु शिखावपः। च°। ३ ख. ग. °दि नोत्क्षिप्यते। ४ ख. ग. °ति। अज्ञानतः। ५ ख. ग. °स्यात्तदीयस्प°। ६ ख. मतः। ७ क. शुध्यत्येका°। ८ ख. °मे ष्वहमे°। ९ ख. ग. °हषे द°। १० क. °नि। अदाहारभ्यमा°। ११ ग. °जसा सक्के स्ना°। १२ क. °मेषाण्डास्ना°। १३ ख. ग. °दके। न° १४ ख. ग. °धिषु सक्तुषु। धा°। १५ ङ. सप्तम्यामल°।

ॐ तत्सद्ब्रह्मणे नमः ।

वसिष्ठस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

अथातः पुरुषनिःश्रेयसार्थं धर्मजिज्ञासा ॥ १ ॥ ज्ञात्वा चानुतिष्ठन्धार्मिकः प्रशस्यतमो भवति लोके, प्रेत्य चेह स्वर्गं लोकं समश्नुते ॥ २ ॥ श्रुतिस्मृतिविहितो धर्मः ॥ ३ ॥ तदलाभे शिष्टाचारः प्रमाणम् ॥ ४ ॥ शिष्टः पुनरकामात्मा ॥ ५ ॥ अगृह्यमाणकारणो धर्मः ॥ ६ ॥ आर्यावर्तः प्रागादर्शात्प्रत्यक्कालकवनादुदक्पारियात्रादक्षिणेन हिमवत उत्तरेण च विन्ध्यस्य ॥ ७ ॥ तस्मिन्देशे ये धर्मा ये चाऽऽचारास्ते सर्वत्र प्रत्येतव्याः ॥ ८ ॥ न त्वन्ये प्रतिलोमकल्पधर्माणः ॥ ९ ॥ एतदार्यावर्तमित्याचक्षते ॥ १० ॥ गङ्गायमुनयोरन्तरेऽप्येके ॥ ११ ॥ यावद्वा कृष्णमृगो विचरति तावद्ब्रह्मवर्चसमित्यन्ये ॥ १२ ॥ अथापि भाल्लविनो निदाने गाथामुदाहरन्ति ॥ १३ ॥

पश्चात्सिन्धुर्विहरिणी सूर्यस्योदयनं पुरः । यावत्कृष्णोऽभिधावति तावद्वै ब्रह्मवर्चसम् ।
त्रैविद्यवृद्धा यं ब्रूयुर्धर्मं धर्मविदो जनाः । पवने पावने चैव स धर्मो नात्र संशय इति १५

देशधर्मजातिधर्मकुलधर्मांश्श्रुत्यभावादब्रवीन्मनुः ॥ १६ ॥ सूर्याभ्युदितः सूर्याभिनिर्मुक्तः कुनखी श्यावदन्तः परिवित्तिः परिवेत्ताऽग्रेदिधिषूर्दिधिषूपतिर्वीरहा ब्रह्मोज्झ इत्येनस्विनः ॥ १७ ॥ पञ्च महापातकान्याचक्षते ॥ १८ ॥ गुरुतल्पं सुरापानं भ्रूणहत्या ब्राह्मणसुवर्णापहरणं पतितसंयोगश्च ॥ १९ ॥ ब्राह्मेण वा यौनेन वा ॥ २० ॥ अथाप्युदाहरन्ति ॥ २१ ॥

संवत्सरेण पतति पतितेन सहाऽऽचरन् । याजनाध्यापनाद्योनान्न तु यानासना[शना]
दिति २२

---

१ घ. ङ. छ. °सार्थध° । २ ङ. छ. °ज्ञासा ज्ञा° । ३ ग. °त्यवावि° । ४ ख. घ. ङ. छ. च वि° । ५ ख. ग. घ. ङ. °म् । दक्षि° । ६ क. °दर्शनात्प्रयक्कालवचना° । ७ ख. ग. °स्य ये ध° । घ. ङ. °स्य च ये ध° । ८ ख. ग. घ. ङ. छ सर्वे प्र° । ९ ख. घ छ. नत्वन्ये । १० च. °कधर्माणाम् । ग° । ११ ग. °धर्माः । ए° । १२ ख. ग. घ. ङ· °न्तराऽप्ये° । १३ क. °ह्मावर्तामि° । १४ ख. ग. घ. ङ. छ °मिति । अ° । १५ क. °विभोनि° । १६ घ. ङ. °नो गा° । १७ च. °विधारणी १८ । ख. पुनः । ग. पुराः । छ. भुवः । १९ क. °र्चसः । त्रै° । २० क. °नाः । यजने पावने चै° । २१ ङ. °र्मानभा° । २२ ग. °दण्डः । परिवि° २३ ख. ब्रह्मघ्न इत्येत एन° । ग. ब्रह्मघ्न इत्येत एन° । २४ ख. ग. घ. ङ. °संप्रयो° । २५ क. ख. °योगं च ब्रा° । २६ क. °नादानान्न । २७ ख. ग. °नादन्नपानासनादपि । घ. ङ. छ. °नात्...।

+योऽग्नीनपविध्येद्गुरुं च यः प्रतिजघ्नुयान्नास्तिको नास्तिकवृत्तिः सोमं च विक्रीणीयादित्युपपातकानि ॥२३॥ तिस्रो ब्राह्मणस्य भार्या वर्णानुपूर्व्येण, द्वे राजन्यस्य, एकैका वैश्यशूद्रयोः॥ २४ ॥शूद्रामप्येके, मन्त्रवर्जं तद्वत्॥ २५ ॥ तथा न कुर्यात्॥ २६ ॥अतो हि ध्रुवः कुलापकर्षः प्रेत्य चास्वर्गः॥२७॥षड्विवाहाः ॥ २८॥ब्राह्मो दैव आर्षो गान्धर्वः क्षात्रो मानुषश्चेति ॥ २९ ॥ इच्छत उदकपूर्वं यां दद्यात्स ब्राह्मः ॥ ३० ॥ यज्ञतन्त्रे वितत ऋत्विजे कर्म कुर्वते कन्यां दद्यादलंकृत्य यं दैवमित्याचक्षते ॥ ३१ ॥ गोमिथुनेन चाऽऽर्षः ॥ ३२ ॥ सकामां कामयमानः सदृशीं यो निमु(रु)द्यात्स गान्धर्वः ॥ ३३ ॥ यां बलेन सहसा प्रमथ्य हरन्ति स क्षात्रः ॥ ३४॥ पणित्वा धनक्रीतां स मानुषः ॥३५॥ तस्माद्दुहितृमतेऽधिरथं शतं देयमितीह क्रयो विज्ञायते ॥ ३६ ॥ या पत्युः क्रीता सत्यथान्यैश्चरतीति ह चातुर्मास्येषु ॥ ३७॥ अथाप्युदाहरन्ति—॥ ३८ ॥

विद्या प्रनष्टा पुनरभ्युपैति जातिप्रणाशे त्विह सर्वनाशः।
कुलापदेशेन ह्ययोऽपि पूज्यस्तस्मात्कुलीनां स्त्रियमुद्वहन्ति। इति ॥३९॥

त्रयो वर्णा ब्राह्मणस्य वशे वर्तेरन्॥४०॥तेषां ब्राह्मणो धर्मान्प्रब्रूयात्॥४१॥तं राजा चानुशिष्यात् ॥ ४२ ॥ राजा तु धर्मेणानुशासत्षष्ठं षष्ठं धनस्य हरेत् ॥ ४३ ॥ अन्यत्र ब्राह्मणात् ॥ ४४॥ इष्टापूर्तस्य तु षष्ठमंशं भजतीति ह ब्राह्मणो वेदमाद्यं करोति, ब्राह्मण आपद उद्धरति तस्माद्ब्राह्मणोऽनाद्यः ॥ ४५ ॥ सोमोऽस्य राजा भवतीति ह प्रेत्य चाऽऽभ्युदयिकमिति ह विज्ञायते ॥ ४६ ॥

इति वासिष्ठे धर्मशास्त्रे प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयोऽध्यायः।)

चत्वारो वर्णा ब्राह्मणक्षत्रियवैश्यशूद्राः ॥१॥ त्रयो वर्णा द्विजातयो ब्राह्मणक्षत्रियवैश्याः॥२॥ तेषां मातुरग्रेऽधिजननं द्वितीयं मौञ्जीबन्धने ॥ ३ ॥

+ इत आरभ्य चातुर्मास्येष्वित्यन्तग्रन्थो न विद्यते ख. ग. घ. ङ. छ. पुस्तकेषु।

---

१ च. °पूर्वेण। २ क. °प्येकमन्त्रवर्जं तदु तथा। ३ क. °कर्षाः प्रे°। ४ क. तं। ५ क. यो न मुच्यात्स। ६ क. पाणित्वा। ७ क. °तीह चातुर्मास्ये। अ°। ८ ग. °द्या विनाशे पु°। ९ ग. °तिज्ञाति°। १० च. °तिकुलप्र°। ११ च. निर्देशेन। १२ च. °न्। ब्रा°। १३ ख. घ. ङ. छ. °र्मान्यद्ब्रूया°। १४ ख. ग. तत्। १५ ख. ग. °नुतिष्ठेत्। १६ च. °ष्ठं ध°। १७ क. °शं हरति भ°। १८ च. °माद्यं क°। १९ क. °णो रायः सो°। २० च. °ते ह विज्ञायत इति। इति वा°। २१ च. °ग्रे विज°। २२ ग. °न्धनम्। त°। २३ च. °ने। अत्रा°।

तत्रास्य माता सावित्री पिता त्वाचार्य उच्यते ॥ ४

वेदप्रदानात्पितेत्याचार्यमाचक्षते ॥ ५ ॥ अथाप्युदाहरन्ति ॥ ६ ॥ द्वयमु वै ह पुरुषस्य रेतो ब्राह्मणस्योर्ध्वं नाभेरर्वाचीनमन्यद्यद्यदूर्ध्वं नाभेस्तेनास्यानौरसी प्रजा जायते ॥ ७ ॥ यदुपनयति जनन्यां जनयति यत्साधू करोति ॥ ८ ॥ अथ यदर्वाचीनं नाभेस्तेनेहास्यौरसी प्रजा जायते ॥ ९ ॥ तस्माच्छ्रोत्रियमनूचानमप्रजोऽसीति न वदन्तीति ॥ १० ॥ हारीतोऽप्युदाहरति ॥ ११ ॥

न ह्यस्य विद्यते कर्म किंचिदामौञ्जिबन्धनात् । वृत्त्या शूद्रसमो ज्ञेयो यावद्वेदेन जायत इति १२

अन्यत्रोदककर्मस्वधापितृसंयुक्तेभ्यः ॥ १३ ॥

विद्या ह वै ब्राह्मणमाजगाम गोपाय मां शेवधिस्तेऽहमस्मि ।
असूयकायानृजवेऽयताय न मां ब्रूया वीर्यवती तथा स्याम् ॥ १४
*यमेव विद्याः शुचिमप्रमत्तं मेधाविनं ब्रह्मचर्योपपन्नम् ।
यस्तेन द्रुह्येत्कतमच्च नाह तस्मै मां ब्रूयो निधिपाय ब्रह्मन् ॥ १५
य आतृणत्त्यवितथेन कर्मणा बहुदुःखं कुर्वन्नमृतं संप्रयच्छन् ।
तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्च नाह ॥ १६
अध्यापिता ये गुरुं नाऽऽद्रियन्ते विप्रा वाचा मनसा कर्मणा वा ।
यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् ॥ १७

दहत्यग्निर्यथा कक्षं ब्रह्मपृष्ठमनादृतम् । न ब्रह्म तस्मै प्रब्रूयाच्छ्रेयसं मानमकुर्वत इति १८

षट्कर्माणि ब्राह्मणस्य ॥ १९ ॥ स्वाध्यायाध्ययनमध्यापनं यजनं याजनं दानं प्रतिग्रहश्चेति ॥ २० ॥ त्रीणि राजन्यस्य ॥ २१ ॥

---

* इत आरभ्य ब्रह्मन्नित्यन्तग्रन्थः श्रुतं तदित्यस्मात्परं विद्यते ख. ग. घ. ङ. छ. पुस्तकेषु ।

---

१ ख. ग. घ. ङ छ °यमिह वै पु° । २ च. °मुह वै पु° । ३ ख. घ. ङ. छ. °स्य यतो । ४ क. °रन्यदर्वा° । च. °रधस्तादवाचीनमन्यत्तद्यदूर्ध्वं नाभेस्तेन हैतत्प्रजाजा° । ५ ख. ग. घ. °मन्येत तद्य° । ६ ङ. छ. °न्यते तद्य° । ७ च. यद्ब्राह्मणानुपनयति, यदध्यापयति, यद्याजयति यत्साधु क° । ८ क. ग. °ति । यत्साधुक° । ९ क. अथान्यद° । १० ग. °ते । जनन्यां जनयति । त° । ११ ख. ग. छ. °मपूज्योऽसीति न वदन्तीति हारीताः । अथाप्युदाहरन्ति । न° । घ. ङ. °मपूज्योऽसीति न वदन्तीति हारीताः । अथादिरुदाहरन्ति । न° । १२ ग. न त्वस्य । १३ च. ह्यस्मिन्विद्य° । १४ च. °मो ह्यषे या । १५ क. °न्यदेवोद° । १६ ख. ग. °वेऽव्रताय । १७ ग. विद्याच्छुचि° । १८ क. घ. ङ. °स्मै मा ब्रू° । १९ ग. ङ. °यान्निधि° । २० क. ख. आतृणेत्यवि° । २१ ख. ग. कुर्वंस्त्वमृ° । २२ ख. ग. °हम् । अ° । २३ ख. ग. °ह्मत्वब्दम° । घ. ङ. छ. °ह्मचष्टम° । २४ ख. ग. घ. ङ. छ. °च्छक्यमानमकुन्तत । २५ ख. ग. घ. ङ. छ. °स्य । अध्य° । २६ च. यज्ञो ।

अध्ययनं यजनं दानं च शस्त्रेण च प्रजापालनं स्वधर्मस्तेन जीवेत् ॥ २२ ॥ एतान्येवं त्रीणि वैश्यस्य, कृषिर्वाणिज्यं पाशुपाल्यं कुसीदं च ॥ २३ ॥ एतेषां परिचर्या शूद्रस्य ॥ २४ ॥ अनियतां वृत्तिं ॥ २५ ॥ अनियतकेशवेशाः सर्वेषां मुक्तशिखावर्जम् ॥ २६ ॥ अजीवन्तः स्वधर्मेणानन्तरां पापीयसीं वृत्तिमातिष्ठेरन् ॥ २७ ॥ न तु कदाचिज्ज्यायसीम् ॥ २८ ॥ वैश्यजीविकामास्थाय पण्येन जीवतोऽश्मलवण-मणिशाणकौशेयक्षौमाजिनानि च तान्तवं रक्तं सर्वं च कृतान्नं पुष्पफलमूलानि च गन्ध-रसा उदकं चौषधीनां रसः सोमश्च शस्त्रं विषं मांसं च क्षीरं च सविकारमयस्त्रपुज-तुसीसं च ॥ २९ ॥ अथाप्युदाहरन्ति ॥ ३० ॥

सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीर-विक्रयात् । इति ३१

ग्राम्यपशूनामेकशफाः केशिनश्च सर्वे चाऽऽरण्याः पशवो वयांसि दंष्ट्रिणश्च ॥ ३२ ॥ धान्यानां तिलानाहुः ॥ ३३ ॥ अथाप्युदाहरन्ति ॥ ३४ ॥

भोजनाभ्यञ्जनाद्दानाद्यदन्यत्कुरुते तिलैः । कृमिभूतः स विष्ठायां पितृभिः सह मज्जति । इति ३५

कामं वा स्वयं कृष्योत्पाद्य तिलान्विक्रीणीरन् ॥ ३६ ॥ *तस्मात्साण्डाभ्यां सनस्योताभ्यां प्राक्पातरशात्कर्षी स्यात् ॥ ३७ ॥ निदाघेऽपः प्रयच्छेत् ॥ ३८ ॥

नातिपीडयल्लाङ्गलं प्रवीरवत्सुशेवं सोमपित्सरु तदुद्वपति गामविं चाजानश्वा-नश्वतरखरोष्ट्रांश्च प्रफर्व्यं च पीवरीं प्रस्थावद्रथवाहनमिति ॥ ३९ ॥

लाङ्गलं प्रवीरवद्वीरवत्सुमनुष्यवदनडुद्वत्सुशेवं कल्याणनासिकं कल्याणी ह्यस्य नासिका नासिकयोद्वपति दूरेऽपविध्यति, सोमपित्सरु सोमो ह्यस्य प्राप्नोति, तत्सरु तदुद्वपति, गां चाविं चाजानश्वानश्वतरखरोष्ट्रांश्च प्रफर्व्यं च पीवरीं दर्शनीयां कल्याणीं च प्रथमयुवतीम् ॥ ४० ॥ कथं हि लाङ्गलमुद्वपेदन्यत्र धान्यविक्रयात् ॥ ४१ ॥

---

* इत आरभ्य लाङ्गलमुद्वपेदित्यन्तग्रन्थो न विद्यते ग. पुस्तके ।

---

१ च. यज्ञो । २ च. °व वै° । ३ च. ते । ४ च. 'स्य नि° । ५ क. च. °ता च वृ° । ६ क. च. °त्तिः । नि° । ७ च. °वेषाः सर्वे या मुक्तकेशाः शि° । ८ क 'वें चामुक्तकेशः (शाः)शि° । ९ ख. °णान्यतरां । ग. °णान्य-तरामपा° । १० च. यवीयसीम् । ११ ग. 'चित्पापीय' । १२ ख. ग. 'मपण्यं पाषाणकौपक्षौ' । छ. 'मपा-प्यपाषाणक्षौ' । १३ ख. घ. ङ. छ. °न्तवस्य र° । १४ क. °स्माभाण्डारयामनं स्फोतास्यां प्रा° । ख. °स्मादाभ्यां मन° । च. °स्मात्सण्डाभ्यामनस्यूता° । छ. °स्मात्साहभ्यां । १५ ङ. °राशौ केशी स्या° । १६ ख. छ. °शाकेशीस्या° । १७ क. ख. घ. ङ. छ °ये यः प्रयच्छेत ना° । १८ च. °त् । लाङ्गलं पवी° । १९ ख. घ. ङ. छ. °ङनलाङ्ग° । २० च. °विं प्रफ° । २१ क. °वन्मनु° । २२ क. °द्वन्मुखेकल्याण° ।

रसा [1]रसैर्महतो हीनतो वा[2] निर्मातव्या न त्वेव लवणं रसैः ॥ ४२ ॥ तिल-तण्डुलपक्वान्नं विप्रा[3] मनुष्याश्च विहिताः परिवर्तकेन ॥ ४३ ॥ ब्राह्मणराजन्यौ वार्धुषान्न[4] नाद्याताम् ॥ ४४ ॥ अथाप्युदाहरन्ति ॥ ४५ ॥

[5]समर्घं धान्यमुद्धृत्य महार्घे यः प्रयच्छति। स वै वार्धुषिको नाम ब्रह्मवादिषु गर्हितः[6]

ब्रह्महत्यां च वृद्धिं च तुलया समतोलयत्। अतिष्ठद्भ्रूणहा कोट्यां वार्धुषिः समकम्पत।

इति ४६

कामं वा परिलुप्तकृत्याय पापीयसे दद्याताम् ॥ ४७ ॥ द्विगुणं हिरण्यं त्रिगुणं धान्यम् ॥ ४८ ॥ धान्येनैव रसा व्याख्याताः ॥ ४९ ॥ पुष्पमूलफलानि च ॥ ५० ॥ तुलाघृतमष्टगुणम् ॥ ५१ ॥ अथाप्युदाहरन्ति* ॥ ५२ ॥

[7]राजानुमतभावेन द्रव्यवृद्धिं [8]विनाशयेत्। पुना राजाऽभिषेकेण द्रव्यं[9]वृद्धिं च वर्जयेत्

द्विकं त्रिकं चतुष्कं च पञ्चकं च शतं स्मृतम्। मासस्य वृद्धिं गृह्णीयाद्वर्णानामनुपूर्वशः

वसिष्ठवचनप्रोक्तां वृद्धिं वार्धुषिके शृणु। पञ्च मासास्तु विंशत्या एवं धर्मो न हीयते।

इति १५

इति वासिष्ठे धर्मशास्त्रे द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः।)

अश्रोत्रिया[10] अननुवाक्या अनग्नयो वा शूद्रसधर्माणो भवन्ति+ ॥ १ ॥ मानवं चात्र श्लोकमुदाहरन्ति ॥ २ ॥

योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्। स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ३

नानृग्ब्राह्मणो भवति न वणिङ्न [11]कुशीलवः। न शूद्रप्रेषणं कुर्वन्न स्तेनो न चिकित्सकः ४

अव्रता ह्यनधीयाना यत्र [12]भैक्षचरा द्विजाः। तं ग्रामं दण्डयेद्राजा चोरभक्तप्रदो हि सः ५

[13]चत्वारोऽपि त्रयो वाऽपि यद्ब्रूयुर्वेदपारगाः। स धर्म इति विज्ञेयो नेतरेषां सहस्रशः ६

---

* च. पुस्तके ग्रन्थव्यत्यासो वर्तते। + इत उत्तरं 'नानृग्ब्राह्मणो भवति' इत्यधिकं क.ग. घ. ङ. पुस्तकेषु।

---

१ ख. ग घ. ङ. छ. रसैः समतो हान°। २ क. मा। ३ ख. ग. ङ. छ. °धान्मनु°। ४ क. घ. °र्धुषी न दद्या'। ख. °र्धुषान्नं नाद°। ५ च. °समर्घं धनमु°। छ. समार्घं। ६ ख. घ. ङ. छ. °तः। वार्धुषिन्तारं तु°। ग. °तः। वृद्धिं च भ्रूणहत्यां च तु°। ७ ख. घ. ङ. छ. °र्धुषिर्न व्यक°। ग. °र्धुषिर्न्यकपपात ह इ°। ८ क. °सश्चाल्पायुः पा°। ९ ग. घ व. °द्यात्। द्वि°। १० च. °जातुमृत°। क. °जानमृत°। ११ क. विभा गये°। १२ क. °व्यमूलं तु वंधते। द्वि°। च. °व्यमूलं च वर्तते। व°। १३ ख. घ. ङ. यान°। ग. °याननुवाका अ°। १४ ख. घ. ङ छ. कुशीदल°। ग. कुशीदजीवि। १५ च. °पि यं ब्रूयु°।

अव्रतानामपत्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते ७
यद्ददन्ति तमोमूढा मूर्खा धर्ममतन्द्रितम् । तत्पापं शतधा भूत्वा तद्वक्तॄनधिगच्छति ८
श्रोत्रियायैव देयानि हव्यकव्यानि नित्यशः । अश्रोत्रियाय दत्तं हि पितॄन्नेति न देवताः
यस्य चैव गृहे मूर्खो दूरे चैव बहुश्रुतः । बहुश्रुताय दातव्यं नास्ति मूर्खे व्यतिक्रमः १०
ब्राह्मणातिक्रमो नास्ति विप्रे वेदविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते
यश्च काष्ठमयो हस्ती यश्च चर्ममयो मृगः । यश्च विप्रोऽनधीयानस्त्रयस्ते नामधारकाः १२
विद्वद्भोज्यान्यविद्वांसो येषु राष्ट्रेषु भुञ्जते । तान्यनावृष्टिमृच्छन्ति महद्वा जायते भयम् ।
इति १३

अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरेदधिगन्त्रे षष्ठमंशं प्रदाय ॥ १४ ॥
ब्राह्मणश्चेदधिगच्छेत्षट्कर्मसु वर्तमानो न राजा हरेत् ॥ १५ ॥ आततायिनं हत्वा नात्र प्राणच्छेत्तुः किंचित्किल्बिषमाहुः ॥ १६ ॥ षड्विधा ह्याततायिनः ॥ १७ ॥ अथाप्युदाहरन्ति ॥ १८ ॥
अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः १९
आततायिनमायान्तमपि वेदान्तपारगम् । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्
स्वाध्यायिनं कुले जातं यो हन्यादाततायिनम् । न तेन भ्रूणहा स स्यान्मन्युस्तं मृत्युमृच्छति २१

त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णवांश्चतुर्मेधा वाजसनेयी षडङ्गविद्ब्रह्मदेयानुसंतानश्छन्दोगो ज्येष्ठसामगो मन्त्रब्राह्मणविद्यः स्वधर्मानधीते यस्य दशपुरुषं मातृपितृवंशः श्रोत्रियो विज्ञायते विद्वांसः स्नातकाश्चैते पङ्क्तिपावना भवन्ति ॥ २२ ॥

चातुर्विद्यं विकल्पी च अङ्गविद्धर्मपाठकः।आश्रमस्थास्त्रयो मुख्याः परिषत्स्याद्दशावरा
उपनीय तु यः कृत्स्नं वेदमध्यापयेत्स आचार्यः ॥२४॥ यस्त्वेकदेशं स उपाध्यायो यश्च वेदाङ्गानि ॥ २४ ॥ आत्मत्राणे वर्णसंकरे वा ब्राह्मणवैश्यौ शस्त्रमाददीयाताम् ॥ २६ ॥ क्षत्रियस्य तु तन्नित्यमेव रक्षणाधिकारात् ॥ २७ ॥ प्राग्वोदग्वाऽऽसीनः प्रक्षाल्य पादौ पाणी चाऽऽप्रणिबन्धनात् ॥२८॥ अङ्गुष्ठमूलस्योत्तरतो रेखा ब्राह्मं तीर्थं तेन त्रिराचामेदशवद्भिः(दोष्ठावद्भिः) परिमृज्यात् ॥ २९ ॥ खान्यद्भिः संस्पृशेत्

---

१ ख. घ. ङ, छ. पर्षत्त्वं नैव वि° । २ ख. घ. ङ. छ. °दन्त्यन्यथा भूत्वा मूर्खा धर्ममतद्विदः । त° । ३ ख. ग घ. ङ. °द्वक्तृष्वनुग° । ४ ख. ग. घ. ङ. दत्तानि तृप्तिं नाऽऽयान्ति दे° । ५ ख. झ. ङ. छ. मूर्खे । ६ ख ग- घ. ङ. छ. °ज्यानि चान्नानि मूर्खा रा° । ७ ख. घ. ङ. छ. °ते । तदन्नं नाशमायाति महच्चापि भयं भवेत् । अ° । ८ च. °र्णश्चतुर्मे° । ९ ख. घ. ङ. °र्विद्य वि° । ग. °र्विद्योवि° । १० च. पर्षदेषां दशा° । ११ ख. घ. ङ. छ. शिष्यं । १२ ग. °संस्कारे । च. संवर्गे ब्रा° । १३ क. °रणा° ।

॥ ३० ॥ मूर्धन्यपो निनयेत् ॥ ३१ ॥ सव्ये च पाणौ, व्रजंस्तिष्ठञ्शयानः प्रणतो वा नाऽऽचामेत् ॥ ३२ ॥ हृदयंगमाभिरद्भिरबुद्बुदाभिरफेनाभिर्ब्राह्मणः कण्ठगाभिः क्षत्रियः शुचिः ॥ ३३ ॥ वैश्योऽद्भिः प्राशिताभिस्तु स्त्रीशूद्रं स्पृष्टाभिरेव च ॥ ३४ ॥ पुत्रैदारादयोऽपि गोस्तर्पणाः स्युः ॥ ३५ ॥ न वर्णगन्धरसदुष्टाभिर्याश्च स्युरशुभागमाः ॥ ३६ ॥ न मुख्या विप्रुष उच्छिष्टं कुर्वन्त्यनङ्गैश्लिष्टाः ॥ ३७ ॥ सुप्त्वा भुक्त्वा पीत्वा क्षुत्वा रुदित्वा स्नात्वा चाऽऽचान्तः पुनराचामेत् ॥ ३८ ॥ वासश्च परिधायौष्ठौ च संस्पृश्य यन्नालोमकौ न श्मश्रुगतो लेपः ॥ ३९ ॥

दन्तवदन्तसक्तेषु यच्चा[प्य]न्तर्मुखे भवेत् । आचान्तस्यावशिष्टं स्यान्मिश्रमेव तच्छुचिः परानथाऽऽचामयतः पादौ या विप्रुषो गताः । *भूम्यांस्तास्तु समाः प्रोक्तास्ताभिर्नोच्छिष्टभाग्भवेत् ४१

+प्रचरन्नभ्यवहार्येषूच्छिष्टं यदि संस्पृशेत् । भूमौ निक्षिप्य तद्द्रव्यमाचान्तः प्रचरेत्पुनः यद्यन्मीमांस्यं स्यात्तत्तदद्भिः संस्पृशेत् ॥ ४३ ॥

श्वहताश्च मृगा वन्याः पातितं च खगैः फलम् । बालैरनुपरिक्रान्तं स्त्रीभिराचरितं च यत् प्रसारितं च यत्पण्यं ये दोषाः स्त्रीमुखेषु च । मशकैर्मक्षिकाभिश्च निलीयेनो(यैवो)पहन्यते क्षितिस्थाश्चैव या आपो गवां तृप्तिकराश्च याः । परिसंख्याय तान्सर्वाञ्शुचीनाह प्रजापतिः । इति ४६

लेपगन्धापकर्षणे शौचममेध्यलिप्तस्याद्भिर्मृदा च ॥ ४७ ॥ तैजसमृन्मयदारवतान्तवानां भस्मपरिमार्जनप्रदाहतक्षणनिर्णेजनानि ॥ ४८ ॥ तैजसवदुपलमणीनां माणिवच्छङ्खशुक्तीनां दारुवदस्थ्नां रज्जुविदलचर्मणां चैलवच्छौचम् ॥ ४९ ॥ गोवालैः फलमयानां गौरसर्षपकल्केन क्षौमजानाम् ॥ ५० ॥ भूम्यास्तु संमार्जनप्रोक्षणोपलेपनोल्लेखनैर्यथास्थानं दोषविशेषात्प्रायत्यमुपैति ॥ ५१ ॥ अथाप्युदाहरन्ति ॥ ५२ ॥

---

* एतदर्धस्थानेऽयं पाठश्च. पुस्तके–"ताभिर्नोच्छिष्टतां यान्ति भूम्यास्तास्तु समाः स्मृताः" इति ।
+चरन्नभ्यवहारेष्वितिपाठश्च. पुस्तके ।

---

१ च. °ताभिः । स्त्री° । २ ख. ग. घ. ङ. °शूद्रौ स्पृ° । ३ क. च प्रदरादीपियोग्योस्तष्याणास्युः । च. च । प्रदरादपि यागोस्तर्पणसमर्थाः स्युः । ४ ख. ग °व्रद्वारापियागास्तर्पणानि स्युः । ५ च. °क्रस्पृष्टाः । ६ ख. ग. घ. °त्वा स्ना° । ७ घ. ङ. छ. °म्यातास्तास° । ८ छ. समा ज्ञेयास्ता° । ९ च. निधाय । १० छ. °त् । शुनाऽऽहता मृ° । ११ ख. ग. °पविद्धान्तः स्त्री° । १२ क. °लीनिर्नोप° । ग. लीनोनोप° । च. °लीनैर्नोप° । १३ ख. ग. छ. °वां प्रीतिक° । १४ क. °न्धानुक° । १५ ख. ग. घ. ङ. °र्षणं शौ° । १६ ख. ग. °लचमसानां । १७ ख. ग. घ. °स्थाने दो° ।

खननाद्दहनाद्वर्षाद्गोभिराक्रमणादपि। चतुर्भिः शुध्यते भूमिः पञ्चमाच्चोपलेपनात्। इति ५३

रजसा शुध्यते नारी नदी वेगेन शुध्यति। भस्मना शुध्यते कांस्यं ताम्रमम्लेन शुध्यति मद्यैर्मूत्रैः पुरीषैर्वा श्लेष्मपूयास्रशोणितैः। संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयम् ५५ अद्भिर्गात्राणि शुध्यन्ति मनः सत्येन शुध्यति। विद्यातपोभ्यां भूतात्मा बुद्धिर्ज्ञानेन शुध्यति ५६

अद्भिरेव काञ्चनं पूयते, तथा राजतम् ॥५७॥ अङ्गुलिकनिष्ठिकामूले दैवं तीर्थम् ॥५८॥ अङ्गुल्यग्रे मानुषम् ॥५९॥ पाणिमध्य आग्नेयम् ॥६०॥ प्रदेशिन्यङ्गुष्ठयोरन्तरा पित्र्यम् ॥६१॥ रोचत इति सायं मातरग्नीन्य(न)भिपूजयेत् ॥६२॥स्वदितमिति पित्र्येषु ॥ ६३ ॥संपन्नमित्याभ्युदयिकेषु ॥ ६४ ॥

इति वासिष्ठे धर्मशास्त्रे तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

प्रकृतिविशिष्टं चातुर्वर्ण्यं संस्कारविशेषाच्च ॥ १ ॥

ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः। ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत, इति निगमो भवति २

गायत्र्या छन्दसा ब्राह्मणमसृजन्त्रिष्टुभा राजन्यं, जगत्या वैश्यं, न केनचिच्छन्दसा शूद्रमित्यसंस्कार्यो विज्ञायते॥ ३ ॥

सर्वेषां सत्यमक्रोधो दानमहिंसा प्रजननं च ॥ ४॥ पितृदेवतातिथिपूजायां पशुं हिंस्यात् ॥५॥

मधुपर्के च यज्ञे च पितृदैवतकर्मणि। अत्रैव च पशुं हिंस्यान्नान्यत्रेत्यब्रवीन्मनुः ६

नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित्। न च प्राणिवधः स्वर्ग्यस्तस्माद्यागे वधोऽवधः ७

अथापि ब्राह्मणाय वा राजन्याय वाऽभ्यागताय वा महोक्षं वा महाजं वा पचेदेवमस्याऽऽतिथ्यं कुर्वन्तीति ॥ ८ ॥ उदकक्रियामशौचं च द्विवर्षात्प्रभृति मृत

---

१ च. °स्यं पुनः पाकेन मृन्मयम्। म°। २ ख. घ. ङ. छ. °पाकान्महीमय°। ३ घ. ङ. छ. पूयेत्। त°। ४ ख. ग रोचन्त इ°। ५ ख. ग. घ. ङ च. छ. °रशनान्य°। ६ च. °केष्वाभ्युदयिकेष्विति। इ°। ७ ख. ग घ. ङ. °ते। त्रिष्वेव निवासः स्यात्सर्वे°। ८ च. °जायामप्येव पशुं हिंस्यादिति मानवम्। म°। ९ क. घ. ङ. छ. °होक्षाणं वा म°। १० क. वा यजेदे°। ११ च. °मस्मा आति°। १२ क. च. °ति। द°।

उभयं कुर्यात् ॥ ९ ॥ दन्तजननादित्येके ॥ १० ॥ शरीरमग्निना संयोज्यानवेक्ष्यमाणा अपोऽभ्यवयन्ति ॥ ११ ॥ सव्येतराभ्यां पाणिभ्यामुदकक्रियां कुर्वन्ति ॥ १२ ॥ अयुग्मा दक्षिणामुखाः ॥ १३ ॥ पितॄणां वा एषा दिक्, या दक्षिणा॥ १४॥ गृहान्व्रजित्वा प्रस्तारे त्र्यहमनश्नन्त आसीरन् ॥ १५ ॥ अशक्तौ क्रीतोत्पन्नेन वर्तेरन्दशाहं शावमाशौचं सपिण्डेषु विधीयते॥ १६ ॥ मरणात्प्रभृति दिवसगणना, सपिण्डता तु सप्तपुरुषं विज्ञायते॥ १७ ॥ अप्रत्तानां स्त्रीणां त्रिपुरुषं त्रिदिनं विज्ञायते ॥१८॥ प्रत्तानामितरे कुर्वीरंस्तांश्च(?) तेषां जननेऽप्येवमेवं निपुणां शुद्धिमिच्छता मातापित्रोर्बीजनिमित्तत्वात् ॥ १९ ॥ अथाप्युदाहरति ॥ २० ॥

नाशौचं सूतके पुंसः संसर्गं चेन्न गच्छति। रजस्तत्राशुचि ज्ञेयं तच्च पुंसि न विद्यते, इति २१

*तच्चेदन्तः पुनरापतेच्छेषेण शुध्येरन् ॥ २२ ॥ रात्रिशेषे द्वाभ्यां, प्रभाते तिसृभिर्ब्राह्मणो दशरात्रेण पञ्चदशरात्रेण भूमिपो विंशतिरात्रेण वैश्यः शूद्रो मासेन शुध्यति ॥ २३ ॥ अत्राप्युदाहरन्ति॥ २४ ॥

आशौचे यस्तु शूद्रस्य सूतके वाऽपि भुक्तवान् । स गच्छेन्नरकं घोरं तिर्यग्योनिषु जायते । इति २५

अनिर्दशाहे परेऽह्नि नियोगाद्यस्तु भुक्तवान्। कृमिर्भूत्वा स देहान्ते तद्विष्ठामुपजीवति २६

द्वादश मासान्द्वादशार्धमासान्वाऽनश्नन्संहितामधीयानः पूतो भवतीति विज्ञायते ॥ २७ ॥ ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमाशौचं, सद्यः शौचमिति गौतमः ॥ २८ ॥ देशान्तरस्थे प्रेत ऊर्ध्वं दशाहाच्छ्रुत्वैकरात्रमाशौचम् ॥२९॥ आहिताग्निश्चेत्प्रवसन्म्रियेत पुनः संस्कारं कृत्वा शववच्छौचमिति गौतमः ॥ ३० ॥ यूपाचितिश्मशानरजस्वलासूतिकाशुचीनुपस्पृश्य सशिरा अभ्युपेयादप इति ॥ ३१ ॥

इति वासिष्ठे धर्मशास्त्रे चतुर्थोऽध्यायः ॥ ४ ॥

---

* इत आरभ्य तिसृभिरित्यन्तग्रन्थः ख. ग. घ. ङ. छ. पुस्तकेषु न विद्यते ।

---

१ ख. ग. घ. च. छ. °वेक्षमा°। २ क. °पो नय°। ३ ख. ग. ङ. छ. °न्ति । ततस्तत्रस्था एव। सं°। ४ क सव्योक्षरा°। ख. ग. ङ. छ. सव्योत्तरा°। ५ च. कुर्वीरन्नयु° । ६ क. °त्वाऽधः प्रस्तारे । ख. ग. घ. ङ. छ. °त्वा स्वस्ता° ।। ७ च. °ते । सपिण्डत्वं साप्त°। ८ च. °ते । प्रत्तानां। ९ क. च. °षं वि°। १० च. °व स्यान्निपु°। ११ क. च. °त्रोर्वा तान्निमित्तत्वान्मातुरित्येके । अ°। १२ च. राजन्यः। १३ च. °ग्योन्यां च जा°। १४ क. अन्तर्दशाहे पररात्रे नि°। १५ च. परशवे नियोगाद्भुक्तवान्द्विजः । कृ° । १६ च. °न्ते तां विष्ठां समुपाश्नुत इति। १७ क. तदिष्टामु°। १८ क. च. °ताध्ययनम°। १९ च. °शुचींश्च स्पृष्ट्वा सशिरस्कोऽभ्यु°। २० च. इत्यप इति ।

(अथ पञ्चमोऽध्यायः।)

अस्वतन्त्रा स्त्री पुरुषप्रधाना ॥ १ ॥ अनग्निकाऽनुदक्या वा अनृतामिति विज्ञायते ॥ २ ॥ अथाप्युदाहरन्ति ॥ ३ ॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने। पुत्रश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति ४

तस्या भर्तुरभिचार उक्तः प्रायश्चित्तरहस्येषु ॥ ५ ॥

मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ॥ ६

त्रिरात्रं रजस्वलाऽशुचिर्भवति, सा नाञ्ज्यान्नाभ्यञ्ज्यान्नाप्सु स्नायात्, अधः शयीत, दिवा न स्वप्यात्, नाग्निं स्पृशेत्, न रज्जुं सृजेत्, न दन्तान्धावयेत्, न मांसमश्नीयात्, न ग्रहान्निरीक्षेत, न हसेन्न किंचिदाचरेत्, अखर्वेण पात्रेण पिबेत्, अञ्जलिना वा पिबेत्, लोहितायसेन वा ॥ ७ ॥

विज्ञायते हीन्द्रस्त्रिशीर्षाणं त्वाष्ट्रं हत्वा पाप्मगृहीतो महत्तमाधर्मसंबद्धोऽहमित्येवमात्मानममन्यत, तं सर्वाणि भूतान्यभ्याक्रोशन्, भ्रूणहन्भ्रूणहन्भ्रूणहन्निति, स स्त्रिय उपाधावत्, अस्यै मे ब्रह्महत्यायै तृतीयं भागं प्रतिगृह्णीतेति तत्थेत्यमुवाच, ता अब्रुवन्, किं नोऽभूदिति, सोऽब्रवीद्वरं वृणीध्वमिति, ता अब्रुवन्नृतौ प्रजां विन्दामहा इति, काममा विजनितोः संभवाम इति, * तथेति ताः प्रतिजगृहुस्तृतीयं भ्रूणहत्यायाः ॥ ८ ॥

सैषा भ्रूणहत्या मासि मास्याविर्भवति ॥ ९ ॥ तस्माद्रजस्वलान्नं नाश्नीयात् ॥ १० ॥

अतश्च भ्रूणहत्याया एवैषा रूपं प्रतिमुच्याऽऽस्ते कञ्चुकमिव ॥ ११ ॥ तदाहुर्ब्रह्मवादिनः ॥ १२ ॥ अञ्जनाभ्यञ्जनमेवास्या न प्रतिग्राह्यम्। तद्धि स्त्रिया अन्नमिति ॥ १३ ॥

तस्मात्तस्यास्तत्र न च मन्यन्ते ॥ १४ ॥ आचारायाश्च योषित इति सेयमुपयाति ॥ १५ ॥

---

* इत उत्तरमधिकं " यथेच्छयाऽऽप्रसवकालात्पुरुषेण सह मैथुनभावेन संभवाम इति एषोऽस्माकं वरस्तथेन्द्रेणोक्तास्ताः प्रतिजगृहुरिति " ख. ग. घ. ङ. पुस्तकेषु।

---

१ ख. ग. °भिरनु। घ. ङ. छ. °ग्निमनु। २ च. अमृत°। ३ क. ख. ग. पुत्राश्च। ४ क. ख. घ. ङ. च. स्थविरे। ५ क. उक्तप्रा। च. उक्तं प्रायश्चित्तं र°। ६ घ. छ. °श्चित्तं र°। ७ च. °त्। नधावेदख°। ख. ग. घ. छ. °त्। न खर्वेण पिबेन्नाञ्जलिना वा न लो°। ८ ख. ग. °त्मना गृहीतोऽमन्यत इति। तं। ९ च भ्रूणहत्यायै। १० क. च. °ति ता अ°। ११ च भूयादि°। १२ ख. ग विजानीमोऽलं भ°। १३ क. च °लाया अन्नं। १४ क. च. °त्। भ्रू° १५ ख. ग. °वैतद्रूपं। १६ क. च. °स्ते। त°। १७ च °तस्यै च तत्र च बीभत्सन्ते मेयमुपागादिति। उ°। छ. °त्तस्य तत्र न वा भत्सन्ते। १८ क. °त्र च बीभत्स्यन्ते मेधउपागादिति। उद°। १९ छ योऽधिक....मेधमु°।

उदक्यास्त्वासते येषां ये च केचिदनग्नयः। कुलं चाश्रोत्रियं येषां सर्वे ते शूद्रधर्मिण इति ॥ १६ ॥

इति वासिष्ठे धर्मशास्त्रे पञ्चमोऽध्यायः ॥ ५ ॥

अथ षष्ठोऽध्यायः।

आचारः परमो धर्मः सर्वेषामिति निश्चयः। हीनाचारपरीतात्मा प्रेत्य चेह विनश्यति नैनं तपांसि न ब्रह्म नाग्निहोत्रं न दक्षिणाः। हीनाचारमितो भ्रष्टं तारयन्ति कथंचन

आचारहीनं न पुनन्ति वेदा यद्यप्यधीताः सह षड्भिरङ्गैः।
छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः ॥ १

*आचारहीनस्य तु ब्राह्मणस्य वेदाः षडङ्गास्त्वखिलाः सयज्ञाः।
कां प्रीतिमुत्पादयितुं समर्था अन्धस्य दारा इव दर्शनीयाः ॥ २

नैनं छन्दांसि वृजिनात्तारयन्ति मायाविनं मायया वर्तमानम्।
द्वेष्य(अ)क्षरे सम्यगधीयमाने पुनाति तद्ब्रह्म यथावदिष्टम् ॥ ५

दुराचारो हि पुरुषो लोके भवति निन्दितः। दुःखभागी च सततं व्याधितोऽल्पायुरेव च आचारात्फलते धर्ममाचारात्फलते धनम्। आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम् ७

सर्वलक्षणहीनोऽपि यः सदाचारवान्नरः। श्रद्दधानोऽनसूयश्च शतं वर्षाणि जीवति ८

आहारनिहारविहारयोगाः सुसंवृता धर्मविदा तु कार्याः।
वाग्बुद्धिकार्याणि तपस्तथैव धनायुषी गुप्ततमे तु कार्ये ॥

उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः। रात्रौ कुर्याद्दक्षिणास्य एवं ह्यायुर्न हीयते १०

---

* इत आरभ्य यथावदिष्टमित्यन्तग्रन्थो न विद्यते घ. ङ. छ. पुस्तकेषु।

---

१ ख. ग. तेषां। २ ख. ग. घ. ङ. °यः। गृहस्थाः श्रोत्रिया ये°। ३ च. °ति। सर्वे ते शूद्रधर्मिण इति। इति प°। ४ क. °रः प्रथमो। ५ ग. °चाराश्रितं भ्र°। ६ ख. ग. सपक्षाः। ७ ख. ग. °म्। तत्राक्षरे। ८ क. °था इषद्वाः। दु°। च. °था इषेन्द्राः। दु°। ९ ख घ. छ. °चारः फल°। १० क. °पि समुदा°। ११ ख. ग. घ. छ. °द्धिवीर्या°। १२ क. °त्रौ दक्षिणामुखः कुर्यादेवं। च °त्रौ तु दक्षिणा कुर्यादेवं १३ क. रिष्यते। ग. रिच्यते। च. रिष्यति।

मत्यग्निं प्रति[1] सूर्यं च प्रति गां प्रति च द्विजम् । प्रति[2] सोमोदकं संध्यां प्रज्ञा नश्यति मेहतः
न नद्यां मेहनं कार्यं न भस्मनि न गोमये । न वा कृष्टे[3] न मार्गे च नोप्ते क्षेत्रे न शाड्वले १२
छायायामन्धकारे वा रात्रावहनि वा द्विजः । यथासुखमुखः कुर्यात्प्राणबाधाभयेषु[4] च
उद्धृताभिरद्भिः कार्यं कुर्यात्[5]स्नानमनुद्धृताभिरपि ॥ १४ ॥
आहरेन्मृत्तिकां विप्रः कूलात्ससिकतां[6] तथा । अन्तर्जले देवगृहे वल्मीके मूषकस्थले
कृतशौचावशिष्टा च न ग्राह्याः पञ्च मृत्तिकाः ॥ १५
एका लिङ्गे करे तिस्र उभाभ्यां द्वे तु मृत्तिके । पादयोः[7] पादशुद्ध्यर्थं दश[8]कस्मिन्नुभयोः सप्त मृत्तिकाः
एतच्छौचं गृहस्थस्य द्विगुणं ब्रह्मचारिणः । वानप्रस्थस्य त्रिगुणं यतीनां च चतुर्गुणम्
अष्टौ ग्रासा मुनेर्भक्तं[9] वानप्रस्थस्य षोडश । द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः
अनड्वान्ब्रह्मचारी च आहिताग्निश्च ते त्रयः । भुञ्जाना[10] एव सिध्यन्ति नैषां सिद्धिर-
नश्नतां[11]मुं* १९
योगस्तपो दमो दानं सत्यं शौचं दया श्रुतम् । विद्या विज्ञानमास्तिक्यमेतद्ब्राह्मणलक्षणं[12]मुं
ये शान्तदान्ताः श्रुतिपूर्णकर्णा जितेन्द्रियाः प्राणिवधान्निवृत्ताः ।
प्रतिग्रहे संकुचिताग्रहस्तास्ते ब्राह्मणास्तारयितुं समर्थाः ॥ २१
नास्तिकः[13] पिशुनश्चैव कृतघ्नो दीर्घरोषकः । चत्वारः कर्मचाण्डाला जन्मतश्चापि पञ्चमः
दीर्घवैरमसूया[14] च असत्यं ब्रह्मदूषणम् । पैशुन्यं निर्दयत्वं च जानीयाच्छूद्रलक्षणम् २३
किंचिद्वैदमयं पात्रं किंचित्पात्रं तपोमयम् । पात्राणामपि तत्पात्रं शूद्रान्नं यस्य नोदरे २४
शूद्रान्नरसपुष्टाङ्गो ह्यधीयानोऽपि नित्यशः । जुह्वन्वाऽपि जपन्वाऽपि गतिमूर्ध्वां न
विन्दति २५
शूद्रान्नेनोदरस्थेन[15] यः कश्चिन्म्रियते द्विजः । स भवेत्सूकरो ग्राम्यस्तस्य वा जायते कुले

---

* इत उत्तरमेतद्वचनमधिकं ख. ग. पुस्तकयोः—"तपोदानोपहारेषु व्रतेषु नियमेषु च । इज्याध्ययनधर्मेषु यो नाऽऽसक्तः स निष्क्रियः" इति ।

---

१ घ. छ. चैव । २ च. °नं कुर्यान्न पथि न च भस्मनि । न गोमये न कृष्टे नोप्ते न शाड्वलोपजीव्यच्छायासु । छा° । ३ क. °ष्टे नोप्ते न शाड्वलोपजीव्यच्छायासु । छा° । ४ ख. ग. घ. छ. °बाधभ° । ५ ग. °र्यान्न स्नान° । ६ क. ख. छ. °कतात° । च °कनां तु या । अ° । ७ क ख ग. मूषिक° । ८ च. उभयोर्मृद्द्वयं स्मृतम् । पा° । ९ य. पञ्च पादे द° । १० घ. छ. मुनेर्भुक्तं । ११ च. अश्नन्त । १२ च. °म् । व्रतेषु नियमेषु चेज्याध्ययनधर्मेषु । यो° । १३ ख. ग. °म् सर्वत्रदा° । १४ ख. ग. छ. असूयकः । १५ च. °न यदि कश्चिन्मृतो द्वि° ।

शूद्रान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति।यस्यान्नं तस्य ते पुत्रा न च स्वर्गार्हको भवेत्२७

स्वाध्यायोत्थं योनिमन्तं प्रशान्तं वैतानस्थं पापभीरुं बहुज्ञम्।
स्त्रीषुक्षान्तं धार्मिकं गोशरण्यं व्रतैः क्षान्तं तादृशं पात्रमाहुः॥ २८

आमपात्रे यथा न्यस्तं क्षीरं दधि घृतं मधु। विनश्येत्पात्रदौर्बल्यात्तच्च पात्रं रसाश्च ते २९

एवं गां च हिरण्यं च वस्त्रमन्नं महीं तिलान्। अविद्वान्प्रतिगृह्णानो भस्मी भवति दारुवत्

नाङ्गनखवादनं कुर्यान्नखैश्च भोजनादौ॥ ३१॥ न चापोऽञ्जलिना पिबेत्॥ ३२॥ न पादेन पाणिना वा जलमभिहन्यान्न जलेन जलम्॥ ३३॥ नेष्टकाभिः फलानि पातयेत्॥ ३४॥ न फलेन फलं न कल्को न कुहको भवेत्॥ ३५॥ न म्लेच्छभाषां शिक्षेत्॥ ३६॥ अथाप्युदाहरति॥ ३७॥

न पाणिपादचपलो न नेत्रचपलो भवेत्। न चाङ्गचपलो विप्र इति शिष्टस्य गोचरः ३८

पारम्पर्यागतो येषां वेदः सपरिबृंहणः। ते शिष्टा ब्राह्मणा ज्ञेयाः श्रुतिप्रत्यक्षहेतवः ३९

यं न सन्तं न चासन्तं नाश्रुतं न बहुश्रुतम्* । न सुवृत्तं न दुर्वृत्तं वेद कश्चित्स ब्राह्मण

इति ४०

इति वासिष्ठे धर्मशास्त्रे षष्ठोऽध्यायः॥ ६॥

अथ सप्तमोऽध्यायः।

चत्वार आश्रमा ब्रह्मचारी(रि)गृहस्थवानप्रस्थपरिव्राजकाः॥१॥ तेषां वेदमधीत्य वेदौ वा वेदान्वाऽविशीर्णब्रह्मचर्यो यमिच्छेत्तमावसेत्॥ २॥ ब्रह्मचार्याचार्यं परिचरेत्॥ ३॥ आ शरीरविमोक्षात्॥ ४॥ आचार्ये प्रमीतेऽग्निं परिचरेत्॥ ५॥ विज्ञायते हि तवाग्निराचार्य इति॥ ६॥ संयतवाक्चतुर्थषष्ठाष्टमकालभोजी भैक्षमाचरेत्॥ ७॥ गुर्वधीनो जटी(टि)लः शिखाजटो वा गुरुं गच्छन्तमनुगच्छेत्॥ ८॥ आसीनं च तिष्ठञ्शयानं चाऽऽसीन उपासीत॥ ९॥ आहूताध्यायी सर्वं लब्धं निवेद्य तदनुज्ञया

---

* एतदनन्तरं सकलादर्शपुस्तकेषु "न वृत्तं न च हुमृतम्" इति वाक्यमधिकम्।

---

१ च. °गारुहो भ°। २ क. ख. °ध्यायाढ्यं योनिमित्रं प्र°। ३ ख. ग. चैतन्यस्थं। ४ ख. ग° स्त्रीयुक्तामं धा°। ५ क. ज्ञातं। च छ क्लान्तं। ६ च. °ल्यान्न च पा°। ७ ख. ग. घ. छ. नाङ्गं नखं वादित्रं कुर्यान्न चा°। ८ ख. ग. °न न पाणिना वा राजानम°। ९ ख. ग. नल्कपुटको। १० च. न च वागङ्गचपल इ°। ११ क. °योऽध्याय°। ख. ग. घ छ °योऽपनिक्षेप्तुमा°। १२ क. च °ब्रह्मचर्या°। १३ घ. विक्षेपात्। आ°। १४ च. मोक्षणात्। आ°। १५ च. °र्ये च प्रेतेऽग्निं। १६ च. °गच्छन्नासीनं चेतिष्ठञ्श°। १७ ख. ग. घ. °नंवानुतिष्ठतशया°। १८ ग. घ. छ. उपवसेत्। १९ ख. ग. घ. सर्व-भैक्ष्यं नि°।

भुञ्जीत ॥ १० ॥ खट्वाशयनदन्तप्रक्षालनाञ्जनाभ्यञ्जनोपानच्छत्रवर्जी तिष्ठेदहनि रात्रावासीत ॥ ११ ॥ त्रिःकृत्वोऽभ्युपेयादपोऽभ्युपेयादप इति ॥ १२ ॥

इति वासिष्ठे धर्मशास्त्रे सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

गृहस्थो विनीतक्रोधहर्षो गुरुणाऽनुज्ञातः स्नात्वाऽसमानार्षामस्पृष्टमैथुनां यवीयसीं सदृशीं भार्यां विन्देत ॥ १ ॥ [न]पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्यः ॥२॥ वैवाह्यमग्निमिन्धीत ॥ ३ ॥ सायमागतमतिथिं नावरुन्ध्यात् ॥ ४ ॥ नास्यानश्नन्गृहे वसेत् ॥ ५ ॥

यस्य नाश्नाति वासार्थी ब्राह्मणो गृहमागतः । सुकृतं तस्य यत्किंचित्सर्वमादाय गच्छति ६

एकरात्रं तु निवसन्नतिथिर्ब्राह्मणः स्मृतः । अनित्यं हि स्थितो यस्मात्तस्मादतिथिरुच्यते

नैकग्रामीणमतिथिं विप्रं सांगतिकं तथा । काले प्राप्ते अकाले वा नास्यानश्नन्गृहे वसेत्

श्रद्धाशीलोऽस्पृहयालुरलमग्न्याधेयाय नानाहिताग्निः स्यात् ॥ ९ ॥ अलं च सोमपानाय नासोमयाजी स्यात् ॥ १० ॥ युक्तः स्वाध्याये प्रजनने यज्ञे च ॥ ११ ॥ गृहेष्वभ्यागतं प्रत्युत्थानासनशयनवाक्सूनृतानसूयाभिमानयेत् ॥ १२ ॥ यथाशक्ति चान्नेन सर्वभूतानि ॥ १३ ॥

गृहस्थ एव यजते गृहस्थस्तप्यते तपः । चतुर्णामाश्रमाणां तु गृहस्थस्तु विशिष्यते १४

यथा नदीनदाः सर्वे समुद्रे यान्ति संस्थितिम् । एवमाश्रमिणः सर्वे गृहस्थे यान्ति संस्थितिम् १५

यथा मातरमाश्रित्य सर्वे जीवन्ति जन्तवः । एवं गृहस्थमाश्रित्य सर्वे जीवन्ति भिक्षवः

नित्योदकी नित्ययज्ञोपवीती नित्यस्वाध्यायी पतितान्नवर्जी ।

ऋतौ च गच्छन्विधिवच्च जुह्वन्न ब्राह्मणश्च्यवते ब्रह्मलोकात् । इति । १७

इति वासिष्ठे धर्मशास्त्रेऽष्टमोऽध्यायः ॥ ८ ॥

---

१ च. °न्तधानप्र° । २ ख. ग. °नाभ्यञ्जनव° । ३ क °त । त्रिरहोऽभ्युपेयादपो° । च °त । त्रिराहेऽभ्युपेयादमहत्यप्इ° । ४ च. नार्षेयाम° । ५ च. °थुनामवरवय° । ६ ख. ग. °मिन्ध्यात् । सा° । ७ च. ना । ८ ख. हि तिथिर्यस्मा । ९ ग. स्थितिर्यस्मा° । १० च. °णअतिथिर्विप्रः साङ्गतिकस्तथा । ११ च. सोमाय नासोमयाजी यु° । १२ च. °भिर्महये° । १३ च. सर्वाणि भूः । १४ ग. च. भिक्षुकाः । १५ ख. ग. च. °काद्ब्रह्मलोकादिति ।

अथ नवमोऽध्यायः ।

वानप्रस्थो जटिलश्चीराजिनवासा[1] ग्रामं च न प्रविशेत् ॥ १ ॥ न फालकृष्टमधितिष्ठेत् ॥ २ ॥ अकृष्टं मूलफलं संचिन्वीत, ऊर्ध्वरेताः क्षमाशयः ॥ ३ ॥ मूलफलभैक्षेणाऽऽश्रमागतमतिथिमभ्यर्चयेत् ॥४॥ दद्यादेव न प्रतिगृह्णीयात् ॥ ५ ॥ त्रिषवणमुदेकमुपस्पृशेत्[2] ॥ ६ ॥ श्रावणकेनाग्निमाधायाऽऽहिताग्निः स्याद्वृक्षमूलिकः[3] ॥ ७ ॥ ऊर्ध्वं षड्भ्यो मासेभ्योऽनग्निरनिकेतः[4] ॥ ८ ॥ दद्यादेवपितृमनुष्येभ्यः स गच्छेत्स्वर्गमानन्त्यमानन्त्यम् ॥ ९ ॥

इति वासिष्ठे धर्मशास्त्रे नवमोऽध्यायः ॥ ९ ॥

(अथ दशमोऽध्यायः ।)

परिव्राजकः सर्वभूताभयदक्षिणां दत्त्वा प्रतिष्ठेत ॥१॥ अथाप्युदाहरन्ति ॥ २ ॥ अभयं सर्वभूतेभ्यो दत्त्वा चरति यो मुनिः[5]। तस्यापि सर्वभूतेभ्यो न भयं जातु विद्यते[6] ३ अभयं सर्वभूतेभ्यो दत्त्वा यस्तु निवर्तते[7]। हन्ति जातानजातांश्च द्रव्याणि प्रतिगृह्य च[8] ४ संन्यसेत्सर्वकर्माणि वेदमेकं न संन्यसेत्। वेदसंन्यसनाच्छूद्रस्तस्माद्वेदं न संन्यसेत् ५ एकाक्षरं परं ब्रह्म प्राणायामः परं तपः। उपवासात्परं भैक्षं दया दानाद्विशिष्यते ६ मुण्डोऽमेध्योऽपरिग्रहः सप्तागाराण्यसंकल्पितानि चरेद्भैक्ष्यं(क्षं)[9] विधूमे सन्नमुसले[10]॥७॥ एकशाटीपरिवृतोऽजिनेन वा गोप्लुतैस्तृणैर्वेष्टितशरीरः[11] स्थण्डिलशाय्यनित्यां वसतिं वसेत्[12], ग्रामान्ते देवगृहे शून्यागारे वृक्षमूले वा मनसा ज्ञानमधीयानः ॥ ८ ॥ अरण्यनित्यो न ग्राम्यपशूनां संदर्शने विहरेत्[13] ॥ ९ ॥ अथाप्युदाहरन्ति— ॥ १० ॥

अरण्यनित्यस्य जितेन्द्रियस्य सर्वेन्द्रियप्रीतिनिवर्तकस्य ।
अध्यात्मचिन्तागतमानसस्य ध्रुवा ह्यनावृत्तिरुपेक्षकस्य, इति ॥ ११

अव्यक्तलिङ्गो व्यक्ताचारः, अनुन्मत्त उन्मत्तवेषः ॥ १२ ॥ अथाप्युदाहरन्ति॥ १३ ॥—

---

१ च. °वासी प्रा°। २ च. °दकोपस्पर्शी। श्रामण°। ३ छ. °वणिके'। ४ च. 'मूलनिकेतन उ'। ५ ख. ग. घ. द्विजः। ६ ग. यज्ञुवि व°। ७ ख. छ. विवर्तते। ८ ख. ग. घ. °श्च प्रतिगृह्णाति यस्य च। ९ ख. ग. 'मसरावं'। १० च. रेद्भिक्षाम्। वि°। ११ च. 'रिहितो'। १२ च. °णैरवस्तृत°। १३ च. विचरेत्।

न शब्दशास्त्राभिरतस्य मोक्षो न चापि लोकग्रहणे रतस्य ।
न भोजनाच्छादनतत्परस्य न चापि रम्यावसथप्रियस्य ॥ १४
न चोत्पातनिमित्ताभ्यां न नक्षत्राङ्गविद्यया[1]। अनुशासनवादाभ्यां भिक्षां लिप्सेत कर्हि-
चित्[2] १५
अलाभे न विषादी स्याल्लाभश्चैनं न हर्षयेत्[3] । प्राणयात्रिकमात्रः स्यान्मात्रासङ्गाद्विनि-
र्गतः १६
न कुट्यां नोदके सङ्गो न चैले न त्रिपुष्करे[4]। नागारे नाऽऽसने नान्ने[5] यस्य वै मोक्षवित्तमः[6]।
इति १७
ब्राह्मणकुले वा यल्लभेत तद्भुञ्जीत, सायं प्रातर्मधुमांसं[7]परिवर्जम्[8] ॥ १८ ॥ यतीन्सा-
धून्वा गृहस्थान्सायं प्रातश्च तृप्येत् ॥ १९ ॥ ग्रामे वा वसेत्[9] ॥ २० ॥ अजिह्मोऽशर-
णोऽसंकुसुको[10] न चेन्द्रियसंयोगं कुर्वीत केनचित् ॥२१॥उपेक्षकः सर्वभूतानां हिंसानुग्रह-
परिहारेण ॥२२॥ पैशुन्यमत्सराभिमानाहंकाराश्रद्धानार्जवात्मस्तवपरगर्हादम्भलोभ-
मोहक्रोधासूयाविवर्जनं सर्वाश्रमिणां धर्म इष्टः ॥ २३ ॥ यज्ञोपवीत्युदककमण्डलुहस्तः
शुचिर्ब्राह्मणो वृषलान्नवर्जी न हीयते ब्रह्मलोकाद्ब्रह्मलोकादिति ॥ २४ ॥

इति वासिष्ठे धर्मशास्त्रे दशमोऽध्यायः ॥ १० ॥

अथैकादशोऽध्यायः ।

---

[12][13]षडर्हा[14] भवन्ति, ऋत्विग्विवाह्यराजा(ज)पितृव्यस्नातकमातुलाश्च ॥ १ ॥ वैश्व-
देवस्य सिद्धस्य सायं प्रातर्गृह्याग्नौ जुहुयात् ॥ २ ॥ गृहदेवताभ्यो बलिं हरेत्॥ ३ ॥
श्रोत्रियायाऽऽगताय[15] भागं दत्त्वा ब्रह्मचारिणे वाऽनन्तरं पितृभ्यो दद्यात् ॥ ४ ॥
ततोऽतिथिं भोजयेत्[16], श्रेयांसं श्रेयांसमानुपूर्व्येण, स्वगृह्याणां कुमारबालवृ-
द्धतरुणप्रभृतींस्ततोऽपरान्गृह्यान् ॥५॥ श्वचण्डालपतितवायसेभ्यो भूमौ निर्वपेत्॥६॥

---

१ च. °या । नानु° । २ ग. °ल्लाभे चैव न । च. °ल्लाभे नैव च ह° । ३ च. °द्विवर्जितः । ४ घ. छ. °त्रे यः स वै । ५ च. °वित्तु स इ° । ६ च. °ले यावल्लं° । ७ ख. °ससर्पिःप° । ग. °ससर्पिर्वर्जं° । ८ च. °म् । न च तृ° । ९ क. °हस्थः प्रीतेन च तृ° । ख. °हस्थः प्रीतेन च तृ° । १० क. °ह्मोऽशठोऽशरणोऽ-शुको । च. ह्मऽशठोऽशरणोऽवसंकुतुको । ११ क. ख. °कात् ॥ २४ ॥ १२ ख. ग. षट्कर्मा गृह° । १३ च °डर्घार्हा । १४ ख. ग. °यान्न द° । च. °याग्रभा° । १५ ख. ग. °त् । स्वेष्टायास° । १६ क. मार्यो वा° । ग. °मार्यावा° । १७ क. 'प्रदातास्ततो' । च. 'प्रजातास्ततो' ।

शूद्रायोच्छिष्टमनुच्छिष्टं वा दद्यात् ॥७॥ शेषं दंपती भुञ्जीयाताम् ॥८॥ सर्वोपयोगेन पुनःपाकः ॥९॥ यदि निरुप्ते वैश्वदेवेऽतिथिरागच्छेद्विशेषेणास्मा अन्नं कारयेत्॥ १०॥ विज्ञायते हि ॥११॥ वैश्वानरः प्रविशत्यतिथिर्ब्राह्मणो गृहं तस्मादप आनयन्त्यन्नं वर्षाभ्यस्तां हि शान्तिं जना विदुरिति ॥ १२ ॥ तं भोजयित्वोपासीताऽऽसीमान्तमनुव्रजेत्, अ(आऽ)नुज्ञानाद्वा ॥१३॥ अपरक्ष ऊर्ध्वं चतुर्थ्याः पितृभ्यो दद्यात्पूर्वेद्युर्ब्राह्मणान्संनिपात्य यतीन्गृहस्थान्साधून्वा परिणतवयसोऽविकर्मस्थाञ्श्रोत्रियानशिष्याननन्तेवासी(सि)नः शिष्यानपि गुणवतो भोजयेत् ॥ १४ ॥ विलग्नशुक्लक्लीबान्धश्यावदन्तकुष्ठिकुनखिवर्जम् ॥ १५ ॥ अथाप्युदाहरन्ति ॥ १६ ॥

अथ चेन्मन्त्रविद्युक्तः शारीरैः पङ्क्तिदूषणैः । अदूष्यं तं यमः प्राह पङ्क्तिपावन एव सः १७

श्राद्धे नोद्वासनीयानि उच्छिष्टान्या दिनक्षयात् । श्रोतन्ते हि सुधाधारास्ताः पिबन्त्यकृतोदकाः १८

उच्छिष्टं न प्रमृज्यात्तु यावन्नास्तमितो रविः । क्षीरधारास्ततो यान्ति अक्षय्याः पङ्क्तिभागिनः १९

प्राक्संस्कारप्रमीतानां स्ववंश्यानामिति श्रुतिः । भागधेयं मनुः प्राह उच्छिष्टोच्छेषणे उभे

उच्छेषणं भूमिगतं विकिरं लेपनोदकम् । अन्नं प्रेतेषु विसृजेदप्रजानामनायुषाम् २१

उभयोः शाखयोर्मुक्तं पितृभ्योऽन्नं निवेदितम् । तदन्तरं प्रतीक्षन्ते ह्यसुरा दुष्टचेतसः २२

तस्मादशून्यहस्तेन कुर्यादन्नमुपागतम् । भो(भा)जनं वा समालभ्य तिष्ठेतोच्छेषणे उभे

द्वौ दैवे पितृकृत्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्जेत विस्तरे २४

सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम् । पञ्चैतान्विस्तरो हन्ति तस्मात्तं परिवर्जयेत्

अपि वा भोजयेदेकं ब्राह्मणं वेदपारगम् । श्रुतशीलोपसंपन्नं सर्वलक्षणवर्जितम् २६

यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य तु २७

देवतायतने कृत्वा ततः श्राद्धं प्रवर्तयेत् । प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे २८

यावदुष्णं भवत्यन्नं यावदश्नन्ति वाग्यताः । तावद्धि पितरोऽश्नन्ति यावन्नोक्ता हविर्गुणाः २९

---

१ ख. ग. शूद्रेभ्य उच्छिष्टं वा । २ ख. ग. 'यं यती भुञ्जीत । स, । ३ ख. ग. विजायतेऽद्धि वै' । ४ क. °ते वै । ५ ग. °ज्ञाताद्वा । ६ क. त् । द्विर्नमशु । च. 'त् । नम° । ७ ख. ग. °क्लविगृधिश्या° । ८ ख. ग. °त् । खे पतन्ति हि या धारा' । ९ ख. ग. °च्छिष्टेन प्रपुष्टास्ते या' । १० क. °वच्चास्त° । ११ ख. ग. यान्त्यक्षयाः संचरभा' । १२ च °स्कारात्प्रमी° । १३ ख. ग. °नां प्रवेशनमि । १४ च. स्थितिः । १५ क. उच्छेषोच्छे' । १६ ख. ग. °किरेलेपसोद° । १७ ख. अनुप्रे' । १८ च. भयोर्हस्तयोः । १९ क. °योः पार्श्वयो° । २० क. °र्यादर्भमु° । २१ ख. ग. °पदः । प° । २२ ख. ग. सर्वल° ।

हविर्गुणा न वक्तव्याः पितरो यावदतर्पिताः। पितृभिस्तर्पितैः पश्चाद्वक्तव्यं शोभनं हविः ३०

नियुक्तस्तु यदा श्राद्धे दैवे वा मांसमुत्सृजेत्। यावन्ति पशुरोमाणि तावन्नरकमृच्छति ३१

त्रीणि श्राद्धे पवित्राणि दौहित्रः कुतपस्तिलाः। त्रीणि चात्र प्रशंसन्ति शौचमक्रोधमत्वराम् ३२

दिवसस्याष्टमे भागे मन्दी भवति भास्करः। स कालः कुतपो ज्ञेयः पितृणां दत्तमक्षयम् ३३

श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽधिगच्छति। भवन्ति पितरस्तस्य तन्मासं रेतसो भुजः ३४

यस्ततो जायते गर्भो दत्त्वा भुक्त्वा च पैतृकम्। न स विद्यां समाप्नोति क्षीणायुश्चैव जायते ३५

पिता पितामहश्चैव तथैव प्रपितामहः। उपासते सुतं जातं शकुन्ता इव पिप्पलम् ३६

मधुमांसैश्च शाकैश्च पयसा पायसेन वा। एष नो दास्यति श्राद्धं वर्षासु च मघासु च ३७

संतानवर्धनं पुंत्रमुद्यतं पितृकर्मणि। देवब्राह्मणसंपन्नमभिनन्दन्ति पूर्वजाः ३८

तन्वन्ति पितरस्तस्य सुकृष्टैरिव कर्षकाः। यद्गयास्थो ददात्यन्नं पितरस्तेन पुत्रिणः ३९

श्रावण्याग्रहायण्योश्चान्वष्टक्यां च पितृभ्यो दद्यात्, द्रव्यदेशब्राह्मणसंनिधाने वा न कालनियमः ॥४०॥ अवश्यं च ब्राह्मणोऽग्नीनादधीत, दर्शपूर्णमासाग्रयणेष्टिचातुर्मास्यपशुसोमैश्च यजेत नैयमिकं ह्येतद्दर्शसंस्तुतं च ॥ ४१ ॥ विज्ञायते हि त्रिभिर्ऋणैर्ऋणवान्ब्राह्मणो जायत इति ॥ ४२ ॥ यज्ञेन देवेभ्यः, प्रजया पितृभ्यो, ब्रह्मचर्येण ऋषिभ्य इत्येष वाऽनृणो यज्वा यः पुत्री ब्रह्मचर्यवानिति ॥ ४३ ॥ गर्भाष्टमेषु ब्राह्मणमुपनयीत, गर्भादेकादशेषु राजन्यं, गर्भाद्वादशेषु वैश्यम् ॥ ४४ ॥ पालाशो बैल्वो वा दण्डो ब्राह्मणस्य, नैयग्रोधः क्षत्रियस्य वा, औदुम्बरो वा वैश्यस्य ॥ ४५ ॥ [*केशसंमितो ब्राह्मणस्य, ललाटसंमितः क्षत्रियस्य, घ्राणसंमितो वैश्यस्य ॥ ४६ ॥ मौञ्जी रशना ब्राह्मणस्य, धनुर्ज्या क्षत्रियस्य, शणतान्तवी वैश्यस्य] ॥४७॥ कृष्णाजिनमुत्तरीयं ब्राह्मणस्य, रौरवं क्षत्रियस्य, गव्यं वै(व)स्ता-

---

* एतच्चिह्नान्तर्गतग्रन्थः क. ख. ग. पुस्तकेषु न विद्यते।

---

१ ख. °रोऽभ्यवत'। ग. °रो भावत'। २ क. च. यतिः। ३ क ग. °वेतं तु स'। ४ ख. ग. नाम। ५ क. यस्तु तस्य भवेद्गर्भो। ख. ग. यतस्ततो। ६ ख. ग. वा। अधनो। ७ क, पुत्रं भुञ्जन्तं पि°। ख. ग. पुत्रं तृप्यन्तं पि°। ८ ख. ग. नन्दति। ९ ख. ग. सुवृष्टै°। १० ख. ग. च. वा का°। ११ क. यजेत्। १२ ख. ग. °संस्तुतं। १३ ख ग. °यते। य'। १४ क. 'भिभ्यो दत्त्वैष। १५ ख. ग. वस्राजि°।

जिनं वा वैश्यस्य ॥ ४८ ॥ शुक्लमहतं वासो ब्राह्मणस्य, माञ्जिष्ठं क्षत्रियस्य, हारिद्रं कौशेयं वैश्यस्य, सर्वेषां वा तान्तवमरक्तम् ॥ ४९ ॥ भवत्पूर्वां ब्राह्मणो भिक्षां याचेत, भवन्मध्यां राजन्यो, भवदन्त्यां वैश्यः ॥ ५० ॥ आ षोडशाद्ब्राह्मणस्य नातीतः कालः ॥ ५१ ॥ आ द्वाविंशात्क्षत्रियस्य ॥ ५२ ॥ आ चतुर्विंशाद्वैश्यस्य ॥ ५३ ॥ अत ऊर्ध्वं पतितसावित्रीका भवन्ति ॥ ५४ ॥ नैतानुपनयेन्नाध्यापयेन्न याजयेन्नैभिर्विवाहयेयुः ॥५५॥ पतितसावित्रीक उद्दालकव्रतं चरेत् ॥५६॥ द्वौ मासौ यावकेन वर्तयेत्, मासं पयसा, अर्धमासमामिक्षयाऽष्टरात्रं घृतेन, षड्रात्रमयाचितेन, त्रिरात्रमब्भक्षोऽहोरात्रमुपवसेत् ॥ ५७ ॥ अश्वमेधावभृथं गच्छेत् ॥ ५८ ॥ व्रात्यस्तोमेन वा यजेद्वा यजेदिति॥ ५९ ॥

इति वासिष्ठे धर्मशास्त्र एकादशोऽध्यायः ॥ ११ ॥

(अथ द्वादशोऽध्यायः ।)

अथातः स्नातकव्रतानि ॥ १ ॥ स न कंचिद्याचेतान्यत्र राजान्तेवासिभ्यः ॥ २ ॥ क्षुधा परीतस्तु किंचिदेव याचेत, कृतमकृतं वा क्षेत्रं गामजाविकमन्ततो हिरण्यं धान्यमन्नं वा, न तु स्नातकः क्षुधाऽवसीदेदित्युपदेशः॥३॥ न मलिनवाससा सह संवसेत, न रजस्वलया, नायोग्यया, न कुलं कुलं स्यात् ॥ ४ ॥ वत्सन्तीं वितताम् नातिक्रामेत् ॥ ५ ॥ नोद्यन्तमादित्यं पश्येत् ॥ ६ ॥ नास्तमयन्तम् ॥ ७ ॥ नाप्सु मूत्रपुरीषे कुर्यात् ॥ ८ ॥ न निष्ठीवेत् ॥ ९ ॥ परिवेष्टितशिरा भूमिमयज्ञियैस्तृणैरन्तर्धाय मूत्रपुरीषे कुर्यात् ॥१०॥ उदङ्मुखश्चाहनि, नक्तं दक्षिणामुखः। संध्यामासीतोत्तरामुदाहरन्ति ॥ ११ ॥ स्नातकानां तु नित्यं स्यादन्तर्वासस्तथोत्तरम्। यज्ञोपवीते द्वे यष्टिः सोदकश्च कमण्डलुः अप्सु पाणौ च काष्ठे च कथितं पावके शुचिः । तस्मादुदकपाणिभ्यां परिमृज्यात्कमण्डलुम् ॥ १३ पर्याग्निकरणं त्वेतन्मनुराह प्रजापतिः। कृत्वा चावश्यकर्माणि आचामेच्छौचवित्तमः। इति १४

---

१ च. °यं वा वै°। २ ख. ग. °त्। ब्राह्मस्तो°। ३ क. ख. °जेत् ॥ ५९ ॥ ४ ख. ग. °न्यस्तं रा°। ५ ख. ग. °विकं संततो। ६ ख. ग न नया स सहसा संविशेन्न रजस्वलायामयोग्यायां न°। ७ क. कुलः स्यात्। वत्सन्तातिवि°। च. कुलः स्यात्। वत्सतन्त्रीं° वि। ८ ख. ग. पश्येन्नाऽऽदित्यं तपन्तं नास्तं मू°। ९ च. नास्तं य°। १० क. °सीनोत्तरमु°। च. °सीनोत्तरमथाप्युदाह°। ११ ख. ग. °वकं शुचि। त°। १२ ख. ग. °श्यकार्याणि। १३ ख. ग. °त्तत इ°।

प्राङ्मुखोऽन्नानि भुञ्जीत ॥ १५ ॥ तूष्णीं साङ्गुष्ठं कृत्स्नग्रासं ग्रसेत् ॥ १६ ॥ न च मुखशब्दं कुर्यात् ॥ १७ ॥ ऋतुकालगामी स्यात्पर्ववर्जं स्वदारेषु ॥ १८ ॥ अतिर्यगुपेयात् ॥ १९ ॥ अथाप्युदाहरन्ति ॥ २० ॥

यस्तु पाणिगृहीताया आस्ये कुर्वीत मैथुनम्। भवन्ति पितरस्तस्य तन्मासं रेतसो भुजः
या स्यादनित्यचारेण रतिः साऽधर्मसंश्रिता ॥ २२

अपि च काठके विज्ञायते॥२३॥अपि नः श्वो विजनिष्यमाणाः पतिभिः सह शयीरन्निति स्त्रीणामिन्द्रदत्तो वर इति ॥ २४ ॥ न वृक्षमारोहेत् ॥ २५ ॥ न कूपमवरोहेत् ॥ २६ ॥ नाग्निं मुखेनोपधमेत् ॥२७॥ नाग्निं ब्राह्मणं चान्तरेण व्यपेयात् ॥२८॥ नाग्न्योर्न ब्राह्मणयोर[न]नुज्ञाप्य वा, भार्यया सह नाश्नीयादवीर्यवदपत्यं भवतीति वाजसनेयके विज्ञायते ॥ २९ ॥ नेन्द्रधनुर्नाम्ना निर्दिशेत् ॥ ३० ॥ मणिधनुरिति ब्रूयात् ॥ ३१ ॥ पालाशमासनं पादुके दन्तधावनमिति वर्जयेत् ॥ ३२ ॥ नोत्सङ्गे भक्षयन्न संध्या [यां]भुञ्जीत ॥ ३३ ॥ वैणवं दण्डं धारयेद्रुक्मकुण्डले च ॥ ३४ ॥ न बहिर्मालां धारयेदन्यत्र रुक्ममय्याः ॥ ३५ ॥ सभाः समवायांश्च वर्जयेत् ॥ ३६ ॥ अथाप्युदाहरन्ति ॥ ३७ ॥

अप्रामाण्यं च वेदानामार्षाणां चैव कुत्सनम्। अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः।
इति ३८

नाहृतो यज्ञं गच्छेत् ॥३९॥ यदि व्रजेत्प्रदक्षिणं पुनरावृजेत् ॥ ४० ॥ अधिवृक्षसूर्यमध्वानं न प्रतिपद्येत ॥४१॥ नावं च सांशयिकीं नाधिरोहेत(त्) ॥ ४२ ॥ बाहुभ्यां न नदीं तरेत् ॥ ४३ ॥ उत्थायापररात्रमधीत्य न पुनः प्रति संविशेत् ॥ ४४ ॥ प्राजापत्ये मुहूर्ते ब्राह्मणः कांश्चिन्नियमाननुतिष्ठेदनुतिष्ठेदिति ॥ ४५ ॥

इति वासिष्ठे धर्मशास्त्रे द्वादशोऽध्यायः॥ १२ ॥

अथ त्रयोदशोऽध्यायः।

अथातः स्वाध्यायोपाकर्म श्रावण्यां पौर्णमास्यां प्रोष्ठपद्यां वाऽग्निमुपसमाधाय कृता-

---

१ ख. ग. कृशप्रा°। २ क. °षु। स्त्रियमुपे°। ख. ग. °षु वा तीर्थमुपे°। ३ ख. ग. °दनतिचा°। ४ ख. ग. °धर्म्यसं°। ५ ख. ग. च पावकोऽपि वि°। ६ ख. ग. अथ श्वो वा वि°। ७ ख. ग. °ह दर्शयन्त इति। ८ ख वरः। तन्न वृ°। ग. वरः। उन्न°। ९ ख. ग. °येदग्न्यो न भु°। च. °येत्। नाऽऽसन्यां भु°। १० च. °मालिं धा°। ११ च. °श्च ना व°। १२ ख. ग. दर्शनम्। १३ ग. °ति। दानाहतो। १४ ख. नानाहतो। १५ ख. ग. °जेदपि°। १६ ख. ग. °गः स्वयि°। १७ ख. ग. °ध्यायश्चोपा°। १८ च. °धायाश्रुतधाना जु°।

धानो जुहोति देवेभ्यऋषिभ्यश्छन्दोभ्यश्चेति ॥१॥ ब्राह्मणान्स्वस्तिवाच्य दधि प्राश्य ततोऽध्यायानुपाकुर्वीरन् ॥२॥ अर्धपञ्चममासानर्धषष्ठान्वाऽत ऊर्ध्वं शुक्लपक्षेष्वधीयीत, कामं तु वेदाङ्गानि ॥ ३ ॥ तस्यानध्यायाः ॥ ४ ॥ संध्यास्तमिते संध्यास्वन्तःशवदिवाकीर्त्येषु नगरेषु कामं गोमयपर्युपिते परिलिखिते वा श्मशानान्ते शयानस्य श्राद्धिकस्य ॥ ५ ॥ मानवं चात्र श्लोकमुदाहरन्ति ॥ ६ ॥

फलान्यपस्तिलान्भक्षान्यच्चान्यच्छ्राद्धिकं भवेत् । प्रतिगृह्याप्यनध्यायः पाण्यास्या ब्राह्मणाः स्मृताः, इति ७

धावतः पूतिगन्धप्रभृतावीरिणे, वृक्षमारूढस्य नावि सेनायां च भुक्त्वा चाऽऽर्द्रपाणेर्वाणशब्दे चतुर्दश्यामावास्यायामष्टम्यामष्टकासु प्रसारितपादोपस्थकृतस्थोपाश्रितस्य च गुरुसमीपे मैथुनव्यपेतायां वाससा मैथुनव्यपेतेनानिर्णिक्तेन ग्रामान्ते छर्दितस्य मूत्रितस्योच्चारितस्य ऋग्यजुषां च सामशब्दे वाऽजीर्णे निर्घाते भूमिचलने चन्द्रसूर्योपरागे दिङ्नादपर्वतनादकम्पप्रपातेषूपलरुधिरपांशुवर्षेष्वाकालिकम् ॥ ८ ॥ उल्काविद्युत्सं मासे त्रिरात्रम् ॥ ९ ॥ उल्काविद्युत्सज्योतिषम् ॥ १० ॥ अपर्तावाकालिकमाचार्ये प्रेते त्रिरात्रमाचार्यपुत्रशिष्यभार्यास्वहोरात्रम् ॥११॥ [+ऋत्विग्योनिसंबन्धेषु च गुरोः पादोपसंग्रहणं कार्यम् ॥१२॥] ऋत्विक्श्वशुरपितृव्यमातुलाननवरवयसः प्रत्युत्थायाभिवदेत् ॥१३॥ ये चैव पादग्राह्यास्तेषां भार्या गुरोश्च मातापितरौ यो विद्यादभिवन्दितुमहमयं भो इति ब्रूयाच्च न विद्यात्प्रत्यभिवादमामन्त्रिते स्वरोऽन्त्यः प्लुते संध्यक्षरमप्रगृह्यमायावभावं चाऽऽपद्यते यथा भो भाविति ॥ १४ ॥ पतितः पिता परित्याज्यो माता तु पुत्रे न पतति ॥ १५ ॥ अत्राप्युदाहरन्ति ॥ १६ ॥

उपाध्यायाद्दशाऽऽचार्य आचार्याणां शतं पिता । पितुर्दशशतं माता गौरवेणातिरिच्यते

+ एतच्चिह्नान्तर्गतं न क. च. पुस्तकयोः ।

---

१ ख. ग. °भ्यश्छ°। २ ख. ग. तत उपांशु कुर्वीत । अ°। ३ क. °श्चमान्मासान्मासान° । च. °श्चम°। ४ क °क्षेऽप्यधी° । ५ च. °स्तनिते । ६ ख. ग. °ते स्युस्तत्र शवे दिवाकीर्त्ये न' । ७ ख. ग. च. 'लान्यापस्ति° । ८ ख. ग. 'न्भक्ष्यमथान्यच्छ्रा° । ९ ख. ग. °गन्धिप्रसतेरितवृ' । १० क. °भृतितृणत्र° । ११ क. च्चारीयाणशाणश° । ख. ग. चार्धप्रागे वाण' । १२ ख. °पस्येस्योपा° । १३ ग. °स्थस्योपा° । १४ च. कृतोपा° । १५ क. ख. ग. °पे मिथुनव्यपेता° । १६ क. ख. ग. °सामिथु° । १७ ख. ग. °स्योच्चरितस्य यजु° । १८ ख. ग. सार्धश° । १९ ख. ग. °र्घातभमो च न चन्द्रसूर्योपरागेषु दि° । २० च. °तप्र° । २१ ख. ग. 'त्सज्योतिषमपत्वाकालिकं वा । आचार्ये । २२ च. °रौ च यो । २३ ख. ग. °वादं नाभिवदेत् । पति° । २४ क. च. पुत्रं । २५ ख. ग. अथाप्यु° ।

भार्याः पुत्राश्च शिष्याश्च संसृष्टाः पापकर्मभिः।परिभाष्य परित्याज्याः पतितो योऽन्यथा त्येजेत् १८

ऋत्विगाचार्यावयाजकानध्यापकौ हेयावन्यत्र हानात्पतति ॥ १९ ॥ पतितोत्पन्नः पतितो भवतीत्याहुरन्यत्र स्त्रियाः ॥२०॥सा हि परंगामिनी तामरिक्थामुपेयात् ॥२१॥ गुरोर्गुरौ संनिहिते गुरुवद्वृत्तिरिष्यते। गुरुवद्गुरुपुत्रस्य वर्तितव्यमिति श्रुतिः २२

शस्त्रं विषं सुरा चामतिग्राह्याणि ब्राह्मणस्य ॥ २३ ॥ विद्यावित्तवयःसंबन्धकर्म च मान्यम् ॥२४॥ पूर्वः पूर्वो गरीयान्स्थविरबालातुरभारिकस्त्रीचक्रीवतां पन्थाः समागमे परस्मै देयः ॥ २५ ॥ राजकस्नातकयोः समागमे राज्ञा स्नातकाय देयः॥ २६ ॥ सर्वैरेवं च वध्वा ऊह्यमानायै ॥ २७ ॥ तृणभूम्यग्न्युदकवाक्सूनृतानसूयाः सतां गृहे नोच्छिद्यन्ते कदाचन कदाचनेति ॥ २८ ॥

इति वासिष्ठे धर्मशास्त्रे त्रयोदशोऽध्यायः ॥ १३ ॥

(अथ चतुर्दशोऽध्यायः।)

अथातो भोज्याभोज्यं च वर्णयिष्यामः ॥ १ ॥ चिकित्सकमृगयुपुंश्चलीदण्डिकस्तेनाभिशस्तपण्डपतितानामन्नमभोज्यम् ॥ २ ॥ कदर्यदीक्षितबद्धातुरसोमविक्रायितक्षकरजकशौण्डिकसूचकवार्धुषिकचर्मावकृत्तानां, शूद्रस्य चोच्छ्रभृतश्चोपपत्ते(ते)र्यश्चोपपत्ति(तिं) मन्यते, यश्च गृहान्दहेत्, यश्च वधार्हं नोपहन्यात्कोऽभक्ष्यत इति ॥ ३ ॥ वाचाऽभिघुष्टं गणान्नं गणिकान्नं चेति ॥ ४ ॥ अथाप्युदाहरन्ति ॥ ५ ॥ नाश्नन्ति श्वपतो देवा नाश्नन्ति वृषलीपतेः। भार्याजितस्य नाश्नन्ति यस्य चोपपतिर्गृहे, इति ६

एधोदकंयवसकुशलाजाभ्युद्यतयानावसथशफरीप्रियङ्गुस्रगन्धमधुमांसानीत्येतेषां प्रतिगृह्णीयात् ॥ ७ ॥ अथाप्युदाहरन्ति ॥ ८ ॥

---

१ क. च. भार्या। २ ख. ग. भवेत्। ३ ख. ग. °नात्तु पतितो नान्यत्र पतितो भ°। ४ ख. च. °रगमिता तद्भिन्नामक्षुण्णासु°। ५ ख. ग. °तिः। शास्त्रं वस्त्रं तथाऽन्नानिप्र°। ६ ख. ग. 'विज्ञयजः संबन्धः क°। ७ ख. 'बन्धाः क'। ८ ख ग. °कचक्रव° । ९ च. °स्मै परस्मै दे°। १० ख. ग. °ष वोच्चतमाय तु। ११ ख. ग. सप्तगृ। १२ ख. ग. °दर्येक्षि°। १३ क. 'तस्करर'। १४ क. °सूचिक°। १५ ख. ग. चायज्ञस्योपयज्ञेयश्चोपप°। १६ ख. ग. गृहीततद्धेतुर्य°। १७ ख. ग. °न्यात्कौ बन्धमोक्षाविति चाभिकुरुयेत, गण°। १८ ख. ग. श्वपतेर्देवा। १९ ख. ग. °कसवत्सकुशलाभ्यु°। २० च. ग. °ङ्गुस्तरजमधुमांसानि नै ते°।

गुर्वर्थे दारमुज्झिहीर्षन्नर्चिष्यन्देवतातिथीन्। सर्वतः प्रतिगृह्णीयान्न तु तृप्येत्स्वयं ततः, इति ९

न मृगयोरिषुचारिणः परिवर्जमन्नम् ॥ १० ॥ विज्ञायते ह्यगस्त्यो वर्षसाहस्रिके सत्रे मृगयां चकार, तस्याऽऽसंस्तु रसमयाः पुरोडाशा मृगपक्षिणां प्रशस्तानाम्॥ ११ ॥ अपि ह्यत्र प्राजापत्याञ्श्लोकानुदाहरन्ति ॥ १२ ॥

उद्यतामाहृतां भिक्षां पुरस्तादप्रचोदिताम्। भोज्यां प्रजापतिर्मेने अपि दुष्कृतकारिणः
श्रद्दधानस्य भोक्तव्यं चोरस्यापि विशेषतः। न त्वेव बहुयाज्यस्य यश्चोपनयते बहून् १४
न तस्य पितरोऽश्नन्ति दश वर्षाणि पञ्च च। न च हव्यं वहत्यग्निर्यस्तामभ्यवमन्यते १५
चिकित्सकस्य मृगयोः शल्यहस्तस्य पापिनः। ष(प)ण्डस्य कुलटायाश्च उद्यताऽपि न पृह्यते, इति १६

उच्छिष्टमगुरोरभोज्यं, स्वमुच्छिष्टोपहतं च ॥१७॥ यदश्नन केशकीटोपहतं च॥१८॥ कामं तु केशकीटानुद्धृत्याद्भिः प्रोक्ष्य भस्मनाऽवकीर्य वाचा प्रशस्तमुपभुञ्जीत ॥ १९ ॥ अपि ह्यत्र प्राजापत्याञ्श्लोकानुदाहरन्ति ॥ २० ॥

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते
देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च। काकैः श्वभिश्च संस्पृष्टमन्नं तन्न विसर्जयेत् २२
तस्मादन्नमपोद्धृत्य शेषं संस्कारमर्हति। द्रवाणां प्लावनेनैव घनानां प्रोक्षणेन तु
मार्जारमुखसंस्पृष्टं शुचि एव हि तद्भवेत् ॥ २३

अन्नं पर्युषितं भावदुष्टं सक्लेदं पुनःसिद्धमामं मांसं पक्वं च कामं तु दध्ना घृतेन वाऽभिघारितमुपयुञ्जीत ॥ २४ ॥ अपि ह्यत्र प्राजापत्याञ्श्लोकानुदाहरन्ति+ ॥ २५ ॥

हस्तदत्तास्तु ये स्नेहा लवणव्यञ्जनानि च। दातारं नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम् २६

+ इतः परमेतद्वचनमधिकं च पुस्तके–" घृतं वा यदि वा तैलं विप्रो नाद्यान्नखरच्युत(न्मु)तम्। यमस्तदशुचि प्राह तुल्यं गोमांसभक्षणैः " इति।

---

१ क ख. °र्थदा°। २ च. चचार। ३ क. °णः। अश्रद्दधानमक्ष°। ४ ख. ग. °धानैर्न भो°। ५ क. श्चेवं व°। ६ ख. ग. °हुधा तस्य यावानपहृता भवेत्। न। ७ क. च. °हर्तुस्तु पा°। ८ ख. ग पाशिनः। ९ क. ग. यद्दुसनके। १० ख ग. °चा च प्र°। ११ क. च. °पयुञ्जी°। १२ ख. ग. °ह्यन्नं प्रा°। १३ क. °च चान्नं प्र°। १४ क विवर्ज°। १५ ख. ग. °स्मात्तदन्नमुद्धृ°। १६ ख. ग °क्षरणेन। १७ ख. ग. तु। पाकेन मु°। १८ ख. ग. °ष्टं हस्ते°। १९ क. °क्षेपं पु°। २० ख. °माममजीतप°। ग. °माममृजीषप°। २१ ख. ग. दध्याद्घृतेन चाभि°। २२ ख. ग. °पभुञ्जीतापि ह्यन्नं प्रा°।

* प्रदद्यान्न तु हस्तेन नाऽऽपसेन कदाचन, इति ॥ २७

लशुनपलाण्डुकेमुकगृञ्जनश्लेष्मातकवृक्षनिर्यासलोहितवृश्चनश्वकाकावलीढशूद्रोच्छिष्टभोजनेषु कृच्छ्रातिकृच्छ्रः इतरेऽप्यन्यत्र मधुमांसफलविकर्षेष्वग्राम्यपशव(शु)विषयः ॥ २८ ॥ संधिनीक्षीरमवत्साक्षीरं गोमहिष्यजानामनिर्दशाहानामन्तर्नाभ्युदकमपूपधानाकरम्भसक्तुवटकतैलपायसशाकानि शुक्तानि वर्जयेत्, अन्यांश्च क्षीरयवपिष्टविकारान् ॥ २९ ॥ श्वाविच्छल्लकशशकच्छपगोधाः पञ्चनखानां भक्ष्याः ॥ ३० ॥ अनुष्ट्राः पशूनामन्यतोदन्ताश्च मत्स्यानां वा चेटगवयशिशुमारनक्रकुलीरा विकृतरूपाः ॥ ३१ ॥ सर्पशीर्षाश्च ॥ ३२ ॥ गौरगवयशरभाश्चानुदिष्टाः ॥ ३३ ॥ तथा धेन्वनड्वाहौ मेध्यौ वाजसनेयके विज्ञायेते ॥ ३४ ॥ खड्गे तु विवदन्त्य(न्तेऽ)ग्राम्यसूकरे च ॥ ३५ ॥ शकुनानां च विषुविष्किरजालपादाः ॥ ३६ ॥ कलविङ्कप्लवहंसचक्रवाकभासैवायसपारावतकुक्कुटसारङ्गपाण्डुकपोतक्रौञ्चकरकङ्कगृध्रश्येनबकबलाकमद्गुटिट्टिभमान्धालनक्तंचरदार्वाघाटचटकैरैलातकहारीतखञ्जरीटग्राम्यकुक्कुटशुकसारिकाकोकिलक्रव्यादा ग्रामचारिणश्चाग्रामचारिणश्चेति ॥ ३७ ॥

इति वासिष्ठे धर्मशास्त्रे चतुर्दशोऽध्यायः ॥ १४ ॥

(अथ पञ्चदशोऽध्यायः ।)

शोणितशुक्रसंभवः पुरुषो मातापितृनिमित्तकः ॥ १ ॥ तस्य प्रदानविक्रयत्यागेषु मातापितरौ प्रभवतः ॥ २ ॥ न त्वेकं पुत्रं दद्यात्प्रतिगृह्णीयाद्वा ॥ ३ ॥ स हि संता-

---

* एतदर्धं न क. ख. ग. पुस्तकेषु ।

---

१ क. घ. °ण्डुकपातलगृ° । च. °ण्डुक्याकुगृ° । २ ख. ग. °हितावश्वनाश्वश्वकाकाव° । ३ क. °तजालंनाश्व° । ४ क. °द्रोच्छेषेण भोजने चातिकृच्छ्रः कृच्छ्र इतरेश्वान्य° । च °द्रोच्छेषणभोजनेष्वतिकृच्छ्रः । संधि° । ५ क. °र्यैश्च प्रा° । ६ ख. ग. °जातरोमानिर्दशाहामनामन्ध्यं ना° । ७ ख. ग. °क्तुचरक° । ८ ख. ग. °निलशु° । ९ च. °च्छल्यक । १० क. ग. °खाना भ° । ११ क. वा वेष्टग° । ख. ग. वाहेहग° । १२ ख. ग. शलभा° । १३ च. °डुहावपन्नदन्ताश्च भक्ष्यौ तु धेन्वडुहौ । १४ क. विशुचिविशूकर° । १५ ख. ग °विविष्किर° । १६ च. °पादक° । १७ ख. ग. °सम° । १८ च. °कुररसा° । १९ ख. ग. °ट्टिभाटवान्धन° । २० ख. ग. °कवैला° । २१ क. च. °रिकको° । २२ च. °व्यालो प्रा° । २३ च. °षो भवति मा° ।

नाय पूर्वेषाम् ॥ ४ ॥ न स्त्री पुत्रं दद्यात्प्रतिगृह्णीयाद्वाऽन्यत्रानुज्ञानाद्भर्तुः ॥ ५ ॥ पुत्रं प्रतिग्रहीष्यन्बन्धूनाहूय राजनि[1] चाऽऽवेद्य निवेशनस्य मध्ये व्याहृतिभिर्हुत्वा दूरेबान्धवं बन्धुसंनिकृष्टमेव[3] प्रतिगृह्णीयात् ॥ ६ ॥ संदेहे चोत्पन्ने दूरेबान्धवं शूद्रमिव स्थापयेत् ॥ ७ ॥ विज्ञायते ह्येकेन बहूंस्त्रायत इति ॥ ८ ॥ तस्मिंश्चेत्प्रतिगृहीत औरसः पुत्र उत्पद्येत, चतुर्थभागभागी स्याद्दत्तकः ॥ ९ ॥ यदि नाऽऽभ्युदयिकेषु युक्तः स्याद्वेदविप्लविनः सव्येन पादेन प्रवृत्ताग्रान्दर्भाल्लोहितान्वोपस्तीर्य पूर्णपात्रमस्मै निनयेत् ॥ १० ॥ निनेतारं चास्य प्रकीर्णकेशा ज्ञातयोऽन्वालभेरन्नपसव्यं कृत्वा गृहेषु स्वैरमापद्येरन्नत ऊर्ध्वं ते न धर्मयेयुस्तद्धर्माणस्तं धर्मयन्तः ॥ ११ ॥ पतितानां तु चरितव्रतानां प्रत्युद्धारः ॥ १२ ॥ अथाप्युदाहरन्ति ॥ १३ ॥ अग्रेऽभ्युद्धरतां गच्छेत्क्रीडन्निव हसन्निव । पश्चात्पातयतां गच्छेच्छोचन्निव रुदन्निव, इति १४

आचार्यमातृपितृहन्तारस्तत्प्रसादोद्धरयाद्वा, एषां तेषां प्रत्यापत्तिः॥१५॥पूर्णाब्दात्प्रवृत्ताद्वा काञ्चनं पात्रं माहेयं वा पूरयित्वाऽऽपोहिष्ठेतिमन्त्रेणाद्भिरभिषिञ्चति ॥१६॥ सर्व एवाभिषिक्तस्य प्रत्युद्धारः पुत्रजन्मना व्याख्यातो व्याख्यात इति ॥ १७ ॥

इति वासिष्ठे धर्मशास्त्रे पञ्चदशोऽध्यायः ॥ १५ ॥

(अथ षोडशोऽध्यायः ।)

अथ व्यवहाराः ॥ १ ॥ राजमन्त्री सदःकार्याणि कुर्यात् ॥ २ ॥ द्वयोर्विवदमानयोर्न पक्षान्तरं गच्छेत् ॥ ३ ॥ यथासनमपराधो ह्यन्ते नापराधः(?) ॥ ४ ॥ समः सर्वेषु भूतेषु यथासनमपराधो(?) ह्याद्यवर्णयोर्विद्यान्ततः ॥ ५ ॥ संपन्नं च रक्षयेद्राजबालधनान्यप्राप्तव्यवहाराणां प्राप्तकाले तु तद्धत् ॥ ६ ॥

---

१ च. नि च निवे° । २ क. घ. दूरबान्धवमसं° । ३ ख.ग. °व सं° । ४ ख.ग. बहु जाय° । ५ ख. ग. स्याद् । य° । ६ ख. ग. °के युं° । ७ च. °विप्लावकः शूद्रयाजक उत्तमवर्णवर्गपतितास्तेषां पात्रनिनयनम् । अपात्रसंकरादकृत्यं पात्रमादाय दासोऽसवर्णापुत्रो वा बन्धुरसदृशो वा गुणहीनः । ८ क °प्लवहीनः । ९ ख. ग. °कीर्य केशाञ्ज्ञात° । १० च. °र्ध्वं न तं धर्मये° । ११ च. ग. °न सह धर्ममीयुस्तद्धर्माणस्तद्धर्मापन्नाः प° । १२ क. ग. अग्न्यभ्यु° । १३ ख. °दादपयाण्याद्वा । १४ ख. ग. °पा प्र° । १५ च. °त्तिः । पुण्यहरदात्प्रसूताद्वा । १६ क. °र्णाब्दादशाब्दात्प्रवृ° । १७ ख. ग. हिष्ठाभिरेव षड्भिर्ऋग्भिः सर्वत्र वाभिरिक्तस्य प्रत्युद्धीरपु° । च. हिष्ठाभिरेनमद्भि° । १८ क. ख. ख्यातः ॥ १७ ॥ १९ च. राजा म° । २० क. सर्वकृत्येषु य° । २१ ख. ग. °र्विद्यानतः संपन्नतामाचरेत् । राजाबालानामप्राप्तव्य° । २२ ख. ग. तद्वत् । लि° ।

लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधं स्मृतम्। धनस्वीकरणं पूर्वं धनी धनमवाप्नुयात्, इति ७

मार्गक्षेत्रयोर्विसर्गे तथा परिवर्तनेनं तरुणगृहेष्वर्थान्तरेषु त्रिपादमात्रम् ॥८॥ गृहक्षेत्रविरोधे सामन्तप्रत्ययः ॥ ९ ॥ सामन्ताविरोधे लेख्यप्रत्ययः ॥ १० ॥ प्रत्यभिलेख्यविरोधे ग्रामनगरवृद्धश्रेणीप्रत्ययः ॥ ११ ॥ अथाप्युदाहरन्ति ॥ १२ ॥

पैतृकं क्रीतमाधेयमन्वाधेयं प्रतिग्रहम्। यद्वादुपगमो वेणिस्तथा धूमशिखाऽष्टमी, इति १३

तत्र भुक्तानुभुक्तदशवर्षम्॥ १४ ॥ अन्यथाऽप्युदाहरन्ति ॥ १५ ॥

आधिः सीमा बालधनो निक्षेपोपनिधिः स्त्रियः। राजस्वं श्रोत्रियद्रव्यं न संभोगेन हीयते

प्रहीणद्रव्याणि राजगामीनि भवन्ति ॥१७॥ [* ततोऽन्यथा राजा मन्त्रिभिः सह नागरैश्च कार्याणि कुर्यात् ॥ १८ ॥ वेधसो वा राजा श्रेयान्गृध्रपरिवारं स्यात् ॥ १९ ॥ गृध्रपरिवारं वा राजा श्रेयान् ॥२०॥ गृध्र]परिवारं स्यान्न गृध्रो गृध्रपरिवारं स्यात्परिवाराद्धि दोषाः प्रादुर्भवन्ति स्तेयहारविनाशनं तस्मात्पूर्वमेव परिवारं पृच्छेत् ॥ २१ ॥

अथ साक्षिणः ॥ २२ ॥ श्रोत्रियो रूपवाञ्शीलवान्पुण्यवान्सत्यवान्साक्षिणः सर्वेषु सर्व एव वा ॥ २३ ॥

स्त्रीणां तु साक्षिणः स्त्रियः कुर्याद्द्विजानां सदृशा द्विजाः। शूद्राणां सन्तः शूद्राश्च, अन्त्यानामन्त्ययोनयः ॥ २४ ॥

अथाप्युदाहरन्ति ॥ २५ ॥

प्रतिभाव्यं वृथादानमाक्षिकं सौरिकं च यत्। दण्डशुल्कावशिष्टं च न पुत्रो दातुमर्हति, इति २६

ब्रूहि साक्षिन्यथातत्त्वं लम्बन्ते पितरस्तव। तव वाक्यमुदीक्षाणा उत्पतन्ति पतन्ति च

नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः। अन्धः शत्रुकुले गच्छेद्यः साक्ष्यमनृतं वदेत् २८

---

* धनुश्चिह्नान्तर्गतग्रन्थः क. पुस्तके न विद्यते।

---

१ च. क्षेत्रेभ्यो विसर्गस्तथा परिवर्तनं तरु। २ ख. न। ऋणाग्रहेष्व°। ग. °न ऋणग्रहेष्व°। ३ ख. ग. °धेऽपि ले°। ४ ख. ग. °न्ति--य एकं। ५ ख. ग. °मो वेणिस्त°। ६ ख ग. °खा लभी इ। ७ ख. ग. भुक्ते दशवर्षमेवोदाह°। ८ ख. ग. सीमाधिकं चैव नि°। ९ ख. ग. न राजा दातुमर्हतीति। तच्च संभोगेन प्रहीतव्यम्। गृहिणां द्रव्या°। १० ख. ग. तथा। ११ ख. ग. °र्यादसौ वा राजा श्रेयान्। वसुपरिवारः स्याद्गृध्रपरिवारं वा राजा श्रेयान्। गृध्रपरिवारः स्यान्न गृध्रो गृध्रपरिवारः स्यात्। परिवाराद्धि। १२ ख. ग. सर्व ए°। १३ ख. ग. °मन्त्याः अ°। १४ ख. ग. °दीर्यन्तमृत्प°। १५ ख. ग. °क्षार्थ क्षु°। १६ ख. ग. °च्छेद्यस्तु साक्ष्यनृ°।

पञ्च कन्यानृते हन्ति दश हन्ति गवानृते। शतमश्वानृते हन्ति सहस्रं पुरुषानृते २९
व्यवहारे मृते दारे प्रायश्चित्तं कुलस्त्रियाः। तेषां पूर्वपरिच्छेदोच्छिद्यन्तेऽत्रापवादिभिः

उद्वाहकाले रतिसंप्रयोगे प्राणात्यये सर्वधनापहारे।
विप्रस्य चार्थे ह्यनृतं वदेयुः पञ्चानृतान्याहुरपातकानि ॥ ३१
स्वजनस्यार्थे यदि वाऽर्थहेतोः पक्षाश्रयेणैव वदन्ति कार्यम्।
ते शब्दवंशस्य कुलस्य पूर्वान्स्वर्गस्थितांस्तानपि पातयन्ति,
अपि पातयन्ति ॥ ३२

इति वासिष्ठे धर्मशास्त्रे षोडशोऽध्यायः ॥ १६ ॥

(अथ सप्तदशोऽध्यायः।)

ऋणमस्मिन्संनयति अमृतत्वं च गच्छति। पिता पुत्रस्य जातस्य पश्येच्चेज्जीवतो मुखम् ?
अनन्ताः पुत्रिणां लोका नापुत्रस्य लोकोऽस्तीति श्रूयते ॥ २ ॥ प्रजाः सन्त्वपुत्रिण इत्यभिशापः ॥ ३ ॥ प्रजाभिरग्ने अमृतत्वमश्यामित्यपि निगमो भवति ॥ ४ ॥ पुत्रेण लोकाञ्जयति पौत्रेणाऽऽनन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण ब्रध्नस्याऽऽप्नोति विष्टपम्। इति ५
क्षेत्रिणः पुत्रो जनयितुः पुत्र इति विवदन्ते ॥६॥ तत्रोभयथाऽप्युदाहरन्ति ॥ ७ ॥ यद्यन्यो गोषु वृषभो वत्सानां जनयेच्छतम्। गोपिनामेव ते वत्सा मोघं स्यन्दितमार्षभम्, इति ८

अप्रमत्ता रक्षत तन्तुमेतं मा वः क्षेत्रे पर(रे)बीजानि वाप्सुः।
न जनयितुः पुत्रो भवति स्वं(सं)पराये मोघं वेत्ता कुरुते तन्तुमेतमिति ॥९
बहूनामेकजातानामेकश्चेत्पुत्रवान्नरः। सर्वे ते तेन पुत्रेण पुत्रवन्त इति श्रुतिः १०
बहूनामेकपत्नीनामेका पुत्रवती यदि। सर्वास्तास्तेन पुत्रेण पुत्रवत्य इति श्रुतिः ११
द्वादश इत्येव पुत्राः पुराणदृष्टाः ॥ १२ ॥ स्वयमुत्पादितः स्वक्षेत्रे संस्कृतायां प्रथमः

---

१ ख. ग. 'श्चित्ते कुले स्त्रियः। ते°। २ ख. ग. 'दाच्छेद्यन्ते वाऽप°। ३ च. °नस्वार्थे। ४ ख. ग. °म्। वै शब्दवादं स्वकुलानुपू°। ५ ख. ग °यन्त्यपि। इ°। ६ क च. °ते। अप्रजाः सन्त्वत्रि°। ७ ख. ग. °त्यपि शा°। ८ ख. ग. वत्साञ्जनयते सुतान्। गो°। ९ ख °वं स्पन्दनमोक्षणम्। इ°। १० ग. °स्यन्दनमोक्षणम्। इ°। ११ क. °ति। स्वंपराणे मो°। च. °ति। मप°। १२ ख. ग. 'रायो मोघं रेतोऽकुरुत तन्तु°। १३ क- बहूनामेकप°। १४ ख. ग. °हीनां द्वादश त्येव पु°।

॥ १३ ॥ तदलाभे नियुक्तायां क्षेत्रजो द्वितीयः ॥ १४ ॥ तृतीयः पुत्रिका विज्ञायते ॥ १५ ॥ अभ्रातृका पुंसः पितृनभ्येति प्रतीचीनं गच्छति पुत्रत्वम् ॥ १६ ॥ तत्र श्लोकः ॥ १७ ॥

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृताम् । अस्यां यो जायते पुत्रः स मे पुत्रो भवेदिति १८

पौनर्भवश्चतुर्थः ॥ १९ ॥ या कौमारं भर्तारमुत्सृज्यान्यैः सह चरित्वा तस्यैव कुटुम्बमाश्रयति सा पुनर्भूर्भवति ॥ २० ॥ या च क्लीबं पतितमुन्मत्तं वा भर्तारमुत्सृज्यान्यं पतिं विन्दते मृते वा सा पुनर्भूर्भवति ॥ २१ ॥ कानीनः पञ्चमः ॥ २२ ॥ या पितृगृहेऽसंस्कृता कामादुत्पादयेत्, मातामहस्य पुत्रो भवतीत्याहुः ॥ २३ ॥ अथाप्युदाहरन्ति ॥ २४ ॥

अमत्ता दुहिता यस्य पुत्रं विन्देत तुल्यतः। पुत्री मातामहस्तेन दद्यात्पिण्डं हरेद्धनम्, इति २५

गृहे च गूढोत्पन्नः षष्ठः ॥ २६ ॥ इत्येते दायादा बान्धवाश्चातारो महतो भयादित्याहुः ॥ २७ ॥ अथैषां दायादबन्धूनां सहोढ एव प्रथमो, या गर्भिणी संस्क्रियते तस्यां जातः सहोढः पुत्रो भवति ॥ २८ ॥ दत्तको द्वितीयो, यं मातापितरौ दद्यातां ॥ २९ ॥ क्रीतस्तृतीयस्तच्छुनःशेपेन व्याख्यातम् ॥ ३० ॥ हरिश्चन्द्रो ह वै राजा सोऽजीगर्तस्य सौपवसेः पुत्रं चिक्राय ॥ ३१ ॥ स्वयमुपागतश्चतुर्थः, तच्छुनःशेपेन व्याख्यातम् ॥ ३२ ॥ शुनःशेपो वै यूपेन नियुक्तो देवतास्तुष्टाव, तस्येह देवताः पाशं विमुमुचुः, तमृत्विज ऊचुर्ममैवायं पुत्रोऽस्त्विति, तान्ह न संपेदे, ते संपादयामासुरेष एव यं कामयेत तस्य पुत्रोऽस्त्विति, तस्य ह विश्वामित्रो होताऽऽसीत्तस्य पुत्रत्वमियाय ॥ ३३ ॥ अपविद्धः पञ्चमो यं मातापितृभ्यामपास्तं प्रतिगृह्णीयात् ॥ ३४ ॥ शूद्रापुत्र एव षष्ठो भवतीत्याहुः ॥ ३५ ॥ इत्येतेऽदायादा बान्धवाः ॥ ३६ ॥ अथाप्युदाहरन्ति ॥ ३७ ॥ यस्य पूर्वेषां षण्णां न कश्चिदायादः स्यादेते तस्य दायं हरेरन्निति ॥ ३८ ॥ अथ भ्रातृणां दायविभागः ॥ ३९ ॥ ज्यंशं ज्येष्ठो हरेत्, गवाश्वस्य चानुदशमम् ॥ ४० ॥ अजावयो गृहं

---

१ क. वाञ्छति । २ ख. ग. गूढे । ३ ख. ग. °थादायादास्तत्र स° । ४ ख. ग. °स्य सोपवस्तैः पुत्रं विक्राय्य स्वयं क्रीतवान् । स्व° । ५ ख. ग. °शेफेन । ६ ख. ग. °शेफेन । ७ ख. ग. °शेफो ह वै यूपे नि° । ८ क. कामयते । ९ ख. ग. तस्येह । १० ख. ग. °षां वर्णानां न । ११ ख. ग. तस्यापहरन्ति । अ° । १२ च. °भागः । याश्चानपत्यास्तासामा पुत्रलाभात् । व्यं । १३ ख. ग. °नुदशमजा° ।

च कनिष्ठस्य ॥ ४१ ॥ कार्ष्णायसं गृहोपकरणानि च मध्यमस्य ॥ ४२ ॥ मातुः पारिणेयं स्त्रियो विभजेरन् ॥ ४३ ॥ यदि ब्राह्मणस्य ब्राह्मणीक्षत्रियावैश्यासु पुत्राः स्युस्त्र्यंशं ब्राह्मण्याः पुत्रो हरेद्द्व्यंशं राजन्यायाः पुत्रः सममितरे विभजेरन् ॥ ४४ ॥ येन चैषां स्वयमुत्पादितं स्याद्द्व्यंशमेव हरेत् ॥ ४५ ॥ अनंशास्त्वाश्रमान्तरगताः ॥ ४६ ॥ क्लीबोन्मत्तपतिताश्च ॥ ४७ ॥ भरणं क्लीबोन्मत्तानाम् ॥ ४८ ॥ प्रेतपत्नी षण्मासान्व्रतचारिण्यक्षारलवणं भुञ्जानाऽधः शयीतोर्ध्वं षड्भ्यो मासेभ्यः स्नात्वा श्राद्धं च पत्ये दत्त्वा विद्याकर्मगुरुयोनिसंबन्धान्संनिपात्य पिता भ्राता वा नियोगं कारयेत्तपसे ॥ ४९ ॥ न सोन्मत्तामवशां व्याधितां वा नियुञ्ज्यात् ॥ ५० ॥ ज्यायसीमपि षोडश वर्षाणि, न चेदामयावी स्यात् ॥ ५१ ॥ प्राजापत्ये मुहूर्ते पाणिग्राहवदुपचरेत् ॥ ५२ ॥ अन्यत्र संप्रहास्यवाक्पारुष्यदण्डपारुष्याच्च ॥ ५३ ॥ ग्रासाच्छादनस्नानानुलेपनेषु प्राग्गामिनी स्यात् ॥ ५४ ॥ अनियुक्तायामुत्पन्न उत्पादयितुः पुत्रो भवतीत्याहुः ॥ ५५ ॥ स्याच्चेन्नियोगिनो रिक्थम् ॥ ५६ ॥ लोभान्नास्ति नियोगः ॥ ५७ ॥ प्रायश्चित्तं वाऽप्युपदिश्य नियुञ्ज्यादित्येके ॥ ५८ ॥ कुमार्यृतुमती त्रीणि वर्षाण्युपासीतोर्ध्वं त्रिभ्यो वर्षेभ्यः पतिं विन्देत्तुल्यम् ॥ ५९ ॥ अथाप्युदाहरन्ति ॥ ६० ॥

पितुः प्रमादात्तु यदीह कन्या वयःप्रमाणं समतीत्य दीयते ।
सा हन्ति दातारमुदीक्षमाणा कालातिरिक्ता गुरुदक्षिणेव ॥ ६१

प्रयच्छेन्नग्निकां कन्यामृतुकालभयात्पिता । ऋतुमत्यां हि तिष्ठन्त्यां दोषः पितरमृच्छति

यावच्च कन्यामृतवः स्पृशन्ति तुल्यैः सकामामभियाच्यमानाम् ।
भ्रूणानि तावन्ति हतानि ताभ्यां मातापितृभ्यामिति धर्मवादः ॥ ६२

अग्निर्वाचा च दत्तायां म्रियेताऽऽदौ वरो यदि । न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा ॥ ६४

बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता । अन्यस्मै विधिवद्देया यथा कन्या तथैव सा ६५

पाणिग्रहे मृते बाला केवलं मन्त्रसंस्कृता । सा चेदक्षतयोनिः स्यात्पुनः संस्कारमर्हति, इति

---

१ ख. ग. काष्ठं गां यवसं । २ ख. ग. °रमन्येन । ३ क वा विनि° । ४ क. °येत । न । च. °येत् । न सोन्मादाम° । ५ ख. ग. सेवोन्म° । ६ ख. ग. °वर्षा न चेदामयाविनी स्या° । ७ ख. ग. °णिप्रहणवदुपचारोऽन्यत्र संस्थाप्य वा° । ८ ख. ग. प्राग्यामि° । ९ ख. ग. °गिनो दृष्टालो° । च. °गिनोः । रिक्थलो° । १० ख. ग. °पनि° । ११ ख. ग. प्रदानात्तु यदा हि पूर्वं कन्या वयो यः स° । १२ ख. ग. °रमपीक्षे° । १३ ख. ण. °ताथैव° । १४ ख. ग. मा । यावच्चेदाहृता । १५ च. °णिग्राहे ।

प्रोषितपत्नी पञ्च वर्षाण्युपासीतोर्ध्वं पञ्चभ्यो वर्षेभ्यो भर्तृसकाशं गच्छेत् ॥ ६७ ॥ यदि धर्मार्थाभ्यां प्रवासं प्रत्यनुकामा न स्याद्यथा प्रेत एवं वर्तितव्यं स्यात् ॥ ६८ ॥ एवं ब्राह्मणी पञ्च प्रजाताऽप्रजाता चत्वारि, राजन्या प्रजाता पञ्चाप्रजाता त्रीणि, वैश्या प्रजाता चत्वार्यप्रजाता द्वे, शूद्रा प्रजाता त्रीण्यप्रजातैकम् ॥ ६९ ॥ अत ऊर्ध्वं समानोदकपिण्डजन्मर्षिगोत्राणां पूर्वः पूर्वो गरीयान् ॥ ७० ॥ न तु खलु कुलीने विद्यमाने परगामिनी स्यात् ॥ ७१ ॥ यस्य पूर्वेषां षण्णां न कश्चिद्दायादः स्यात्सपिण्डाः पुत्रस्थानीया वा तस्य धनं विभजेरन् ॥ ७२ ॥ तेषामलाभ आचार्यान्तेवासिनौ हरेयाताम् ॥ ७३ ॥ तयोरलाभे राजा हरेत् ॥ ७४ ॥ न तु ब्राह्मणस्य राजा हरेत् ॥ ७५ ॥ ब्रह्मस्वं तु विषं घोरम् ॥ ७६ ॥

न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते । विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्, इति त्रैविद्यसाधुभ्यः संप्रयच्छेत्संप्रयच्छेदिति ॥ ७८ ॥

इति वासिष्ठे धर्मशास्त्रे सप्तदशोऽध्यायः ॥ १७ ॥

(अथाष्टादशोऽध्यायः ।)

शूद्रेण ब्राह्मण्यामुत्पन्नश्चण्डालो भवतीत्याहू राजन्यायां वैणो वैश्यायामन्त्यावसायी ॥ १ ॥ वैश्येन ब्राह्मण्यामुत्पन्नो रामको भवतीत्याहुः, राजन्यायां पुल्कसः ॥ २ ॥ राजन्येन ब्राह्मण्यामुत्पन्नः सूतो भवतीत्याहुः ॥ ३ ॥ अथाप्युदाहरन्ति ॥ ४ ॥ छन्नोत्पन्नास्तु ये केचित्प्रातिलोम्यगुणाश्रिताः । गुणाचारपरिभ्रंशात्कर्मभिस्तान्विजानीयुः, इति ५

एकान्तैरन्तरैरन्तरानुजाता ब्राह्मणक्षत्रियवैश्यैरम्बष्ठोग्रनिषादा भवन्ति ॥ ६ ॥ शूद्रायां पारशवः पारयन्नेव जीवन्नेव शवो भवतीत्याहुः ॥ ७ ॥ शव इति मृतार्ख्या ॥ ८ ॥ एके वै तच्छ्मशानं ये शूद्रास्तस्माच्छूद्रसमीपे नाध्येतव्यम् ॥ ९ ॥ अथापि यमगीताश्लोकानुदाहरन्ति ॥ १० ॥

श्मशानमेतत्प्रत्यक्षं ये शूद्राः पापचारिणः । तस्माच्छूद्रसमीपे तु नाध्येतव्यं कदाचन ११

---

१ ख. ग. 'र्षो प्रवसेद्यद्यकामा यथा प्रेतस्यैवं च वार्ते' । २ ख. ग. 'वं पञ्च ब्राह्मणी प्रजाता चत्वारि राजन्या प्रजाता त्रीणि वैश्या प्रजाता द्वे शूद्रा प्रजाता अ° । ३ च. 'मानार्थजन्म°ण्डोदकगो° । ४ ख. ग. 'मि स्या° । ५ ख. ग. °यां वैश्या° । ६ ख. ग. 'न्ति छिन्नो° । ७ क. च. °न्तराऽन्तराऽन्तरासु जा° । ८ क. च. 'द्राणां पारशवः पारशवन्ने° । ९ ख. ग. °ख्या । एतच्छावं यच्छूद्रस्त° ।

न शूद्राय मतिं दद्यान्नोच्छिष्टं न हविष्कृतम्। न चास्योपदिशेद्धर्मं न चास्य व्रतमादिशेत् यश्चास्योपदिशेद्धर्मं यश्चास्य व्रतमादिशेत्। सोऽसंवृतं तमो घोरं सह तेन प्रपद्यते, इति ॥ ११ ॥

व्रणद्वारे कृमिर्यस्य संभवेत कदाचन। प्राजापत्येन शुध्येत हिरण्यं गौर्वासो दक्षिणा, इति नाभिं चित्वा रामामुपेयात्॥ १५ ॥कृष्णवर्णा या रामा रमणायैव न धर्माय न धर्मा-येति ॥ १६ ॥

इति वासिष्ठे धर्मशास्त्रेऽष्टादशोऽध्यायः ॥ १८ ॥

(अथैकोनविंशोऽध्यायः।)

स्वधर्मो राज्ञः पालनं भूतानां तस्यानुष्ठानात्सिद्धिः ॥ १ ॥ भयकार्ष्ण्यहानं जरा-मयं(र्यं) वै तत्सत्रमाहुर्विद्वांसस्तस्माद्राहस्थ्यानैयमिकेषु पुरोहितं दध्यात् ॥ २ ॥ विज्ञायते ॥३॥ ब्रह्मपुरोहितं राष्ट्रमृध्नोतीति ॥४॥ उभयस्य पालनादसामर्थ्याच्च देश-धर्मजातिकुलधर्मान्सर्वानेवैताननुपविश्य राजा चतुरो वर्णान्स्वधर्मे स्थापयेत् ॥ ५ ॥ तेष्वपचरत्सु दण्डं धारयेत् ॥ ६ ॥ दण्डस्तु देशकालधर्मवयोविद्यास्थानविशेषैर्हिंसा-क्लेशयोः कल्प्य आगमादृष्टान्ताच्च ॥ ७ ॥ पुष्पफलोपगान्पादपान्न हिंस्यात्कर्षणक-रणार्थं चोपहन्यात् ॥ ८ ॥ गार्हस्थ्याङ्गानां च मानोन्माने रक्षिते स्याताम् ॥ ९ ॥ अधिष्ठानान्नानीहारः स्वार्थानां, मानमूल्यमात्रं नैहारिकं स्यात् ॥ १० ॥ महामहेशोः स्थानात्पथः स्यात्(?) ॥११॥ संयाने दशवाहवाहिनी द्विगुणकारिणी स्यात् ॥ १२ ॥ प्रत्येकं प्रेष्यास्यः पुमान्(?)।१३।पुंसां शतावराध्यं चाऽऽहवयेदन्यर्थाः स्त्रियः स्युः॥१४॥ करीषष्ठीलामाषः शरमध्यापः पादः कार्षापणाः स्युर्निरुदकस्तरोमोष्योऽकरः श्रोत्रियो राजपुमाननाथप्रव्रजितबालवृद्धतरुणप्रजाताः प्राग्गामिकाः कुमार्यो मृतपत्न्यश्च॥१५॥

---

१ क. °त्। सुसंवृत्तं त'। २ ख. ग. नाभिंचित्परामु°। ३ ख ग. 'र्णायः सरमाया इव। ४ ख. ग. 'कारणं ह्यापालनं वै एतत्सूत्रमा°। ५ ख. ग. 'हिते दधाद्विज्ञायते ब्राह्मणः पुरोहितो राष्ट्रं दधातीति। तस्य भयमपा'। ६ ख. ग. 'तिधर्मकु'। ७ ख. ग. 'ष्वधर्मपरेषु दण्डं तु दे°। ८ ख ग. 'धर्माधर्मेव'। ९ ख. ग. °षैर्देशेत्। आ'। १० ख. ग 'मादृष्टाभावात्। पु'। ११ च. 'णकार'। १२ ख. ग. 'र्हस्थ्यं गां च। १३ क. 'नान्मानी'। ख. ग. 'नान्नो नीहारसार्थानामस्मान्नम्'। १४ ख. ग. 'हस्थः स्यात्। संमानयेदवाहवाहनीयाद्वि'। १५ क. स्थानमन्यथा स्या°। १६ क. 'ने देश°। १७ क. च. प्रपाः स्युः पुं' १८ ख. ग शतं वाराध्यं वा तदेतदप्यर्थाः। १९ ख. ग. 'राष्ट्रौ मानाधारमध्यमाः पादः कार्षापणस्य निरुक्तोऽन्तरो मानाक्'। २० ख. ग. 'नथ'। २१ ख. ग. °प्रदाताप्रागामि'। २२ च. 'र्यो भृत'। २३ ग. मृतापत्न्याश्च।

भ्रातुर्भ्रामुत्तरञ्छतगुणं दद्यात् ॥ १६ ॥ नदीकक्षवनदाहशैलोपभोगा निष्कराः स्युस्तदुपजीविनो वा दद्युः ॥ १७ ॥ प्रतिमासमुद्वाहकरं त्वागमयेद्राजनि च प्रेते दद्यात्प्रासंक्रिकम् ॥ १८ ॥ एतेन मातृवृत्तिर्व्याख्याता ॥ १९ ॥ राजमहिष्याः पितृव्यमातुलाभ्राजा बिभृयात्तद्बन्धूंश्चान्यांश्च ॥ २० ॥ राजपत्न्यो ग्रासाच्छादनं लभेरन् ॥ २१ ॥ अनिच्छन्त्यो वा प्रव्रजेरन् ॥ २२ ॥ क्लीबोन्मत्ताद्राजा बिभृयात्, तद्धामित्वाद्रिक्थस्य ॥ २३ ॥ शुल्के चापि मानवं श्लोकमुदाहरन्ति ॥ २४ ॥

न भिन्नकार्षापणमस्ति शुल्के न शिल्पवृत्तौ न शिशौ न दूते ।
न भैक्षलब्धे न हृतावशेषे न श्रोत्रिये प्रव्रजिते न यज्ञे, इति ॥ २५

स्तेनोऽनुप्रवेशान्न दुष्यते शस्त्रधारी सहोढो व्रणसंपन्नो व्यपदिष्टस्त्वेकेषां दण्ड्योत्सर्गे राजैकरात्रमुपवसेत्त्रिरात्रं पुरोहितः ॥ २६ ॥ कृच्छ्रमदण्ड्यदण्डने पुरोहितस्त्रिरात्रं राजा ॥ २७ ॥ अथाप्युदाहरन्ति ॥ २८ ॥

अन्नादे भ्रूणहा मार्ष्टि पत्यौ भार्याऽपचारिणी । गुरौ शिष्यश्च याज्यश्च स्तेनो राजनि किल्बिषम् २९

राजभिर्धृतदण्डास्तु कृत्वा पापानि मानवाः । निर्मलाः स्वर्गमायान्ति सन्तः सुकृतिनो यथा ३०

एनो राजानमृच्छति उत्सृजन्तं सकिल्बिषम् । तं चेद्घातयते राजा हन्ति धर्मेण दुष्कृतम्, इति ३१

शौचमात्ययिके कार्ये सद्यः शौचं विधीयते । तथाऽनात्ययिके नित्यं काल एवात्र कारणम्, इति ३२

यमगीतं चात्र श्लोकमुदाहरन्ति ॥ ३३ ॥

नात्र दोषोऽस्ति राज्ञां वै व्रतीनां न च सत्रिणाम् । ऐन्द्रस्थानमुपासीना ब्रह्मभूता हि ते सदा, इति हि ते सदा, इति ३४

इति वासिष्ठे धर्मशास्त्र एकोनविंशोऽध्यायः ॥ १९ ॥

---

१ ख. ग °नशैलोपमाङ्गानि' । २ ख ग. °करैस्त्वाग° । ३ ख. ग. °तुलांशजापितृव्यात्राजा । ४ ख. ग. °तद्धामित्वादंशस्य स्युस्तद्व° । ५ ख ग. °न्मत्ताशं वाऽपि । मा' ॥ ६ ख. ग. न रिक्तका° । ७ ख. ग शुल्कं । ८ क ग. धर्मे । ९ क. ग °क्षवृत्तौ न हृ' । १० ख. ग. स्तेनाभिशस्तदुष्टशस्त्रधारिसहोढव्रणसंपन्नव्यपविष्टेष्वेके° । ११ ख. ग. दण्डोत्स° । १२ ख. ग. °त्रं वा । अ' । १३ ख. ग. चेन्न घातयेद्राजा राजधर्मेण दुष्यतीति । १४ क. च. राजामा° । १५ ख. ग. °था तान्यपि नित्यानि का° । १६ क. चे नाद्यदो' । १७ ख. ग. मन्त्रिणाम् । १८ क. °ति ॥ ३४ ॥

(अथ विंशोऽध्यायः ।)

अनभिसंधिकृते प्रायश्चित्तमपराधे ॥ १ ॥ अभिसंधिकृतेऽप्येके ॥ २ ॥ गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् । इह प्रच्छन्नपापानां शास्ता वैवस्वतो यमः, इति ३

तत्र च सूर्याभ्युदितः सन्नहस्तिष्ठेत् ॥ ४ ॥ सावित्रीं च जपेत् ॥ ५ ॥ एवं सूर्याभिनिर्मुक्तो रात्रावासीत ॥ ६ ॥ कुनखी श्यावदन्तस्तु कृच्छ्रं द्वादशरात्रं चरेत् ॥ ७ ॥ परिवित्तिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत, तां चैवोपयच्छेत् ॥ ८ ॥ अथ परिविविदानः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निर्वि(वि)शेत, तामेवोपयच्छेत् ॥ ९ ॥ अग्रेदिधिषूपतिः कृच्छ्रं द्वादशरात्रं चरित्वा निविशेत तां चैवोपयच्छेत् ॥ १० ॥ दिधिषूपतिः कृच्छ्रातिकृच्छ्रौ चरित्वा तस्मै दत्त्वा पुनर्निविशेत्(त) ॥ ११ ॥ वीरहणं परस्ताद्वक्ष्यामः ॥ १२ ॥ ब्रह्मघ्नः कृच्छ्रं द्वादशरात्रं चरित्वा पुनरुपयुञ्जीत वेदमाचार्यात् ॥ १३ ॥ गुरुतल्पगः सवृषणं शिश्नमुत्कृत्याञ्जलावाधाय दक्षिणामुखो गच्छेत् ॥ १४ ॥ यत्रैव प्रतिहन्यात्तत्र तिष्ठेदाप्रलयम् ॥ १५ ॥ निष्कालको वा घृताभ्यक्तस्तप्तां सूर्मीं परिष्वजेन्मरणात्पूतो भवतीति विज्ञायते ॥ १६ ॥ आचार्यपुत्रशिष्यभार्यासु चैवम् ॥ १७ ॥ योनिषु च गुर्वी सखीं गुरुसखीमप्यपात्रां पतितां च गत्वा कृच्छ्रोऽब्दपादं चरेत् ॥ १८ ॥ एतदेव चाण्डालपतितान्नभोजनेषु, ततः पुनरुपनयनं, वपनादीनां तु निवृत्तिः ॥ १९ ॥ मानवं चात्र श्लोकमुदाहरन्ति ॥ २० ॥

वपनं मेखला दण्डो भैक्षचर्या व्रतानि च । एतानि तु निवर्तन्ते पुनःसंस्कारकर्मणि, इति २१

मत्या मद्यपाने त्वसुरायाः सुरायाश्चाज्ञाने कृच्छ्रातिकृच्छ्रौ घृतं प्राश्य पुनः संस्कारश्च ॥ २५ ॥ मूत्रशकृच्छुक्राभ्यवहारेषु चैवम् ॥ २३ ॥

मद्यभाण्डे स्थिता आ(अ)पो यदि कश्चिद्द्विजः पिबेत् ॥

पद्मोदुम्बरबिल्वपलाशानामुदकं पीत्वा त्रिरात्रेणैव शुध्यति ॥ २४ ॥ अभ्यासे तु सुराया अग्निवर्णां तां द्विजः पिबेन्मरणात्पूतो भवतीति ॥ २५ ॥ भ्रूणहनं वक्ष्यामो

---

१ ख. च. अथ । २ ख. ग. चरित्वा पुनर्निर्विशेत् । अथ दिधिषूपतिः कृच्छ्रं । ३ ख. ग. °त्वा निर्विशेत् । चरणप्रहरहस्तद्वं° । ४ ख. ग. °पनीतो वे° । ५ क. च. °मुद्वृत्या° । ६ ख. ग. सूर्मिं । ७ ख ग. °न्मुक्तो भ° । ८ ख. ग. °सखीं च पतिं° । ९ ख. ग. °च्छ्राब्दं च° । १० ख. ग च । निवर्तन्ते द्विजातीनां पुं° । ११ ख. ग. मद्यपाने क्लीबव्यवहा° । १२ क. °याश्च ज्ञा° । १३ ख. ग. °द्द्विजोऽर्थवित् ।

ब्राह्मणं हत्वा भ्रूणहा भवत्यविज्ञातं गर्भमविज्ञाता हि गर्भाः पुमांसो भवन्ति ॥ २६ ॥ तस्मात्पुंस्कृत्याऽऽजुहुतीति, भ्रूणहाऽग्निमुपसमाधाय जुहुयादेताः ॥ २७ ॥ लोमानि मृत्योर्जुहोमि लोमभिर्मृत्युं वासय, इति प्रथमाम्॥२८॥त्वचं मृत्योर्जुहोमि त्वचा मृत्युं वासय, इति द्वितीयाम् ॥ २९ ॥ लोहितं मृत्योर्जुहोमि लोहितेन मृत्युं वासय, इति तृतीयाम् ॥ ३० ॥ मांसं मृत्योर्जुहोमि मांसेन मृत्युं वासय, इति चतुर्थीम् ॥३१॥ स्नावानि मृत्योर्जुहोमि स्नावभिर्मृत्युं वासय, इति पञ्चमीम् ॥ ३२ ॥ मेदो मृत्योर्जुहोमि मेदसा मृत्युं वासय, इति षष्ठीम् ॥ ३३ ॥अस्थीनि मृत्योर्जुहोमि अस्थिभिर्मृत्युं वासय, इति सप्तमीम् ॥३४॥ मज्जानं मृत्योर्जुहोमि मज्जा(ज्ज)भिर्मृत्युं वासय, इत्यष्टमीमिति॥३५॥ राजार्थे ब्राह्मणार्थे वा सङ्ग्रामेऽभिमुखमात्मानं घातयेन्निरजितो वाऽपराद्धः पूतो भवतीति ॥३६॥ विज्ञायते हि ॥३७॥ निरुक्तं स्तेनः कनीयो भवतीति ॥३८॥ तथाऽप्युदाहरन्ति ॥ ३९ ॥

पतितं पतितेत्युक्त्वा चौरं चौरेति वा पुनः। वचनात्तुल्यदोषः स्यान्मिथ्या द्विर्दोषतां व्रजेत्, इति ४०

एवं राजन्यं हत्वाऽष्टौ वर्षाणि चरेत्, षड्वैश्यं, त्रीणि शूद्रं, ब्राह्मणीं चाऽऽत्रेयीं हत्वा सवनगतौ च राजन्यवैश्यौ॥४१॥आत्रेयीं वक्ष्यामो रजस्वलामृतुस्नातामात्रेयीमाहुः ॥ ४२ ॥ अत्र श्लोष्यदपत्यं भवतीति ॥ ४३ ॥ अनात्रेयीं राजन्यहिंसायां राजन्यां वैश्यहिंसायां वैश्यां शूद्रहिंसायां शूद्रां हत्वा संवत्सरम् ॥४४॥ ब्राह्मणसुवर्णहरणे प्रकीर्य केशान्राजानमभिधावेत्स्तेनोऽस्मि भोः शास्तु मां भवानिति तस्मै राजोदुम्बरं शस्त्रं दद्यात्तेनाऽऽत्मानं प्रमापयेन्मरणात्पूतो भवतीति विज्ञायते ॥ ४५ ॥ निष्कालको वा घृताक्तो गोमयाग्निना पादप्रभृत्यात्मानमभिदाहयेन्मरणात्पूतो भवतीति विज्ञायते ॥ ४६ ॥ अथाप्युदाहरन्ति ॥ ४७ ॥

पुराकालात्प्रमीतानां पापाद्विविधकर्मणाम्। पुनरापन्नदेहानामङ्गं भवति तच्छृणु ४८

स्तेनः कुनखी भवति श्वित्री भवति ब्रह्महा। सुरापः श्यावदन्तस्तु दुश्चर्मा गुरुतल्पगः, इति ४९

पतितसंप्रयोगं च ब्राह्मेण वा यौनेन वा यास्तेभ्यः सकाशान्मात्रा उपलब्धास्तासां परित्यागस्तैश्च न संवसेदुदीचीं दिशं गत्वाऽनश्नन्संहिताध्ययनमधीयानः पूतो भवतीति विज्ञायते ॥ ५० ॥ तथाऽप्युदाहरन्ति ॥ ५१ ॥

---

१ ख. ग. °स्कृत्य जुहु°। २ क. ख. ग. °यात्। लोमा°। ३ ख. ग. °रजितो। ४ ख. ग. °चसा तुल्य°। ५ ख ग °ष्यादिदोष°। ६ ख. ग. अत्रेत्येषामपत्यं भवतीति चात्रेयी राजन्यहि°। ७ ख. ग °यां वैश्यहिंसायां शूद्रं ह°। ८ ख. ग. °तानामानाकविधिक°।

शरीरपरितापेन तपसाऽध्ययनेन च । मुच्यते पापकृत्पापाद्दानाच्चापि प्रमुच्यते
इति विज्ञायते विज्ञायत इति ५२

इति वासिष्ठे धर्मशास्त्रे विंशोऽध्यायः ॥ २० ॥

(अथैकविंशोऽध्यायः ।)

शूद्रश्चेद्ब्राह्मणीमभिगच्छेद्दीर्घैरणैर्वेष्टयित्वा शूद्रमग्नौ प्रास्येत् ॥१॥ ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषा समभ्यज्य नग्नां कृष्णं खरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते ॥ २ ॥ वैश्यश्चेद्ब्राह्मणीमभिगच्छेल्लोहितदर्भैर्वेष्टयित्वा वैश्यमग्नौ प्रास्येत् ॥ ३ ॥ ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषाऽभ्यज्य [3]नग्नां गौरं खरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते ॥ ४ ॥ राजन्यश्चेद्ब्राह्मणीमभिगच्छेच्छरपत्रैर्वेष्टयित्वा राजन्यमग्नौ प्रास्येत्, ब्राह्मण्याः शिरसि वपनं कारयित्वा सर्पिषा समभ्यज्य नग्नां श्वेतं खरमारोप्य महापथमनुसंव्राजयेत्पूता भवतीति विज्ञायते ॥ ५ ॥ एवं वैश्यो राजन्यायां शूद्रश्च राजन्यवैश्ययोः ॥६॥मनसा भर्तुरतिचारे त्रिरात्रं यावकं क्षीरौदनं वा भुञ्जानाऽधः शयीतोर्ध्वं त्रिरात्रादप्सु निमग्नायाः सावित्र्यष्टशतेन शिरोभिर्जुहुयात्पूता भवतीति विज्ञायते ॥ ७ ॥ *वाक्संबन्ध एतदेव मासं चरित्वोर्ध्वं मासादप्सु निमग्नायाः सावित्र्याश्चतुर्भिरष्टशतैः शिरोभिर्जुहुयात्पूता भवतीति विज्ञायते ॥ ८ ॥ व्यवाये तु संवत्सरं घृतपटं धारयेत् ॥ ९ ॥ गोमयगर्ते कुशप्रस्तरे वा शयीतोर्ध्वं संवत्सरादप्सु निमग्नायाः सावित्र्यष्टशतेन शिरोभिर्जुहुयात्पूता भवतीति विज्ञायते ॥ १० ॥

व्यवाये तीर्थगमने धर्मेभ्यस्तु निवर्तते । चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥ १२

या ब्राह्मणी सुरापी न तां देवाः पतिलोकं नयन्ति ।
इहैव सा चरति क्षीणपुण्याऽप्सुलुग्भवति शुक्तिका वा ॥ १३

ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण संगताः । अमजाता विशुध्यन्ति प्रायश्चित्तेन नेतराः
प्रतिलोमं चरेयुस्ताः कृच्छ्रं चान्द्रायणोत्तरम् । १४

---

* अत्रैतदध्यायसमाप्तिः ख. ग. पुस्तकयोः । इत उत्तरग्रन्थः ख. ग. पुस्तकयोर्न विद्यते ।

---

१ ख ग. °रणातनाश्चैव त° । २ क. ख. °यते इ° । ३ ख. ग. नग्नां गोरथमारो° । ४ ख. ग. शयाना त्रिरात्रमप्सु । ५ क. ख. निम्नगायाः ।

पतिव्रतानां गृहमेधिनीनां सत्यव्रतानां च शुचिव्रतानाम्।
तासां तु लोकाः पतिभिः समाना गोपायुलोका व्यभिचारिणीनाम् ॥ १५ ॥
पतत्यर्धं शरीरस्य यस्य भार्या सुरां पिबेत्। पतितार्धशरीरस्य निष्कृतिर्न विधीयते १६
ब्राह्मणश्चेदपेक्षापूर्वं ब्राह्मणदारानभिगच्छेदनिवृत्तधर्मकर्मणः कृच्छ्रो निवृत्तधर्मकर्मणोऽतिकृच्छ्रः ॥ १७ ॥ एवं राजन्यवैश्ययोः ॥ १८ ॥ गां चेद्धन्यात्तस्याश्वर्षभाऽऽर्द्रेण परिवेष्टितः षण्मासान्कृच्छ्रं(च्छ्रं)तप्तकृच्छ्रं वा तिष्ठेत् ॥ १९ ॥ तयोर्विधिः ॥ २० ॥
त्र्यहं दिवा भुञ्जे नक्तमश्नाति वै त्र्यहम्। त्र्यहमयाचितव्रतस्त्र्यहं न भुञ्ज इति कृच्छ्रः २१
त्र्यहमुष्णं पिबेदा(च्चा)पस्त्र्यहमुष्णं पयः पिबेत्। त्र्यहमुष्णं घृतं पीत्वा वायुभक्षः परं त्र्यहम् २२
इति तप्तकृच्छ्रः ॥२३॥ऋषभवेहतौ च दद्यात् ॥ २४ ॥ अथाप्युदाहरन्ति ॥ २५ ॥
त्रय एव पुरा रोगा ईर्ष्या अनशनं जरा। पृषद्धस्तनयं(?) हत्वा अष्टानवतिमाहरेत्, इति
श्वमार्जारनकुलसर्पदर्दुरमूषकान्हत्वा कृच्छ्रं द्वादशरात्रं चरेत्किंचिद्दद्यात् ॥ २७ ॥
अनस्थिमतां तु सत्त्वानां गोमात्रं राशिं हत्वा कृच्छ्रं द्वादशरात्रं चरेत्किंचिद्दद्यात् ॥२८॥
अस्थिमतां त्वेकैकम् ॥ २९ ॥ योऽग्नीनपविध्येत्कृच्छ्रं द्वादशरात्रं चरित्वा पुनराधानं कारयेत् ॥ ३० ॥ गुरोश्चालीकानिर्बन्धः सचैलं स्नातो गुरुं प्रसादयेत्प्रसादात्पूतो भवतीति विज्ञायते ॥ ३१ ॥ नास्तिकः कृच्छ्रं द्वादशरात्रं चरित्वा विरमेन्नास्तिक्यात् ॥ ३२ ॥ नास्तिकवृत्तिस्त्वतिकृच्छ्रम् ॥ ३३ ॥ एतेन सोमविक्रयी व्याख्यातः ॥ ३४ ॥ वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षे(क्षं) वर्धयेत् ॥३५॥ भिक्षुकैर्वा(को वा)नप्रस्थैर्बलोभवृद्धिवर्जं स्वशास्त्रसंस्कारैश्च स्वशास्त्रसंस्कारश्चेति ॥ ३६ ॥

इति वासिष्ठे धर्मशास्त्र एकविंशोऽध्यायः ॥ २१॥

(अथ द्वाविंशोऽध्यायः।)

अथ खल्वयं पुरुषो मिथ्या व्याकरोत्ययाज्यं वा याजयति अप्रतिग्राह्यं वा प्रतिगृह्णाति अनन्नं वाऽश्नाति अनाचरणीयमेवाऽऽचरति तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते, न कुर्यादित्याहुर्न हि कर्म क्षीयत इति, कुर्यादित्येव तस्माच्छ्रुतिनिदर्शनात्त-

---

१ क. °श्चेत्प्रेक्षा°। २ च. °मुष्णाः पि°। ३ क. °त्वा विरमेत्। नास्तिक्यात्पुनराधानं न का°। ४ च. °स्थवात्सोमवृद्धिवर्धनं स्व°। ५ क. ख. °रश्चे°। ६ क. °नश्नन्वाऽश्ना°।

रति सर्वं पाप्मानं तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति ॥१॥ वाचाऽभिशस्तो गोसवेनाग्निष्टुता यजेत ॥ २ ॥ तस्य निष्क्रयणानि जपस्तपो होम उपवासो दानमुपनिषदो वेदादयो वेदान्ताः सर्वच्छन्दःसंहिता मधून्यघमर्षणमथर्वशिरो रुद्राः पुरुषसूक्तं राजनि(न)रौहिणे सामनी कूष्माण्डानि पावमान्यः सावित्री चेति पावनानि ॥ ३ ॥ अथाप्युदाहरन्ति ॥ ४ ॥

वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव च। सकृदृतौ प्रयुञ्जानः पुनाति दशपूरुषम्, इति ५

उपवासन्यायेन पयोव्रतता फलभक्षता प्रसृतयावको हिरण्यप्राशनं सोमपानमिति मेध्यानि ॥ ६ ॥ सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः पुण्या ह्रदास्तीर्थान्यृषिनिवासगोष्ठपरिष्कन्धा इति देशाः ॥ ७ ॥ संवत्सरो मासश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्यहोऽहोरात्र इति कालाः ॥ ८ ॥ एतान्येवानादेशे विकल्पेन क्रियेरन्, एनःसु गुरुषु गुरूणि लघुषु लघूनि ॥ ९ ॥ कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चितिः सर्वप्रायश्चित्तिरिति॥ १० ॥

इति वासिष्ठे धर्मशास्त्रे द्वाविंशोऽध्यायः ॥ २२ ॥

(अथ त्रयोविंशोऽध्यायः।)

ब्रह्मचारी चेत्स्त्रियमुपेयादरण्ये चतुष्पथे लौकिकेऽग्नौ रक्षोदैवतं गर्दभं पशुमालभेत, नैर्ऋतं वा चरुं निर्वपेत्, तस्य जुहुयात्कामाय स्वाहा, कामकामाय स्वाहा, निर्ऋत्यै स्वाहा रक्षोदेवताभ्यः स्वाहेति ॥ १ ॥ एतदेव रेतसः प्रयत्नोत्सर्गे दिवा स्वप्ने व्रतान्तरेषु वा समावर्तनात्तिर्यग्योनिव्यवाये ॥ २ ॥ शुक्लमृषभं दद्यात् ॥ ३ ॥ गां गत्वा शूद्रावधेन दोषो व्याख्यातः ॥ ४ ॥ ब्रह्मचारिणः शवकर्मणो व्रतान्निवृत्तिरन्यत्र मातापित्रोः ॥ ५ ॥ स चेदधीयीत कामं गुरोरुच्छिष्टं भेषजार्थं सर्वं प्राश्नीयात् ॥ ६ ॥ गुरुप्रयुक्तश्चेन्म्रियेत त्रीन्कृच्छ्रांश्चरेद्गुरुः ॥ ७ ॥ ब्रह्मचारी चेन्मांसमश्नीयादुच्छिष्टभोजनीयं कृच्छ्रं द्वादशरात्रं चरित्वा व्रतशेषं समापयेत् ॥ ८ ॥ श्राद्धसूतकभोजनेषु चैवम् ॥ ९ ॥ अकामतोपनतं मधु वाजसनेयके न दुष्यतीति विज्ञायते ॥ १० ॥ य आत्मत्याग्यभिशस्तो भवति सपिण्डानां प्रेतकर्मच्छेदः ॥ ११ ॥ काष्ठजललोष्टजलपाषाणशस्त्रविषरज्जु-

---

१ क. °ति सप्तपौरु°। २ क. °ण्या नद्यस्ती°। ३ च. °रात्रा इ°। ४ च. नैर्ऋत्यै। ५ क. °शुक्लावृषभं दद्यात्। शुक्ललिङ्गं गां दत्त्वा शूद्रव°।

भिर्य आत्मानमवसादयति, स आत्महा भवति ॥ १२ ॥ अथाप्युदाहरन्ति ॥ १३ ॥ य आत्मत्यागिनः कुर्यात्स्नेहात्प्रेतक्रियां द्विजः। स तप्तकृच्छ्रसहितं चरेच्चान्द्रायणव्रतम्। इति १४

चान्द्रायणं परस्ताद्वक्ष्यामः ॥ १५ ॥ आत्महननाध्यवसाये त्रिरात्रम् ॥ १६ ॥ जीवन्नात्मत्यागी कृच्छ्रं द्वादशरात्रं चरेत्, त्रिरात्रं क्षुपवसेन्नित्यं स्निग्धेन वाससा प्राणानात्मनि चाऽऽयम्य त्रिः पठेदघमर्षणमिति ॥ १७ ॥

अपि वैतेन कल्पेन गायत्रीं परिवर्तयेत्। अपि वाऽग्निमुपसमाधाय कूष्माण्डैर्जुहुयाद्घृतम्, यच्चान्यन्महापातकेभ्यः सर्वमेतेन पूयत इत्यथाप्याचामेत् ॥ १९ ॥ अग्निश्च मा मन्युश्चेति प्रातर्मनसा पापं ध्यात्वों पूर्वाः सत्यान्ता व्याहृतीर्जपेदघमर्षणं वा पठेत् ॥ २० ॥ मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमाशौचमस्निग्धे त्वहोरात्रम् ॥ २१ ॥ श्ववानुगमने चैवम् ॥ २२ ॥ अधीयानानामन्तरा गमने त्वहोरात्रमभोजनम्, त्रिरात्रमभिषेको विवासश्चान्योन्येन ॥ २३ ॥ श्वमार्जारनकुलशीघ्रगाणामहोरात्रम् ॥ २४ ॥ श्वकुक्कुटग्राम्यसूकरकङ्कगृध्रभासपारावतमानुषकाकोलूकमांसादने सप्तरात्रमुपवासो निष्पुरीषभावो घृतप्राशः पुनःसंस्कारश्च ॥ २५ ॥

ब्राह्मणस्तु शुना दष्टो नदीं गत्वा समुद्रगाम्। प्राणायामशतं कृत्वा घृतं प्राश्य ततः शुचिः, इति २६

कालोऽग्निर्मनसः शुद्धिरुदकार्कावलोकनम्। अविज्ञानं च भूतानां षड्विधा शुद्धिरिष्यते, इति २७

श्वचाण्डालपतितोपस्पर्शने सचैलं स्नातः सद्यः पूतो भवतीति विज्ञायते ॥ २८ ॥ पतितचाण्डालशववहने त्रिरात्रं वाग्यता अनश्नन्त आसीरन्, सहस्रपरमं वा तदभ्यसन्तः पूता भवन्तीति विज्ञायते ॥ २९ ॥ एतेनैव गर्हिताध्यापकयाजका व्याख्याताः, दक्षिणात्यागाच्च पूता भवन्तीति विज्ञायते ॥ ३० ॥ एतेनैवाभिशस्तो व्याख्यातः ॥ ३१ ॥ अथापरं भ्रूणहत्यायां द्वादशरात्रमभक्षो द्वादशरात्रमुपवसेत् ॥ ३२ ॥ ब्राह्मणमनृतेनाभिशं(श)स्य पतनीयेनोपपतनीयेन वा मासमभक्षः शुद्धवतीरावर्तयेत् ॥ ३३ ॥ अश्वमेधावभृथे वा गच्छेत् ॥ ३४ ॥ एतेनैव चाण्डालीव्यवायो व्याख्यातः ॥ ३५ ॥ अथापरः कृच्छ्रविधिः साधारणो व्यूढः ॥ ३६ ॥ अहः प्रातरहर्नक्तमहरेकमयाचितम्। अहः परार्कं तन्नैकमेवं चतुरहौ परौ ३७

---

१ च. 'नेऽहो'। २ च. 'म्यशूक'। ३ क. 'सवायसगा'। ४ क. 'षकुलुकानां सा'। ५ च. 'ण्डालारावश्रवणे त्रि,। ६ च. 'ख्यातो भ्रू'। ७ च. 'भृथं वा। ८ क. अतः परार्कतन्नैक'।

अनुग्रहार्थं विप्राणां मनुर्धर्मभृतां वरः। बालवृद्धातुरेष्वेवं शिशुकृच्छ्रमुवाच ह ३८

अथ चान्द्रायणविधिः ॥ ३९ ॥

मासस्य कृष्णपक्षादौ ग्रासानद्याच्चतुर्दश। ग्रासापचयभोजी स्यात्पक्षशेषं समापयेत् ४०

+एवं हि शुक्लपक्षादौ ग्रासमेकं तु भक्षयेत्। ग्रासोपचयभोजी स्यात्पक्षशेषं समापयेत् ४१

अत्रैव गायेत्सामानि अपि वा व्याहृतीर्जपेत्। एष चान्द्रायणो मासः पवित्रमृषिसंस्तुतः

अनादिष्टेषु सर्वेषु प्रायश्चित्तं विधीयते विधीयत इति ॥ ४२

इति वासिष्ठे धर्मशास्त्रे त्रयोविंशोऽध्यायः ॥ २३ ॥

(अथ चतुर्विंशोऽध्यायः।)

अथातिकृच्छ्रः—॥ १ ॥ त्र्यहं प्रातस्तथा सायमयाचितं पराक इति कृच्छ्रः॥२॥ यावत्सकृदाददीत तावदश्नीयात्पूर्ववत्सोऽतिकृच्छ्रः ॥३॥ अब्भक्षः स कृच्छ्रातिकृच्छ्रः ॥४॥ कृच्छ्राणां व्रतरूपाणि—॥५॥ श्मश्रुकेशान्वापयेद्भ्रुवोऽक्षिलोमशिखावर्जं नखानिकृत्यैकवासा अनिन्दितभोजी सकृद्भैक्षमानिन्दितं त्रिषवणमुदकोपस्पर्शी दण्डी कमण्डलुः स्त्रीशूद्रसंभाषणवर्जी स्थानासनशीलोऽहस्तिष्ठेद्रात्रावासीतेत्याह भगवान्वसिष्ठः ॥ ६ ॥ स तद्यदेतद्धर्मशास्त्रं नापुत्राय नाशिष्याय नासंवत्सरोषिताय दद्यात् ॥ ७ ॥ सहस्रं दक्षिणा ऋषभैकादश गुरुप्रसादो वा गुरुप्रसादो वेति ॥ ८ ॥

इति वासिष्ठे धर्मशास्त्रे चतुर्विंशोऽध्यायः ॥ २४ ॥

(अथ पञ्चविंशोऽध्यायः।)

अविरुद्धापितदोषाणां पापानां महतां तथा। सर्वेषां चोपपापानां शुद्धिं वक्ष्याम्यशेषतः

आहिताग्नेर्विनीतस्य वृद्धस्य विदुषोऽपि वा। रहस्योक्तं प्रायश्चित्तं पूर्वोक्तमितरे जनाः २

प्राणायामैः पवित्रैश्च दानैर्होमैर्जपैस्तथा। नित्ययुक्ताः प्रमुच्यन्ते पातकेभ्यो न संशयः ३

प्राणायामान्पवित्राणि व्याहृतीः प्रणवं तथा। पवित्रपाणिरासीनो ब्रह्म नैत्यकमभ्यसेत्

आवर्तयेत्सदा युक्तः प्राणायामान्पुनः पुनः। आलोमाग्रान्नखाग्राच्च तपस्तप्यतु उत्तमम्

+ एतद्वचनं न विद्यते क. पुस्तके।

---

१ क. एवं। २ क. ख. 'ते। इति वा°। ३ क. नखं निकृ°। ४ क. °भोगी स°। ५ क °वृद्धैश्यम°। ६ च. °तेयन्सदा।

निरोधाज्जायते वायुर्वायोरग्निर्हि जायते। तापेनाऽऽपोऽथ जायन्ते ततोऽन्तः क्षुध्यते त्रिभिः ६

न तां तीव्रेण तपसा न स्वाध्यायैर्न चेज्यया। गतिं गन्तुं द्विजाः शक्ता योगात्संप्राप्नुवन्ति याम् ७

योगात्संप्राप्यते ज्ञानं योगो धर्मस्य लक्षणम्। योगः परं तपो नित्यं तस्माद्युक्तः सदा भवेत् ८

प्रणवे नित्ययुक्तः स्याद्व्याहृतीषु च सप्तसु। त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् ९

प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः। वाङ्मयं प्रणवः सर्वं तस्मात्प्रणवमभ्यसेत्

एकाक्षरं परं ब्रह्म पावनं परमं स्मृतम्। सर्वेषामेव पापानां संकरे समुपस्थिते ११

अभ्यासो दशसाहस्रः सावित्र्याः शोधनं महत्। १२

सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह। त्रिः पठेदायतप्राणः प्राणायामः स उच्यते स उच्यत इति १३

इति वासिष्ठे धर्मशास्त्रे पञ्चविंशोऽध्यायः॥ २५॥

(अथ षड्विंशोऽध्यायः।)

प्राणायामान्धारयेत्त्रीन्यो यथाविध्यतन्द्रितः। अहोरात्रकृतं पापं तत्क्षणादेव नश्यति १

कर्मणा मनसा वाचा यदह्नो कृतमेनसम्। आसीनः पश्चिमां संध्यां प्राणायामैर्व्यपोहति

कर्मणा मनसा वाचा यद्रात्र्या कृतमेनसम्। उत्तिष्ठन्पूर्वसंध्यां तु प्राणायामैर्व्यपोहति २

*प्राणायामैर्य आत्मानं संयम्याऽऽस्ते पुनः पुनः। संदध्याच्चाधिकैर्वाऽपि द्विगुणैर्वा परं तु यः ४

सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश। अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः ५

जप्त्वा कौत्समपेत्येतद्वासिष्ठं चेत्यृचं प्रति। सावित्रं शुद्धवत्यश्च सुरापोऽपि विशुध्यति ६

सकृज्जप्त्वाऽस्यवामीयं शिवसंकल्पमेव च। सुवर्णमपहृत्यापि क्षणाद्भवति निर्मलः ७

---

* एतद्वचनं न विद्यते च. पुस्तके।

---

१ क. ख. °ते। इति वा°। २ क. °रात्कृतमानसः। आ°। ३ क. °नः प्रथमां। ४ क. °हनु क°। ५ क. °तमानसः। उ°। ६ क. °हतु। प्रा°। ७ च. माहित्रं।

हविष्यन्तीयमभ्यस्य नतमंह इतीति च । सूक्तं च पौरुषं जप्त्वा मुच्यते गुरुतल्पगः ८
अपि वाऽप्सु निमज्जानस्त्रिर्जपेदघमर्षणम् । यथाऽश्वमेधावभृथस्तादृशं मनुरब्रवीत् ९
आरम्भयज्ञाज्जपयज्ञो विशिष्टो दशभिर्गुणैः । उपांशुः स्याच्छतगुणः सहस्रो मानसः स्मृतः १०
ये पाकयज्ञाश्चत्वारो विधियज्ञसमन्विताः । सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् ११
जप्येनैव तु संसिध्येद्ब्राह्मणो नात्र संशयः । कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते
जापिनां होमिनां चैव ध्यायिनां तीर्थवासिनाम् । न परिवसन्ति पापानि ये च स्नाताः शिरोव्रतैः १३
यथाऽग्निर्वायुना धूतो हविषा चैव दीप्यते । एवं जप्यपरो नित्यं ब्राह्मणः संप्रदीप्यते
स्वाध्यायाध्यायिनां नित्यं नित्यं च प्रयतात्मनाम् । जपतां जुह्वतां चैव विनिपातो न विद्यते १५
सहस्रपरमां देवीं शतमध्यां दशावराम् । शुद्धिकामः प्रयुञ्जीत सर्वपापेष्वपि स्थितः १६
क्षत्रियो बाहुवीर्येण तरेदापदमात्मनः । धनेन वैश्यशूद्रौ तु जपैर्होमैर्द्विजोत्तमः १७
यथाऽश्वा रथहीनाः स्यू रथो वाऽश्वैर्विना यथा । एवं तपस्त्वविद्यस्य विद्या वाऽप्यतपस्विनः १८
यथाऽन्नं मधुसंयुक्तं मधु वाऽन्नेन संयुतम् । एवं तपश्च विद्या [च] संयुक्तं भेषजं महत् १९
विद्यातपोभ्यां संयुक्तं ब्राह्मणं जपनैत्यकम् । सदाऽपि पापकर्माणमेनो न प्रतियुज्यते एनो न प्रतियुज्यते, इति २०

इति वासिष्ठे धर्मशास्त्रे षड्विंशोऽध्यायः ॥ २६ ॥

(अथ सप्तविंशोऽध्यायः ।)

यद्यकार्यशतं साग्रं कृतं वेदश्च धार्यते । सर्वं तत्तस्य वेदाग्निर्दहत्यग्निरिवेन्धनम् १
यथा वातबलो वह्निर्दहत्यार्द्रानपि द्रुमान् । तथा दहति वेदाग्निः कर्मजं दोषमात्मनः २
हत्वाऽपि स इमाल्लोकान्भुञ्जानोऽपि यतस्ततः । ऋग्वेदं धारयन्विप्रो नैनः प्राप्नोति किंचन ३

---

१ ख. ग. च. °म् । जाप्ये° । २ क. °दन्यत्र वा । ३ ख. ग. °वं जाप्य° । ४ क. °त्यं नित्यं च । ५ क. जपहो° । ६ क. °श्चैर्यथा विना । ए° । ७ क. ख. °ते इति वा° । ८ क. °र्यैकृते त्यागं कृ° । ९ क. °र्वं तु तस्य । १० च. °था जातव° ।

न वेदबलमाश्रित्य पापकर्मरतिर्भवेत्। अज्ञानाच्च प्रमादाच्च दह्यते कर्म नेतरत् ४
तपस्तप्यति योऽरण्ये मुनिर्मूलफलाशनः। ऋचमेकां च योऽधीते तच्च तानि च तत्समम् ५
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद्वेदो मामयं प्रहरिष्यति ६
वेदाभ्यासोऽन्वहं शक्त्या महायज्ञक्रियाक्रमः। नाशयत्याशु पापानि महापातकजान्यपि ७
वेदोदितं स्वकं कर्म नित्यं कुर्यादतन्द्रितः। तद्धि कुर्वन्यथाशक्त्या प्राप्नोति परमां गतिम्
याजनाध्यापनाद्योनात्तथैवासत्प्रतिग्रहात्। विप्रेषु न भवेद्दोषो ज्वलनार्कसमो हि सः ९
शङ्कास्थाने समुत्पन्ने अभोज्याभोज्यसंज्ञके। आहारशुद्धिं वक्ष्यामि तन्मे निगदतः शृणु
अक्षारलवणां रूक्षां पिबेद्ब्राह्मीं सुवर्चलाम्। त्रिरात्रं शङ्खपुष्पं(ष्पी) च ब्राह्मणः पयसा सह ११
पालाशबिल्वपत्राणि कुशान्पद्मानुदुम्बरान्। काथयित्वा पिबेदा(च्चा)पस्त्रिरात्रेणैव शुध्यति १२
गोमूत्रं गोमयं क्षीरं दधिसर्पिः कुशोदकम्। एकरात्रोपवासश्च श्वपाकमपि शोधयेत् १३
गोमूत्रं गोमयं चैव क्षीरं दधि घृतं तथा। पञ्चरात्रं तदाहारः पञ्चगव्येन शुध्यति १४
यवान्विधिनोपयुञ्जानः प्रत्यक्षेणैव शुध्यति। विशुद्धभावे शुद्धाः स्युरशुद्धे तु सरागिणः
हविष्यान्मातराशांस्त्रीन्सायमाशांस्तथैव च। अयाचितं तथैव स्यादुपवासत्रयं भवेत् १६
अथ चेच्चरते कर्तुं दिवसं मारुताशनः। रात्रौ जलाशये व्युष्टः प्राजापत्येन तत्समम् १७
सावित्र्यष्टसहस्रं तु जपं कृत्वोत्थिते रवौ। मुच्यते पातकैः सर्वैर्यदि नो ब्रह्महा भवेत् १८
यो वै स्तेनः सुरापो वा भ्रूणहा गुरुतल्पगः। धर्मशास्त्रमधीत्यैव मुच्यते सर्वपातकैः १९
दुरितानां दुरिष्टानां पापानां महतां तथा। कृच्छ्रं चान्द्रायणं चैव सर्वपापप्रणाशनम् २०
एकैकं वर्धयेत्पिण्डं शुक्ले कृष्णे च ह्रासयेत्। अमावास्यां न भुञ्जीत एवं चान्द्रायणो विधिरेवं चान्द्रायणो विधिः। इति २१

इति वासिष्ठे धर्मशास्त्रे सप्तविंशोऽध्यायः॥ २७॥

(अथाष्टाविंशोऽध्यायः।)

न स्त्री दुष्यति जारेण न विप्रो वेदकर्मणा। नाऽऽपो मूत्रपुरीषेण नाग्निर्दहनकर्मणा १

---

१ क. °नाद्दान°। २ क. °शुद्ध्यथा'। ३ क. जले स्थितां व्यु°। ४ च. न। ५ क. °येच्छुक्ले कृष्णे चैव तु हरा'। ६ क. ख. एष। ७ क. ख. 'विधिः। इति वा°। ८ क. ख. °हतिक°।

स्वयं विप्रतिपन्ना वा यदि वा विप्रवासिता । बलात्कारोपभुक्ता वा चोरहस्तगताऽपि वा न त्याज्या दूषिता नारी नास्यास्त्यागो विधीयते । पुष्पकालमुपासीत ऋतुकालेन शुध्यति ३

स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ४

पूर्वं स्त्रियः सुरैर्भुक्ताः सोमगन्धर्ववह्निभिः । गच्छन्ति मानुषान्पश्चान्नैता दुष्यन्ति धर्मतः तासां सोमोऽदद(दा)च्छौचं गन्धर्वः शिक्षितां गिरम् । अग्निश्च सर्वभक्षत्वं तस्मान्निष्कल्मषाः स्त्रियः ६

त्रीणि स्त्रियः(याः)पातकानि लोके धर्मविदो विदुः । भर्तुर्वधो भ्रूणहत्या स्वस्य गर्भस्य पातनम् ७

वत्सः प्रस्रवणे मेध्यः शकुनिः फलपातने । स्त्रियश्च रतिसंसर्गे श्वा मृगग्रहणे शुचिः ८

अजाश्वा मुखतो मेध्या गावो मेध्यास्तु पृष्ठतः । ब्राह्मणाः पादतो मेध्याः स्त्रियो मेध्यास्तु सर्वतः ९

सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम् । येषां जपैश्च होमैश्च पूयन्ते नात्र संशयः १०

अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समाः । कूष्माण्डानि पावमान्यो दुर्गा सावित्रिरेव च(?) अभीषङ्गाः पदस्तोमाः सामानि व्याहृतीस्तथा(?) । भारुण्डानि च सामानि गायत्रं रैवतं तथा १२

पुरुषव्रतं न्यासं च तथा देवव्रतानि च । अङ्गिलङ्गं बार्हस्पत्यं च वाक्सूक्तं मधुवृचस्तथा १३

शतरुद्रियमथर्वशिरास्त्रिसुपर्णं महाव्रतम् । गोसूक्तं चाश्वसूक्तं च शुद्धः शुद्धेति सामनी १४

त्रीण्याज्यदोहानि रथंतरं च अग्नेर्व्रतं वामदेव्यं बृहच्च ।
एतानि जप्यानि पुनन्ति जन्तूञ्जातिस्मरत्वं लभते यदीच्छेत् ॥ १५
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
तासामनन्तं फलमश्नुवीत यः काञ्चनं गां च महीं च दद्यात ॥ १६

उपरुन्धन्ति दातारं गौरश्वः कनकं क्षितिः । अश्रोत्रियस्य विप्रस्य हस्तं दृष्ट्वा निराकृतेः १७

वैशाख्यां पौर्णमास्यां च ब्राह्मणान्सप्त पञ्च वा । तिलान्क्षौद्रेण संयुक्तान्कृष्णान्वा यदि वेतरान् १८

---

१ क. जायन्ते । २ क. °र्षणो देवकृतः शु° । ३ च. अतीष° । ४ क. 'षड्गायदस्तो' । ५ च. °स्तोभाः सा° । ६ च. °तं च भासं । ७ क. अष्टलिङ्गं । ८ क. °क्सूक्तमनृतस्त' । ९ च च शुद्धाशुद्धीये सा° । १० क. सामानि । ११ क. दत्वा ।

प्रीयतां धर्मराजेति यद्वा मनसि वर्तते। यावज्जीवकृतं पापं तत्क्षणादेव नश्यति १९
सुवर्णनाभं कृत्वा तु सखुरं कृष्णमार्गणम् । तिलैः प्रच्छाद्य यो दद्यात्तस्य पुण्यफलं शृणु २०
ससुवर्णगुहा तेन सशैलवनकानना। चतुर्वक्त्रा भवेद्दत्ता पृथिवी नात्र संशयः २१
कृष्णाजिने तिलान्कृत्वाहिरण्यं मधुसर्पिषी।ददाति यस्तु विप्राय सर्वं तरति दुष्कृतमिति सर्वं तरति दुष्कृतमिति २२

इति वासिष्ठे धर्मशास्त्रेऽष्टाविंशोऽध्यायः ॥ २८ ॥

(अथैकोनत्रिंशोऽध्यायः ।)

दानेन सर्वकामानवाप्नोति॥१॥चिरजीवित्वं ब्रह्मचारी रूपवान् ॥२॥ अहिंस्युपपद्यते स्वर्गम् ॥ ३ ॥ अग्निप्रवेशाद्ब्रह्मलोकः ॥ ४ ॥ मौनात्सौभाग्यम् ॥ ५ ॥ नागाधिपतिरुदकवासात् ॥ ६ ॥ नीरुजः क्षीणकोशः ॥ ७ ॥ तोयदः सर्वकामसमृद्धः ॥ ८ ॥ अन्नपदाता सुचक्षुः॥९॥स्मृतिमान्मेधावी सर्वतोऽभयदाता ॥ १० ॥ गोप्रयुक्ते सर्वतीर्थोपस्पर्शनम् ॥ १० ॥ शय्यासनदानादन्तःपुराधिपत्यम् ॥ १२ ॥ छत्रदानाद्धलाभः ॥ १३ ॥ गृहप्रदो नगरमाप्नोति ॥ १३ ॥ उपानत्प्रदाता यानमासादयति ॥ १५ ॥ अथाप्युदाहरन्ति— ॥ १६ ॥
यत्किंचित्कुरुते पापं पुरुषो वृत्तिकर्षितः। अपि गोचर्ममात्रेण भूमिदानेन शुध्यति
विप्रायाऽऽचमनार्थं तु दद्यात्पूर्णं कमण्डलुम्। प्रेत्य तृप्तिं परां प्राप्य सोमपो जायते पुनः
अनड्वहां सहस्राणां दानानां धुर्यवाहिनाम्। सुपात्रे विधिदत्तानां कन्यादानेन तत्समम्
त्रीण्याहुरतिदानानि गावः पृथ्वी सरस्वती। आदिदानं हिरण्यानां विद्यादानं ततोऽधिकम् २०
आत्यन्तिकफलप्रदं मोक्षसंसारमोचनम्। योगिनां संमतं विद्वानाचारमनुवर्तते २१
श्रद्दधानः शुचिर्दान्तो धारयेच्छृणुयादपि। विहाय सर्वपापानि नाकपृष्ठे महीयते इति नाकपृष्ठे महीयत इति ॥ २२ ॥

इति वासिष्ठे धर्मशास्त्र एकोनत्रिंशोऽध्यायः ॥ २९ ॥

---

१ च. °र्गेजम्। ति°। २ क. ख. °मिति। इति वा°। ३ च. सर्वान्कामा°। ४ क. °वान्त्युपप°। ५ च. °साग्निरु°। ६ क. °रुजोऽक्षी°। ७ च. °ताऽयनमासादयते। अ°। ८ च. °ती। अतिदानं हि दानानां। ९ च. °योऽनसूयुरिमं वि°। १० क. ख. °यते ॥ २२ ॥

(अथ त्रिंशोऽध्यायः।)

धर्मं चरत माऽधर्मं सत्यं वदत नानृतम्। दीर्घं पश्यत मा ह्रस्वं परं पश्यत माऽपरम् १

ब्राह्मणो भवत्यग्निरग्निर्वै ब्राह्मण इति श्रुतेः ॥ २ ॥ तच्च कथम् ॥ ३ ॥ तत्र सदो ब्राह्मणस्य शरीरं वेदिः संकल्पो यज्ञः पशुरात्मा रशना बुद्धिः सदो मुखमाहवनीयं नाभ्यामुदरोऽग्निर्गार्हपत्यः प्राणोऽध्वर्युरपानो होता व्यानो ब्रह्मा समान उद्गाताऽऽत्मेन्द्रियाणि यज्ञपात्राणि य एवं विद्वानिन्द्रियैरिन्द्रियार्थं जुहोतीति ॥ ४ ॥ अपि च काठके विज्ञायते ॥ ५ ॥ अथाप्युदाहरन्ति— ॥ ६ ॥

पाति *त्राति च दातारमात्मानं चैव किल्बिषात्। वेदेन्धनसमृद्धेषु हुतं विप्रमुखाग्निषु७

न स्कन्दते न व्यथते नैनमध्यापतेच्च यत्। वरिष्ठमग्निहोत्रात्तु ब्राह्मणस्य मुखे हुतम् ८

ध्यानाग्निः सत्योपचयनं क्षान्त्यो पुष्टिश्रवं त्रिः पुरोडाशमहिंसा च संतोषो यूपः कृच्छ्रं भूतेभ्योऽभयदाक्षिण्यं स्मृतिं कृत्वा क्रतुं मानसं याति क्षयं बुधः ॥ ९ ॥

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः। जीवनाशा धनाशा च जीर्यतोऽपि न जीर्यति १०

यो दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः। याऽसौ प्राणान्तिको व्याधिस्तां तृष्णां त्यजतः सुखमिति ११

नमोऽस्तु मित्रावरुणयोरुर्वश्यात्मजाय शतयातवे वसिष्ठाय वसिष्ठायेति ॥ १२ ॥

इति वासिष्ठे धर्मशास्त्रे त्रिंशोऽध्यायः ॥ ३० ॥

समाप्तेयं वसिष्ठस्मृतिः।

* आर्षत्वात्साधु।

१ क. °तेश्च यः। ब°। २ च. °त्याहुतिः स्रुवं हरीः पुं°। ३ च. °क्षिण्यमिति कृ°। ४ च. क्रतुमा°। ५ क. या दुःखजा।

ॐतत्सद्ब्रह्मणे नमः ।

वृद्धशातातपस्मृतिः ।

वृद्धशातातपप्रोक्तं स्मृतितन्त्रविनिश्चयम् । संक्षेपेण प्रवक्ष्यामि यावदर्थोपलब्धये १
नदीतीरेषु गोष्ठेषु पुण्येष्वायतनेषु च । तत्र गत्वा शुचौ देशे ब्रह्मकूर्चं समाचरेत् २
पालाशं पद्मपत्रं वा ताम्रं वाऽथ हिरण्मयम् । तत्र भुङ्क्ते व्रती नित्यं तत्पात्रं समुदाहृतम् ३
गायत्र्या चैव गोमूत्रं गन्धद्वारेति गोमयम् । आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि
तेजोऽसि शुक्रमित्याज्यं देवस्य त्वा कुशोदकम् । चतुर्दशीमुपोष्यैवं योऽमावस्यां समाचरेत् ५
गोमूत्रकं पलं दद्यादङ्गुष्ठार्धं तु गोमयम् । क्षीरं सप्तपलं दद्याद्दध्नस्त्रिपलमेव च ६
आज्यमेकपलं प्रोक्तं पलमेकं कुशोदकम् । एवं क्रमेण कर्तव्यं पञ्चगव्यं यथाविधि ७
सप्तपर्णाः शुभा दर्भा अच्छिन्नाग्राः समायताः । तैः समुद्धृतैर्होतव्यं देवताभ्यो यथाविधि ८
अग्नये सोमायेति इरावतीदं विष्णुरिति । विष्णोर्नुकं सुमित्रियान सुजानातकस्तथा(?)९
एतासां देवताहुतीनां हुतशेषं तु यः पिबेत् । आलोड्य प्रणवेनैव निर्मथ्य प्रणवेन तु १०
उद्धृत्य प्रणवेनैव पिबेच्च प्रणवेन तु । एवं कुर्वन्ब्रह्मकूर्चं मासे मासे च वै द्विजः ।
सर्वपापविशुद्धात्मा जायते नात्र संशयः ॥ ११
यत्त्वगस्थिगतं पापं देहे तिष्ठति देहिनाम् । ब्रह्मकूर्चो दहेत्पापं प्रदीपा(प्ता)ग्निरिवेन्धनम्
मूत्ररेतःसमुत्सर्गे मोहाद्भुञ्जीत वा क्वचित् । +त्रिरात्रं तत्र कुर्वीत प्रायश्चित्तं विशुद्धये १३
मूत्रयित्वा द्विजो मार्गे स्मृतिभ्रंशाज्जलं पिबेत् । अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति १४
निगिरन्यदि मेहेत भुङ्क्ते वा मेहने कृते । अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति १५
भोजनस्य तु काले च योऽशुचिर्भवति द्विजः । भूमौ निक्षिप्य तं ग्रासं स्नात्वा शुद्धिमवाप्नुयात् १६

+ एतदर्धस्थानेऽयं पाठः ख. पुस्तके " अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति " इति ।

---

१ ख. °निश्चितम् । २ ख. यत्र । ३ क. ग. ङ. °त्रं द्वारे तिष्ठति गो° । ४ च °वं पौर्णमास्यां । ५ ख. तु वर्जयेत् । ६ ख. °ते वै प्रं । ७ क. ग. शुचिमं ।

चाण्डालैः श्वपचैः स्पृष्टो विण्मूत्रे कुरुते द्विजः । त्रिरात्रं तत्र कुर्वीत भुक्तोच्छिष्टस्तदाचरेत् १७

उदक्या सूतिका चैव ह्यन्त्यजा स्पृशति द्विजम् । त्रिरात्रेणैव शुध्येत इति शातातपोऽब्रवीत् १८

रजस्वला यदा स्पृष्टा चाण्डालान्त्यजवायसैः । तावत्तिष्ठेन्निराहारा स्नात्वा कालेन शुध्यति १९

रजस्वले च द्वे नार्यावन्योन्यं स्पृशतो यदि । सुवर्णपञ्चगव्येन स्नात्वा शुद्धिमवाप्नुयात

रजस्वलायाः प्रेतायाः संस्कारादीनि नाऽऽचरेत् । ऊर्ध्वं त्रिरात्रतः स्नातां शवधर्मेण दाहयेत् २१

चाण्डालं पतितं व्यङ्गमुन्मत्तं शवमन्त्यजम् । शूगालं सूतिकां नारीं रजसा च परिप्लुताम्

श्वकुक्कुटवराहांश्च ग्राम्यान्स्पृशति मानवः । सचैलं सशिरः स्नात्वा तदानीमेव शुध्यति

अशुद्धःस्वयमप्येतानशुद्धांश्च यदा स्पृशेत् । विशुध्यत्युपवासेन शातातपवचो यथा २४

उच्छिष्टं स्पृशते विप्रो यदाऽशुद्धं च मानवः । अहोरात्रोषितः स्नात्वा पञ्चगव्येन शुध्यति

आदित्येऽस्तमिते रात्रावस्पृश्यं स्पृशते यदि । भगवन्मेन शुद्धिः स्यात्तन्मे ब्रूहि विनिश्चितम् २६

अनस्तमित आदित्ये संगृहीतं तु यज्जलम् । तेन सर्वात्मना शुद्धिः शवस्पृष्टं न शुध्यति २७

स्वाभिप्रायकृतं कर्म यत्किंचिज्ज्ञानवर्जितम् । क्रीडाधर्मेण बालानां तत्सर्वं निष्फलोजनम् २८

विना धर्मेण शास्त्रेण प्रायश्चित्तं प्रदीयते । न तेन शुद्धिमाप्नोति प्रायश्चित्ते कृते सति २९

अनधीत्य धर्मशास्त्रं प्रायश्चित्तं ददाति यः । प्रायश्चित्ती भवेत्पूतस्तत्पापं पर्षदं व्रजेत् ३०

गोभूहिरण्यहरणे स्त्रीसंबन्धकृतेषु च । यमुद्दिश्य त्यजेत्प्राणांस्तमाहुर्ब्रह्मघातकम् ३१

अथ कश्चित्प्रमादेन म्रियतेऽन्युदकादिभिः । तस्याशौचं विधातव्यं कर्तव्या चोदकक्रिया

ऋतौ तु गर्भशङ्कायां स्नानं मैथुनिनः स्मृतम् । ऋतुं विना यदा गच्छेच्छौचं मूत्रपुरीषवत् ३३

तावदेवाशुची स्यातां दंपती शयनं गतौ । शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ३४

उच्छिष्टं संस्पृशेद्यस्तु ह्येक एव स दुष्यति । तं स्पृष्ट्वाऽन्यं(न्यो)न दुष्येत सर्ववर्णेष्वयं विधिः

---

१ च. °रिप्लुता° । २ क. ग. घ. °लं शिरसा स्ना° । ३ ख. 'प्रो मद्यं शूद्री च मानवीम् । अ° । ४ क. यथा शुद्धं च मानव । अ° । ५ ख. °द्धिः शुना स्पृष्टं तु वर्जयेत् । स्वा' । ६ ख. च. °त् । द्वावेतावशु' ।

शोणितानां[1] तु पात्राणां यद्येकमुपहन्यते। तावन्मात्रस्य तच्छौचं नेतरेषामिति स्थितिः
पिण्याकाश्चैव तैक्काम्बु[2] सक्तवः प्रतिवासरम्। एकरात्रोपवासश्च कृच्छ्रसौम्योऽयमुच्यते
एषामेव त्रिरभ्यासादेकैकस्य यथाक्रमम्। तुलापुरुष इत्येष ज्ञेयः पञ्चदशाहिकः ३८
पिण्डयज्ञकृता देयं प्रेतायान्नं दिनत्रयम्। जलमेकाहमाकाशे स्थाप्यं क्षीरं च मृन्मये ३९
मृताहनि तु कर्तव्यं प्रतिमासं तु वत्सरम्। प्रतिसंवत्सरं चैवमाद्यमेकादशेऽहनि ४०
मातुः सपिण्डीकरणं कथं कार्यं भवेत्सुतैः। पितामह्या सहैवास्याः सपिण्डीकरणं स्मृतम्[3]
मातुर्लेनैव गोत्रेण यावत्तस्याः सपिण्डता। भार्यायां संस्थितायां तु सपिण्डीकरणा-
न्तिकम् ४२
पितुः सा भजते गोत्रमूर्ध्वं तु पतिपैतृकम्[4]। इति प्रोक्तं पुराविद्भिर्धर्मशास्त्रानुसारतः ४३
सर्ववर्णासु नारीषु ये स्युर्विप्रस्य बान्धवाः। तेषामाशौचं विप्रस्य दशाहं सूतकं भवेत् ४४
पूर्वपातस्थितानां तु षड्भिस्तु पृथगेव च। यद्येकजाता बहवः पृथक्क्षेत्राः पृथक्स्थिताः
एकपिण्डः पृथक्स्थो यस्तं पिण्डं त्रिषु वर्तयेत्। एवं सपिण्डि(ण्ड)ता कार्या सर्वदैव विच-
क्षणैः ४६
नाभिमात्रे जले स्थित्वा चिन्तयेदूर्ध्वमानसः। आगच्छन्तु मे पितरः प्रतिगृह्णन्तु
तज्जलम् ४७
पिबतः पतते तोयं भाजने मुखनिःसृतम्। अभोज्यान्नं विजानीयाद्भुक्त्वा चान्द्रायणं
चरेत् ४८
हस्तदत्तं तु यत्तोयं लवणं व्यञ्जनानि च। तदातुर्नोपतिष्ठन्ति भोक्ता भुञ्जीत किल्बिषम्
पात्रे तु मृन्मये यस्तु श्राद्धे वै भोजयेद्द्विजान्। अन्नदाता पुरोधाता भोक्ता च नरकं
व्रजेत् ५०
श्राद्धे भुक्त्वा य उच्छिष्टं वृषलाय प्रयच्छति। स गच्छेन्नरकं घोरं तिर्यग्योनौ च जायते
आसनारूढपादो वा वस्त्रार्धप्रावृतोऽपि वा। मुखेन फूत्कृतं भुङ्क्ते भुक्त्वा चान्द्रायणं
चरेत् ५२
मुखपर्युषितो नित्यं देवतास्त्वर्चयेत्तु यः। तस्मात्सर्वप्रयत्नेन प्रकुर्यादन्तधावनम् ५३
नेत्राञ्जनं सताम्बूलं सिन्दूरं रक्तवाससी। बिभृयात्सोपवासाऽपि सर्वदा भर्तृवृद्धये ५४
गन्धालंकारवस्त्राणि धूपमाल्यानुलेपनम्। उपवासे न दुष्यन्ति दन्तधावनमञ्जनम् ५५

---

१ क. ग. घ. ङ. शोणिता°। २ क. ग. ङ. वक्त्राम्बु। ३ ख. °र्यायाः सस्थितायास्तु स। ४ ख. °तिपितृ°। ५ ख. °त्। प्रथमेऽवस्थि°। ६ क. ग. घ. ङ. °यस्ते पिण्डत्रिषु वर्तते। ए°। ७ च. °दत्तांस्तु योऽश्नीयाल्लवणं व्यञ्जनादिकम्। त°। ८ च श्राद्धं। ९ क. ग. °र्चयन्नतः। त°। १० क. ग. घ. ङ. °सना। वि°।

नित्यमाराधयेदेनमा समाप्तेः श्रुतिग्रहात्। अनेन विधिनाऽधीतो वेदमन्त्रो द्विजं नयेत् ३७
शापानुग्रहसामर्थ्यमृषीणां च सलोकताम्। पयोमृताभ्यां मधुभिः साज्यैः प्रीणन्ति देवताः ३८
तस्मादहरहर्वेदमनध्यायमृते पठेत्। यदेकं तदनध्याये गुरोर्वचनमाचरेत् ३९
व्यतिक्रमादसंपूर्णमनहंकृतिना च यत्। परत्रेह च तद्ब्रह्म अनधीतमपि द्विजम् ४०
यस्तूपनयनादेतदा मृत्योर्व्रतमाचरेत्। स नैष्ठिको ब्रह्मचारी ब्रह्मसायुज्यमाप्नुयात् ४१
गुरवेऽपि वसेन्न्यायो(य्यो) द्विजः षोडशवार्षिकः। केशान्तकर्मणो विप्रात(स्त)द्व्रतान्यप्यनघ्नता ४२
समाप्य वेदान्वेदौ वा वेदं वा सततं द्विजः। स्नायीत गुर्वनुज्ञातः प्रदत्तो(द)त्तोदितदक्षिणः

इति श्रीवेदव्यासीये [धर्मशास्त्रे] ब्रह्मचार्यधिकारो नाम प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयोऽध्यायः ।)

एवं स्नातकतां प्राप्तो द्वितीयाश्रमकाङ्क्षया। प्रतीक्षेत विवाहार्थमनिन्द्यान्वयसंभवाम्
अरोगादुष्टवंशोत्थामशुल्कादानदूषिताम्। सवर्णामसमानार्षाममातृपितृगोत्रजाम् २
अनन्यदत्तवागाप्तां शुभलक्षणसंयुताम्। धृताधोवसनां गौरीं विख्यातदशपूरुषाम् ३
ख्यातनाम्नः पुत्रवतः सदाचारवतः सतः। दातुमिच्छोर्दुहितरं प्राप्य धर्मेण चोद्वहेत् ४
ब्राह्मोद्वाहविधानेन तदभावेऽपरो विधिः। दातव्यैषा सदृक्षाय वयोविद्यान्वयादिभिः ५
पितृतत्पितृभ्रातृषु पितृव्यज्ञातिमातृषु। पूर्वाभावे परो दद्यात्सर्वाभावे स्वयं व्रजेत् ६
यदि सा दातृवैकल्याद्रजः पश्येत्कुमारिका। भ्रूणहत्याश्च यावत्यः पतितः स्यात्तदप्रदः
तुभ्यं दास्याम्यहमिति ग्रहीष्यामीति यस्तयोः। कृत्वा समयमन्योन्यं भजते न स दण्डभाक् ८
त्यजन्नदुष्टां दण्ड्यः स्यादूषयंश्चाप्यदूषिताम्। *तावन्न दुष्टं दुष्टं च स्वार्थेभ्यो भेदयंश्च तत् ९

---

* एतदर्धं न. ख. ग. पुस्तकयोः।

---

१ क. ङ. °मृतेक्षुमेदोभिः। २ क. ङ. °दङ्गास्तमन°। ३ ख. ग. °तिराचरेत्। ४ ख. ग. °त्। उपकुर्वाणको यस्तु द्विजः षड्विंश°। ५ ख.ग.°णा तत्र यथोक्तचरितव्रतः स°। ६ ख. ग. प्रसभं। ७ क. °वृत्ताविवित्तद°। ८ ख. ग. °न्यपूर्विकां लघ्वीं शु°। ९ क. ङ. °म्। स्मृता°। १० क. ङ. °ख्यातां दशपौरु°। ११ क. ङ. सदक्षा°। १२ क. घ. °दि स्याद्दात्°। १३ क. ङ. तुल्यं दास्याम्यहं दत्तोप्र°। १४ क. ङ. °न्यं विभज्येतस। घ. °न्यं विरज्येत स।

ऊढायां हि सवर्णायामन्यां वा काममुद्वहेत् । तस्यामुत्पादितः पुत्रो न स्ववर्णात्प्रहीयते उद्वहेत्क्षत्रियां विप्रो वैश्यां च क्षत्रियोऽपि ताम् । न तु शूद्रां द्विजः क्वश्चिन्नाधरः पूर्ववर्णजाम् ११

नानावर्णासु भार्यासु सवर्णा सहचारिणी । धर्मे धर्मेण धर्मिष्ठा ज्येष्ठा तु सजातिषु १२

पाटितोऽयं द्विजाः पूर्वमेकदेहः स्वयंभुवा । पतयोऽर्धेन चार्धेन पत्न्यो ऽभूवन्निति श्रुतिः यावन्न विन्दते जायां तावदर्धो भवेत्पुमान् । नार्धं प्रजायते सर्वं प्रजायेतेत्यपि श्रुतिः १४

गुर्व्येषा भूस्त्रिवर्गस्य वोढुं नान्येन शक्यते । यतस्ततोऽन्वहं भूत्वा संवासा बिभृयात्तया

कृतदारोऽग्निपत्नीभ्यां कृतवेश्मा गृहं वसेत् । स्वकृतं वित्तमासाद्य वैतानाग्नीन्न हापयेत् स्मार्तं वैवाहिके वह्नौ श्रौतं वैतानिकाग्निषु । कर्म कुर्यात्प्रतिदिनं विधिवत्प्रतिपर्व च १७

सम्यग्धर्मार्थकामेषु दंपतिभ्यामहर्निशम् । एकचित्ततया भाव्यं समानव्रततृत्तया १८

न पृथग्विद्यते स्त्रीणां त्रिवर्गविधिसाधनम् । भावतो ह्यतिदेशाद्वा इति शास्त्रविधिः परः

पत्युः पूर्वं समुत्थाय देहशुद्धिं विधाय च । उत्थाप्य शयनाद्यानि कृत्वा वेश्मविशोधनम् २०

मार्जनैर्लेपनैः प्राप्य साग्निशालं स्वमङ्गनम् । शोधयेदग्निकार्याणि स्निग्धान्युष्णेन वारिणा प्रोक्षण्यै(णै)रिति तान्येव यथास्थानं प्रकल्पयेत् । द्वंद्वपात्राणि सर्वाणि न कदाचिद्वियोजयेत् २२

शोधयित्वा तु पात्राणि पूरयित्वाऽनुधारयेत् । महानसस्य पात्राणि बहिः प्रक्षाल्य सर्वशः मृद्भिश्च शोधयेच्चुल्लीं तत्राग्निं सेन्धनं न्यसेत् । स्मृत्वा नियोगपात्राणि रसान्द्रविणानि च कृतपूर्वाह्णकार्योऽयं स्वगुरावभिवादयेत् । ताभ्यां भर्तृपितृभ्यां वा भ्रातृमातुलबान्धवैः वस्त्रालंकाररत्नानि प्रदत्तान्येव धारयेत् । मनोवाक्कर्मभिः शुद्धा पतिदेशानुवर्तिनी छायेवानुगता स्वच्छा सखीव हितकर्मसु । दासीवाऽऽदिष्टकार्येषु भार्या भर्तुः सदा भवेत् २७

---

१ ख. ग. घ. न स व° । २ ख. ग. °यो विशाम् । ३ ख. ग. °धमः पू° । ४ ख. धर्माधर्मेषु धर्मि° । ग. धर्म्या धर्मेषु धर्मि° । ५ ख. ग. ज्येष्ठा तस्य स्वजा° । ६ क. ङ पतिरर्धेन चा° । ७ क. ङ. °त्न्योवादिति । घ. °त्न्योवाभृदि° । ८ ख. ग. गुर्वी सा भृ° । ९ ख. ग. °त्वा स्ववशो बिभृयाच्च ताम् । कृ° । १० घ. सर्वासां । ११ क. घ. °ताग्नीन्न तु हा° । १२ ख. °वत्प्रीतिपूर्वतः । स° ग. °वत्प्रीतिपूर्वकः । स° । १३ ख. ग. °तवृत्तितः । न । १४ क. °म् । भवेद्भर्तुरनादेशात्तदेवयक्तिनयदि । प° । १५ क. °विन्धबन° । १६ क. ङ °मिलंगवसागणम् । १७ क. °णा । प्रोक्षणैवितान्ये° । १८ क. ङ. शोषयित्वा । १९ ख. ग. °त्वा तु धा° । घ. °त्वाऽपिधापये° । २० ख. ग. °ग्निं. विन्यसेत्ततः । स्मृ° । २१ ख. ग. रसाश्च द्र° । २२ क. ग. °कार्याच्च स्वगुरूनभि° । २३ क. ङ. भर्तापि° ।

ततोऽन्नसाधनं कृत्वा *पतये विनिवेद्य सा। वैश्वदेवोक्तैरन्नैर्भोजनीयांश्च भोजयेत् २८
पतिं चैतदनुज्ञाता शिष्टमन्वाद्यमात्मना। भुक्त्वा नयेदहःशेषं मायव्ययविचिन्तया २९
पुनः सायं पुनः प्रातर्गृहशुद्धिं विधाय च। कृतान्नसाधना साध्वी सुभृशं भोजयेत्पतिम्
नातितृप्ता स्वयं भुक्त्वा गृहनीतिं विधाय सा। आस्तीर्य साधुशयनं ततः परिचरेत्पतिम्
सुप्ते +पतौ तदभ्याशे स्वपेत्तद्गतमानसा। अनग्ना चाप्रमत्ता च निष्कामा च जितेन्द्रिया
नोच्चैर्वदेन्न परुषं न बहून्पतिमप्रियम्। न केनचिद्विवदेच्च अप्रलापविलापिनी ३३
न चातिव्ययशीला स्यान्न धर्मार्थविरोधिनी। प्रमादोन्मादरोषेर्ष्यावञ्चनं चातिमानिताम् ३४
पैशुन्यहिंसाविद्वेषमहाहंकारधूर्तता। नास्तिक्यसाहसस्तेयदम्भान्साध्वी विवर्जयेत् ३५
एवं परिचरन्ती सा पतिं परमदैवतम्। यशस्यामिह यात्येवं परत्र च सलोकताम् ३६
योषितो नित्यकर्मोक्तं नैमित्तिकमथोच्यते। रजसो दर्शनाद्दोषात्सर्वमेव परित्यजेत् ३७
सर्वैरलक्षिता शीघ्रं लज्जिताऽन्तर्गृहे वसेत्। एकाम्बरा कृशा दीना स्नानालंकारवर्जिता
मौनिन्यधोमुखी चक्षुष्पाणिपद्भिरचञ्चला। अश्नीयात्केवलं भक्तं नक्तं मृन्मयभाजने
स्वपेद्भूमावप्रमत्ता क्ष(क्षि)पेदेवमहस्त्रयम्। स्नायीत सा त्रिरात्रान्ते सचैलमुदिते रवौ ४०
विलोक्य भर्तृवदनं शुद्धा भवति धर्मतः। कृतशौचा पुनः कर्म पूर्ववच्च समाचरेत् ४१
रजोदर्शनतः कात्स्न्र्याद्रात्रयः षोडशर्तवः। ततः पुंबीजमाक्षिप्तं शुद्धे क्षेत्रे प्ररोहति ४२
चतस्रश्चाऽऽदिमा रात्रीः पर्ववच्च विवर्जयेत्। गच्छेद्युग्मासु स्वयं मुक्त्वा पौष्णपित्र्यर्क्षरात्रिषु ४३
गच्छादितादित्यपथे पुमान्गच्छेत्स्वयोषिति। क्षामाऽलंकृदवाप्नोति पुत्रं पूजितलक्षणम् ४४
ऋतुकालाभिगाम्येवं ब्रह्मचार्येव धर्मतः। गच्छन्नपि यथाकामं न दुष्टः स्यादनन्यहृत् ४५
भ्रूणहत्यामवाप्नोति ऋतौ भार्यापराङ्मुखः। सा त्ववाप्यान्यतो गर्भं त्याज्या भवति पापिनी ४६

---

* आर्षत्वात्साधुत्वमस्य। + आर्षः प्रयोगोऽयम्।

---

१ ख. ग. तत्। २ ख. ग. °देवकृतै°। ३ घ. °मद्याद्यथात्म°। क. ङ. °मन्नाद्य°। ४ क. घ. ङ. °मादाय व्ययचि°। ५ क. ङ. सभृतिं। ६ ख.ग. °तृप्त्या स्व°। ७ क. ङ. आस्तृत्य। ८ ख. ग. °न्पत्युरप्रि°। ९ ख. चापि व्य°। १० क. ङ. °श्वनान्नाति°। ११ ख. ग. यशः शमिह। १२ क. ङ. °रत्रेमास°। १३ ख. ग. रजोदर्शनतो दोषा°। १४ ख.ग. °रावृता दी°। १५ ख. °नतो याः स्यू रात्र°। १६ ख- ग °जमाक्षि°। १७ क. ङ. °तस्रषष्ठमा। १८ ख. ग. °गासु रात्रीषु पौ°। १९ क. ङ. °न्। पुष्पादितादित्यैः पु°। २० ख. ग. °षितः। क्षा°। २१ ख. ग. °कालेऽभिगम्यैवं ब्रह्मचर्ये व्यवस्थितः। २२ ख. ग. °न्यकृत्।

महापातकदुष्टा[1] च पतिगर्भविनाशिनी । सद्वृत्तचारिणीं पत्नीं त्यक्त्वा पतति धर्मतः ४७
महापातकदुष्टोऽपि नाप्रतीक्ष्यो[2] भवेत्पतिः।अशुद्धे क्षयमादूरं स्थि[3]तायामनुचिन्तया(?)४८
व्यभिचारेण दु[4]ष्टां तां पत्नीमा दर्शनादृतोः । हृतत्रिवर्गकरणां धिक्कृतां च वसेत्पतिः४९
पुनस्तामार्तवस्नातां पूर्ववद्व्यवहा[5]रयेत् । धूर्तां च धर्मकामघ्नीमपुत्रां दीर्घरोगिणीम् ५०
त्वे[6]ग्दुष्टां व्यसनासक्तामहितामधिवेदयेत् । अधिविन्नामपि विभुः स्त्रीणां तु समतामियात
विवर्णदीनवदना देहसंस्कारवर्जिता । पतिव्रता निराहारा शो[7]ष्यते प्रोषिते पतौ ५२
मृतं भर्तारमादाय ब्राह्मणी वह्निमाविशेत् । ब्राह्मणी चेत्यक्तकेशा तपसा शोषयेद्वपुः ५३
सर्वावस्थासु नारीणां न युक्तं स्यादरक्षणम् । तदेवानुक्रमात्कार्यं पितृ[8]भ्रातृसुतादिभिः
जाताः सुरक्षितायां ये पुत्रपौत्रप्रपौत्रकाः । ये यजन्ति पितॄ[9]न्स्वर्गे मोक्षप्राप्तिमहोदयैः ५५
मृतानामग्निहोत्रेण दाहये[10]द्विधिपूर्वकम्[11] । आहरेदविलम्बेन भा[12]र्यामाप्रव्रजेत्तदा ५६

इति श्रीवेदव्यासीये स्त्र्यधिकारो नाम

द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः ।)

नित्यं नैमित्तिकं का[13]म्यं नैमित्तिकमतः परम् । त्रिविधं कर्म वक्ष्यामि गृहस्थस्यावधार्यताम्
यामिन्याः पश्चिमे यामे त्यक्तनिद्रो हरिं स्मरेत् । आलोक्य मङ्गलद्रव्यं कर्माऽऽवश्यकमा-
चरेत् २
कृतशौचोऽनि[14]षेधेऽह्नि दन्तान्प्रक्षाल्य वारिणा । स्नात्वोपास्य द्विजः सं[15]ध्यां देवादींश्चैव
तर्पयेत् ३
*जुहोत्यनुदिते भानावित्येक उदिते रवौ । जपेदादि[16]त्यदैवत्यान्मन्त्रान्मन्त्रनियोगवित्

---

* इत आरभ्य नियोगविदित्यन्तं न ख. ग. पुस्तकयोः ।

---

१ क घ. ङ. °ष्टानां प° । २ ख. ग. °तीक्ष्यस्तया पतिः । ३ क. स्थितया° । ४ ख. ग. दुष्टानां पतीनां दर्शनादृते । धिक्कृतायामवाच्यायामन्यत्र वासयेत्प° । ५ ख. ग. सुदुष्टां । ६ ख. ग. °धिवासये° । ७ ख. ग. °वर्णादी° । ८ क. ङ. °हासाप्यते । ९ ख. ग. जीवन्ती । १० ख. ग. °त्वभर्तृमु° । ११ ख. ग. °तॄन्यज्ञैर्मोक्ष° । १२ क ङ. °धिवत्पतिः । आ° । घ. °धिवत्पतिम् । १३ ख. ग. °म् । दाहयेद्° । १४ ख. ग. भार्यां चात्र व्रजेत सा । इ° । १५ ख. ग. काम्यामिति कर्म त्रिधा मतम् । त्रिविधं तच्च वं° । १६ ख. ग. निषेध्याग्निं दं° । १७ क. घ. ङ. °ध्यां वेदादींश्च त° । १८ घ. °त्यदैव° ।

वेदवेदाङ्गशास्त्राणि इतिहासानि चाभ्यसेत्। अध्यापयेच्च सच्छिष्यान्सद्विपांश्च द्विजोत्तमः ५

अलब्धं प्रापयेल्लब्ध्वा क्षणमात्रं समापयेत्। समर्थो हि समर्थेन नाविज्ञातः क्वचिद्वसेत् ६

सरित्सरसि वापीषु गर्तप्रस्रवणादिषु। स्नायीत यावदुद्धृत्य पञ्च पिण्डानि वारिणा ७

तीर्थाभावेऽप्यशक्तो वा स्नायात्तोयैः समाहृतैः। गृहाङ्गणगतस्तत्र यावदम्बरपीडनम् ८

स्नानमब्दैवतैः कुर्यात्पावनैश्च समार्जनम्। मन्त्रैः प्राणांस्त्रिरायम्य सौरैश्चार्कं विलोकयेत्

तिष्ठन्स्थित्वा तु गायत्रीं ततः स्वाध्यायमाचरेत्। ऋचां च यजुषां साम्नामथर्वाङ्गिरसामपि १०

इतिहासपुराणानां वेदोपनिषदां द्विजः। शक्त्या सम्यक्पठेन्नित्यमल्पमप्या समापनात्

स यज्ञदानतपसामखिलं फलमाप्नुयात्। *वेदेभ्योऽन्यत्र संतुष्टः स विप्रः शूद्रतामियात्

तस्मादहरहर्वेदं द्विजोऽधीयीत वाग्यतः। धर्मशास्त्रेतिहासादि सर्वेषां शक्तितः पठेत्

कृतस्वाध्यायः प्रथमं तर्पयेच्चाथ देवताः। जान्वाच्य दक्षिणं दर्भैः प्राग्ग्रैः सयवैस्तिलैः

+पुरःक्षिप्तैः कराग्राभ्यां निर्गतैः प्राङ्मुखो द्विजः। एकैकाञ्जलिदानेन प्रकृतिस्थोपवीतकः १५

समजानुद्वयो ब्रह्मसूत्रहार उदङ्मुखः। तिर्यग्दर्भैश्च वामाग्रैर्यवैस्तिलविमिश्रितैः १६

अम्भोभिरुत्तरक्षिप्तैः कनिष्ठामूलनिर्गतैः। द्वाभ्यां द्वाभ्यामञ्जलिभ्यां मनुष्यांस्तर्पयेत्ततः

दक्षिणाभिमुखः सव्यं जान्वाच्य द्विगुणैः कुशैः। तिलैर्जलैश्च देशिन्या मूलदर्भाग्रविच्युतैः

दक्षिणांसोपवीतः स्यादञ्जलीभिस्त्रिभिस्त्रिभिः। संतर्पयेद्दिव्यपितॄन्स्वधापूर्वमितीरयेत्

स्वधावर्जनमानेवमेक इच्छन्ति तर्पणे। द्विजातिजीवत्पितृको ऽप्येतानन्यांश्च तर्पयेत् २०

तर्पयेद्दिव्यपितॄंश्च पितृपूर्वान्पितॄन्स्वकान्। मातृर्मातामहांस्तद्वत्रीनेवं हि त्रिभिस्त्रिभिः

मातामहीश्च येऽप्यन्ये गोत्रिणो ज्ञातिवर्जिताः। तानेकाञ्जलिदानेन प्रत्येकं च पृथक्पृथक्

असंस्कृतप्रमीता ये प्रेतसंस्कारवर्जिताः। वस्त्रनिष्पीडनाम्भोभिस्तेषामाप्यायनं भवेत्

अतर्पितेषु पितृषु वस्त्रं निष्पीडयेच्च यः। निराशाः पितरस्तस्य भवन्ति सुरमानुषैः २४

---

* एतदर्धं न विद्यते ख. ग. पुस्तकयोः। + एतदर्धेन न विद्यते ख. ग. पुस्तकयोः।

---

१ क. ङ. °शास्त्रेति इ°। २ क. घ. °ण्डान्परवा°। ३ ख न शक्त्यां वा। ४ क. ङ. °गता तत्र यावत्यम्ब°। ५ ख. ग. °नैश्चापि मा। ६ ख. ग. °मारभेत्। ७ क. घ. ङ. °नां विद्योप°। ८ क. घ. °धीतेन्वहन्वहम्। ध°। ९ ख. ग. °न्वा च द°। १० ख. ग °न्वाचद्वि°। ११ ख. ग. °र्भाद्विनिःसृतैः। १२ ख. ग. स्यात्क्रमेणाञ्जलिभिस्त्रिभिः। १३ ख. ग. °पितॄंस्तत्परांश्च पितॄन्स्व°। १४ घ. °वर्जन्यमेनेव। १५ क. °पितृतः पितृ°। १६ ख. ग. मातृमाता°। १७ ख. ग ङ. °महाश्च। १८ ख. ग. °णोदाहव°। घ. णोदात्व°। १९ ख ग. °न तर्पयेच्च पृथक्पृथक्।

पयोदर्भस्वधाकारगोत्रनामातिलैर्भवेत्। सुदत्तं तत्पुनस्तेषामेकेनापि विना वृथा २५
अन्यचित्तेन यद्दत्तं यद्दत्तं विधिवर्जितम्। अनासनस्थितेनापि तज्जलं रुधिरायते २६
एवं संतर्पिताः कामैस्तर्पकांस्तर्पयन्ति च। ब्रह्मविष्णुशिवादित्यमित्रावरुणनामभिः २७
पूजयेल्लक्षितैर्मन्त्रैर्जलमन्त्रोक्तदेवताः। उपस्थाय रवेः काष्ठां पूजयित्वा च देवताः २८
ब्रह्मोग्निस्त्वौषधीजीवविष्णुनामर्हतामपी(?)। अपां पतये च सत्कारं नमस्कारैः स्वनामभिः २९
कृत्वा मुखं समालभ्य स्नानमेवं समाचरेत्। ततः प्रविश्य भवनमावसथ्ये हुताशने ३०
पाकयज्ञांश्च चतुरो विदध्याद्विधिवद्द्विजः। अनाहितावसथ्याग्निरादायान्नं घृताप्लुतम्
शाकलेन विधानेन जुहुयाल्लौकिकेऽनले। व्यस्ताभिर्व्याहृतीभिस्तु समस्ताभिस्ततः परम् ३२
षड्भिर्देवकृतस्येति मन्त्रवद्भिर्यथाक्रमम्। प्राजापत्यं स्विष्टकृतं हुत्वैवं द्वादशाऽऽहुतीः
ओंकारपूर्वः स्वाहान्तस्त्यागः स्विष्टविधानतः। भुवि दर्भान्समास्तीर्य बलिकर्म समाचरेत् ३४
विश्वेभ्यो देवेभ्य इति सर्वेभ्यो भूतेभ्य एव च। भूतानां पतयेच ति नमस्कारेण शास्त्रवित्
दद्याद्बलित्रयं चाग्रे पितृभ्यश्च स्वधा नमः। पात्रनिर्णेजनं वारि वायव्यां दिशि निक्षिपेत्
उद्धृत्य षोडशग्रासमात्रमन्नं घृतोक्षितम्। इदमन्नं मनुष्येभ्यो हन्तेत्युक्त्वा समुत्सृजेत् ३७
गोत्रनामस्वधाकारैः पितृभ्यश्चापि शक्तितः। षड्भ्योऽन्नमन्वहं दद्यात्पितृयज्ञविधानतः
वेदादीनां पठेत्किंचिदल्पं ब्रह्ममखाप्तये। ततोऽन्यदन्नमादाय निर्गत्य भवनाद्बहिः ३९
काकेभ्यः श्वपचेभ्यश्च प्रक्षिपेद्ग्रासमेव च। उपस्पृश्य गृहद्वारि स्थितो यावन्मुहूर्तकम् ४०
अप्रमत्तोऽतिथिं लिप्सुर्भावशुद्धिः प्रतीक्षितः। आगतं दूरतः श्रान्तं भोक्तुकाममकिंचनम्
दृष्ट्वा संमुखमभ्येत्य सत्कृत्य श्रद्धयाऽर्चनैः। पादधावनसन्मानाभ्यञ्जनादिभिरर्चितः
त्रिदिवप्रापणे सोढा यज्ञस्याभ्यधिकोऽतिथिः। कालागतोऽतिथिर्दृष्टवेदपारो गृहागतः
द्वावेतौ पूजितौ स्वर्गं नयतोऽधस्त्वपूजितौ। विवाह्यस्नातकक्ष्माभृदाचार्यसुहृदात्विजः ४४

---

१ क. घ. ङ. °नाकाशस्थि°। २ क. ङ. °र्पणं तर्प°। ३ क. घ. ङ. रविः का°। ४ क. घ. ङ °यित्वा स दे°। ५ ख. °ह्माग्नीन्द्रोप°। ६ ग. हतांहसाम्। अ°। ७ ग. °पां यतेतिसत्कायं न°। ८ क. घ. ङ. °रैः सना°। ९ ख. ग. °माचरेत्। १० क. ङ °सथ्यहु°। ११ घ. °यज्ञाश्च चत्वारो। १२ क ङ. °ग शिष्ट°। १३ ख. ग °माचरेत्। १४ घ. सर्वभू°। १५ ख. ग. °शि नि.क्षि°। १६ ख. ग. °विश्य। १७ ख. ग. °ति तिष्ठेत्°। १८ ख. ग. °प्रमत्तोऽति°। १९ ख. ग. °तीक्षकः। आ°। २० क. ख. ग. शान्तं। २१ ख. ग. °त्य प्रश्रयाऽ°। २२ घ. °क्षयेत्। पा°। २३ ख. ग. °नसंमाना°। २४ ख. ग. °दिवं प्रापयेत्सद्योय°।

अर्घ्या भवन्ति धर्मेण प्रतिवर्षं गृहागताः । गृहागताय सत्कृत्य श्रोत्रियाय यथाविधि४५
भक्त्योपकल्पयेदेकं महाभागं विसर्जयेत् । विसर्जयेदनुव्रज्य सुतृप्तश्रोत्रियातिथीन् ४६
मित्रमातुलसंबन्धिबान्धवान्समयागतान् । भोजयेद्गृहिणो भिक्षां सत्कृतां भिक्षुकोऽर्हति
स्वाद्वन्नमश्नन्स्वादु ददद्गच्छत्यधोगतिम् । गर्भिण्यातुरभृत्येषु बालवृद्धातुरादिषु ४८
बुभुक्षितेषु भुञ्जानो गृहस्थोऽश्नाति किल्बिषम् । नाद्याद्गृध्येन्न पाकान्नं कदाचिदनिमन्त्रितः ४९
निमन्त्रितोऽपि नैन्द्येन प्रत्याख्यानं द्विजोऽर्हति ॥ ५०
क्षुद्राभिशस्तवार्धुष्यवाग्दुष्टक्रूरतस्कराः । क्रुद्धापविद्धवद्धोग्रवधबन्धनजीविनः
शैलूषशौण्डिकानद्धोन्मत्तव्रात्यव्रतच्युताः ॥ ५१
नग्ननास्तिकनिर्लज्जापिशुनव्यसनान्विताः । कदर्यस्त्रीजितानार्यपरवादकृता नराः ५२
अमित्राकीर्तिमन्तोऽपि राजदेवलकोद्धताः । शयनासनसंसर्गकृतकर्मादिदूषिताः ५३
अश्रद्दधानाः पतिता भ्रष्टाचारादयश्च ये । अभोज्यान्नाः स्युरन्नादो यस्य यः स्यात्स तत्समः ५४
नापितान्वयमित्रार्धसीरिणो दासगोपकाः । शूद्राणामप्येषां तु भुक्त्वाऽन्नं नैव दुष्यति
धर्मेणान्योन्यभोज्यान्ना द्विजास्तु विदितान्वयाः । स्ववृत्त्योपार्जितं मेध्यमकेशकृमिमक्षिकम् ५६
अश्वलीढमगोघ्रातमस्पृष्टं शूद्रवायसैः । अनुच्छिष्टमसंघुष्टमपर्युषितमेव च ५७
अम्लानबाष्पमन्नाद्यमद्यान्नित्यं सुसंस्कृतम् । कृसरापूपसंयावपायसं शष्कुलीति च ५८
नाश्नीयाद्ब्राह्मणो मांसमनियुक्तः कथंचन । क्रतौ श्राद्धे नियुक्तो वा अनश्नन्पतति द्विजः ५९
मृगयोपार्जितं मांसमभ्यर्च्य पितृदेवताः । क्षत्रियो द्वादशोनं तत्क्रीत्वा वैश्योऽपि धर्मतः
द्विजो जग्ध्वा वृथा मांसं हत्वाऽप्यविधिना पशून् । निरयेष्वक्षयं वासमाप्नोत्याचन्द्रतारकम् ६१
सर्वान्कामान्समासाद्य फलमश्वमखस्य च । मुनिसाम्यमवाप्नोति गृहस्थोऽपि द्विजोत्तमः

---

१ ख. ग. °न्समुपाग° । २ क. °दृगृह्येन्नपाकाद्यं क° । ३ घ. °न्येत प्र° । ४ ख. निन्देन । ५ घ. °ताभार्यानार्याकार्यकृदातुराः । ६ क. पराशदकृतादराः । ७ ख. ग. अनीशाः की° । ८ ख. ग. °वस्वहारकाः । श° । ९ ख. ग. घ. °र्गवृत्त° । १० क. ङ. °ज्यान्ना इमेऽन्ना° । ११ क. ङ. °प्यन्यस्य भोज्यमानो न मुच्यते । ध° । घ. °प्यनन्यस्य भोज्यमानो न मुच्यते । ध° । १२ ख. ग. °वृत्तोपार्जितं मेध्यमाकरस्थममाक्षि° । १३ ख. ग. °संदुष्ट° । १४ ख. ग. °नवाद्यमन्नाद्यमाद्यं नित्यं ।

द्विजभोज्यानि गव्यानि माहिषाणि पयांसि च।निर्दशासंधिसंबन्धिवत्सवन्तीपयांसि च
*अलाबुशिग्रुकवकच्छत्राकलशुनानि च। पलाण्डुश्वेतवृन्ताकरक्तमूलकमेव च ६४
गृञ्जनारुणवृक्षासृग्जन्तुगर्भफलानि च। अकालकुसुमादीनि द्विजो जग्ध्वैन्दवं चरेत् ६५
वाग्दूषितमविज्ञातमन्यपांडितकार्यपि। भूतेभ्योऽन्नमदत्त्वा च तदन्नं गृहिणो दहेत् ६६
हैमराजतकांस्येषु पात्रेष्वद्यात्सदा गृही। तदभावे साधुगन्धे मेध्यद्रुमलतासु च ६७
पलाशपद्मपत्रेषु गृहस्थो भोक्तुमर्हति। ब्रह्मचारी यतिश्चैव श्रेयोर्थं भोक्तुमर्हतः ६८
अभ्युक्ष्यान्नं नमस्कारैर्भुवि दद्याद्बलित्रयम्। भूपतये भुवनपतये भूतानां पतये तथा ६९
अपः प्राश्य ततः पश्चात्पञ्च प्राणाहुतीः क्रमात्। स्वाहाकारेण जुहुयाच्छेषमद्याद्यथा-सुखम् ७०
अनन्यचित्तो भुञ्जीत वाग्यतोऽन्नमकुत्सयन्। आ तृप्तेरन्नमश्नीयादंशून्यं पात्रमुत्सृजेत्
उच्छिष्टमन्नमुद्धृत्य ग्रासमेकं भुवि क्षिपेत्। आचान्तः साधुसङ्गेन सद्विद्यापठनेन च ७२
पुरावृत्तकथाभिश्च शेषाहमतिवाहयेत्। सायं संध्यामुपासीत हुत्वाऽग्निं भृत्यसंयुतः ७३
आपोशा(श)नक्रियापूर्वमश्नीयादन्वहं द्विजः। सायमप्यतिथिः पूज्यो होमकालागतो द्विजः ७४
श्रद्धया शक्तितो नित्यं श्रेयो हन्यादपूजितः।नातितृप्त उपस्पृश्य प्रक्षाल्य चरणौ शुचिः
अप्रत्यगुत्तरशिराः शयीत शयने शुभे। शक्तिमानुचिते काले स्नानं संध्यां न हापयेत् ७६
ब्राह्मे मुहूर्ते त्वनिद्रश्चिन्तयेद्धितमात्मनः। शक्तिमान्मतिमान्नित्यं वृत्तमेतत्समाचरेत् ७७

इति श्रीवेदव्यासीये[धर्मशास्त्रे]गृहस्थाह्निको नाम
तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः ।)

+इति व्यासकृतं शास्त्रं धर्मसारसमुच्चयम्। आश्रमे यानि पुण्यानि मोक्षधर्माश्रयाणि च

---

* एतदर्धं न ख. ग. पुस्तकयोः। +एष तुरीयाध्यायो घ. पुस्तके न विद्यते। अस्यैवाध्यायस्य लघुव्यासस्मृतिरिति संज्ञा च. छ. ज. संज्ञकेषु पुस्तकेषूपलभ्यते। छ पुस्तक एतदर्धस्थाने पाठान्तरं वर्तते तद्यथा–"वेदव्यास उवाच–व्यासकृतं धर्मशास्त्रं धर्मसारसमुच्चयम्" इति।

---

१ क. घ. ङ. °वन्ति तसन्ति च। २ क. °कविद्रुवः। गृ°। घ. 'कविद्भुव.। गृ°। ङ. °कविद्गुवः। गृ°। ३ घ. 'पीडनका°। ४ ग. °गन्धलोध्रद्रु°। ५ क. ङ. °योयं भो°। ख. ग. °यो यद्भोक्तुमर्हति। अ°। ६ क. घ. ङ. °भ्युक्षणान्नम°। ७ घ. °नां अ°। पात्रसंनिधौ। ८ क.ङ पातेसंनिधौ। अ'। ९ क. घ. ङ. °चित्तटक्कचित्तो वा'। १० ख. ग.'दक्षुण्णं पा'। ११ क.घ. ङ. °पठितेन। १२ क. ख. ग. घ. च। वृत्तवृद्धक°। १३ क. घ. ङ. °ल्यगणावृतः। १४ क. घ. ङ. °तः। अपो°। १५ ख. ग. °तोऽनिशम्। श्र°। १६ ख. ग. श्रुतं। १७ घ. °ले न काममपि हा°। १८ ख. ग. °र्ते चोत्थाय; चिन्त°।

गृहाश्रमात्परो धर्मो नास्ति नास्ति पुनः पुनः।सर्वतीर्थफलं तस्य यथोक्तं[1] यस्तु पालयेत् २
गुरुभक्तो भृत्यपोषी दयावाननसूयकः।नित्यजापी[3] च होमी च सत्यवादी जितेन्द्रियः
स्वदारे[4] यस्य संतोषः परदारनिवर्तनम्[5]। अपवादं न कुर्वीत[6] तस्य तीर्थफलं गृहे ४
परदारान्[7]परद्रव्यं हरते यो दिने दिने। सर्वतीर्थाभिषेकेण तस्य पापं न नश्यति ५
गृहेषु सेवनीयेषु[9] सर्वतीर्थफलं ततः। अन्नदस्य त्रयो भागाः कर्ता भोगेन लिप्यते ६
प्रतिश्रयं पादशौचं ब्राह्मणा[10]नां च तर्पणम्। न पापं संस्पृशेत्तस्य बलिं भिक्षां ददाति यः७
पादोदकं पादघृतं दीपमन्नं प्रतिश्रयम्। यो ददाति ब्राह्मणे[12]भ्यो नोपसर्पति तं यमः ८
विप्रपादोदकक्लिन्ना यावत्तिष्ठति मेदिनी। तावत्पुष्करपात्रेषु[13] पिबन्ति पितरो जलम् ९
यत्फलं कपिलादाने कार्तिक्यां ज्येष्ठपुष्करे[14]।तत्फलं पाण्डवश्रेष्ठ विप्राणां पादशोधने
स्वागतेनाग्नयः प्रीता आसनेन शतक्रतुः। पितरः पादशौचेन अन्नाद्येन प्रजापतिः ११
मातापित्रोः परं तीर्थं गङ्गा गावो विशेषतः[15]। ब्राह्मणात्परमं तीर्थं न भूतं न भविष्यति १२
इन्द्रियाणि वशीकृत्य[16] यत्र यत्र वसेन्नरः। तत्र तत्र कुरुक्षेत्रं नैमिषं पुष्कराणि च १३
गङ्गाद्वारं च केदारं संनिहत्यां[17] तथैव च(?)। एतानि सर्वतीर्थानि कृत्वा पापैः प्रमुच्यते
वर्णानामाश्रमाणां च चातुर्वर्ण्यस्य पार्थिव । दानधर्मं प्रवक्ष्यामि यथा व्यासेन भाषितम् १५
यद्ददासि[21] विशिष्टेभ्यो यच्चाश्नासि[23] दिने दिने। तत्ते वित्तमहं मन्ये शेषं कस्यापि[22] रक्षसि १६
यद्ददाति यदश्नाति तदेव धनिनो धनम्। अन्ये मृतस्य क्रीडन्ति दारैरपि धनैरपि १७
किं धनेन करिष्यन्ति देहिनो गत्वरायुषः । यद्धर्षयितुमिच्छन्ति[23] तच्छरीरमशाश्वतम्
अशाश्वतानि गात्राणि विभवो नैव शाश्वतः। नित्यं संनिहितो मृत्युः कर्तव्यो धर्मसंग्रहः
यदि नाम न धर्माय न कामाय न कीर्तये। यत्परित्यज्य गन्तव्यं तद्धनं किं न दीयते २०

---

१ छ. °क्तं योऽनुपा°। २ च. °याक्षान्त्यनसू°। ज °याक्षान्तिरहिंसकः । ३ ज. °पी नित्यहो°। ४ ज. दारानित्यसं°। ५ छ. °र्तकः। अ°। ६ च. °त सर्वतीर्थफलं लभेत्। प°। छ. °त सर्वती°। ७ क. ङ. °दारपरद्रव्यार्थी हिनस्ति च दिने दिने। च. ज. °दारपरद्रव्यहिंसते च दिने दिने। छ. °दारपरद्रव्यं यो हिनस्ति दिने दिने। ८ ख. ग. सवनीयेषु। ९ छ. °षु तीर्थधर्मफ°। १० क. ङ. ज. °ह्मणैस्तर्पणं तथा । न । च छ. °ह्मणेभ्यो निवेदयेत्। न। ११ क. ङ. छ. ज. °पं पर्युषित्त°। १२ क. च. छ. सहस्राक्ष ।१३ ख ग. °रोऽमृतम्। १४ ख. ग. °लमृषयः श्रेष्ठा वि°। १५ च. °तः। ब्रह्मपादोदकं तीर्थं । १६ च. ज. वशं कृत्वा यत्र य°। छ. वशे कृत्वा गृहे यो निवसे°। १७ ख. ग. संनिहत्य। १८ ज. °त्यां विशेषतः। ए°। १९ क. ख. ग. °दाति वि°। २० क. ख. ग. °श्नाति दिने दि°। २१ ख. ग. तच्च वित्त। २२ क. ख. ग °स्याभिरक्षति। य°। २३ ख. ग. °च्छन्तस्तच्छ°।

हस्त्यश्वरथयानानि केचिदिच्छन्ति पादयोः। *अहमिच्छामि ते व्यास कस्यैताः सस्यसंपदः ५८

वेदलाङ्गलकृष्टेषु द्विजश्रेष्ठेषु सत्सु च। यत्पुरा पातितं बीजं तस्यैताः सस्यसंपदः+ ५९

शतेषु जायते शूरः सहस्रेषु च पण्डितः। वक्ता शतसहस्रेषु दाता भवति वा न वा ६०

न रणे विजयाच्छूरोऽध्ययनान्न च पण्डितः। न वक्ता वाक्पटुत्वेन न दाता चार्थदानतः

इन्द्रियाणां जये शूरो धर्मं चरति पण्डितः। $सत्यवादी भवेद्वक्ता दाता भूतहिते रतः ६२

यस्त्वेकपङ्क्त्यां विषमं ददाति स्नेहाद्भयाद्वा यदि वाऽर्थहेतोः।

वेदे च दृष्टमृषिभिश्च गीतं तद्ब्रह्महत्यां मुनयो वदन्ति ‡ ६३

ऊषरे वापितं बीजं भिन्नभाण्डेषु गोदुहम्। हुतं भस्मनि हव्यं च मूर्खे दानमशाश्वतम् ६४

सूतसूतकपुष्टाङ्गं द्विजं शूद्रान्नभोजिनम्। अहमेवं न जानामि कां योनिं स गमिष्यति ६५

शूद्रान्नेनोदरस्थेन यदि कश्चिन्म्रियेत यः। स भवेत्सूकरो नूनं तस्य वा जायते कुले ६६

गृध्रो द्वादश जन्मानि सप्त जन्मानि सूकरः×। श्वा चैव सप्त जन्मानि इत्येवं मनुरब्रवीत्† ६७

अमृतं ब्राह्मणान्नैस्तु दारिद्र्यं क्षत्रियस्य च। वैश्यान्नेन तु शूद्रत्वं शूद्रान्ने नरकं व्रजेत् ६८

यस्तु भुञ्जति शूद्रान्नं मासमेकं निरन्तरम्। इह जन्मनि शूद्रत्वं मृतः श्वा चोपजायते ६९

---

* एतदर्धस्थानेऽयं पाठो ज. पुस्तके-"एकं पृच्छामि ते कृष्ण कस्यैषा संपदाभवेत्" इति। + इतः परं ज. पुस्तकेऽधिकं वचनम्-"वेदेन्धनसमृद्धेषु हुतं विप्रमुखाग्निषु। स्वल्पोऽपि बहुधा याति न्यग्रोधोत्कणिका यथा" इति। $ एतदर्धस्थानेऽयं पाठः ख ग. पुस्तकयोः-"हितप्रयोक्तिभिर्वक्ता दाता सन्मानदानतः" इति। ‡ इत उत्तरमेतद्वचनं च. पुस्तके-"एकपङ्क्त्यां तु यो भुङ्क्ते न स्पृशेच्च परस्परम्। भस्मना कृतमर्यादा एकपङ्क्तिर्न दुष्यति" इति। × इत उत्तरमेतदर्धं च पुस्तके-"अमेध्यकृमितां याति अष्ट जन्मानि भारत" इति। † इत उत्तरं च पुस्तकेऽधिकानि वचनान्युपलभ्यन्ते--"अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्। वैश्यस्यअ(त्व)न्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्। शूद्रान्नोपहता विप्रा जिह्वया मुखलालिताः। कुपिताः किं करिष्यन्ति निर्विषा इव पन्नगाः। अनभ्यासेन विद्यानामाचारस्य च लङ्घनात्। आलस्यादन्नदोषाच्च मृत्युर्विप्रा जिघांसति" इति। † इतः परं छ. पुस्तकेऽयं पाठः-"अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्। वैश्यस्यअ(त्व)न्नमेवान्नं शूद्रान्नं रुधिरं स्मृतम्। ब्राह्मणान्नैर्दरिद्रत्वं क्षत्रियान्नानपत्यता" इति। † इतः परमेतदधिकं ज. पुस्तके-"अस्तावाशी चाजपी च विप्रकीर्णेन्द्रियद्विजः। न तारयति दातारमात्मानं च प्रतिग्रहम्। अज्ञाताशी मलं भुङ्क्ते अजपी पूयशोणितम्। आहुताशी कृमिं भुङ्क्ते अदाता विषमश्नुते। उदरार्थं पथि श्रान्तं गच्छन्तं गृहमागतम्। वैश्वदेवेऽतिसंप्राप्ते सोऽतिथिः स्वर्गसंक्रमः। सद्यो हि नरकं याति ब्राह्मणं यो अ(यस्त्व)तिक्रमेत्। अपि मूर्खे गृहे जातं किं पुनर्वेदपाठकम्" इति।

---

१ ख. ग. पण्डिताः। २ ख. ग. अहं नेच्छा°। छ. अहं वक्ष्यामि। ३ क. ङ. भारत। ४ क. ङ. °रो व्यसनाच्च न प°। छ °रो विद्यया न च प°। ५ छ. °ता दानसव्रतः। ६ च ज. °म्। भस्मनीव हुतं द्रव्यं तद्वदानमसाधुषु। शू°। ७ ख. ग. श्राद्धे द्विजः शूद्रान्नभोजने। अ°। ८ च. यस्तु प्राणान्विमुञ्चति। स।

यस्य शूद्रा पचेन्नित्यं शूद्रा च गृहमेधिनी । वर्जितः पितृदेवैस्तु रौरवं[3] याति स द्विजः ७०
भाण्ड[1]संकरसंकीर्णा नानासंकरसंकराः । योनिसंकरसंकीर्णा वियोनिं यान्ति मानवाः +
पङ्क्तिभेदी वृथापाकी नित्यं ब्राह्मणनिन्दकः । आदेशी वेदविक्रेता पञ्चैते ब्रह्मघातकाः *

इति श्रीवेदव्यासीये [धर्मशास्त्रे] गृहस्थाश्रमप्रशंसादिवर्णनो नाम
चतुर्थोऽध्यायः ॥ ४ ॥

(समाप्तेयं वेदव्यासस्मृतिः ।)

+ इत. परं वचनद्वयमधिकं ज. पुस्तके–"अनभ्यासेन वेदानामाचारस्य च वर्जनात् । अन्नदानस्य दोषं च मृत्युर्विप्रा जिघांसति । गवां स्पृशति पादेन दिवार्के प्रक्षुध्यति । एकाकी मिष्टमश्नाति त्रयस्ते ब्रह्मघातकाः " इति । * इतः परमधिको ग्रन्थो ज. पुस्तके—"मातृघ्नश्च पितृघ्नश्च ब्रह्महा गुरुतल्पगः । सुवर्णहारश्चैवैते महापातकिनः स्मृताः । ऋणहर्ता भूमिहर्ता यैस्तु हारयते तथा । नरकान्न निवर्तन्ते यावदाभूतसंप्लवम् । पुत्रमित्रकलत्राद्याः सुहृत्संबन्धिबान्धवाः । असहायपरा लोके सदा धर्मं समाचरेत् । यो विष्णुः स च वै विप्रो यो विष्णुः स उमापतिः । यो विप्रः स च वै ब्रह्मा तस्माद्विप्रं न कम्प(कोप)येत् । धर्मासंशयं छाता राजा वस्तुरधोगतः । तस्मान्नवचयतेमेके न बहुज्ञानधर्मतः । न राजा प्रश्रयादेयं ददौ विप्रस्य मर्यता । परमा देवता तस्य ब्राह्मणस्य शरीरतः । यदीच्छेन्नरकं छेत्तुः सपुत्रः पशुबान्धवैः । दैवैः सार्धाकृतं कार्या गुरुषु ब्राह्मणेषु च " इति ।

---

१ क. ङ. भाण्डासंक° । २ क. ङ. °र्तलालासं° । ३ ख. ग. निरयं ।

ॐ तत्सद्ब्रह्मणे नमः ।

शङ्खलिखितस्मृतिः ।

+वासुदेवं नमस्कृत्य शङ्खस्य लिखितस्य च । धर्मशास्त्रं प्रवक्ष्यामि दाध्नि चैव घृतं यथा १
वैश्वदेवेन ये हीना आतिथ्येन विवर्जिताः । सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि द्विजाः २
अकृते वैश्वदेवे तु ये भुञ्जन्ति द्विजातयः । वृथा ते तेन पाकेन काकयोनिं व्रजन्ति वै ३
अन्नं व्याहृतिभिर्हुत्वा तथा मन्त्रैस्तु शाकलैः । अन्नं विभज्य भूतेभ्यस्ततोऽश्नीयादनग्नि-
मान् ४
यो दद्यादबलिक्लेशः सांनाय्यं वा निवर्तते । दृष्टो वाऽदृष्टपूर्वो वा स यज्ञः सार्वकामिकः५
इष्टो वा यदि वा मूर्खो द्वेष्यः पण्डित एव वा । प्राप्तस्तु वैश्वदेवान्ते सोऽतिथिः स्वर्गसं-
क्रमः ६
दातारः किं विचारेण गुणवान्निर्गुणी भवेत् । समं वर्षति पर्जन्यः सस्यादपि तृणादपि ७
यान्ग्रासान्क्षुधितो भुङ्क्ते ते ग्रासाः क्रतुभिः समाः । ग्रासे तु हयमेधस्य फलं प्राप्नोति
मानवः ८
*अद्भिश्चाऽऽमनवाक्यैश्च फलैः पुष्पैर्मनोरमैः।तृणैरञ्जलिभिश्चैव देवांस्तृप्येत्पुनः पितॄन्
पितॄनभ्यर्चयेद्यस्तु तस्य नास्ति सुसंयमः । इदं तु परमं गुह्यं व्याख्यातमनुपूर्वशः १०
स्वल्पग्रन्थप्रभूतार्थं शङ्खेन लिखितेन च । यथा हि मृन्मयं पात्रं दुष्टं दोषशतैरपि ११
पुनर्दाहेन शुध्येत धर्मशास्त्रैस्तथा द्विजाः । धर्मशास्त्रप्रदीपोऽयं धार्यः पथानुदेशिकः १२
निष्यन्दं सर्वशास्त्राणां व्याधीनामिव भेषजम् ॥ १३
परपाकनिवृत्तस्य परपाकरतस्य च । अपचस्य तु भुक्त्वाऽन्नं द्विजश्चान्द्रायणं चरेत् १४
परान्नेन तु भुक्तेन मैथुनं योऽधिगच्छति । यस्यान्नं तस्य ते पुत्रा अन्नाच्छुक्रं प्रवर्तते १५
अन्नात्तेजो मनः प्राणाश्चक्षुः श्रोत्रं यशो बलम् । धृतिं श्रुतिं तथा शुक्रं परान्नं वर्जयेद्बुधः
परान्नं परवस्त्रं च परयानं परस्त्रियः । परवेश्मनि वासश्च शक्रस्यापि श्रियं हरेत् १७

+ इत आरभ्य ब्रह्मशापहतो हत इत्यन्तग्रन्थः क. च. पुस्तकयोरेव विद्यते नेतरेषु । * एतद्वचन-स्थानेऽयं पाठश्च. पुस्तके—अद्भिश्च वाक्यैश्च मनोरमैश्च पुष्पैः फलैरञ्जलिभिस्तृणैश्च । एतेन देवानतिथी-न्पितॄंश्च अभ्यर्चयेद्यस्य तु नास्ति संपत् " इति ।

---

१ च.° धि न जातं घृ° । २ क. °थ्ये च वि° । ३ क. °न्नावद्धि नि° । ४ क. °तारं किं । ५ च. °र्गुणो भ° । ६ क. °धार्य यथानुदेशगः । नि° ।

आहिताग्निस्तु यो विप्रो मत्स्यमांसानि भोजयेत्। कालरूपी कृष्णसर्पो जायते ब्रह्मराक्षसः १८

आहिताग्निस्तु यो विप्रः शूद्रान्नानि च भुञ्जते। पञ्च तस्य प्रणश्यन्ति आत्मा ब्रह्म त्रयोऽग्नयः १९

एतदर्थं विशेषेण ब्राह्मणान्पालयेन्नृपः॥ २०

प्रत्यूषे च प्रदोषे च यदधीये(यी)त ब्राह्मणः। तेन राष्ट्रं च राज्यं च वर्धते ब्रह्मतेजसा २१

अग्रं वृक्षस्य राजानो मूलं वृक्षस्य ब्राह्मणाः। तस्मान्मूलं न हिंसीयान्मूलादग्रं प्ररोहति

फलं वृक्षस्य राजानः पुष्पं वृक्षस्य ब्राह्मणाः। तस्मात्पुष्पं न हिंसीयात्पुष्पात्संजायते फलम् २३

गावो भूमिः कलत्रं च ब्रह्मस्वहरणं तथा। यस्तु न त्रायते राजा तमाहुर्ब्रह्मघातकम् २४

दुर्बलानामनाथानां बालवृद्धतपस्विनाम्। अन्यायैः परिभूतानां सर्वेषां पार्थिवो गतिः

राजा पिता च माता च राजा च परमो गुरुः। राजा च सर्वभूतानां परित्राता गुरुर्मतः २६

दावाग्निदग्धानां राजा पूर्णमिवाम्भसा॥ २७

पक्षिणां बलमाकाशं मत्स्यानामुदकं बलम्। दुर्बलस्य बलं राजा बालस्य रुदितं बलम् २८

बलं मूर्खस्य मौनत्वं तस्करस्यानृतं बलम्। एते राजबलाः सर्वे यैर्ज्ञेन परिरक्षिताः २९

दहत्यग्निस्तेजसा च सूर्यो दहति रश्मिना। राजा दहति दण्डेन विप्रो दहति मन्युना ३०

मन्युप्रहरणा विप्राश्चक्रप्रहरणो हरिः। चक्रात्तीक्ष्णतरो मन्युस्तस्माद्विप्रान्न कोपयेत् ३१

अग्निदग्धं प्ररोहेत सूर्यदग्धं तथैव च। दण्डघस्तु संप्ररोहेत ब्रह्मशापहतो हतः ३२

इति शङ्खलिखितस्मृतिधर्मशास्त्रं
समाप्तम्॥

---

१ क. °स्मात्पुष्पं न। २ क. °र्णानवीभासि। ब°। ३ च. वत्तेन। ४ च. दण्डस्तु।

ॐ तत्सद्ब्रह्मणे नमः ।

शङ्खस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

स्वयंभुवे नमस्कृत्य सृष्टिसंहारकारिणे । चातुर्वर्ण्यहितार्थाय शङ्खः शास्त्रमकल्पयत् १
यजनं याजनं दानं तथैवाध्यापनक्रिया । प्रतिग्रहं चाध्ययनं विप्रकर्माणि निर्दिशेत् २
दानं चाध्ययनं चैव यजनं च यथाविधि । क्षत्रियस्य च वैश्यस्य कर्मेदं परिकीर्तितम् ३
क्षत्रियस्य विशेषेण प्रजानां परिपालनम् । कृषिगो(गौ)रक्ष्यवाणिज्यं विशश्च परिकीर्तितम् ४
शूद्रस्य द्विजशुश्रूषा सर्वशिल्पानि चाप्यथ । क्षमा सत्यं दमः शौचं सर्वेषामविशेषतः ५
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः । तेषां जन्म द्वितीयं तु विज्ञेयं मौञ्जिबन्धनम् ६
आचार्यस्तु पिता प्रोक्तः सावित्री जननी तथा । ब्राह्मणक्षत्रियविशां मौञ्जीबन्धनजन्मनि ७
वृत्त्या शूद्रसमास्तावद्विज्ञेयास्ते विचक्षणैः । यावद्वेदेन जायन्ते द्विजा ज्ञेयास्ततः परम् ८

इति शाङ्खे [धर्मशास्त्रे] प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयोऽध्यायः ।)

गर्भस्य स्फुटताज्ञाने निषेकः परिकीर्तितः । पुरा तु स्पन्दनात्कार्यं पुंसवनं विचक्षणैः १
षष्ठेऽष्टमे वा सीमन्तो जाते वै जातकर्म च । आशौचे च व्यतिक्रान्ते नामकर्म विधीयते २
नामधेयं च कर्तव्यं वर्णानां च समाक्षरम् । माङ्गल्यं ब्राह्मणस्योक्तं क्षत्रियस्य बलान्वितम्
वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् । शर्मान्तं ब्राह्मणस्योक्तं वर्मान्तं क्षत्रियस्य तु
धनान्तं चैव वैश्यस्य दासान्तं चान्त्यजन्मनः ॥
चतुर्थे मासि कर्तव्यं बालस्याऽऽदित्यदर्शनम् । षष्ठेऽन्नप्राशनं मासि चूडा कार्या यथाकुलम् ५
गर्भाष्टमेऽब्दे कर्तव्यं ब्राह्मणस्योपनायनम् । गर्भादेकादशे राज्ञो गर्भात्तु द्वादशे विशः ६
षोडशाब्दानि विप्रस्य राजन्यस्य द्विविंशतिः । विंशतिः सचतुष्का तु वैश्यस्य परिकीर्तिता । नातिवर्तेत सावित्रीमत ऊर्ध्वं निवर्तते ७

---

१ ग. °मथाकरोत् । २ क. °न्धनात् । आ° । ३ ग. °नि । विप्राः शू° । ४ ग. °तः । ततस्तु स्पन्दनात्कार्यं स° । ५ ग. °तैव्यमादित्यस्य प्रद° । ६ ग. °शाब्दस्तु विप्रस्य द्वाविंशः क्षत्रियस्य तु । वि° । ७ ग. नाभिभाषेत सा° । ८ ग. °तैयेत् । वि° ।

विज्ञातव्यास्त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्याः सर्वधर्मबहिष्कृताः ८

मौञ्जीज्याबन्धनानां तु क्रमान्मौञ्ज्यः प्रकीर्तिताः। मार्गवैयाघ्रबास्तानि कर्माणि ब्रह्मचारिणाम् ९

पर्णपिप्पलबिल्वानां क्रमाद्दण्डाः प्रकीर्तिताः।केशदेशललाटास्यतुल्याः प्रोक्ताः क्रमेण तु

अवक्राः सत्वचः सर्वे नाग्निदग्धास्तथैव च। वस्त्रोपवीते कार्पासक्षौमौर्णानां यथाक्रमम्

आदिमध्यावसानेषु भवच्छब्दोपलक्षितम्। भैक्षस्य वरणं प्रोक्तं वर्णानामनुपूर्वशः १२

इति शाङ्खे[धर्मशास्त्रे]द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः)

उपनीय गुरुः शिष्यं शिक्षयेच्छौचमादितः। आचारमग्निकार्यं च संध्योपासनमेव च १

स गुरुर्यः क्रियाः कृत्वा वेदमस्मै प्रयच्छति। भृतकाध्यापको यस्तु उपाध्यायः स उच्यते

+माता पिता गुरुश्चैव पूजनीयाः सदा नृणाम्। क्रियास्तथाऽफलाः सर्वा यस्यैतेऽनादृतास्त्रयः २

प्रयतः कल्प उत्थाय स्नातो हुतहुताशनः। कुर्वीत प्रणतो भक्त्या गुरूणामभिवादनम् ४

अनुज्ञातस्तु गुरुणा ततोऽध्ययनमाचरेत्। कृत्वा ब्रह्माञ्जलिं पश्यन्गुरोर्वन्दनमानतः ५

ब्रह्मावसाने प्रारम्भे प्रणवं च प्रकीर्तयेत्। अनध्यायेष्वध्ययनं वर्जयेच्च प्रयत्नतः ६

चतुर्दशीं पञ्चदशीमष्टमीं राहुसूतकम्। उल्कापातं महीकम्पमाशौचं ग्रामविप्लवम् ७

इन्द्रध्वजं श्वरुतं सर्वसंपातनिस्वनम्। वाद्यकोलाहलं युद्धमनध्यायान्विवर्जयेत् ८

नाधीयीताभियुक्तोऽपि यानगो न च नौगतः। देवायतनवल्मीकश्मशानशवसंनिधौ ९

भैक्षचर्यां तथा कुर्याद्ब्राह्मणेषु यथाविधि। गुरुणा चाप्यनुज्ञातः प्राश्नीयात्प्राङ्मुखः शुचिः १०

हितप्रिये गुरोः कुर्यादहंकारविवर्जितः। उपास्य पश्चिमां संध्यां पूजयित्वा हुताशनम्

अभिवाद्य गुरुं पश्चाद्गुरोर्वचनकृद्भवेत्। गुरोः पूर्वं समुत्तिष्ठेच्छयीत चरमं तथा १२

+ एतद्वचनं न ग. पुस्तके ।

---

१ ग °ञ्जीबन्धो द्विजानां। २ ख. नायां तु। ३ ग. °न्मौञ्जी प्रकीर्तिता। मा°। ४ ग °ताः। कर्णकेशललाटैस्तु तु°। ५ ग च। यज्ञोपवीतं का°। ६ ख. °क्षस्याऽऽचर°। ७ ग. प्रयतो भूत्वा। ८ ख. ग. ङ. °वंदन°। ९ ग. °यागं सुरतं घनसंघात°। १० ख. °ं श्वहतं। ११ ख. ग. घ. °संघात°। १२ ग. °पि प्रयत्नात्र च वेगतः। १३ क. °गवम्। दे°।

मधुमांसाञ्जनं श्राद्धं गीतनृत्यं विवर्जयेत् । हिंसां परापवादं च स्त्रीलीलां च विशेषतः ॥ १३
मेखलामजिनं दण्डं धारयेच्च विशेषतः । अधःशायी भवेन्नित्यं ब्रह्मचारी समाहितः १४
एवं व्रतं तु कुर्वीत वेदस्वीकरणं बुधः । गुरवे च धनं दत्त्वा स्नायीत तदनुज्ञया १५

इति शाङ्खे [धर्मशास्त्रे] तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः ।)

विन्देत विधिवद्भार्यामसमानार्षगोत्रजाम् । मातृतः पञ्चमीं चापि पितृतस्त्वथ सप्तमीम् ?
ब्राह्मो दैवस्तथैवाऽऽर्षः प्राजापत्यस्तथाऽऽसुरः । गान्धर्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः २
एभ्यो धर्म्यास्तु चत्वारः पूर्वे ये परिकीर्तिताः । गान्धर्वो राक्षसश्चैव क्षत्रियस्य तु शस्यते
संप्रार्थितः प्रयत्नेन ब्राह्मस्तु परिकीर्तितः । यज्ञस्थायर्त्विजे दैव आदायाऽऽर्षस्तु गोद्वयम् ४
प्रार्थितः संप्रदानेन प्राजापत्यः प्रकीर्तितः । आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः
राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ।
तिस्रस्तु भार्या विप्रस्य द्वे भार्ये क्षत्रियस्य तु । एकैव भार्या वैश्यस्य तथा शूद्रस्य कीर्तिता
ब्राह्मणी क्षत्रिया वैश्या विप्रभार्याः प्रकीर्तिताः ७
क्षत्रिया चैव वैश्या च क्षत्रियस्य विधीयते । वैश्या च भार्या वैश्यस्य शूद्रा शूद्रस्य कीर्तिता
आपद्यपि न कर्तव्या शूद्रा भार्या द्विजन्मना । तस्यां तस्य प्रसूतस्य निष्कृतिर्न विधीयते
तपस्वी यशशीलस्तु सर्वधर्मभृतां वरः । ध्रुवं शूद्रत्वमायाति शूद्रश्राद्धे त्रयोदशे १०
नीयते तु सपिण्डत्वं येषां शूद्रः कुलोद्भवः । सर्वे शूद्रत्वमायान्ति यदि स्वर्गाजितश्च ते ११
सपिण्डीकरणं कार्यं कुलजस्य तथा ध्रुवम् । श्राद्धद्वादशकं कृत्वा श्राद्धे प्राप्ते त्रयोदशे १२
सपिण्डीकरणे चार्हे(र्हो) न च शूद्रः कथंचन । तस्मात्सर्वप्रयत्नेन शूद्रां भार्यां विवर्जयेत्
पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम् । वैश्या प्रतोदमादद्याद्दशेन त्वग्रजन्मनः १४
सा भार्या या गृहे दक्षा सा भार्या या पतिव्रता । सा भार्या या पतिप्राणा सा भार्या या प्रजावती १५

---

१ ग. हिंसापवादवादांश्च स्त्रीलीलाश्च वि° । २ ग. प्रयत्नतः । ३ ग. वं कृत्वं तु । ४ ग. लायाश्च तदनन्तरम् । इ° । ५ ग. एते धर्मास्तु चत्वारः पूर्वं विप्रे प्रकी° । ६ ग. °स्य प्रशं° । ७ ग. यज्ञेषु ऋत्विजे । ८ ग. °इया ब्राह्मणस्य प्र° । ९ ग. °जिताश्च । १० ग. श्राद्धं द्वा° । ११ क. ख. °रणं चार्हेन्न च । च- °रणं श्राद्धे न । १२ क. घ. °द्वेदने त्वं ।

लालनीया सदा भार्या ताडनीया तथैव च। ताडिता लालिता चैव स्त्री श्रीर्भवति नान्यथा १६

इति शाङ्खे [धर्मशास्त्रे] चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः ।)

पञ्च सूना गृहस्थस्य चुल्ली पेषण्युपस्करः । कण्डनी चोदकुम्भश्च तस्य पापस्य शान्तये
पञ्चयज्ञविधानं तु गृही नित्यं न हापयेत् । पञ्चयज्ञविधानेन तत्पापं तस्य नश्यति २
देवयज्ञो भूतयज्ञः पितृयज्ञस्तथैव च। ब्रह्मयज्ञो नृयज्ञश्च पञ्च यज्ञाः प्रकीर्तिताः ३
होमो दैवो बलिर्भौतः पित्र्यः पिण्डक्रिया स्मृतः। स्वाध्यायो ब्रह्मयज्ञश्च नृयज्ञोऽतिथिपूजनम् ४
वानप्रस्थो ब्रह्मचारी यतिश्चैव तथा द्विजः। गृहस्थस्य प्रसादेन जीवन्त्येते यथाविधि ५
गृहस्थ एव यजते गृहस्थस्तप्यते तपः। ददाति च गृहस्थश्च तस्माच्छ्रेष्ठो गृहाश्रमी ६
यथा भर्ता प्रभुः स्त्रीणां वर्णानां ब्राह्मणो यथा । अतिथिस्तद्वदेवास्य गृहस्थस्य प्रभुः स्मृतः ७
न व्रतैर्नोपवासैश्च धर्मेण विविधेन च। नारी स्वर्गमवाप्नोति प्राप्नोति पतिपूजनात् ८
न व्रतैर्नोपवासैश्च न च यज्ञैः पृथग्विधैः। राजा स्वर्गमवाप्नोति प्राप्नोति परिपालनात्
न स्नानेन न मौनेन नैवाग्निपरिचर्यया। ब्रह्मचारी दिवं याति स याति गुरुपूजनात् १०
अग्निशुश्रूषया क्षान्त्या स्नानेन विविधेन च। वानप्रस्थो दिवं याति याति भोजनवर्जनात् ११
न दण्डैर्न च मौनेन शून्यागाराश्रयेण च । यतिः सिद्धिमवाप्नोति योगेनाऽऽप्नोत्यनुत्तमाम् १२
न यज्ञैर्दक्षिणावद्भिर्वह्निशुश्रूषया तथा। गृही स्वर्गमवाप्नोति यथा चातिथिपूजनात् १३
तस्मात्सर्वप्रयत्नेन गृहस्थोऽतिथिमागतम्। आहारशयनाद्येन विधिवत्प्रतिपूजयेत् १४
सायं प्रातश्च जुहुयादग्निहोत्रं यथाविधि। दर्शं च पौर्णमासं च जुहुयाद्विधिवत्तथा १५
यजेत पशुबन्धैश्च चातुर्मास्यैस्तथैव च। त्रैवार्षिकाधिकान्नस्तु पिबेत्सोममतन्द्रितः १६
इष्टिं वैश्वानरीं कुर्यात्तथा चाल्पधनो द्विजः । न भिक्षेत धनं शूद्रात्सर्वं दद्याच्च भिक्षितम्

---

१ ख. च. °च्छ्रेयो गृ° । २ क. °ति यतिपूजनात्' । ङ. °ति प्रातिपा° । ३ ग. न होमेन नैवाग्निपरितर्पणात् । ब्र° । ४ ग. °याच्च यथाविधि । यज्ञैर्वा प° । ५ ख. त्रैवार्षि° । ६ ग. °वादभीप्सित° ।

वृत्तं तु न त्यजेद्विद्वानृत्विजं पूर्वमेव च । कर्मणा जन्मना शुद्धं विधया च वृणीत तम् १८
एतैरेव गुणैर्युक्तं धर्मार्जितधनं तथा । याजयीत सदा विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः १९

इति शाङ्खे[धर्मशास्त्रे] पञ्चमोऽध्यायः ॥ ९ ॥

(अथ षष्ठोऽध्यायः ।)

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः । अपत्यस्यैव चापत्यं तदाऽरण्यं समाश्रयेत्
पुत्रेषु दारान्निक्षिप्य तया वाऽनुगतो वनम् । अग्नीनुपचरेन्नित्यं वन्यमाहारमाहरेत् २
यदाहारो भवेत्तेन पूजयेत्पितृदेवताः । तेनैव पूजयेन्नित्यमतिथिं समुपागतम् ३
ग्रामादाहृत्य वाऽश्नीयादष्टौ ग्रासान्समाहितः । स्वाध्यायं च तथा कुर्याज्जटाश्च बिभृयात्तथा ४
तपसा शोषयेन्नित्यं स्वयं चैव कलेवरम् । आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ५
प्रावृष्याकाशशायी च नक्ताशी च सदा भवेत् । चतुर्थकालिको वा स्यात्षष्ठकालिक एव वा ६
कृच्छ्रैर्वाऽपि नयेत्कालं ब्रह्मचर्यं च पालयेत् । एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी भवेत् ७

इति शाङ्खे[धर्मशास्त्रे] षष्ठोऽध्यायः ॥ ६ ॥

(अथ सप्तमोऽध्यायः ।)

कृत्वेष्टिं विधिवत्पश्चात्सर्ववेदसदक्षिणाम् । आत्मन्यग्नीन्समारोप्य द्विजो ब्रह्माश्रमी भवेत् १
विधूमे न्यस्तमुसले व्यङ्गारे भुक्तवज्जने । अतीते पात्रसंपाते नित्यं भिक्षां यतिश्चरेत् २
सप्तागारांश्चरेद्भैक्ष्यं (क्षं) भिक्षितं नानुभिक्षयेत् । न व्यथेच्च तथाऽलाभे यथालाभेन वर्तयेत् ३
नाऽऽस्वादयेत्तथैवान्नं नाश्नीयात्कस्यचिद्गृहे । मृन्मयालाबुपात्राणि यतीनां च विनिर्दिशेत् ४
तेषां संमार्जनाच्छुद्धिरद्भिश्चैव प्रकीर्तिता । कौपीनाच्छादनं वासो बिभृयादव्यथश्चरन्

---

१ ग. स्यात्स्याच्च षष्ठक । च. स्यात्स्वस्वकालि° । २ ग. घ. ङ. च. °क्षिणम् । ३ घ. ङ. व्यगारे । ४ ग. पादसं° । ५ क. मृद्भांडा° ।

शून्यागारनिकेतः स्याद्यत्र सायंगृहो मुनिः ॥ ६
दृष्टिपूतं न्यसेत्पादं वस्त्रपूतं जलं पिबेत् । सत्यपूतां वदेद्वाचं मनःपूतं समाचरेत् ७
चन्दनेन तु लिप्ताङ्गं वास्यैवं चैव तक्षतः । कल्याणं चाप्यकल्याणं तयोरेव न चिन्तयेत् ८
सर्वभूतसमो मैत्रः समलोष्टाश्मकाञ्चनः । ध्यानयोगरतो भिक्षुः प्राप्नोति परमां गतिम् ९
जन्मना यस्तु निर्विण्णो मरणेन तथैव च । आधिभिर्व्याधिभिश्चैव तं देवा ब्राह्मणं विदुः १०
अशुचित्वं शरीरस्य प्रियाप्रियविपर्ययः । गर्भवासे च वसतिस्तस्मान्मुच्येत नान्यथा ११
जगदेतन्निराक्रन्दं न तु सारमनर्थकम् । भोक्तव्यमिति निर्दिष्टो मुच्यते नात्र संशयः १२
प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषम् । प्रत्याहारेण संसर्गान्ध्यानेनानैश्वरान्गुणान् १३
सव्याहृतिं सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते १४
मनसः संयमस्तज्ज्ञैर्धारणेति निगद्यते । संहारश्चेन्द्रियाणां च प्रत्याहारः प्रकीर्तितः १५
हृदिस्थध्यानयोगेन देवदेवस्य दर्शनम् । ध्यानं प्रोक्तं प्रवक्ष्यामि ध्यानयोगमतः परम् १६
हृदिस्था देवताः सर्वा हृदि प्राणाः प्रतिष्ठिताः । हृदि ज्योतींषि सूर्यश्च हृदि सर्वं प्रतिष्ठितम् १७
स्वदेहमरणिं कृत्वा प्रणवं चोत्तरारणिम् । ध्याननिर्मन्थनाभ्यासाद्विष्णुं पश्येद्धृदि स्थितम् १८
हृद्यर्कश्चन्द्रमाः सूर्यः सोमो मध्ये हुताशनः । तेजोमध्ये स्थितं सत्त्वं सत्त्वमध्ये स्थितोऽच्युतः १९

अणोरणीयान्महतो महीयानात्माऽस्य जन्तोर्निहितो गुहायाम् ।
तेजोमयं पश्यति वीतशोको धातुः प्रसादान्महिमानमात्मनः ॥ २०

वासुदेवस्तमोन्धानां प्रत्यक्षो नैव जायते । अज्ञानपटसंवीतैरिन्द्रियैर्विषयेप्सुभिः २१
एष वै पुरुषो विष्णुर्व्यक्ताव्यक्तः सनातनः । एष धाता विधाता च पुराणो निष्कलः शिवः २२

वेदाहमेतं पुरुषं महान्तमादित्यवर्णं तमसः परस्तात् ।
यं वै विदित्वा न बिभेति मृत्योर्नान्यः पन्था विद्यतेऽयनाय ॥ २३

पृथिव्यापस्तथा तेजो वायुराकाशमेव च । पञ्चैतानि विजानीयान्महाभूतानि पण्डितः

---

१ ग. °न्दनैर्लिप्यतेऽङ्गं वा भस्मचूर्णैर्विगर्हितैः । क° । २ ग. संश्रयेत् । ३ ग. घ. ङ. °तहितो । ४ क. °र्विद्य म° । ५ क. ख. घ. ङ. नरसा° । ६ ग. घ. ङ. निर्विण्णो । ७ ग. हृदयस्थस्य यो° । ८ ग. °तं तत्त्वं तत्त्वम° । च. °तं सत्यं सत्यम° । ९ क. ग. घ ङ. °नां पर्वैरपि विधीय° ।

चक्षुः श्रोत्रं स्पर्शनं च रसनं घ्राणमेव च। बुद्धीन्द्रियाणि जानीयात्पञ्चैमानि शरीरके२९
रूपं शब्दस्तथा स्पर्शो रसो गन्धस्तथैव च। इन्द्रियार्थान्विजानीयात्पञ्चैवं सततं बुधः२६
हस्तौ पादावुपस्थं च जिह्वा पायुस्तथैव च। कर्मेन्द्रियाणि पञ्चैव नित्यमस्मिञ्शरीरके
मनो बुद्धिस्तथैवाऽऽत्मा ह्यव्यक्तं च तथैव च। इन्द्रियेभ्यः पराणीह चत्वारि कथितानि च २८
चतुर्विंशत्यथैतानि तत्त्वानि कथितानि च। तथाऽऽत्मानं तमतीतं पुरुषं पञ्चविंशकम्
यं तु ज्ञात्वा विमुच्यन्ते ये जनाः साधुवृत्तयः। तदिदं परमं गुह्यमेतदक्षरमुत्तमम् ३०
अशब्दरसमस्पर्शमरूपं गन्धवर्जितम्। निर्दुःखमसुखं शुद्धं तद्विष्णोः परमं पदम् ३१
अजं निरञ्जनं शान्तमव्यक्तं ध्रुवमक्षरम्। अनादिनिधनं ब्रह्म तद्विष्णोः परमं पदम् ३२
विज्ञानसारथिर्यस्तु मनःप्रग्रहबन्धनः। सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्३३
वालाग्रशतशो भागः कल्पितस्तु सहस्रधा। तस्यापि शतमाद्भागाज्जीवः सूक्ष्म उदाहृतः
इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिर्बुद्धरात्मा तथा परः ३५
महतः परमव्यक्तमव्यक्तात्पुरुषः परः। पुरुषान्न परं किंचित्सा काष्ठा सा परा गतिः३६
एषु सर्वेषु भूतेषु तिष्ठत्यविकलः सदा। दृश्यते त्वग्र्यया बुध्या सूक्ष्मया सूक्ष्मदर्शिभिः
इति शाङ्खे [धर्मशास्त्रे] सप्तमोऽध्यायः ॥ ७ ॥

(अथाष्टमोऽध्यायः।)

---

*नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्। क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम् १
अस्नातः पुनरानर्हो जप्याग्निहवनादिषु। प्रातःस्नानं तदर्थं च नित्यस्नानं प्रकीर्तितम्
चण्डालशवयूपाद्यं स्पृष्ट्वा स्नानं रजस्वलाम्। स्नानानर्हस्तु यः स्नाति स्नानं नैमित्तिकं च तत् ३
पुण्यस्नानादिकं स्नानं दैवज्ञविधिचोदितम्। तद्धि काम्यं समुद्दिष्टं नाकामस्तत्प्रयोजयेत्
जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन्। स्नानं समाचरेद्यस्तु क्रियाङ्गं तत्प्रकीर्तितम् ५

---

* एषोऽध्यायो न विद्यते ग. पुस्तके।

---

१ ग. °न्द्रियस्थान्वि°। २ ग. °व विषयान्बुधः। ३ ग च. °त्मा व्यक्ताव्यक्तं त°। ४ ग. °रि प्रवराणि च। ५ च. °न्धनम्। सो°। ६ क. ख घ. °नः पर°। ७ ग. °विरलः। ८ घ. ङ. °जके। ज°।

मलापकर्षणार्थं तु स्नानमभ्यङ्गपूर्वकम्। मलापकर्षणार्थाय प्रवृत्तिस्तस्य नान्यथा ६
सरित्सु देवखातेषु तीर्थेषु च नदीषु च। क्रियास्नानं समुद्दिष्टं स्नानं तत्र महाक्रिया ७
तत्र काम्यं तु कर्तव्यं यथावद्विधिचोदितम्। नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ८
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः। स्नानं तु वह्नितप्तेन तथैव परवारिणा ९
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं[1] लभेत्। अद्भिर्गात्राणि शुध्यन्ति तीर्थस्नानात्फलं लभेत् १०
सरःसु देवखातेषु तीर्थेषु च नदीषु च। स्नानमेव क्रिया तस्मात्स्नानात्पुण्यफलं स्मृतम्
तीर्थं प्राप्यानुषङ्गेण स्नानं तीर्थे समाचरेत्। स्नानजं फलमाप्नोति तीर्थयात्राफलं न तु १२
सर्वतीर्थानि पुण्यानि पापघ्नानि सदा नृणाम्। परस्परानपेक्षाणि[3] कथितानि मनीषिभिः
सर्वे प्रस्रवणाः पुण्याः सरांसि च शिलोच्चयाः। नद्यः पुण्यास्तथा सर्वा जाह्नवी तु विशेषतः[6] १४
यस्य पादौ च हस्तौ च मनश्चैव सुसंयतम्। विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते १५
नृणां पापकृतां तीर्थे पापस्य शमनं भवेत्। यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम्
इति शाङ्खे [धर्मशास्त्रेऽ]ष्टमोऽध्यायः॥ ८॥

(अथ नवमोऽध्यायः।)

क्रियास्नानं तु वक्ष्यामि यथावद्विधिपूर्वकम्। मृद्भिरद्भिश्च कर्तव्यं शौचमादौ यथाविधि
जले निमग्न उन्मज्ज्य उपस्पृश्य यथाविधि। जलस्याऽऽवाहनं कुर्यात्तत्प्रवक्ष्याम्यतः परम्
प्रपद्ये वरुणं देवमम्भसां पतिमूर्जितम्। याचितं देहि मे तीर्थं सर्वपापापनुत्तये ३
तीर्थमावाहयिष्यामि सर्वाघविनिषूदनम्। सांनिध्यमस्मिंस्तोये च भज त्वं मदनुग्रहात् ४
रुद्रान्प्रपद्ये वरदान्सर्वानप्सुषदस्तथा। सर्वानप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः ५
देवमप्सुषदं वह्निं प्रपद्येऽघनिषूदनम्। आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा ६
रुद्राश्चाग्निश्च सर्पाश्च वरुणश्चाऽऽप एव च। शमयन्त्वाशु मे पापं मां रक्षन्तु च सर्वशः ७
इत्येवमुक्त्वा कर्तव्यं ततः संमार्जनं जले। आपो हि ष्ठेति तिसृभिर्यथावदनुपूर्वशः ८
हिरण्यवर्णेति वदेदग्निश्च तिसृभिस्तथा। शं नो देवीति च तथा शं न आपस्तथैव च ९
इदमापः प्रवहत तथा मन्त्रमुदीरयेत्। एवं मन्त्रान्समुच्चार्य च्छन्दांसि ऋषिदेवताः १०

---

१ घ. ङ. च. भवेत्। २ घ. ङ. °राण्यपे°। ३ च. °पेक्ष्याणि। ४ न. घ. निमज्ज्य। ५ ग. °धि। तीर्थस्या°। ६ ग. °म्यशेषतः। प्र°।

अघमर्षणसूक्तस्य संस्मरेत्प्रयतः सदा। छन्द आनुष्टुभं तस्य ऋषिश्चैवाघमर्षणः ११
देवता भाववृत्तस्तु पापघ्नस्य प्रकीर्तितः। ततोऽम्भसि निमग्नस्तु त्रिः पठेदघमर्षणम् १२
यथाऽश्वमेधः क्रतुराट्सर्वपापप्रणाशनः। तथाऽघमर्षणं सूक्तं सर्वपापप्रणाशनम् १३
अनेन स्नात्वा अब्मध्ये स्नातवान्धौतवाससा। परिवर्तितवासास्तु तीर्थतीरमुपस्पृशेत्
उदकस्याप्रदानाच्च स्नानशाटीं न पीडयेत्। अनेन विधिना स्नातस्तीर्थस्य फलमश्नुते
इति शाङ्खे [धर्मशास्त्रे] नवमोऽध्यायः ॥ ९ ॥

(अथ दशमोऽध्यायः।)

अतः परं प्रवक्ष्यामि शुभामाचमनक्रियाम्। कार्यं कनिष्ठिकामूले तीर्थमुक्तं मनीषिभिः १
अङ्गुष्ठमूले च तथा प्राजापत्यं विचक्षणैः। अङ्गुल्यग्रे स्मृतं दि(दै)व्यं पित्र्यं तर्जनिमूलकम्(के) २
प्राजापत्येन तीर्थेन त्रिः प्राश्नीयाज्जलं द्विजः। द्विः प्रमृज्य मुखं पश्चात्खान्यद्भिः समुपस्पृशेत् ३
हृद्गाभिः पूयते विप्रः कण्ठगाभिस्तु भूमिपः। तालुगाभिस्तथा वैश्यः शूद्रः स्पृष्टाभिरन्ततः
अन्तर्जानु शुचौ देशे प्राङ्मुखः सुसमाहितः। उदङ्मुखो वा प्रयतो दिशश्चानवलोकयन्
अद्भिः समुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः। वह्निना चाप्यतप्ताभिरक्षाराभिरुपस्पृशेत्
तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम्। अङ्गुष्ठमध्ययोगेन स्पृशेन्नेत्रद्वयं ततः ७
अङ्गुष्ठानामिकाभ्यां तु श्रवणौ समुपस्पृशेत्। कनिष्ठाङ्गुष्ठयोगेन स्पृशेत्स्कन्धद्वयं ततः ८
सर्वासामेव योगेन नाभिं च हृदयं तथा। संस्पृशेच्च तथा मूर्ध्नि एष आचमने विधिः ९
त्रिः प्राश्नीयाद्यदम्भस्तु प्रीतास्तेनास्य देवताः। ब्रह्मा विष्णुश्च रुद्रश्च भवन्तीत्यनुशुश्रुम १०
गङ्गा च यमुना चैव प्रीयेते परिमार्जनात्। नासत्यदस्रौ प्रीयेते स्पृष्टे नासापुटद्वये ११
स्पृष्टे लोचनयुग्मे तु प्रीयेते शशिभास्करौ। कर्णयुग्मे तथा स्पृष्टे प्रीयेते अनिलानलौ १२
स्कन्धयोः स्पर्शनादस्य प्रीयन्ते सर्वदेवताः। मूर्ध्नः संस्पर्शनादस्य प्रीतस्तु पुरुषो भवेत्
विना यज्ञोपवीतेन तथा मुक्तशिखो द्विजः। अप्रक्षालितपादस्तु आचान्तोऽप्यशुचिर्भवेत् १४

---

१ ग. °सूक्तं च प्रपठेत्प्र°। २ ग. °न विधिना स्नात्वा स्नात°। ३ग. °र्थनामानि संजपेत्। ४ ग. °क्तं करस्य तु। अ°। घ. ङ. छ °क्तं द्विजस्य तु। अ°। ५ क. ख. °कायोगे श्र°। ६ ग. °खोऽपि वा। अ°

बहिर्जानुरुपस्पृश्य एकहस्तार्पितैर्जलैः[1] । सोपानत्कस्तथा तिष्ठन्नैव शुद्धिमवाप्नुयात्*
आचम्य च पुरा प्रोक्तं तीर्थसंमार्जनं[2] तु यत् । उपस्पृशेत्ततः पश्चान्मन्त्रेणानेन धर्मतः १६
अन्तश्चरसि[3] भूतेषु गुहायां विश्वतोमुखः । त्वं यज्ञस्त्वं वषट्कार आपो ज्योती रसोऽमृतम्
आचम्य च ततः पश्चादादित्याभिमुखो जलम् । उदु त्यं जातवेदसमिति मन्त्रेण निक्षि-
पेत् १८
एष एव विधिः प्रोक्तः संध्ययोश्च द्विजातिषु। पूर्वां संध्यां जपंस्तिष्ठेदासीनः पश्चिमां तथा
ततो जपेत्पवित्राणि पवित्रं वाऽथ शक्तितः । ऋषयो दीर्घसंध्यत्वाद्दीर्घमायुरवाप्नुयुः २०
सर्ववेदपवित्राणि वक्ष्याम्यहमतः परम् । येषां जपैश्च होमैश्च पूयन्ते मानवाः सदा २१

इति शाङ्खे [धर्मशास्त्रे] दशमोऽध्यायः ॥ १० ॥

(अथैकादशोऽध्यायः ।)

अघमर्षणं देवकृतं[4] शुद्धवत्यस्तरत्समाः । कूष्माण्ड्यः पावमान्यश्च सावित्र्यश्च तथैव च[5]
त्र्य(त्रि)भिष्टुं[6] द्रुपदा चैव स्तोमानि व्याहृतीस्तथा । भारुण्डानि च सामानि गायत्री
चौशनं(त्र्यौशनसं)तथा २
पुरुषव्रतं च भाषं च तथा सोमव्रतानि च । अब्लिङ्गं बार्हस्पत्यं च वाक्सूक्तममृतं तथा ३
शतरुद्रीयमथर्वशिरस्त्रिसुपर्णं महाव्रतम् । गोसूक्तमश्वसूक्तं[7] च इन्द्रसूक्तं च सामनी ४
त्रीण्याज्यदोहानि रथंतरं च अग्निव्रतं वामदेवव्रतं[8] च ।
एतानि गीतानि पुनन्ति जन्तूञ्जातिस्मरत्वं लभते यदीच्छेत् ॥ ५

इति शाङ्खे [धर्मशास्त्रे] एकादशोऽध्यायः ॥ ११ ॥

(अथ द्वादशोऽध्यायः ।)

इति वेदपवित्राण्यभिहितानि, एभ्यः सावित्री विशिष्यते ॥ १॥ नास्त्यघमर्षणात्परं[9]

---

* इतः परं सार्धं वचनमधिकं च. पुस्तके–"क्षिप्तेन मूर्ध्नि तोयेन पापमस्य प्रणश्यति । भूमौ क्षिप्तेन हन्यन्ते असुरा देवशत्रवः । व्याहृतीः कीर्तयेच्चैव तथैवार्यचमव्ययम् " इति ।

---

१ ग. °लैः । ममलाभिस्तथाऽद्भिश्च नैव । २ ग.°नं ततः । उपस्पृश्य ततः । ३ घ.ङ.च. छ. °रति भू°। ४ ग. घ. ङ. छ. °वव्रतं । ५ ग. °श्च सर्वसावित्र्य एव । ६ ख च । अभीष्टुं° । ७ ग. घ. ङ. छ. भाषं । ८ घ. ङ. छ. च श्रीसू° । ९ क. °क्तं चन्द्र° । १० घ. ङ. छ. 'देव्यं बृहच्च । ए । ११ ग. °रमं तन्नलेन व्याहृतिभिः परं होमः । न सावित्र्याः परं जप्यं कुशश° ।

मन्तर्जले ॥ २ ॥ न सावित्र्या समं जप्यं न व्याहृतिसमं हुतम् ॥ ३ ॥ कुशशय्यामासीनः कुशोत्तरीयवान्कुशपवित्रपाणिः प्राङ्मुखः सूर्याभिमुखो वाऽक्षमालामुपादाय देवताध्यायी जपं कुर्यात् ॥ ४ ॥ सुवर्णमणिमुक्तास्फटिकपद्माक्षरुद्राक्षपुत्रजीवकानामन्यतमेनाऽऽदाय मालां कुर्यात् ॥ ५ ॥ कुशग्रन्थिं कृत्वा वामहस्तोपयमैर्वा गणयेत् ॥ ६ ॥ आदौ देवतां ऋषिच्छन्दः स्मरेत् ॥ ७ ॥ ततः सप्रणवां सव्याहृतिकामादावन्ते च शिरसा गायत्रीमावर्तयेत् ॥ ८ ॥ अथास्याः सविता देवता, ऋषिर्विश्वामित्रो गायत्री छन्दः ॥ ९ ॥ ॐकारः प्रणवाख्यः ॥ १० ॥ ॐ भूः। ॐ भुवः। ॐ स्वः। ॐ महः। ॐ जनः। ॐ तपः। ॐ सत्यमिति व्याहृतयः ॥ ११ ॥ ओमापो ज्योतीरसोऽमृतं ब्रह्म भूर्भुवः स्वरोमिति शिरः ॥ १२ ॥ भवन्ति चात्र श्लोकाः ॥ १३ ॥

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह। ये जपन्ति सदा तेषां न भयं विद्यते क्वचित्
शतं जप्त्वा तु सा देवी दिनपापप्रणाशिनी *। सहस्रं जप्त्वा तु तथा पातकेभ्यः समुद्धरेत्
दशसहस्रं जप्त्वा तु सर्वकल्मषनाशिनी। सुवर्णस्तेयकृद्विप्रो ब्रह्महा गुरुतल्पगः १६
सुरापश्च विशुध्येत लक्षजाप्यान्न संशयः। प्राणायामत्रयं कृत्वा स्नानकाले समाहितः १७
अहोरात्रकृतात्पापात्तत्क्षणादेव मुच्यते। सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश
अपि भ्रूणहनं मासात्पुनन्त्यहरहः कृताः। हुता देवी विशेषेण सर्वकामप्रदायिनी १९
सर्वपापक्षयकरी वरदा भक्तवत्सला। शान्तिकामस्तु जुहुयात्सावित्रीमक्षतैः शुचिः २०
हन्तुकामोऽपमृत्युं च घृतेन जुहुयात्तथा। श्रीकामस्तु तथा पद्मैर्बिल्वैः काञ्चनकामुकः २१
ब्रह्मवर्चसकामस्तु पयसा जुहुयात्तथा। घृतप्लुतैस्तिलैर्वह्निं जुहुयात्सुसमाहितः २२
गायत्र्ययुतहोमाच्च सर्वपापैः प्रमुच्यते। पापात्मा लक्षहोमेन पातकेभ्यः प्रमुच्यते २३
अभीष्टं लोकमाप्नोति प्राप्नुयात्काममीप्सितम्। गायत्री वेदजननी गायत्री पापनाशिनी
गायत्र्याः परमं नास्ति दिवि चेह च पावनम्। हस्तत्राणप्रदा देवी पततां नरकार्णवे २५
तस्मात्तामभ्यसेन्नित्यं ब्राह्मणो नियतः शुचिः। गायत्रीजाप्यनिरतं हव्यकव्येषु भोजयेत् २६

---

* इतः परं ग. पुस्तकेऽयं पाठः—"शतं जप्त्वा तथा सा तु सर्वकल्मषनाशिनी। सहस्रं जप्त्वा सा नृणां पातकेभ्यः समुद्धरेत्।" इति।

---

१ ग. पद्मपत्रबीजाक्षाणामन्यतमेनाक्षमा° । २ घ. ङ. छ. °क्षपत्रजीवानामन्यतमेनाक्षमा° । ३ ग. °त्। ध्यायन्वामहस्तोपरिव्याग° । ४ च. वा स्वहस्तोपयुक्तैर्वा । ५ क. ख. °स्तोपायनैर्वा । ६ ग. °तामार्षं छन्दश्च स्म° । ७ ग. °न्दः । प्रणवाद्याः । भूः । ८ ग. दश। ९ ग. °त्। स्वर्णस्तेयी कृतघ्नश्च ब्र° । १० ग. °कामतः । ब्र° । ११ म. °ते । ब्रह्मलो° । १२ क. °षु योज° ।

तस्मिन्न तिष्ठते पापमब्बिन्दुरिव पुष्करे। २७
जपे(प्ये)नैव तु संसिध्येद्ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यान्मैत्रो ब्राह्मण उच्यते २८
उपांशु स्याच्छतगुणः साहस्रो मानसः स्मृतः।नोच्चैर्जपं बुधः कुर्यात्सावित्र्यास्तु विशेषतः सावित्रीजाप्यनिरतः स्वर्गमाप्नोति मानवः। गायत्रीजप्यनिरतो मोक्षोपायं च विन्दति तस्मात्सर्वप्रयत्नेन स्नातः प्रयतमानसः। गायत्रीं तु जपेद्भक्त्या सर्वपापप्रणाशिनीम् ३१

इति शाङ्खे [धर्मशास्त्रे] द्वादशोऽध्यायः ॥ १२ ॥

(अथ त्रयोदशोऽध्यायः)

स्नातः कृतजप्यस्तदनु प्राङ्मुखो दिव्येन तीर्थेन देवानुदकेन तर्पयेत् ॥१॥ *अथ तर्पणविधिः ॥ २ ॥ ॐ भगवन्तं शेषं तर्पयामि ॥ ३ ॥

कालाग्निरुद्रं तु ततो रुक्मभौमं तथैव च। श्वेतभौमं ततः प्रोक्तं पातालानां च सप्तकम् ४
जम्बूद्वीपं ततः प्रोक्तं शाकद्वीपं ततः परम्। गोमेदपुष्करे तद्वच्छाकाख्यं च ततः परम् ५
शार्वरं ततः स्वधामानं ततो हिरण्यरोमाणं ततः कल्पस्थायिनो लोकांस्तर्पयेत् ॥६॥ लवणोदकं ततः क्षीरोदं ततो घृतोदं तत इक्षूदं ततः स्वादूदं तत इति सप्तसमुद्रकं प्रेत्यृचं पुरुषसूक्तेनोदकाञ्जलीन्दद्यात्, पुष्पाणि च तथा भक्त्या ॥ ७ ॥ अथ कृतापसव्यो दक्षिणामुखोऽन्तर्जानुः पित्र्येण पितॄणां यथाश्राद्धं प्रकाममुदकं दद्यात् ॥ ८ ॥ सौवर्णेन पात्रेण राजतेनौदुम्बरेण खड्गपात्रेणान्यपात्रेण वोदकं पितृतीर्थे स्पृशन्दद्यात् ॥९॥पित्रे पितामहाय प्रपितामहाय मात्रे पितामह्यै प्रपितामह्यै मातामहाय(?) प्रमातामहाय मात्रे(?) मातामह्यै प्रमातामह्यै सप्तमात्पुरुषात्पितृपक्षे यावतां नाम जानीयात्पितृपक्षाणां तर्पणं कृत्वा गुरूणां मातृपक्षाणां तर्पणं कुर्यात् ॥ १० ॥ मातृपक्षाणां तर्पणं कृत्वा संबन्धिबान्धवानां कुर्यात्, तेषां कृत्वा सुहृदां कुर्यात् ॥११॥ भवन्ति चात्र श्लोकाः ॥ १२ ॥

विना रौप्यसुवर्णेन विना ताम्रतिलेन च। विना दर्भैश्च मन्त्रैश्च पितॄणां नोपतिष्ठते १३

---

* इतः प्रभृति सप्तसमुद्रकामित्यन्तं न विद्यते ग. पुस्तके।

---

१ घ. छ. °दन्यत्र वा। २ घ. ङ. छ. °णाशनी°। ३ च देवं। ४ क. °भौतं त°। ५ घ. ङ. छ. ततः शिलाभौमं ततो रक्तभौमं ततः श्वेतभौमं ततः पातालसप्तकं ततो जम्बूद्वीपं ततः शाकद्वीपं ततो गोमेद ततः पुष्करं ततो दिति द्वितीयं ततोः लोकालोकाख्यं ततः शा°। ६ घ. ततः स्वादूदकं तत इ°। ङ. छ. ततः केतुमन्तं ततो। ७ ङ. छ. लोकपालांस्त°। ८ ङ. छ. ततः स्वादूदकं तत इति समु°। ९ ग. प्रत्यहं। १० ग. °पक्षीयाणां त्रयाणां दत्त्वा मातृपक्षीयाणां गुरूणां संबन्धिबान्धवानां च कृत्वा सु°।

सौवर्णराजताभ्यां च खड्गेनौदुम्बरेण च । दत्तमक्षय्यतां याति पितॄणां तु तिलोदकम्
हेम्ना तु सह यद्दत्तं क्षीरेण मधुना सह । तदप्यक्षय्यतां याति पितॄणां तु तिलोदकम् १५
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन वा । पयोमूलफलैर्वाऽपि पितॄणां प्रीतिमावहन् १६
स्नातः संतर्पणं कृत्वा पितॄणां तु तिलाम्भसा । पितृयज्ञमवाप्नोति प्रीणाति च पितॄंस्तथा
इति शाङ्खे [धर्मशास्त्रे] त्रयोदशोऽध्यायः ॥ १३ ॥

(अथ चतुर्दशोऽध्यायः ।)

ब्राह्मणान्न परीक्षेत दैवे कर्मणि धर्मवित् । पित्र्ये कर्मणि संप्राप्ते युक्तमाहुः परीक्षणम् १
ब्राह्मणा ये विकर्मस्था बैडालव्रतिकास्तथा+ । ऊनाङ्गा अतिरिक्ताङ्गा ब्राह्मणाः पङ्क्ति-
दूषकाः २
गुरूणां प्रतिकूलाश्च वेदाग्न्युत्सादिनश्च ये । गुरूणां त्यागिनश्चैव ब्राह्मणाः पङ्क्तिदूषकाः ३
अनध्यायेष्वधीयानाः शौचाचारविवर्जिताः । शूद्रान्नरससंपुष्टा ब्राह्मणाः पङ्क्तिदूषकाः
षडङ्गवित्त्रिसुपर्णो बह्वृचो ज्येष्ठसामगः । त्रिणाचिकेतः पञ्चाग्निर्ब्राह्मणाः पङ्क्तिपावनाः
ब्रह्मदेयानुसंतानो ब्रह्मदेयाप्रदायकः । ब्रह्मदेयापतिर्यश्च ब्राह्मणाः पङ्क्तिपावनाः ६
ऋग्यजुःपारगो यश्च साम्नां यश्चापि पारगः । अथर्वाङ्गिरसोऽध्येता ब्राह्मणः पङ्क्तिपावनः
नित्यं योगरतो विद्वान्समलोष्टाश्मकाञ्चनः । ध्यानशीलो यतिर्विद्वान्ब्राह्मणः पङ्क्तिपावनः
द्वौ दैवे प्राङ्मुखौ त्रीन्वा पित्र्ये चोदङ्मुखांस्तथा । भोजयेद्विविधान्विप्रानेकैकमुभयत्र वा
भोजयेदथ वाऽप्येकं ब्राह्मणं पङ्क्तिपावनम् । दैवे कृत्वा तु नैवेद्यं पश्चाद्वह्नौ तु तत्क्षिपेत् १०
उच्छिष्टसंनिधौ कार्यं पिण्डनिर्वपणं बुधैः । अभावे च तथा कार्यमग्निकार्यं यथाविधि ११
श्राद्धं कृत्वा प्रयत्नेन त्वराक्रोधविवर्जितः । उष्णमन्नं द्विजातिभ्यः श्रद्धया विनिवेदयेत्
अन्यत्र पुष्पमूलेभ्यः पीठकेभ्यश्च पण्डितः । भोजयेद्विविधान्विप्रान्गन्धमाल्यसमुज्ज्वलान्
पर्तिकचित्पच्यते गेहे भक्ष्यं वा भोज्यमेव वा । अनिवेद्य न भोक्तव्यं पिण्डमूले कदा-
चन १४
उग्रगन्धान्यगन्धानि चैत्यवृक्षभवानि च । पुष्पाणि वर्जनीयानि रक्तवर्णानि यानि च

+ इतः परमेतद्वचनमधिकं घ. ङ. छ पुस्तकेषु—" यस्य धर्मध्वजो नित्यं सुराध्वज इवोद्धृतः । प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम् " इति ।

---

१ ग. घ. ङ. च. °ह । दत्तमक्ष° । २ ग. °तिकाः शठाः । हीना° । ३ क. °संतुष्टा । ४ घ. ङ. छ. °थर्वशिर° । ५ क. ख. °लो हि यो विद्वा° । ६ घ. ङ. छ. °भ्यः पानकं° । ७ ग. °माल्यानुलेपनैः । य° ।

तोयोद्भवानि देयानि रक्तान्यपि विशेषतः। ऊर्णासूत्रं प्रदातव्यं कार्पासमथ वा नवम्
देशां विवर्जयेत्प्राज्ञो यद्यप्यहतवस्त्रजाम्। घृतेन दीपो दातव्यस्तिलतैलेन वा पुनः १७
धूपार्थं गुग्गुलुं दद्याद्घृतयुक्तं मधूत्कटम्। चन्दनं च तथा दद्यात्पिष्ट्वा च कुङ्कुमं शुभम् १८
*भूतृणं सुरसं शिग्रुं पालकं सिन्धुकं तथा। कूष्माण्डालाबुवार्ताककोविदारांश्च वर्जयेत्
पिप्पलीं मरिचं चैव तथा वै पिण्डमूलकम्। कृतं च लवणं सर्वं वंशाग्रं तु विवर्जयेत् २०
राजमाषान्मसूरांश्च कोद्रवान्कोरदूषकान्। लोहितान्वृक्षनिर्यासाञ्श्राद्धकर्माणि वर्जयेत् २१
आम्रमामलकीमिक्षुं मृद्वीकादधिदाडिमान्+। ‡विदार्यश्चैव रम्भाद्या दद्याच्छ्राद्धे प्रयत्नतः २२
धानालाजे मधुयुते सक्तूञ्शर्करया सह। दद्याच्छ्राद्धे प्रयत्नेन शृङ्गाटकविसेतकान् २३
भोजयित्वा द्विजान्भक्त्या स्वाचान्तान्दत्तदक्षिणान्। अभिवाद्य पुनर्विप्राननुव्रज्य विसर्जयेत् २४
निमन्त्रितस्तु यः श्राद्धे मैथुनं सेवते द्विजः। श्राद्धं दत्त्वा च भुक्त्वा च युक्तः स्यान्महतैनसा २५
कालशाकं सशल्कांश्च मांसं वाध्रीणसस्य च। खड्गमांसं तथाऽनन्तं यमः प्रोवाच धर्मवित्† २६
यद्ददाति गयाक्षेत्रे प्रभासे पुष्करे तथा। प्रयागे नैमिषारण्ये सर्वमानन्त्यमश्नुते २७
गङ्गायमुनयोस्तीरे पयोष्ण्यामरकण्टके। नर्मदायां गयातीरे सर्वमानन्त्यमुच्यते २८
वाराणस्यां कुरुक्षेत्रे भृगुतुङ्गे महालये। सप्तवेण्यृषिकूपे च तदप्यक्षय्यमुच्यते २९
म्लेच्छदेशे तथा रात्रौ संध्यायां च विशेषतः। न श्राद्धमाचरेत्प्राज्ञो म्लेच्छदेशे न च व्रजेत् ३०

---

*इतः परमयं पाठो ग. पुस्तके–"सकोविदार्यसत्कन्दराजेन मधुना सदा। सक्तूञ्शर्करया सार्धं दद्याच्छ्राद्धे प्रयत्नतः। पायसादिभिरुग्रैश्च भोजयित्वा तथा द्विजान्। भक्त्या प्रणम्य आचान्तांस्तथा वै दत्तदक्षिणाम्(न्)। अभिवाद्य प्रसन्नात्मा अनुव्रज्य विसर्जयेत्"इति। +एतदर्धस्थानेऽयं पाठो ग. पुस्तके–"छत्राकं शरशिम्बं च पलं च सुसकं तथा"इति। ‡ इतः प्रभृति विसर्जयेदित्यन्तं न ग. पुस्तके। † अत्राध्यायसमाप्तिर्दृश्यते ग. पुस्तके।

---

१ ग. दशा वि°। २ ग. °यनाहतवस्त्रजाः। घृ°। ३ ग. °यादिष्टं यत्कुङ्कुं। ४ घ. ङ. छ. °बुवृन्ताकं। ५ ग. आम्रातलवलीमूलमूलकान्दधि। घ. ङ. छ आम्रैलाम°। ६ घ. ङ. छ. °क्षुं द्राक्षाद्वीका°। ७ घ. ङ. छ. धानला°। ८ क. °लाभेम°। ९ च. विशेषका°। १० क. °सेतिका। ११ क. ख. °यास्यश्च प्र°। १२ ख. च. °रे अयोध्याम°। ग. °रेर्तीर्थे वाऽम°। १३ ग. सप्तारण्येऽसिकू°। १४ च. च दत्तमक्ष°।

हस्तिच्छायासु यद्दत्तं यद्दत्तं राहुदर्शने । विषुवत्ययने चैव सर्वमानन्त्यमुच्यते ३१
प्रोष्ठपद्यामतीतायां मघायुक्तां त्रयोदशीम् । प्राप्य श्राद्धं तु कर्तव्यं मधुना पायसेन वा
प्रजां पुष्टिं यशः स्वर्गमारोग्यं च धनं तथा । नृणां श्राद्धैः सदा प्रीताः प्रयच्छन्ति पितामहाः ३३

इति शाङ्खे [धर्मशास्त्रे] चतुर्दशोऽध्यायः ॥ १४ ॥

(अथ पञ्चदशोऽध्यायः ।)

जनने मरणे चैव सपिण्डानां द्विजोत्तमः । त्र्यहाच्छुद्धिमवाप्नोति योऽग्निवेदसमन्वितः १
सपिण्डता तु पुरुषे सप्तमे विनिवर्तते । नामधारकविप्रस्तु दशाहेन विशुध्यति २
क्षत्रियो द्वादशाहेन वैश्यः पक्षेण शुध्यति । मासेन तु तथा शूद्रः शुद्धिमाप्नोति नान्तरा ३
रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति । अजातदन्तबाले तु सद्यः शौचं विधीयते ४
अहोरात्रात्तथा शुद्धिर्बाले त्वकृतचूडके । तथैवानुपनीते तु त्र्यहाच्छुध्यन्ति[1] बान्धवाः ५
अनूढानां तु कन्यानां तथैव शूद्रजन्मनाम्[2] । अनूढभार्यः शूद्रस्तु षोडशाद्वत्सरात्परम् ६
मृत्युं समधिगच्छेच्चेन्मासात्तस्यापि[3] बान्धवाः । शुद्धिं समभिगच्छेयुर्नात्र कार्या विचारणा ७
पितृवेश्मनि या कन्या रजः पश्यत्यसंस्कृता । तस्यां मृतायां नाशौचं कदाचिदपि शाम्यति[4] ८
हीनवर्णा तु या नारी प्रमादात्प्रसवं व्रजेत् । प्रसवे मरणे तज्जमाशौचं नोपशाम्यति[5] ९
समानं खल्वशौचं तु प्रयत्नेन समापयेत्[6] । असमानं द्वितीयेन धर्मराजवचो यथा १०
देशान्तरगतः श्रुत्वा कुल्यानां मरणोद्भवौ । यच्छेषं दशरात्रस्य तावदेवाशुचिर्भवेत् ११
अतीते दशरात्रे तु त्रिरात्रमशुचिर्भवेत् । तथा संवत्सरेऽतीते स्नात एव विशुध्यति १२
अनौरसेषु पुत्रेषु भार्यास्वन्यगतासु च । परपूर्वासु च स्त्रीषु त्र्यहाच्छुद्धिरिहेष्यते १३
मातामहे व्यतीते तु आचार्ये च तथा मृते । गृहे दत्तासु कन्यासु मृतासु च त्र्यहस्तथा १४
निवासराजनि प्रेते जाते दौहित्रके गृहे । आचार्यपत्नीपुत्रेषु प्रेतेषु दिवसेन च १५
मातुले पक्षिणीं रात्रिं शिष्यर्त्विग्बान्धवेषु च । सब्रह्मचारिण्येकाहमनूचाने तथा मृते १६
एकरात्रं त्रिरात्रं च षड्रात्रं मासमेव च । शूद्रे सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम् १७

---

१ ग. °न्ति मानवाः । मृतानां कन्यकानां तु तथैव शूद्रजन्मनः । अ° । २ ग. °भवग° । ३ ग. °न्मासं तस्या° । ४ ग. मे तु सं° । ५ ग. °था । विनष्टेरा° । ६ ग. च. वा ।

त्रिरात्रमथ षड्रात्रं पक्षं मासं तथैव च। वैश्ये सपिण्डे वर्णानामाशौचं क्रमशः स्मृतम् १८
सपिण्डे क्षत्रिये शुद्धिः षड्रात्रं ब्राह्मणस्य तु। वर्णानां परिशिष्टानां द्वादशाहं विनिर्दिशेत् १९
सपिण्डे ब्राह्मणे वर्णाः सर्व एवाविशेषतः। दशरात्रेण शुध्येयुरित्याह भगवान्यमः २०
भृग्वङ्ग्यनशनाम्भोभिर्मृतानामात्मघातिनाम्। पतितानां च नाशौचं शस्त्रविद्युद्धताश्च ये
यतिव्रतिब्रह्मचारिनृपकारुकदीक्षिताः। नाशौचभाजः कथिता राजाज्ञाकारिणश्च ये २२
यस्तु भुङ्क्ते पराशौचे वर्णी सोऽप्यशुचिर्भवेत्। आशौचशुद्धौ शुद्धिश्च तस्याप्युक्ता मनीषिभिः २३
पराशौचे नरो भुक्त्वा कृमियोनौ प्रजायते। भुक्त्वाऽन्नं म्रियते यस्य तस्य योनौ प्रजायते २४
दानं प्रतिग्रहो होमः स्वाध्यायः पितृकर्म च। प्रेतपिण्डक्रियावर्जमाशौचे विनिवर्तते २५

इति शाङ्खे[धर्मशास्त्रे]पञ्चदशोऽध्यायः॥१५॥

(अथ षोडशोऽध्यायः।)

मृन्मयं भाजनं सर्वं पुनः पाकेन शुध्यति। मद्यैर्मूत्रैः पुरीषैश्च ष्ठीवनैः पूयशोणितैः १
संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयम्। एतैरेव तथा स्पृष्टं ताम्रसौवर्णराजतम् २
शुध्यत्यावर्तितं पश्चादन्यथा केवलाम्भसा। आम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा ३
क्षारेण शुद्धिः कांस(स्य)स्य लोहस्य च विनिर्दिशेत्। मुक्तामणिप्रवालानां शुद्धिः प्रक्षालनेन तु ४
अब्जानां चैव भाण्डानां सर्वस्याश्ममयस्य च। शार्ङ्गवर्जं मूलफलैर्विदलानां तथैव च ५
मार्जनाद्यज्ञपात्राणां पाणिना यज्ञकर्मणि। उष्णाम्भसा तथा शुद्धिः सस्नेहानां विनिर्दिशेत् ६
शयनासनयानानां स्फ्यशूर्पशकटस्य च। शुद्धिः संप्रोक्षणाद्यज्ञे कटाग्नि(टाग्नी)न्धनयोस्तथा ७
मार्जनाद्वेश्मनां शुद्धिः क्षितेः शोधस्तु तत्क्षणात्। संमार्जितेन तोयेन वाससां शुद्धिरिष्यते ८

---

१ क. च एवावि°। २ क. च. क्षीरेण। ३ च. अक्षालितानां भा°। ४ ग. °कमूलफलानां च वि°। ५ घ. छ. °लद्विद°। ६ ग. सकेशानां। ७ ग. शय्यासनापणानां सूर्यस्य किरणैस्तथा। शु°। ८ क. घ. धनत°।

बहूनां प्रोक्षणाच्छुद्धिर्धान्यादीनां विनिर्दिशेत्। प्रोक्षणात्संहतानां च दारवाणां च तक्षणात् ९
सिद्धार्थकानां कल्केन शृङ्गदन्तमयस्य च। गोवालैः फलपात्राणामस्थ्नां शृङ्गवतां तथा
निर्यासानां गुडानां च लवणानां तथैव च। कुसुम्भकुङ्कुमानां च ऊर्णाकार्पासयोस्तथा
प्रोक्षणात्कथिता शुद्धिरित्याह भगवान्यमः। भूमिष्ठमुदकं शुद्धं शुचि तोयं शिलागतम् १२
वर्णगन्धरसैर्दुष्टैर्वर्जितं यदि तद्भवेत्। शुद्धं नदीगतं तोयं सर्वदैव तथाऽऽकरः ११
शुद्धं प्रसारितं पण्यं शुद्धे चाजाश्वयोर्मुखे। मुखवर्जं तु गौः शुद्धा मार्जारश्चाऽऽक्रमे शुचिः
अद्भ्या भार्या शिशुर्वस्त्रमुपवीतं कमण्डलुः। आत्मनः कथितं शुद्धं न शुद्धं हि परस्य च १५
नारीणां चैव वत्सानां शकुनीनां शुनां मुखम्। रात्रौ प्रस्रवणे वृक्षे मृगयायां सदा शुचि
शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला। दैवे कर्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति १७
रथ्याकर्दमतोयेन छत्रिवाद्येन वाऽप्यथ। नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुध्यति
कृत्वा मूत्रं पुरीषं वा स्नात्वा भोक्तुमनास्तथा। भुक्त्वा क्षुत्वा तथा सुप्त्वा पीत्वा चाम्भोऽवगाह्य च १९
रथ्या वाऽऽक्रम्य वाऽऽचामेद्वासो विपरिधाय च। कृत्वा मूत्रपुरीषं च लेपगन्धापहं द्विजः २०
उद्धृतेनाम्भसा शौचं मृदा चैव समाचरेत्। मेहने मृत्तिकाः सप्त लिङ्गे द्वे परिकीर्तिते २१
एकस्मिन्विंशतिर्हस्ते द्वयोर्ज्ञेयाश्चतुर्दश। तिस्रस्तु मृत्तिका देयाः कृत्वा नखविशोधनम्
तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्वदा। शौचमेतद्गृहस्थानां द्विगुणं ब्रह्मचारिणाम्
त्रिगुणं च वनस्थानां यतीनां तु चतुर्गुणम्। मृत्तिका च विनिर्दिष्टा त्रिपर्वाऽऽपूर्यते यया

इति शाङ्खे[धर्मशास्त्रे]षोडशोऽध्यायः॥ १६॥

(अथ सप्तदशोऽध्यायः।)

नित्यं त्रिषवणस्नायी कृत्वा पर्णकुटीं वने। अधःशायी जटाधारी पर्णमूलफलाशनः १
ग्रामं विशेच्च भिक्षार्थं स्वकर्म परिकीर्तयन्। एककालं समश्नीयाद्वर्षे तु द्वादशे गते २
स्तेयस्तेयी सुरापश्च ब्रह्महा गुरुतल्पगः। व्रतेनैतेन शुध्यन्ते महापातकिनस्त्विमे ३
यागस्थं क्षत्रियं हत्वा वैश्यं हत्वा च याजकम्। एतदेव व्रतं कुर्यादात्रेयीविनिषूदकः ४

---

१ ग.च काष्ठानां चैव त'। २ च.°रश्चक्रमे। ३ ख. ग. °श्चाऽऽश्रमे। ४ क. ख. घ. शुभं। ५ ग. स्नानं। ६ क. ख. च. ज्ञेयाः। ७ च. 'मे। योग'।

कूटसाक्ष्यं तथैवोक्त्वा निक्षेपमपहृत्य[3] च। एतदेव व्रतं कुर्यान्नृपमुक्त्वा च शरणागतम् ५
आहिताग्नेः स्त्रियं हत्वा मित्रं हत्वा त[4]था च। हत्वा गर्भमविज्ञातमेतदेव व्रतं चरेत् ६
वेनस्थं च द्विजं हत्वा पार्थिवं च कृतागसम्। एतदेव व्रतं कुर्याद्द्विगुणं च विशुद्धये ७
क्षत्रियस्य च पादोनं वधेऽर्धं वैश्यघातने। अर्धमेव सदा कुर्यात्स्त्रीवधे पुरुषस्तथा ८
पादं तु शूद्रहत्यायामुदक्यागमने तथा। गोवधे च तथा कुर्यात्परदारगतस्तथा ९
पशून्हत्वा तथा ग्राम्यान्मासं कृत्वा विचक्षणः। आरण्यानां वधे तद्वत्तदर्धं तु विधीयते
हत्वा द्विजं तथा सर्पजलेशयबिलेशयान्। सप्तरात्रं तथा कुर्याद्व्रतं ब्रह्महणस्तथा ११
अनस्थनां शकटं हत्वा सास्थ्नां दशशतं तथा। ब्रह्महत्याव्रतं कुर्यात्पूर्णं संवत्सरं नरः
यस्य यस्य च वर्णस्य वृत्तिच्छेदं समाचरेत्। तस्य तस्य वधे प्रोक्तं प्रायश्चित्तं समाचरेत्
अपहृत्य तु वर्णानां भुवं प्राप्य प्रमादतः। प्रायश्चित्तं वधे प्रोक्तं ब्राह्मणानुमतं चरेत् १४
गोजाश्वस्यापहरणे मणीनां रजतस्य च। जलापहरणे चैव कुर्यात्संवत्सरव्रतम् १५
तिलानां धान्यवस्त्राणां[10] मद्यानां मामिषस्य च। संवत्सरार्धं कुर्वीत व्रतमेतत्समाहितः १६
तृणेक्षुकाष्ठतक्राणां[11] रसानामपहारकः। मासमेकं व्रतं कुर्याद्गन्धानां सर्पिषां तथा १७
लवणानां गुडानां च मूलानां कुसुमस्य च। मासार्धं तु व्रतं कुर्यादेतदेव समाहितः १८
लोहानां वैदलानां च सूत्राणां चर्मणां तथा। एकरात्रव्रतं कुर्यादेतदेव समाहितः १९
भुक्त्वा पलाण्डुलशुनं मद्यं च कवकानि[12] च। नारं मलं तथा मांसं विड्वराहं खरं तथा[13] २०
गौधेरकुञ्जरोष्ट्रं च सर्वपञ्चनखं तथा। क्रव्यादं कुक्कुटं ग्राम्यं कुर्यात्संवत्सरं व्रतम् २१
भक्ष्याः पञ्चनखास्त्वेते गोधाकच्छपशल्लकाः। खड्गश्च[14] शशकश्चैव तान्हत्वा च चरेद्व्रतम्
हंसं मद्गुं बकं काकं काकोलं खञ्जरीटकम्। मत्स्यादांश्च तथा मत्स्यान्बलाकं शुकसारिके
चक्रवाकं प्लवं कोकं[15] मण्डूकं भुजगं तथा। मासमेकं व्रतं कुर्यादेतच्चैव न भक्षयेत् २४
राजीवान्सिंहतुण्डांश्च[16] सशल्कांश्च[17] तथैव च। पाठीनरोहितौ भक्ष्यौ मत्स्येषु परिकीर्तितौ
जलेचरांश्च जलजान्मुखाग्रनखविष्किरान्। रक्तपादाञ्जालपादान्सप्ताहं व्रतमाचरेत्[18] २६
तित्तिरं च मयूरं च लावकं[19] च कपिञ्जलम्। वार्ध्रीणसं वर्तकं च भक्ष्यानाह यमस्तथा २७
भुक्त्वा चोभयतोदन्तं तथैकशफदंष्ट्रिणः। तथा भुक्त्वा तु मांसं वै मासार्धं व्रतमाचरेत्

---

१ ग. छ. °ताग्निः स्त्रि°। २ ग. व्रतस्थं। ३ ग. °वं चाकृताश्रमम्। ४ घ. ङ. छ. °तके। अं। ५ क. °दारग°। ६ ख. सर्पौ ज°। ७ च. °शयौ। सं। ८ ग. °स्थ्नां तु शतं ह°। ९ च. °ल्य सुव°। १० ग. °णां शस्त्राणामा°। ११ ख. ग. °र्याहन्तानां। १२ ख. ग. करकाणि। १३ क. घ. ङ. च. °था। गोश्वकुञ्जरखरो°। १४ क. °ङ्गश्चैकशफश्चै°। १५ क घ. च. काकं। १६ ख. ग. °श्च शकुलांश्च। १७ क. सकल्कां°। १८ घ. ङ. छ. बलाकं। १९ क. ख. घ. वार्ध्राण°।

स्वयं मृतं वृथा मांसं माहिषं त्वाजमेव च। गोश्च क्षीरं विवत्सायाः संधिन्याश्च तथा पयः
संधिन्यमेध्यं भक्षित्वा पक्षं तु व्रतमाचरेत । क्षीरागे यान्यभक्ष्याणि तद्विकाराशने बुधः
सप्तरात्रं व्रतं कुर्याद्यदेतत्परिकीर्तितम्। लोहितान्वृक्षनिर्यासान्स्नेहनप्रभवांस्तथा ३१
केवलानि च शुक्तानि तथा पर्युषितं च यत्। गुडेनयुक्तं तथा भुक्त्वा त्रिरात्रं च व्रती भवेत्
दधि भक्ष्यं च शुक्रे(क्ते)षु यच्चान्यद्दधिसंभवम् । गुडेनशुक्तं तु भक्ष्यं स्यात्ससर्पिष्कमिति
स्थितिः ३३
यवगोधूमजाः सर्वे विकाराः पयसश्च ये। राजवाडबकुल्यं च भक्ष्यं पर्युषितं भवेत् ३४
सजीवपक्वमांसं च सर्वं यत्नेन वर्जयेत् । संवत्सरं व्रतं कुर्यात्प्राश्यैताञ्ज्ञानतस्तु तान् ३५
शूद्रान्नं ब्राह्मणो भुक्त्वा तथा रङ्गावतारिणः। चिकित्सकस्य क्षुद्रस्य तथा स्त्रीमृगजीविनः ३६
ष(प)ण्डस्य कुलटायाश्च तथा बन्धनचारिणः। बद्धस्य चैव चोरस्य अवीरायाः स्त्रियस्तथा ३७
चर्मकारस्य वेणस्य क्लीबस्य पतितस्य च। रुक्मकारस्य धूर्तस्य तथा वार्धुषिकस्य च ३८
कदर्यस्य नृशंसस्य वेश्यायाः क्षितवस्य च । गणान्नं भूमिपालान्नमन्नं चैव श्वजीविनाम् ३९
मौञ्जिकान्नं सूतिकान्नं भुक्त्वा मासं व्रतं चरेत्। शूद्रस्य सततं भुक्त्वा षण्मासान्व्रतमाचरेत् ४०
वैश्यस्य तु तथा भुक्त्वा त्रीन्मासान्व्रतमाचरेत्। क्षत्रियस्य तथा भुक्त्वा द्वौ मासौ व्रतमाचरेत् ४१
ब्राह्मणस्य तथा भुक्त्वा मासमेकं व्रतं चरेत् । अपः सुराभाजनस्थाः पीत्वा पक्षं व्रतं
चरेत् ४२
मद्यभाण्डगताः पीत्वा सप्तरात्रं व्रतं चरेत्। शूद्रोच्छिष्टाशने मासं पक्षमेकं तथा विशः ४३
क्षत्रियस्य तु सप्ताहं ब्राह्मणस्य तथा दिनम्। अग्र्यश्राद्धाशने विद्वान्मासमेकं व्रती भवेत्

---

१ क. °मेध्यभक्षायाः प°। २ ग. °न्व्रणानां प्र°। च. °न्व्रणतः प्र°। ३ ग. °नि तथाऽन्नानि। ४ क. °डशुक्रं त°। ख. ङ. °डशुक्तं। ग. °डपक्वं त°। ५ ग. भक्तं च शुक्तेषु यच्चान्यद्दारुसं°। ६ घ. ङ. छ. भुक्तेषु। च. शुष्केषु। ७ ग. °डयुक्तं भक्षयित्वा तक्रं निन्द्यमिति श्रुतिः । ८ क. ग. °शुक्रं तु। ९ ग. °वाहं च कु° । घ. ङ. छ. °वाटुव। १० क. °त् । °जीष्वीप°। च. °त् । °मीसप°। ११ ग °था। कर्म°। १२ क. घ. छ. वेनस्य। १३ ग. तक्ष्णश्च। १४ ग. चैवान्न जी°। १५ घ. ङ. छ. °म् । सैनिकान्नं सू°। १६क. ख. च. अथ श्रा°।

परिविक्तिः परिवेत्ता च यया चै परिविन्दति । व्रतं संवत्सरं कुर्युर्दातृयाजकपञ्चमाः ४५
काकोच्छिष्टं गवाऽऽघ्रातं भुक्त्वा पक्षं व्रती भवेत् । दूषितं केशकीटैश्च मूषिकोल्लाङ्गलेन च ४६
मक्षिकामशकेनापि त्रिरात्रं तु व्रती भवेत् । दृथा कृसरसंयावपायसापूपशष्कुलीः ४७
भुक्त्वा त्रिरात्रं कुर्वीत व्रतमेतत्समाहितः । नीलया चैव क्षतो विप्रः शुना दष्टस्तथैव च
त्रिरात्रं तु व्रतं कुर्यात्पुंश्चलीदशनक्षतः । पादप्रतापनं कृत्वा वह्निं कृत्वा तथाऽप्यधः ४९
कुशैः प्रमृज्य पादौ च दिनमेकं व्रती भवेत् । नीलीवस्त्रं परी(रि)धाय भुक्त्वा स्नानार्हणस्तथा ५०
त्रिरात्रं च व्रतं कुर्याच्छित्त्वा गुल्मलतास्तथा । अध्यास्य शयनं यानमासनं पादुके तथा
पलाशस्य द्विजश्रेष्ठस्त्रिरात्रं तु व्रती भवेत् । वाग्दुष्टं भावदुष्टं च भाजने भावदूषिते
भुक्त्वाऽन्नं ब्राह्मणः पश्चात्त्रिरात्रं तु व्रती भवेत् ॥ ५२
क्षत्रियस्तु रणे दत्त्वा पृष्ठं प्राणपरायणः । संवत्सरव्रतं कुर्याच्छित्त्वा वृक्षं फलप्रदम् ५३
दिवा च मैथुनं गत्वा स्नात्वा नग्नस्तथाऽम्भसि । नग्नां परस्त्रियं दृष्ट्वा दिनमेकं व्रती भवेत् ५४
क्षिप्त्वाऽशुचि द्रव्यं तदेवाम्भसि मानवः । मासमेकं व्रतं कुर्यादुपक्रुश्य तथा गुरुम्
पीतावशेषं पानीयं पीत्वा च ब्राह्मणः क्वचित् । त्रिरात्रं तु व्रतं कुर्याद्वामहस्तेन वा पुनः ५६
एकपङ्क्त्युपविष्टेषु विषमं यः प्रयच्छति । सं च तावदसौ पक्षं कुर्यात्तु ब्राह्मणो व्रतम् ५७
धारयित्वा तुलां चार्यं विषमं कारयेद्वणिक् । सुरालवणमद्यानां दिनमेकं व्रती भवेत् ५८
मांसस्य विक्रयं कृत्वा कुर्याच्चैव महाव्रतम् । विक्रीय पणिना मद्यं तिलस्य च तथाऽऽचरेत् ५९
हुंकारं ब्राह्मणस्योक्त्वा त्वंकारं च गरीयसः । दिनमेकं व्रतं कुर्यात्प्रयतः सुसमाहितः ६०
प्रेतस्य प्रेतकार्याणि अकृत्वा धनहारकः । वर्णानां यद्व्रतं प्रोक्तं तद्व्रतं प्रयतश्चरेत् ६१
कृत्वा पापं न गूहेत गुह्यमानं विवर्धते । कृत्वा पापं बुधः कुर्यात्पर्षदोऽनुमतं व्रतम् ६२

---

१ क. ङ छ. यथा । २ क. न । ३ ग. °विद्यते । व्र° । ४ ग. °माः । शुनोच्छिष्टं तथा भुक्त्वा मासमेकं व्र° । ५ ग. °कानकुले । ६ ग. °नं वह्नौ क्षिप्त्वा वह्नौ त° । ७ ग °णे हत्वा पृष्ठं प्राणपरायणम् । सं° । ८ ग. °त्त्वा पिप्पलपादपम् । ९ क. ख. °ति । यश्च यावदसौ पक्षं कु° । १० घ. ङ च. यश्चायां° । ११ ग. तुलां चैव विषमं वणिजस्तथा । सु° । १२ घ. ङ. छ °लाधर्यं । १३ ग. तिलानि । १४ क. ख, च. °णि कृत्वा चैनमहा° । १५ क. ख घ. °त गूहमा° । १६ ग. °म् । स्थित्वा च ऋष° ।

तस्करश्वापदाकीर्णे बहुव्यालमृगे वने। न व्रतं ब्राह्मणः कुर्यात्प्राणबाधाभयात्सदा ६३
सर्वत्र जीवनं रक्षेज्जीवन्पापमपोहति। व्रतैः कृच्छ्रैश्च दानैश्च इत्याह भगवान्यमः ६४
शरीरं धर्मसर्वस्वं रक्षणीयं प्रयत्नतः। शरीरात्स्रवते धर्मः पर्वतात्सलिलं यथा ६५
आलोच्य धर्मशास्त्राणि समेत्य ब्राह्मणैः सह। प्रायश्चित्तं द्विजो दद्यात्स्वेच्छया न कथंचन ६६

इति शाङ्खे [धर्मशास्त्रे] सप्तदशोऽध्यायः॥ १७॥

(अथाष्टादशोऽध्यायः।)

त्र्यहं त्रिषवणस्नायी स्नाने स्नानेऽघमर्षणम्। निमग्नस्त्रिः पठेदप्सु न भुञ्जीत दिनत्रयम्
वीरासनं च तिष्ठेत गां दद्याच्च पयस्विनीम्। अघमर्षणमित्येतद्व्रतं सर्वाघनाशनम् २
त्र्यहं सायं त्र्यहं प्रातस्त्र्यहमद्यादयाचितम्। त्र्यहं परं च नाश्नीयात्प्राजापत्यं चरन्व्रतम् ३
त्र्यहमुष्णं पिबेत्तोयं त्र्यहमुष्णं घृतं पिबेत्। त्र्यहमुष्णं पयः पीत्वा वायुभक्षस्त्र्यहं भवेत् ४
तत्कृच्छ्रं विजानीयाच्छीतैः शीतमुदाहृतम्। द्वादशाहोपवासेन पराकः परिकीर्तितः ५
विधिनोदकसिद्धानि मासमश्नीत यत्नतः। स कृत्वा सोदकान्मासं कृच्छ्रं वारुणमुच्यते ६
बिल्वैरामलकैर्वाऽपि पद्माक्षैरथ वा शुभैः। मासेन लोकेऽतिकृच्छ्रः कथ्यते बुद्धिसत्तमैः ७
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रं सांतपनं स्मृतम् ८
एतैस्तु त्र्यहमभ्यस्तं महासांतपनं स्मृतम्। पिण्याकं(क)वामतक्राम्बुसक्तूनां(?) प्रतिवासरम् ९
उपवासान्तराभ्यासात्तुलापुरुष उच्यते। गोपुरीषाशनो भूत्वा मासं नित्यं समाहितः
व्रतं तु यावकं कुर्यात्सर्वपापापनुत्तये। ग्रासं चन्द्रकलाहृद्ध्या प्राश्नीयाद्वर्धयन्सदा ११
ह्रासयेच्च कलांहानौ व्रतं चान्द्रायणं चरेत्। मुण्डस्त्रिषवणस्नायी अधःशायी जितेन्द्रियः
स्त्रीशूद्रपतितानां च वर्जयेत्परिभाषणम्। पवित्राणि जपेच्छक्त्या जुहुयाच्चैव शक्तितः

---

१ ग. °दा। सतो हि जीवतो जीवं सर्वपाप°। २ ग. °राच्च्यव°। ३ ख.न. कदाच°। ४ ग. °नं सदा तिष्ठेद्वां च दद्यात्पय°। ५ ख °द्धान्नं समश्नीयात्प्रय°। ६ क. लोकैः स्त्रीकृ°। घ. ङ. छ. °लोकैः श्रीकृच्छ्रं कृच्छ्रं सां°। ७ ग °म्। पादद्वयं तथा. त्यक्त्वा स°। ८ घ. ङ. छ. °ण्याकावा°। ९ क. ख. च °पायवान्नं तु मा। १० क. ख. च. °लाबृद्ध्याव्र°। ११ ख. चरन्।

अयं विधिः स विज्ञेयः सर्वकृच्छ्रेषु सर्वदा । पापात्मानस्तु पापेभ्यः कृच्छ्रैः संतारिता
, नराः १४
गतपापा दिवं यान्ति नात्र कार्या विचारणा । शङ्खप्रोक्तमिदं शास्त्रं योऽधीते बुद्धिमान्नरः
सर्वपापविनिर्मुक्तः स्वर्गलोके महीयते* । १६

इति शाङ्खे धर्मशास्त्रेऽष्टादशोऽध्यायः ॥ १८ ॥

(समाप्तेयं शङ्खस्मृतिः ।)

---

* एतद्वचनद्वयमधिकं क. पुस्तके—" पादशेषं पीतशेषं शौचशेषं तु यज्जलम् । तज्जलं मदिरातुल्यं पर्यग्निकरणं विना ॥ क्ष्वाशेषं शूद्रशेषं स्याच्छ्राद्धशेषं तथैव च । दंपत्योर्मुक्तशेषं स्याद्भुक्त्वा चान्द्रायणं चरेत् " इति ।

---

१ ग. °ते प्रयतः सुधीः । स° । घ. ङ. छ. °ते द्विजपुंगवः । स° ।

ॐ तत्सद्ब्रह्मणे नमः ।

शातातपस्मृतिः ।

(तत्र प्रथमोऽध्यायः ।)

प्रायश्चित्तविहीनानां महापातकिनां नृणाम् । नरकान्ते भवेज्जन्म चिह्नाङ्कितशरीरिणाम् १
प्रतिजन्म भवेत्तेषां चिह्नं तत्पापसूचकम् । प्रायश्चित्ते कृते याति पश्चात्तापवतां पुनः * २
महापातकजं चिह्नं सप्तजन्मानि जायते । उपपापोद्भवं पञ्च त्रीणि पापसमुद्भवम् (?) ३
दुष्कर्मजा नृणां रोगा यान्ति चोपक्रमैः शमम् । जाप्यैः सुरार्चनैर्होमैर्दानैस्तेषां शमो भवेत् ४
+पूर्वजन्मकृतं पापं नरकस्य परिक्षये । बाधते व्याधिरूपेण तस्य जप्यादिभिः शमः ५
कुष्ठं च राजयक्ष्मा च प्रमेहो ग्रहणी तथा । मूत्रकृच्छ्राश्मरीकासा अतिसारभगंदरौ ६
दुष्टव्रणं गण्डमाला पक्षघातोऽक्षिनाशनम् । इत्येवमादयो रोगा महापापोद्भवाः स्मृताः
जलोदरं यकृत्प्लीहा शूलशोफव्रणानि च । श्वासाजीर्णज्वरच्छर्दिभ्रममोहगलग्रहाः ८
रक्तार्बुदविसर्पाद्या उपपापोद्भवा गदाः । दण्डापतानकश्वित्रवपुःकम्पविचर्चिकाः ९
वल्मीकपुण्डरीकाद्या रोगाः पापसमुद्भवाः । †शिरोत्पाद्या नृणां रोगा अभिशापाद्भवन्ति हि १०
अन्ये च बहवो रोगा जायन्ते वर्णसंकरात् । उच्यन्ते यानि दानानि प्रायश्चित्तानि च क्रमात् ११
महापापेषु सर्वस्वं तदर्धमुपपातके । दद्यात्पापेषु षष्ठांशं दृष्ट्वा व्याधिबलाबलम् १२
अथ साधारणं तेषु गोदानादिषु कथ्यते ॥ १३

---

*इतः परमधिकमेतद्वचनं क. पुस्तके—"महापातकजं पापं नरकस्य परिक्षये । बाध्य(ध)ते व्याधिरूपेण तस्य जाप्यादिभिः शमः" इति । + अत्रैतद्वचनं न क. पुस्तके । † एतदर्धस्थानेऽयं पाठः ख. ग. पुस्तकयोः—"अर्शआद्या नृणां रोगा अतिपापाद्भवन्ति हि" इति ।

---

१ ख. ग. °सूचितम् । २ क घ. °ते बाऽपि पश्चात्ताप्युतं पु° । ३ क. घ. पापं । ४ क. घ. °वं चैव त्री° । ५ क घ. °न्ति नोप° । ६ ख. ग. °मू । जपैः सु° । ७ क घ. °रार्चितैर्हो° । ८ क. घ. कुष्ठी । ९ घ. °रीश्वासा । १० क. घ. कण्ठमाला । ११ ख. ग. °लरोगत्र । १२ ख. ग. °कराः । उ° । १३ ख. ग. °न्ते च नि° । १४ ख. ग. सर्वं स्यात्तद° । १५ ख. ग. कल्प्यं ।

*गोदाने वत्सयुक्ता गौः सुशीला च पयस्विनी । +सर्वस्वं यत्र देयं स्यात्तत्र इच्छा यदा न हि १४

गोशतं तु यदा दद्यात्सर्वालंकारभूषितम् । वृषदाने शुभोऽनड्वाञ्शुक्लाम्बरः सकाञ्चनः
‡धौरेयो हेमसंयुक्तो दद्याद्वस्त्रसमन्वितः । दशधेनुसमं पुण्यं प्रवदन्ति मनीषिणः १६
निवर्तनानि भूदाने दश दद्याद्विजातये । दशहस्तेन दण्डेन त्रिंशद्दण्डं निवर्तनम् १७
दश तान्येव गोचर्म दत्त्वा स्वर्गे महीयते । सुवर्णशतनिष्कं तु तदर्धार्धप्रमाणतः १८
अश्वदाने मृदुश्लक्ष्णमश्वं सोपस्करं दिशेत् । महिषीं महिषीदाने दद्यात्स्वर्णाम्बरान्विताम्
दद्याद्गजं महादाने सुवर्णफलसंयुतम् ॥ २०

लक्षसंख्यार्हणं पुष्पं प्रदद्यादेवतार्चने । दद्याद्विजसहस्राय मिष्टान्नं द्विजभोजने २१
रुद्रजाप्यं लक्षपुष्पैः पूजयित्वा च त्र्यम्बकम् । एकादश जपेद्रुद्रान्दशांशं गुग्गुलेन तु
हुत्वाऽभिषेचनं कुर्यान्मन्त्रैर्वरुणदेवतैः । शान्तिके गणशान्तिश्च ग्रहशान्तिकपूर्विका २३
धान्यदाने शुभं धान्यं खारीषष्टिमितं स्मृतम् । वस्त्रदाने पट्टवस्त्रद्वयं कर्पूरसंयुतम् २४
दश पञ्चाष्ट चतुर उपवेश्य द्विजाञ्शुभान् । तेषामनुज्ञया सर्वं प्रायश्चित्तमुपक्रमेत् २५
विधाय वैष्णवं श्राद्धं संकल्प्य निजकाम्यया । धेनुं दद्याद्विजातिभ्यो दक्षिणां वै स्वशक्तितः २६

अलंकृत्य यथाशक्ति वस्त्रालंकरणैर्द्विजान् । याचेद्दण्डानुसारेण प्रायश्चित्तं यथोचितम् २७
तेषामनुज्ञया कृत्वा प्रायश्चित्तं यथाविधि । पुनस्तान्परिपूर्णार्थमर्चयेद्विधिवद्द्विजान् २८
†दद्याद्व्रतानि नामानि तेभ्यः श्रद्धासमन्वितः । संतुष्टा ब्राह्मणा दद्युरनुज्ञां व्रतकारिणे २९

जपच्छिद्रं तपश्छिद्रं यच्छिद्रं यज्ञकर्मणि । सर्वं भवति निश्छिद्रं यस्य चेच्छन्ति ब्राह्मणाः
ब्राह्मणा यानि भाषन्ते मन्यन्ते तानि देवताः । सर्वदेवमया विप्रा न तद्वचनमन्यथा ३१

---

* एतदर्धं न क. घ. पुस्तकयोः । + इत आरभ्य भूषितमित्यन्तं न वियते ख. ग. पुस्तकयोः । ‡ एतद्वचनं न ख. ग. पुस्तकयोः । † एतदर्धं न ख. ग. पुस्तकयोः ।

---

१ क. घ. °ण्डे नि° । २ क. °वर्ण स्व° । ३ क. घ. °नेषु दुष्कूलम° । ४ ख. ग. °षीं माहिषे दाने दद्यात्स्वर्णायुधान्वि° । ५ क. घ. °संख्योत्तमं पु° । ६ ख. ग रुद्रं जपेल्लक्ष° । ७ घ. त्वा त्रियम्ब° । ८ क घ. जपान्रुद्रा° । ९ क. घ. °दशाङ्गं गु° । १० ख. ग °ग्गुलैर्घृतैः । हु° । ११ क. °णनाथस्य प्र° । १२ ख. ग. °पूर्वकम् । धा° । १३ क. °ट्टकूले कर्षूक° । घ. °ट्टकूले कर्षक फलसं° । १४ क. °श्वाथ च° । १५ क. घ. °नैर्युतान् । । १६ ख. ग. °ण्डप्रमाणेन प्रा° । १७ ख. ग. °धोदित° । १८ ख. ग °र्णाधानवं° ।

उपवासो व्रतं चैव स्नानं तीर्थफलं तपः । विप्रैः संपादितं यस्य संपन्नं तस्य तत्फलम् ३२
संपन्नमिति तद्वाक्यं वदन्ति ऋषिदेवताः । प्रणम्य शिरसा सार्धमग्निष्टोमफलं लभेत् ३३
ब्राह्मणा जङ्गमं तीर्थं निर्मलं सार्वकामिकम् । तेषां वाक्योदकेनैव शुध्यन्ति मलिनो जनाः
तेभ्योऽनुज्ञामनुप्राप्य प्रतिगृह्य तथाऽऽशिषः । भोजयित्वा द्विजाञ्शक्त्या भुञ्जीत सह
बन्धुभिः ३५

इति शातातपस्मृतौ कर्मविपाके साधारणविधिर्नाम प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयोऽध्यायः ।)

ब्रह्महा नरकस्यान्ते पाण्डुकुष्ठी प्रजायते । प्रायश्चित्तानि कुर्वीत स तत्पातकशान्तये १
चत्वारः कलशाः कार्याः पञ्चरत्नसमन्विताः । पञ्चपल्लवसंयुक्ताः सितवस्त्रेण संयुताः २
अश्वत्थानादिमृद्युक्तास्तीर्थोदकसुपूरिताः । कषायपञ्चकोपेता नानाविधफलान्विताः
सर्वौषधिसमायुक्ताः स्थाप्याः प्रतिदिशं द्विजैः । रौप्यमष्टदलं पद्मं मध्यकुम्भोपरि न्यसेत्
तस्योपरि न्यसेद्देवं ब्रह्माणं च चतुर्मुखम् । पलार्धार्धप्रमाणेन सुवर्णेन विनिर्मितम् ५
अर्चयेत्पुरुषसूक्तेन त्रिकालं प्रतिवासरम् । यजमानः शुभैर्गन्धैः पुष्पैर्धूपैर्यथाविधि ६
पूर्वादिषु च कुम्भेषु ब्राह्मणा ब्रह्मचारिणः । पठेयुः स्वस्ववेदांस्त ऋग्वेदप्रभृतीञ्शनैः
दशांशेन ततो होमो ग्रहशान्तिपुरःसरः । मध्यकुण्डे विधातव्यो घृताक्तैस्तिलव्रीहिभिः
द्वादशाहमिदं कर्म समाप्य द्विजपुंगवैः । भद्रपीठे यजमानमभिषिञ्चेद्यथाविधि ९
ततो दद्याद्यथाशक्ति गोभूहेमतिलादिकम् । ब्राह्मणेभ्यस्तथा देयमाचार्यायं यथाविधि
आदित्या वसवो रुद्रा विश्वे देवा मरुद्गणाः । प्रीताः सर्वे व्यपोहन्तु मम पापं सुदारुणम्
इत्युदीर्य मुहुर्भक्त्या तमाचार्यं क्षमापयेत् । एवं विधाने विहिते श्वेतकुष्ठी विशुध्यति १२
कुष्ठी गोवधकारी स्यान्नरकान्तेऽस्य निष्कृतिः । स्थापयेद्घटमेकं तु पूर्वोक्तद्रव्यसंयुतम्
रक्तचन्दनलिप्ताङ्गं रक्तपुष्पाम्बरावृतम् । रत्नगर्भं तु तं कृत्वा स्थापयेद्दक्षिणा दिशम् १४
ताम्रपात्रं न्यसेत्तत्र तिलचूर्णेन पूरितम् । तस्योपरि न्यसेद्देवं हेमनिष्कमयं यमम्
यजेत्पुरुषसूक्तेन पापं मे शाम्यतामिति १५

---

१ ख ग. °न्ति क्षिति° । २ ख. ग. निर्जलं । ३ ख. ग. °लिना ज° । ४ ख. ग श्चित्तं प्रकु° । ५ क. घ. °शं दिशम् । रौ° । ६ ख.ग. अर्चेत्पु° । ७ ख ग. °दिकुम्भेषु ततो ब्रा° । ८ घ कुण्डेषु ऋत्विजो ब्र° । ९ क. घ. °णः । पारयेयुः स्वकान्वेदानृग्वे° । १० ख. ग. लहेमभिः । ११ ख. ग. °वः । तत्र पी° । १२ ख. ग. °य निवेदयेत् । आ° । १३ ख. ग. रक्तकुम्भं तु । घ. रक्तग° । १४ क. घ. °लपूर्णे° ।

सामपारायणं कुर्यात्कलशे तत्र सामवित्। दशांशं सर्षपैर्हुत्वा पात्रमान्यभिषेचने १६
विहिते धर्मराजानमाचार्याय निवेदयेत् ॥ १७
यमो महिषमारूढो दण्डपाणिर्भयावहः। दक्षिणाशापतिर्देवो मम पापं व्यपोहतु १८
इत्युच्चार्य विसृज्यैनं मासं[1] गोभक्तिमाचरेत्। ब्रह्मगोवधयोरेषा[2] स्यात्तदभ्यासनिष्कृतिः
पितृहा चेतनाहीनो मातृहाऽन्धश्च जायते। नरकान्ते प्रकुर्वीत प्रायश्चित्तं यथाविधि २०
प्राजापत्यानि कुर्वीत त्रिंशच्छाखाविधानतः। व्रतान्ते कारयेन्नावं सौवर्णी[3] पलसंख्यया
*कुम्भं रौप्यमयं चैव ताम्रपात्राणि पूर्ववत्। निष्कहेम्ना तु कर्तव्यो दैवः श्रीवत्सलाञ्छनः २२
पट्टकूलेन संवेष्ट्य पूजयेत्तां विधानतः। नावं द्विजाय तां दद्यात्सर्वोपस्करसंयुताम् २३
वासुदेव जगन्नाथ सर्वभूताशयस्थित। पातकार्णवमग्नं मां तारय प्रणतार्तिहृत् २४
इत्युदीर्य प्रणम्याथ ब्राह्मणाय विसर्जयेत्। अन्येभ्योऽपि यथाशक्ति विप्रेभ्यो दक्षिणां+ ददेत् २५
[†हतं वै बालकं सुप्तं स्वसा(सृ)जातं च मूलजम्। तेन संजायते वन्ध्या मृतवत्सा च नारकी
तत्पातकविनाशाय यथा कार्यं प्रयत्नतः। सौवर्णं बालकं कृत्वा दद्याद्दोलासमन्वितम्
अनड्वाहं ततो दद्याद्वस्त्रद्वयसमन्वितम्। तत्पातकविनिर्मुक्ता पश्चाद्भवति पुत्रिणी २८
पिता बन्दीकृतो येन निबद्धो लोहशृङ्खलैः। चिरं कष्टतरं भुक्त्वा मृतस्तत्रैव मन्दिरे २९
तेन पापेन पापात्मा पतितो रौरवार्णवे। नरकान्ते भवेच्चिह्नं पङ्गुर्मूको विचेतनः ३०
तस्य पापविनिर्मुक्त्यै पिता कार्यो हिरण्मयः। तत्पिता रथमारूढो विप्राय प्रतिपादयेत्]
स्वसृघाती तु बधिरो नरकान्ते प्रजायते। मूको भ्रातृवधाच्चैव तस्येयं[4] निष्कृतिः स्मृता
तेन कार्यं विशुध्यर्थं यतिचान्द्रायणव्रतम्। व्रतान्ते पुस्तकं दद्यात्सुवर्ण[5](र्ण) पलसंयुतम्
इमं मन्त्रं समुच्चार्य ब्राह्मणं तं विसर्जयेत्। सरस्वति जगन्मातः शब्दब्रह्माधिदैवते ३४
दुष्कर्मकारिणं पापं पाहि मां परमेश्वरि। बालघाती च पुरुषो मृतवत्सः प्रजायते ३५
ब्राह्मणोद्वाहनं चैव कर्तव्यं तेन शुद्धये। श्रवणं हरिवंशस्य कर्तव्यं च यथाविधि ३६

---

* एतद्वचनं ग क. घ. पुस्तकयोः। + इदमार्धम्। † धनुश्चिह्नान्तर्गतग्रन्थः ख. ग. पुस्तकयोर्न विद्यते।

---

१ क. °चनम्। वि°। २ ख. °सं सद्भक्ति°। ३ ख ग °षा प्रायश्चित्तेन नि°। ४ ख. ग. °शश्चैव वि°। ५ ख. ग. °र्णपलसंमिताम्। कु°। ६ ख. ग. °ष्टवस्त्रेण सं। ७ क. घ. °शक्त्या वि°। ८ घ. °न साजा°। ९ ख. ग. °ता। सोऽपि पापविशुध्यर्थं चरेच्चान्द्रा°। १० ग. घ. °वर्णफल°। ११ ख. ग. °र्मकरणात्पापात्पाहि।

*महारुद्रजपं चैव कारयेच्च यथाविधि। षड्भिरेकादशैः रुद्रैः रुद्रः समभिधीयते ३७
रुद्रैस्तथैकादशभिर्महारुद्रः प्रकीर्तितः। एकादशभिरेतैस्तु अतिरुद्रश्च कथ्यते ३८
जुहुयाच्च दशांशेन पूर्वोक्ताज्याहुतीस्तथा। एकादश स्वर्णनिष्काः प्रदातव्याश्च दक्षिणाः
पलान्येकादश तथा दद्याद्वित्तानुसारतः। अन्येभ्योऽपि यथाशक्ति द्विजेभ्यो दक्षिणां
दिशेत् ४०
स्नापयेद्दंपती पश्चान्मन्त्रैर्वरुणदैवतैः। आचार्याय प्रदेयानि वस्त्रालंकरणानि च ४१
गोघ्नो पुरुषः कुष्ठी निर्वंशश्चोपजायते। स च पापविशुद्ध्यर्थं प्राजापत्यशतं चरेत् ४२
व्रतान्ते मेदिनीं दद्याच्छृणुयादथ भारतम्। स्त्रीहन्ता चातिसारी स्यादश्वत्थोन्मोपये-
दृशं ४३
+विप्रस्य बालकं हत्वा संहृतं रत्नकाञ्चनम्। तेनैव जायते मृत्युः पुत्राणां च पुनः पुनः
तेन कर्मविनाशाय कार्यं तेनैव यत्नतः। वृषो हैमेन संयुक्तो दातव्यो वस्त्रसंयुतः ४५
दद्याच्च शर्कराधेनुं भोजयेच्च शतं द्विजान्। ४६
राजहा क्षयरोगी स्यादेषा तस्य विनिष्कृतिः। गोभूहिरण्यमिष्टान्नजलवस्त्रप्रदानतः ४७
†घृतधेनुप्रदानेन तिलधेनुप्रदानतः। इत्यादिना क्रमेणैव क्षयरोगः प्रशाम्यति ४८
रक्तार्बुदो वैश्यहन्ता जायते सं च मानवः। प्राजापत्यानि चत्वारि सप्त धान्यानि
चोत्सृजेत् ४९
दण्डापतानकयुतः शूद्रहन्ता भवेन्नरः। ×प्राजापत्यं सकृच्चैवं दद्याद्धेनुं सदक्षिणाम् ५०
कारुणां च वधे चैव रूक्षभावः प्रजायते। तेन तत्पापशुद्ध्यर्थं दातव्यो वृषभः सितः ५१
सर्वकार्येष्वसिद्धार्थो गजघाती भवेन्नरः। प्रासादं कारयित्वा तु गणेशप्रतिमां न्यसेत् ५२
अथ वा गणनाथस्य मन्त्रं लक्षमितं जपेत्। $दशांशहोमश्चापूपैर्गणशान्तिपुरःसरः ५३

---

* एतदर्धं न क घ. पुस्तकयोः। + इत आरभ्य वस्त्रसंयुत इत्यन्तं वचनद्वयं न ख. ग पुस्तकयोः। † एतदायर्धचतुष्टयं न क. घ. पुस्तकयोः। × एतद्वचनद्वयं न क घ. पुस्तकयोः। $ एतदर्धस्थानेऽयं पाठः ख. ग. पुस्तकयोः। "कुलत्थशाकैः पुष्पैश्च गणशान्तिपुरःसरम्" इति।

---

१ क. घ. द्रैं रुद्री समभि°यते। एकादशभिरेताभी रुद्रः। २ ख. ग. °न दूर्वयाऽयुतसंख्यया। ए°। ३ ख ग °तव्याः सद°। ४ क. पदान्ये। ५ क. घ. शक्त्या द्वि°। ६ क. °ह मूत्रकृच्छ्री च प्रा°। घ. °हा सूतकी चैव प्रा°। ७ क घ °त्थान्त्थाप°। ८ क. संहृतं। ९ ख. ग. °बुदी दे°। १० क. घ. समाचरेत्। प्रा°। ११ क. घ. दण्डपातमवर्तु°। १२ ख. ग. °त्। गणवाधरथ मन्त्रं तु मन्त्री ल°।

उष्ट्रे विनिहते चैव जायते विकृतस्वरः । स तत्पापविशुद्ध्यर्थं दद्यात्कर्पूरजं फलम् ५४
अश्वे विनिहते चैव वक्रकण्ठः प्रजायते । शतं पलानि दद्याच्च चन्दनान्यघनुत्तये ५५
महिषीघातने चैव कृष्णगुल्मः प्रजायते । स्वशक्त्या च महीं दद्याद्रक्तवस्त्रद्वयं तथा ५६
खरे विनिहते चैव खररोमा प्रजायते । निष्कत्रयस्य प्रकृतिं प्रदद्याच्च हिरण्मयीम् ५७
तरक्षे निहते चैव जायते केकरेक्षणः । दद्याद्रत्नमयीं धेनुं स तत्पातकशान्तये ५८
सूकरे निहते चैव दन्तुरो जायते नरः । स दद्याच्च विशुद्ध्यर्थं घृतकुम्भं सदक्षिणम् ५९
हरिणे निहते खञ्जः शृगाले तु विपादकः । अश्वस्तेन प्रदातव्यः सौवर्णनिष्कसंमितः
अजाभिघातने चैव अधिकाङ्गः प्रजायते । अजा तेन प्रदातव्या विचित्रवस्त्रसंयुता ६१
उरभ्रे निहते चैव पाण्डुरोगः प्रजायते । कस्तूरिकापलं दद्याद्ब्राह्मणाय विशुद्धये ६२
मार्जारे निहते चैव जायते पिङ्गलोचनः । *तेन वै(ङ्गू)दूर्यरत्नानि दातव्यानि स्वशक्तितः
जायते चक्रपादस्तु निहते शुनि मानवः । निष्कद्वयमितं दद्यान्नकुलं स विशुद्धये ६४
शशके निहते चैव कुब्जकर्णस्तु जायते । निष्कत्रयमितं दद्यात्स सुवर्णं विशुद्धये ६५
नकुलस्याभिहनने जायते वक्रमण्डलम् । शय्यां दद्यात्स विप्राय सोपधानां सतूलिकाम्
शयालुः सर्पहा दद्याल्लोहदण्डं सदक्षिणम् । कुब्जो मूषकहा दद्यात्सप्तधान्यं सकाञ्चनम्
मयूरघातने चैव जायते कृष्णमण्डलम् । निष्कत्रयमितो देयस्तेन स्वर्णमयः शिखी ६८
हंसघाती भवेद्यस्तु तस्य स्याच्छ्वेतमण्डलम् । रूप्यं पलत्रयमितं हंसं दद्याद्विशुद्धये
कुक्कुटे निहते चैव वक्रनासः प्रजायते । पारावतं च सौवर्णं स दद्यान्निष्कमात्रकम् ७०
शुकसारिकयोर्घाते नरः स्खलितवाग्भवेत् । ततश्च पुस्तकं दत्त्वा स विप्राय सदक्षिणम् ७१
बकघाती दीर्घनसो दद्याद्वां धवलप्रभाम् । काकघाती कर्णहीनो दद्याद्वामसितप्रभाम्
हिंसायां निष्कृतिरियं ब्राह्मणे समुदाहृता । तदर्धार्धप्रमाणेन क्षत्रियादिष्वनुक्रमात् ७३
+क्षत्रियो मृगयां चक्रे मृ(कुर्वन्मृ)गान्निघ्नन्न दुष्यति । तस्य युद्धाङ्गणगतो येमोर्धस्तान्प्रमापयेत्(?) ७४

---

* इत आरभ्य वक्रनासः प्रजायत इत्यन्तं न ख. ग. पुस्तकयोः । + इत आरभ्य सवस्त्रं हेमसंमितमित्यन्तमधिकं क. घ. पुस्तकयोः ।

---

१ क. घ. °कृतिस्व° । २ ख. ग. °रकं फ° । ३ ख ग. °क्रतुण्डः प्र° । ४ ख. °तं फला° । ५ क. °द्यात्स चन्दनेऽस्य द्विजातये । ६ क. घ. °म् । चर° । ७ ख ग. °रक्षौनि° । ८ क. °ले नष्टपा° । ९ ख. ग. °र्णपलनिर्मितः । १० ख. ग. °व पीतपाणिः प्रजायते । ११ क. रूप्यत्रयपलमि° । १२ ख. ग. °त् । सच्छास्त्रपु° । १३ क. °र्धकलोद° । १४ क. °याणामनु° ।

गजादिकान्सप्तदश सप्तसप्तोत्तरान्क्रमात् । निघ्नन्नवाप्नोति नरश्चिह्नानि कथितानि च
मयूराद्यास्तथा सप्त चतुर्दशोत्तरान्क्रमात् ॥ ७५
गर्भपातकरी नारी स्वदेहे भोगलुप्तया (लब्धये) । सप्तजन्मावधिर्यावन्नरकान्ते हसन्तिका
तत्पातकविनाशाय बालं कुर्याद्धिरण्मयम् । विधाय बालकं दद्यात्सवस्त्रं हेमसंमितम् ७७

इति शातातपस्मृतौ कर्मविपाके हिंसादिप्रायश्चित्तविधिर्नाम
द्वितीयोऽध्यायः ॥ २ ॥

(अथ तृतीयोऽध्यायः ।)

सुरापः श्यावदन्तः स्यात्प्राजापत्याष्टकं चरेत् । शर्करायास्तुला(लाः)सप्त दद्यात्पापवि-
शुद्धये १
जपित्वा तु महारुद्रं दशांशं जुहुयात्तिलैः । ततोऽभिषेकः कर्तव्यो मन्त्रैर्वरुणदेवतैः २
मद्यपो रक्तपित्ती स्यात्स दद्यात्सर्पिषो घटम् । मधुनोऽर्धघटं चैव सहिरण्यं विशुद्धये ३
अभक्ष्यभक्षणाच्चैव जायते कृमिकोदरः । यथावत्तेन शुद्ध्यर्थमुपोष्यं भीष्मपञ्चकम् ४
उदक्यावीक्षितंभुक्त्वा जायते कृमिलोदरः । गोमूत्रयावकाहारस्त्रिरात्रेणैव शुध्यति ५
भुक्त्वा चास्पृश्यसंयुक्तो जायते कृमिलोदरः । त्रिरात्रं वैष्णवं कृत्वा स (कुर्यात्स) तत्पा-
तकशान्तये ६
श्वमार्जारादिभिः स्पृष्टं भुक्त्वा दुर्गन्धवान्भवेत् । पीत्वा त्रिरात्रं गोमूत्रं भोजयेद्ब्राह्मणत्र-
यम् ७
अनिवेद्य सुरादिभ्यो भुञ्जानो जायते नरः । भोजयेत्त्रिशतान्विप्रान्सहस्रं तु प्रमाणतः ८
परान्नविघ्नकरणाद्जीर्णमभिजायते । लक्षहोमं प्रकुर्वीत प्रायश्चित्तं यथाविधि ९
मन्दोदराग्निर्भवति सति द्रव्ये कदन्नदः । प्राजापत्यत्रयं कुर्याद्भोजयेच्च शतं द्विजान् १०
विषदश्छर्दिरोगी स्याद्दद्यादश पयस्विनीः । मार्गहा पादरोगी स्यात्सोऽश्वदानं समा-
चरेत् ११
पिशुनो नरकस्यान्ते जायते श्वासकासवान् । घृतं तेन प्रदातव्यं सहस्रपलसंमितम् १२
धूर्तोऽपस्माररोगी स्यात्स तत्पापविशुद्धये । ब्रह्मकूर्चत्रयं कृत्वा धेनुं दद्यात्सदक्षिणाम्

---

१ ख. ग. °पत्यन्तरं तथा । श° । २ क. घ. °मिलोदरः । गो° । ३ ख. ग. °संस्पृष्टं जा° । ४ क. घ. °ते सकृशोद° । ५ ख. ग. °त्र समुपोष्याथ स तत्पापात्प्रमुच्यते । परा° । ६ ख. ग. °मं स कु° । ७ ख. ग. 'चमयी धेनुं दद्याद्गां च स द' ।

शूली परोपतापेन जायते तत्प्रमोचने। सोऽन्नदानं प्रकुर्वीत तथा रुद्रं जपेन्नरः १४
दावाग्निदायकश्चैव रक्तातीसारवान्भवेत्। तेनोदपानं कर्तव्यं रोपणीयस्तथा वटः १५
सुरालये जले वाऽपि सकृद्विष्ठां करोति यः। गुदरोगो भवेत्तस्य पापरूपः सुदारुणः १६
मासं सुरार्चनेनैव गोदानद्वितयेन तु। प्राजापत्येन चैकेन शाम्यन्ति गुदजा रुजः १७
गर्भस्तम्भकरी नारी काकवन्ध्या प्रजायते। तया कार्यं प्रयत्नेन गोदानं विधिपूर्वकम्
गर्भपातनजा रोगा यकृत्प्लीहजलोदराः। तेषां प्रशमनार्थाय प्रायश्चित्तमिदं शुभम् १९
एतेषु दद्याद्विप्राय जलधेनुं विधानतः। सुवर्णरूप्यताम्राणां पलत्रयसमन्विताम् २०
प्रतिमाभङ्गकारी च व्रणकायः प्रजायते। संवत्सरत्रयं सिञ्चेदश्वत्थं सोऽनुवासरम् २१
उद्वाहयेत्तमश्वत्थं स्वगृह्योक्तविधानतः। तत्र संस्थापयेद्देवं विघ्नराजं सुपूजितम् २२
दुष्टवादी खण्डितः स्यात्स वै दद्याद्द्विजातये। रूप्यं पलद्वयं दुग्धं घटद्वयसमन्वितम् २३
खल्वाटः परनिन्दायां धेनुं दद्यात्सकम्बलाम्। परोपहासकृत्काणः स गां दद्यात्समौक्तिकाम् २४
सभायां पक्षपाती च जायते पक्षघातवान्। निष्कत्रयमितं हेम स दद्यात्सत्यवादिनाम्

इति शातातपीये कर्मविपाके प्रकीर्णप्रायश्चित्तं नाम
तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थोऽध्यायः।)

कुलघ्नो नरकस्यान्ते जायते विप्रहेमहृत्। स तु स्वर्णशतं दद्यात्कृत्वा चान्द्रायणत्रयम् १
औदुम्बरी ताम्रचौरो नरकान्ते प्रजायते। प्राजापत्यं स कृत्वैवं ताम्रं पलशतं दिशेत् २
कांस्यहारी च भवति पुण्डरीकसमन्वितः। कांस्यं पलशतं दद्यादुपोष्य दिवसं नरः ३
रीतिहारी पिङ्गलाक्ष उपोष्य हरिवासरम्। रीतिं पलशतं दद्यादलंकृत्य द्विजं शुभम् ४
मुक्ताहारी च पुरुषो जायते पिङ्गमूर्धजः। मुक्ताफलशतं दद्यादुपोष्य स विधानतः ५
त्रपुहारी च पुरुषो जायते श्लेष्मणः सदा। उपोष्य दिवसं सोऽपि दद्यात्पलशतं त्रपु ६
सीसहारी च पुरुषो जायते शीर्षरोगवान्। उपोष्य दिवसं दद्याद्घृतधेनुं विधानतः ७

---

१ क. घ. लूलः। २ क. °त्प्रमार्जने। ३ ख. ग. °पि शकृन्मूत्रं क°। ४ ख. ग स्मृतम्। ५ ख. ग. च अप्रतिष्ठः प्र°। ६ ख. ग. °त्थं प्रतिवा'। ७ क. घ. रूपत्रयं दुग्धावटत्रय°। ८ ख. ग. खल्वीटः। ९ ख. ग. °त्सकाम्बनाम्। १० क. घ. °त्सभ्यव°। ११ क. घ कुनखी न°। १२ क. घ. °म्। उदु'। १३ ख. ग. °यादलंकृत्य द्विजातये। रिति°। १४ ख. ग. °ते नेत्ररोगवान्' ड'।

दुग्धहारी च पुरुषो जायते बहुमूत्रकः । स दद्याद्दुग्धधेनुं च ब्राह्मणाय यथाविधि ८
दधिचौर्येण पुरुषो जायते मेदसा युतः । दधिधेनुः प्रदातव्या तेन विप्राय शुद्धये ९
मधुचोरस्तु पुरुषो जायते बस्तिरोगवान् । स दद्यान्मधुधेनुं च समुपोष्य द्विजातये १०
इक्षोर्विकारहारी च भवेदुदरगुल्मवान् । गुडधेनुः प्रदातव्या तेन तद्दोषशान्तये ११
लोहहारीच पुरुषो जायते बर्बरोगवान् । लोहं पलशतं दद्यादुपोष्य स तु वासरम् १२
तैलचौरस्तु पुरुषो भवेत्कण्ड्वादिपीडितः । उपोष्य स तु विप्राय दद्यात्तैलघटद्वयम् १३
आमान्नहरणाच्चैव दन्तहीनः प्रजायते । स दद्यादश्विनौ हेमनिष्कद्वयविनिर्मितौ १४
पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते । गायत्र्याः स जपेल्लक्षं दशांशं जुहुयाद्घृतैः १५
फलहारी च पुरुषो जायते व्रणिताङ्गुलिः । नानाफलानामयुतं प्रदद्यात्स द्विजन्मने १६
ताम्बूलहरणेनैव श्वेतौष्ठः संप्रजायते । *सदक्षिणं प्रदद्याच्च विद्रुमस्य द्वयं वरम् १७
शाकहारी च पुरुषो जायते नीललोचनः । ब्राह्मणाय प्रदद्याद्वै महानीलमणिद्वयम् १८
कन्दमूलस्य हरणाद्ध्रस्वपाणिः प्रजायते । देवतायतनं कार्यमुद्यानं तेन शक्तितः १९
सौगन्धिकस्य हरणाद्दुर्गन्धाङ्गः प्रजायते । स लक्षमेकं पद्मानां जुहुयाज्जातवेदसि २०
क्षीरहारी च पुरुषो श्वेतपाणिः प्रजायते । स दद्याद्ब्राह्मणायाथ काश्मीरजपलत्रयम् २१
विद्यापुस्तकहारी च किल मूकः प्रजायते । न्यायेतिहासं दद्याच्च ब्राह्मणाय सदक्षिणम्
वस्त्रहारी च शीतालुः स प्रदद्यात्प्रजापतिम् । हेमनिष्कमितं चैव वस्त्रयुग्मं द्विजातये २३
कर्णहारी लोमशः स्यात्स दद्यात्कम्बलान्वितम् । स्वर्णनिष्कमितं हेम वह्निं दद्याद्विजातये २४
पट्टसूत्रस्य हरणान्निर्लोमा जायते नरः । तेन धेनुः प्रदातव्या तद्वर्णा च द्विजन्मने २५
औषधीहरणे चैव सूर्यावर्तश्च जायते । सूर्यायार्घ्यः प्रदातव्यो मासं दद्यात्स काञ्चनम्
रत्नवस्त्रप्रवालादिहारी स्याद्रक्तवातवान् । सवस्त्रां महिषीं दद्यात्पद्मरागसमन्विताम्
विप्ररत्नस्य हारी च अनपत्यः प्रजायते । तेन कार्यं विशुद्ध्यर्थं महारुद्रजपादिकम् २८
मृतवत्सोदितः सर्वो विधिरत्र विधीयते । दशांशहोमः कर्तव्यः पालाशेन यथाविधि २९

---

* एतदर्धस्थानेऽयं पाठः क. घ. पुस्तकयो.-"दक्षिणां संप्रदद्याच्च सविष्टेम यथाद्वयम्" इति ।

---

१ ख ग ते मदवान्यतः । २ ख. ग. °रुषः कर्बूराङ्गः प्रजायते । लो° । ३ क. घ. दद्यादश्विनं हेम निष्कद्वयसमन्वितम् । प° । ४ ख. ग °यात्तिलैः । फ° । ५ ख ग. °सि । दारुहारी च पुरुषः स्विन्नपा° । ६ ख. ग द्याद्विदुषे शुद्धौका° । ७ ख. ग. °लद्वय° । ८ ख. ग. °री भवेत्कुष्ठी संप्र° । ९ क ग. °व्या विशुद्ध्यर्थं द्वि° । १० ख ग. °पथस्यापह° । ११ क. घ. सूर्यवातश्च । १२ ख. ग. °द्यान्मणिरा° । १३ ख. ग. °रत्नापहारी चाप्यन°।

*अनड्वान्वस्त्रसंयुक्तः पलार्धार्धं च काञ्चनम् । निर्धनेन प्रकर्तव्यं द्विजस्य मुच्यते क्षणात्
ब्राह्मणस्य धनं लोभाद्यो नार्पयति मूढधीः । निर्वंशो जायते तस्य दद्यादश पयस्विनीः
देवस्वहरणाच्चैव जायते विविधो ज्वरः । ज्वरो महाज्वरश्चैव रौद्रो वैष्णव एव च ३२
ज्वरे रुद्रं जपेत्कर्णे महारुद्र महाज्वरे । अतिरौद्रं जपेद्रौद्रे वैष्णवे तद्वयं जपेत् ३३
नानाविधद्रव्यचोरो जायते ग्रहणीयुतः । तेनान्नोदकवस्त्राणि हेम देयं च शक्तितः ३४
+माषतिललोहहारी गजचर्मः (र्मा) प्रजायते । माषद्वयमितां दद्याद्धेनुं द्विपतिलान्विताम्

इति शातातपीये कर्मविपाके स्तेयप्रायश्चित्तं नाम
चतुर्थोऽध्यायः ॥ ४ ॥

(अथ पञ्चमोऽध्यायः ।)

मातृगामी भवेद्यस्तु लिङ्गं तस्य विनश्यति । चाण्डालीगमने चैव हीनकोषः प्रजायते १
तस्य प्रतिक्रियां कर्तुं कुम्भमुत्तरतो न्यसेत् । कृष्णवस्त्रसमाच्छन्नं कृष्णमाल्यविभूषितम्
तस्योपरि न्यसेद्देवं कांस्यपात्रे धनेश्वरम् । सुवर्णनिष्कषट्केन निर्मितं नरवाहनम् ३
यजेत्पुरुषसूक्तेन धनदं विश्वरूपिणम् । अथर्ववेदविद्विप्रो ह्याथर्वणं समाचरेत् ४
सुवर्णपुत्रिकां कृत्वा निष्कविंशतिसंख्यया । दद्याद्विप्राय संपूज्य निष्पापः स्यामिति
ब्रुवन् ५
निधीनामधिपो देवः शंकरस्य प्रियः सखा । सौम्याशाधिपतिः श्रीमान्मम पापं व्यपोहतु
इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि । दद्याद्देवं हीनकोषे लिङ्गनाशे विशुद्धये ७
गुरुजायाभिगमनान्मूत्रकृच्छ्रः प्रजायते । तेनापि निष्कृतिः कार्या शास्त्रदृष्टेन वर्त्मना ८
स्थापयेत्कुम्भमेकं तु पश्चिमायां शुभे दिने । नीलवस्त्रसमाच्छन्नं नीलमाल्यविभूषितम्
तस्योपरि न्यसेद्देवं ताम्रपात्रे प्रचेतसम् । सुवर्णनिष्कषट्केन निर्मितं यादसां पतिम् १०
यजेत्पुरुषसूक्तेन वरुणं विश्वरूपिणम् । सामविद्ब्राह्मणस्तत्र सामवेदं समापयेत् ११
सुवर्णपुत्रिकां कृत्वा निष्कविंशतिसंख्यया । दद्याद्विप्राय निष्पापं(पः) संपूज्य स्यामिति
ब्रुवन् १२

---

* इत आरभ्य पयस्विनीरित्यन्तग्रन्थः क. घ. पुस्तकयोर्न । + एतद्वचनं ख. ग. पुस्तकयोः ।

---

१ क. घ. °पेत्काम्यामह रु° । २ ख. ग. ग्रहिणी° । ३ क घ. °नकुष्ठं च जा° । ४ क. घ °द्विप्र-मथ° । ख ग. ५ समापयेत् । ६ ख. °ष्पापोऽहमि° । ७ क. घ. °द्यादेव हीनकुष्ठे लि° । ८ ग. °कोशे °लि । ९ क घ. °माल्यादिभू° । १० क. घ. °सल्लोहपात्रे देयं प्र° । ११ ख. ग. °माचरेत् । १२ ख. ग. °य संपूज्य निष्पापोऽहमि° ।

यादसामधिपो देवो विश्वेषामपि पावनः। संसाराब्धौ कर्णधारो वरुणः पावनोऽस्तु मे
इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि। दद्याद्देवमलंकृत्य मूत्रकृच्छ्रप्रशान्तये १४
स्वसुतागमने चैव रक्तकुष्ठं प्रजायते। भगिनीगमने चैव पीतकुष्ठं प्रजायते १५
तस्य प्रतिक्रियां कर्तुं पूर्वतः कलशं न्यसेत्। पीतवस्त्रसमाच्छन्नं पीतमाल्यविभूषितम् १६
तस्योपरि न्यसेत्स्वर्णपात्रे देवं सुरेश्वरम्। सुवर्णनिष्कषट्केन निर्मितं वज्रधारिणम् १७
यजेत्पुरुषसूक्तेन वासवं विश्वरूपिणम्। *बह्वृचस्तत्र कलश ऋग्वेदं च समापयेत् १८
सुवर्णपुत्रिकां कृत्वा सुवर्णदशकेन तु। दद्याद्विप्राय संपूज्य निष्पापः स्यामिति ब्रुवन्
देवानामधिपो देवो वज्री कुलिशकेतनः। शतयज्ञः सहस्राक्षः पापं मम निकृन्ततु २०
इमं मन्त्रं समुच्चार्य आचार्याय यथाविधि। दद्याद्देवं सहस्राक्षं स्वपापस्यापनुत्तये २१
भ्रातृभार्याभिगमनाद्गलत्कुष्ठं प्रजायते+। तेन कार्यं विशुध्यर्थं प्रागुक्तस्यार्धमेव हि २२
दशांशहोमैः कर्तव्यो घृताक्तैश्च तिलैः क्रमात्॥ २३
स्वाम्यङ्गनाभिगमने जायते दद्रुमण्डलम्। कृत्वा लोहमयीं धेनुं पलषष्टिप्रमाणतः २४
कार्पासभाण्डसंयुक्तां कांस्यदोहां सवत्सिकाम्। [×दद्याद्विप्राय च सकृत्पापं मे क्षीयतामिति २५
विश्वस्तभार्यागमने गजचर्म प्रजायते। तस्य पापविनाशाय प्रायश्चित्तं विधीयते २६
कृत्वा रौप्यमयीं धेनुं निष्कृतिं विश्वसंरूपया। तस्य पापस्य नाशाय च्छत्रोपानहसंयुताम्] २७
दद्याद्विप्राय विधिवादिमं मन्त्रमुदीरयेत्। सुरभिर्वैष्णवी माता मम पापं व्यपोहतु २८
मातुः सपत्नीगमने जायते चाश्मरीगदः। स तु पापविशुध्यर्थं प्रायश्चित्तं समाचरेत् २९
दद्याद्विप्राय विदुषे मधुधेनुं यथोदितम्। तिलद्रोणशतं चैव हिरण्येन समन्वितम् ३०
पितृष्वस्रभिगमनाद्दक्षिणां(णा)शत्रणी भवेत्। तेनापि निष्कृतिः कार्या अजादानेन यत्नतः ३१
मातुलान्यां तु गमने पृष्ठकुब्जः प्रजायते। कृष्णाजिनप्रदानेन प्रायश्चित्तं समाचरेत् ३२

---

* एतदर्धस्थानेऽयं पाठः ख. ग पुस्तकयोः "यजुर्वेदं तत्र साम ऋग्वेदं च समाचरेत्" इति। + इत उत्तरं "स्वस्रूगमने चैव कृष्णकुष्ठं प्रजायते" इति ख. ग. पुस्तकयोः। × एतच्चिह्नान्तर्गतं न ख. ग. पुस्तकयोः।

---

१ क. °द्यादेयमलंकृत्य मम पापप्र°। २ ख.ग. °ष्पापोऽहमि°। ३ क.घ. °वो विष्णुः कु°। ४ ख. ग. °श्री विष्णुनिके°। ५ क. घ. °नः। धृतवज्रः स°। ६ ख. ग. °मः सर्वत्र घृताक्तैः क्रियते तिलैः। यदगम्याभिगमनाज्जायते ध्रुवम°। ७ क. घ. °भारसंयुक्ता सप्तधान्येन संयुता। द°। ८ ख.ग. °रभी वैष्ण°। ९ ख. ग. °तु। तपस्विनी सङ्गम°। १० क. घ. °क्षिणाङ्गो व्र°। ११ ख. ग. शक्तितः। १२ क. घ. पृष्टिकुब्जं °प्र°।

मातृष्वस्राभिगमने वामाङ्गे व्रणवान्भवेत् । तेनापि निष्कृतिः कार्या सम्यग्दासीप्रदानतः
[*पितृव्यपत्नीगमनात्कटिकुष्ठं प्रजायते । निष्कृतिस्तेन कर्तव्या कन्यादानेन यत्नतः
यदगम्य(म्या)सु तं(सं)योगात्प्रायश्चित्तमुदीरितम् । तदेव मुनिभिः प्रोक्तं नियतं तत्सुत-
(ता)स्वपि] ३५
मृतभार्याभिगमने मृतभार्यः प्रजायते । स तु पापविशुध्यर्थं द्विजमेकं विवाहयेत् ३६
सगोत्रस्त्रीप्रसङ्गेन जायते च भगंदरः । तेनापि निष्कृतिः कार्या महिषीदानयत्नतः ३७
तपस्विन्यभिगमने प्रमेही जायते नरः । मासं रुद्रजपः कार्यो दद्याच्छक्त्या च दक्षिणाम्
दीक्षितस्त्रीप्रसङ्गेन जायते दुष्टरक्तदृक् । स पातकविशुध्यर्थं प्राजापत्यानि षट् चरेत् ३९
[+प्राणनाथं परित्यज्य देवरं सेवते ध्रुवम् । गुदमध्ये भवेद्व्याधिरशना वा म(सु)दुःसह(हा)
तया कार्यं प्रयत्नेन गोदानं हेमसंयुतम् । ४०

गोविन्दगोपीजनवल्लभेशं(शः) कंसासुरघ्ना त्रि(घ्रस्त्रि)दशेष(श)वन्द्या (न्द्यः) ।
गोदानतृप्तं(प्तः) कुरुते दयालुरीशाननाथाद(न्क्ष)पितारिवर्गः(र्गान्) ॥ ४१

श्रोत्रियस्त्रीप्रसङ्गेन जायते नासिकाव्रणी । आचरेत्स विशुध्यर्थं प्राजापत्यचतुष्टयम्]४२
स्वजातिजायागमने जायते हृदयव्रणी । स पापस्य विशुध्यर्थं प्राजापत्यद्वयं चरेत् ४३
भात्युत्तरस्त्रीगमनाज्जायते मस्तकव्रणः । स पातकविशुध्यर्थं प्राजापत्यं समाचरेत् ४४
पशुयोनौ च गमने मूत्रघातः प्रजायते । तिलपात्रद्वयं चैव दद्यादात्मविशुद्धये ४५
अश्वयोनौ च गमनाद्भुजस्तम्भः प्रजायते । सहस्रकलशैः स्नानं मासं कुर्याच्छिवस्य च
एते दोषा नराणां स्युर्नरकान्ते न संशयः । स्त्रीणामपि भवन्त्येते तत्तत्पुरुषसंगमात्+४७
आसुरी असती दासी चर्मकारी च नर्तकी । रजकीभिः समं भोगात्पतन्ति पितृभिः सह
उपोष्यैकादशीं शुद्धां जागरं कारयेन्निशि । तस्य पापविशुध्यर्थं दद्यादेकां पयस्विनीम्

इति श्रीशातातपीये कर्मविपाकेऽगम्यागमनप्रायश्चित्तं
नाम पञ्चमोऽध्यायः ॥ ५ ॥

(अथ षष्ठोऽध्यायः ।)

अश्वसूकरशृङ्गच्यद्विद्रुमादिशकटेन च । भृग्वग्निदारुशस्त्राश्मविषोद्बन्धनजैर्मृताः १

---

* एतच्चिह्नान्तर्गतं न ख. ग. पुस्तकयोः । + एतच्चिह्नान्तर्गतग्रन्थः ख. ग. पुस्तयोर्न विद्यते । × इतः परं वचनद्वयं न ख. ग. पुस्तकयोः ।

---

१ ख. ग 'ग्दासप्र°। २ क. घ. °पि । पितृभार्याभिगामी च मृ' । ३ ख. ग. °ते। तत्पातकवि° । ४ क. घ. °र्यो मेषदानेन । ५ ख ग. °स्विनीप्रसङ्गेन प्र° । ६ ख. ग. काञ्चनम् । ७ ख. ग. °पत्यद्वयं च° । ८ घ. 'शात्रना° । ९ क. घ. °व्रणः । स । १० ख. ग. मूत्राघा' । ११ ख. ग. 'नाद्रुदस्त° । १२ ख. ग. °कमलस्ना° । १३ क. घ. °रकृद्वृक्षशृङ्गीशकटघातिनः । भृ° ।

व्याघ्रा[1]हिगजभूपालचौरवैरिवृकाहताः। काष्ठशल्यमृता ये च शौचसंस्कारवर्जिताः २
विषूचिकान्नकवले[2]दवातीसारतो मृताः। शाकिन्यादिग्रहैर्ग्रस्ता विद्युत्पातहताश्च ये ३
अस्पृश्या अपवित्राश्च पतिता[3]पुत्रवर्जिताः। यच्च त्रिंशत्प्रकारैश्च नाऽऽप्नुवन्ति गतिं मृताः
पित्राद्याः पिण्डभाजः स्युस्त्रयो लेपभुजस्तथा। ततो नान्दीमुखाः प्रोक्तास्त्रयोऽप्यश्रुमुखास्त्रयः ५
द्वादशैते पितृगणास्तर्पिताः संततिप्रदाः। गतिहीनाः सुतादीनां संतातिं नाशयन्तिते ते ६
दश व्याघ्रादिनिहता गर्भं निघ्नन्त्यमी क्रमात्। द्वादशास्त्रादिनिहता आकर्षन्ति च बालकम् ७
विषादिनिहता घ्नन्ति दशसु द्वादशस्वपि। वर्षैकबालकं कुर्यादनपत्योऽनपत्यताम् ८
व्याघ्रेण हन्यते जन्तुः कुमारीगमनेन च। विषदश्चैव सर्पेण गजेन नृपदुःखकृत्[4] ९
राज्ञा राजकुमारघ्नश्चौरेण पशुहिंसकः। वैरिणा मित्रभेदी च वकवृत्तिर्वृकेण तु १०
गुरुघाती च शय्यायां मत्सरी शौचवर्जितः। द्रोही संस्काररहितः शुना निपेक्षहारकः
नरो विहन्यतेऽरण्ये सूकरेण च पाशिकः। कृमिभिः कृत्तत्रासाश्च कृमिणा च निकृन्तनः
शृङ्गिणा शंकरद्रोही शकटेन च सूचकः। भृगुणा मेदिनीचौरो वह्निना यज्ञहानिकृत्[5] ११
दर्वेन दक्षिणाचोरः शस्त्रेण श्रुतिनिन्दकः। अश्मना द्विजनिन्दाकृद्विषेण कुमतिप्रदः १४
उद्बन्धनेन हिंस्रः स्यात्सेतुभेदी जलेन तु। *द्रुमेण राजदन्तिहृदतीसारेण लौहहृत् १५
†गोग्रासहृद्विषूचिक्या कवलेन द्विजान्नहृत्। भ्रामेण राजपत्नीहृदतिसारेण निष्क्रियः
शाकिन्याद्यैश्च म्रियते[6] स्वदर्पाकार्यकारकः। अनध्यायेष्वधीयाना[7] म्रियन्ते विद्युता तथा
अस्पृश्यस्पर्शसङ्गी[8] च वान्तमाश्रित्य शास्त्रहृत्। पतितोऽपत्यविक्रेता[9] अनपत्यो द्विजान्नहृत् १८
अथ तेषां क्रमेणैव प्रायश्चित्तं विधीयते। +विक्रेता घातकश्चैव द्वावेतौ तुलया धृतौ १९
घातकश्चैव हव्यायां रोष्णि रोष्णि(?) च विक्रयी। कारयेन्निष्कमात्रं तु पुरुषं प्रेतरूपिणम्

---

* एतदर्धं न विद्यते क. घ. पुस्तकयोः। † इतः प्रभृति निष्क्रिय इत्यन्तं न विद्यते ख. ग. पुस्तकयोः। + एतदाद्यर्धद्वयं न विद्यते ख ग. पुस्तकयोः।

---

१ ख. °घ्रादिग°। २ क. घ. °लभ्रमतोऽमा°। ३ क. घ. पुण्यव°। ४ ख. ग °ताः। पञ्चाग्निं°। ५ क. घ. हि। ६ ख. ग. °पदुष्टकृ°। ७ क. कृत्तिभिःकृतनाशश्च दमेन च निकृन्तरः। शृं°। ८ क. घ. °तं। दारुणाचौरोऽस्त्रं°। ९ ख. ग. ते सदर्पकार्य°। १० क. ख. °येऽप्यधीयानो म्रियते वि°। ११ क. घ. °स्पृश्यास्पृश्यसङ्गी च भ्रान्तिहृद्दुष्टशास्त्रकृत्।। १२ ख. ग. °तो मदवि°। १३ ख. ग. °ताऽनपत्योदिजवन्नह°। १४ क. घ विशुद्धये। वि°।

चतुर्भुजं दण्डहस्तं महिषासनसंस्थितम् । पिष्टैः कृष्णतिलैः कुर्यात्पिण्डं प्रस्थप्रमाणतः
मध्वाज्यशर्करायुक्तं स्वर्णदण्डेन संयुतम् । अकालमूलं कलशं पञ्चपल्लवसंयुतम् २२
कृष्णवस्त्रसमाच्छन्नं सर्वौषधिसमन्वितम् । तस्योपरि न्यसेद्देवं पात्रं धान्यफलैर्युतम् २३
सप्तधान्यं च कलशं तत्रैव तत्संमुखं न्यसेत् । कुम्भोपरि च विन्यस्य पूजयेत्प्रेतरूपिणम् २४
कुर्यात्पुरुषसूक्तेन प्रत्यृचं दुग्धतर्पणम् । षडङ्गांश्च जपेन्मुद्रान्कलशे तत्र वेदवित् २५
यमसूक्तेन कुर्वीत जपपूजादिकं तथा । गायत्र्याश्चैव कर्तव्यो जपः स्वात्मविशुद्धये २६
ग्रहशान्तिकपूर्वं च दशांशं जुहुयात्तिलैः । अज्ञातनामगोत्राय प्रेताय सतिलोदकम्
प्रदद्यात्पितृतीर्थेन पिण्डमन्त्रमुदीरयेत् ॥ २७
इमं तिलमयं पिण्डं मधुसर्पिःसमन्वितम् । ददामि तस्मै प्रेताय यः पीडां कुरुते मम २८
सजलान्कृष्णकलशांस्तिलपात्रसमन्वितान् । द्वादश प्रेतमुद्दिश्य दद्यादेकं च विष्णवे
ततोऽभिषिञ्चेदाचार्यो दंपती कलशोदकैः । शुची रक्ताम्बरधरौ मन्त्रैर्वरुणदेवतैः ३०
यजमानस्ततो दद्यादाचार्याय स दक्षिणाम् । ततो नारायणबलिः कर्तव्यः शास्त्रनिश्चयैः
एष साधारणविधिरगतीनामुदाहृतः । विशेषस्तु पुनर्ज्ञेयो व्यांघ्रादिनिहतेष्वपि ३२
व्याघ्रेण निहते प्रेते परकन्यां विवाहयेत् । सर्पदंशे नागबलिर्देयः सर्वेषु काञ्चनम् ३३
चतुर्निष्कमितं हेमगजं दद्याद्द्विजैर्हते । राज्ञा विनिहते दद्यात्पुरुषं तु हिरण्मयम् ३४
चौरेण निहते धेनुं वैरिणा निहते वृषम् । वृकेण निहते दद्याद्यथाशक्ति च काञ्चनम् ३५
शय्यामृते प्रदातव्या शय्या तूलीसमन्विता । निष्कमात्रं सुवर्णं तु विष्णुना समधिष्ठिता
शौचहीने मृते चैव द्विनिष्कस्वर्णजं हरिम् । संस्कारहीने च मृते कुमारमुपवीतयेत् ३७
+शुना हते च निक्षेपं स्थापयेन्निजशक्तितः । शूकरेण हते दद्यान्महिषं दक्षिणान्वितम् ३८
कृमिभिश्च मृते दद्याद्गोधूमान्नं द्विजातये । शृङ्गिणा च हते दद्याद्वृषभं वस्त्रसंयुतम् ३९
शकटेन मृते दद्याद्द्रव्यं सोपस्करान्वितम् । भृगुपाते मृते चैव प्रदद्याद्धान्यपर्वतम् ४०
अग्निना निहते कार्यमग्निदानं स्वशक्तितः । दारुणा निहते चैव कर्तव्या सदने सभा ४१

+ एतदर्धस्थान एतद्वचनं क. घ. पुस्तकयोः—" निष्कत्रयं स्वर्णयुतं दद्यादश्वहताहतौ । पुनर्हरेः क्षेत्रपालं स्थापयेन्निजशक्तितः " इति ।

---

१ १ ख. ग. °र्णकुण्डलसं°। २ क. घ. °सेद्वंशपा°। ३ ख. ग. °धान्यं तु सफलं तत्र। ४ क. घ. °त्र सत्सं°। ख. ग. तत्सफलं न्य°। ५ क. घ. अमृतं। ६ ख. ग. °त यमपू°। ७ क. घ. °दशे प्रेतनिर्देशं द°। ८ ख. ग. शुचिर्वैरायुधधरो। ९ ख. ग. °श्चयात्। ए°। १० क. घ. व्याघ्रेण नि°। ११ क. घ. सर्पिः सकाञ्चनः। च°। १२ ख. ग. °वर्णस्य वि°। १३ क. घ. सह तिष्ठता। १४ ख. ग. °मारं च विवाहये°। १५ क. घ. याद्गृ°। १६ ख. ग. °ते दद्यादुपानहं स्वशक्तितः। दवेन नि°।

शस्त्रेण निहते दद्यान्महिषीं दक्षिणान्विताम् । अश्मना निहते दद्यात्सवत्सां गां पयस्विनीम् ४२

विषेण च मृते दद्यान्मेदिनीं हेमनिर्मिताम्। उद्बन्धनमृते चापि प्रदद्याद्गां पयस्विनीम्४३

मृते जलेन वरुणं हैमं दद्याद्विनिष्किकम्। ×वृक्षं वृक्षहते दद्यात्सौवर्णं स्वर्णसंयुतम् ४४

अतीसारमृते लक्षं सावित्र्याः संयतो जपेत् । शाकिन्यादिमृते चैव जपेद्रुद्रं यथोचितम्

*विषूचिकामृते स्वादु भोजयेच्च शतं द्विजान् । तिलधेनुः प्रदातव्या कण्ठेऽन्नकवलैर्मृते

कासरोगमृते वाऽपि कृच्छ्राब्दिकव्रतं चरेत्। विद्युत्पातेन निहते विद्यादानं समाचरेत्

अस्पर्शे च मृते कार्यं वेदपारायणं तथा[1]। सच्छास्त्रपुस्तकं दद्याद्[3]द्वान्तमाश्रित्य संस्थिते४८

पौंतित्येन[2] मृते कुर्यात्प्राजापत्यांश्च षोडश[4]। मृते वाऽपत्यरहिते कृच्छ्राणां नवतिं चरेत्४९

+निष्कत्रयमितस्वर्णं दद्यादश्वं ह्याहते। कपिना निहते दद्यात्कपिं कनकनिर्मितम्५०

केशरोगमृते चापि अष्टौ कृच्छ्रान्समाचरेत् । एवं कृते विधानेन विदध्यादौर्ध्वदैहिकम्

ततः प्रेतत्वनिर्मुक्ताः पितरस्तर्पितास्तथा। दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसंपदः५२

†इति शातातपप्रोक्तो विपाकः कर्मणामयम् । शिष्याय शरभङ्गाय विनयात्परिपृच्छते

इति श्रीशातातपीये कर्मविपाकेऽगतिप्रायश्चित्त-
निरूपणं नाम षष्ठोऽध्यायः ॥ ६ ॥

(समाप्तेयं शातातपस्मृतिः।)

× सार्धं वचनं न विद्यते क. घ. पुस्तकयोः। * इत आरभ्य व्रतं चरेदित्यन्तं ख. ग. पुस्तकयोर्नास्ति। + एतत्सार्धं वचनं नास्ति क. घ. पुस्तकयोः। † नैतद्वचनं क. घ. पुस्तकयोः।

---

१ ख. ग. °द्याग्निनि°। २ क. घ. °द्या। सशास्त्र°। ३ क. घ. °द्यादन्यस्पर्शमृतोमृते। प°। ४ क. घ. पातितेन। ५ ख. ग. °पत्यानि षो°।

ॐ तत्सद्ब्रह्मणे नमः ।

संवर्तस्मृतिः ।

संवर्तमेकमासीनं[1] सर्ववेदाङ्गपारगम् । ऋषयस्तमुपागम्य पप्रच्छुर्धर्मकाङ्क्षिणः १
भगवञ्श्रोतुमिच्छामो[2] द्विजानां धर्मसाधनम् । यथावद्धर्ममाचक्ष्व शुभाशुभविवेचनम्[3] २
वामदेवादयः सर्वे[4] तं पृच्छन्ति महौजसम् । तानब्रवीन्मुनीन्सर्वान्प्रीतात्मा श्रूयतामिति
स्वभावाद्विचरेद्यत्र कृष्णसारः सदा मृगः । धर्मदेशः स विज्ञेयो द्विजानां धर्मसाधनम्[5] ४
उपनीते द्विजो नित्यं गुरवे[6] हितमाचरेत् । स्रग्गन्धमधुमांसानि ब्रह्मचारी विवर्जयेत् ५
संध्यां प्रातः सनक्षत्रामुपासीत यथाविधि । सादित्यां पश्चिमां संध्यामर्धास्तमित-
भास्करे ६
तिष्ठन्पूर्वं[7] जपं कुर्यात्सावित्रीमर्कदर्शनात् । आसीनः पश्चिमां संध्यां सम्यगृक्षविभाव-
नात् ७
अग्निकार्यं च कुर्वीत मेधावी तदनन्तरम् । ततोऽधीयीत वेदं तु वीक्षमाणो गुरोर्मुखम् ८
प्रणवं प्राक्प्रयुञ्जीत व्याहृतीस्तदनन्तरम् ।गायत्रीं चाऽऽनुपूर्वे(र्व्ये)ण ततो वेदं समारभेत्
हस्तौ[10] तु संयतौ धार्यौ जानुभ्यामुपरि स्थितौ । गुरोरनुमतं[11] कुर्यात्पठन्नान्यमतिर्भवेत्[12] १०
सायं प्रातस्तु भिक्षेत ब्रह्मचारी सदा व्रती । निवेद्य गुरवेऽश्नीयात्प्राङ्मुखो वाग्यतः
शुचिः ११
सायं प्रातर्द्विजातीनामशनं श्रुतिचोदितम्[13] । नान्तरा भोजनं कुर्यादग्निहोत्रसमो[14] विधिः
आचम्यैव तु भुञ्जीत भुक्त्वा चोपस्पृशेद्द्विजः । अनाचान्तस्तु योऽश्नीयात्प्रायश्चित्तीयते
तु सः १३
अनाचान्तः पिबेद्यस्तु योऽपि वा भक्षयेद्द्विजः । गायत्र्यष्टसहस्रं तु जपं कुर्वन्विशुध्यति[15]

---

१ ग. घ. च. °सीनमात्मविद्यापरायणम् । २ घ. च. °च्छामः श्रेयस्कामा द्विजोत्तमाः । यं । ग. °च्छामः श्रेयस्कर्म द्विजोत्तम । यं । ३ क. °विमोचनं । ४ ग. °र्वे तमपृच्छन्महौ° । ५ घ. छ. °भनः । उ° । ६ घ. च. गुरोस्तु हिं । ७ ग. घ च. °न्पूर्वाह्णं । ८ घ. च. °र्याद्ब्रह्मचारी समाहितः । आं । ९ ग. घ. च. °ध्यां जपं कुर्यादतन्द्रितः । अ° । १० ग. घ. ङ. °स्तौ सुसं° । ११ घ. च. °नुकृतं कुं । १२ क. ङ. °मतिं कुं । १३ ख. घ. च. °तिनोदि° । १४ ख. ङ. °होत्री समाहितः । आं । १५ ग. °पं कृत्वा वि° ।

अकृत्वा पादशौचं तु तिष्ठन्मुक्तशिखोऽपि वा। विना यज्ञोपवीतेन त्वाचान्तोऽप्यशुचिर्भवेत् १५

आचामेद्ब्रह्मतीर्थेन त्वो(चो)पवीती मुदङ्मुखः।उपवीती द्विजो नित्यं प्राङ्मुखो वाग्यतः शुचिः १६

जले जलस्थश्चाऽऽचामेत्स्थलाचान्तो बहिः शुचिः। बहिरन्तस्थ आचान्त एवं शुद्धिमवाप्नुयात् १७

आ मणिबन्धाद्धस्तौ च पादावद्भिर्विशोधयेत्+। परिमृज्य द्विरास्यं तु द्वादशाङ्गानि च स्पृशेत् १८

स्नात्वा पीत्वा तथा क्षुत्वा भुक्त्वा स्पृष्ट्वा द्विजोत्तमः। अनेन विधिना सम्यगाचान्तः शुचितामियात् १९

शूद्रः शुध्यति हस्तेन वैश्यो दन्तेषु वारिभिः। * कण्ठागतैः क्षत्रियस्तु आचान्तः शुचितामियात् २०

आसनारूढपादश्च कृतावसक्थिकस्तथा। आरूढपाँदुको वाऽपि न शुध्यति कदाचन २१

उपासीत न चेत्संध्यामग्निकार्यं न वा कृतम्। गायत्र्यष्टसहस्रं तु जपेत्स्नात्वा समाहितः

सूतकान्नं नवश्राद्धं मासिकान्नं तथैव च। ब्रह्मचारी तु योऽश्नीयात्त्रिरात्रेणैव शुध्यति २३

ब्रह्मचारी तु यो गच्छेत्स्त्रियं कामप्रपीडितः। प्राजापत्यं चरेत्कृच्छ्रमर्धं त्वेकं सुयन्त्रितः

ब्रह्मचारी तु योऽश्नीयान्मधुमांसं कथंचन। प्राजापत्यं तु कृत्वाऽसौ मौञ्जीहोमेन शुध्यति २५

निर्वपेत्तु पुरोडाशं ब्रह्मचारी तु पर्वणि। मन्त्रैः शाकलहोमान्तैरग्नावाज्यं तु होमयेत् २६

ब्रह्मचारी तु यः स्कन्देत्कामतः शुक्रमात्मनः। अवकीर्णिव्रतं कुर्यात्स्नात्वा शुध्येदकामतः

भिक्षाटनमटित्वा तु स्वस्थो यैकान्नमश्नुते। अस्नात्वा चैव यो भुङ्क्ते गायत्र्यष्टशतं जपेत्

शूद्रहस्तेन योऽश्नीयात्पानीयं वा पिबेत्क्वचित्। अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति २९

+ इतः परमेतद्वचनमधिकं ग. घ. च. पुस्तकेषु—"अशब्दाभिरनुष्णाभिः सवर्णरसगन्धिभिः। हरिताभिरफेनाभिस्त्रिश्चतुर्वाऽद्भिराचमेत्" इति। * न विद्यत एतदार्धर्धद्वयं क. घ. ङ. च. पुस्तकेषु।

---

१ ग. च. °चिद्द्विजः। आ°। २ ग. °मेद्ब्राह्म°। ३ क ङ. °मेत्स्थला°। ४ ग. घ. छ. °पादको। ५ ग. °थवैकं सुमाञ्जि°। ६ घ. च. °मकृत्वा। ७ घ. °वेद्द्विज.। भ°।

शुष्कं पर्युषितोच्छिष्टं भुक्त्वाऽन्नं केशदूषितम् । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति* ३०

दिवा स्वपिति यः स्वस्थो ब्रह्मचारी कथंचन । स्नात्वा सूर्यं समीक्षेत गायत्र्यष्टशतं जपेत् ३१

एष धर्मः समाख्यातः प्रथमाश्रमवासिनाम् । एवं संवर्तमानस्तु प्राप्नोति परमां गतिम् ३२

अतो द्विजः समावृत्तः सवर्णां स्त्रियमुद्वहेत् । कुले महति संभूतां लक्षणैस्तु समन्विताम् ३३

आर्षेणैव विवाहेन शीलरूपगुणान्विताम् । अतः पञ्च महायज्ञान्कुर्यादहरहर्द्विजः ३४

न हापयेत्तु तान्सक्तः श्रेयस्कामः कथंचन । हानिं तेषां तु कुर्वीत सदा मरणजन्मनोः ३५

विप्रो दशाहमासीत दानाध्ययनवर्जितः । क्षत्रियो द्वादशाहानि वैश्यः पञ्चदशैव तु ३६

शूद्रः शुध्यति मासेन संवर्तवचनं यथा । प्रेतायान्नं जले देयं स्नात्वा तद्गोत्रजैः सह ३७

प्रथमेऽह्नि तृतीये च सप्तमे नवमे तथा । चतुर्थेऽहनि कर्तव्यमस्थिसंचयनं द्विजैः ३८

ततः संचयनादूर्ध्वमङ्गस्पर्शो विधीयते । चतुर्थेऽहनि विप्रस्य षष्ठे वै क्षत्रियस्य च ३९

अष्टमे दशमे चैव स्पर्शः स्याद्वैश्यशूद्रयोः । जातस्यापि विधिर्दृष्ट एष एव मनीषिभिः ४०

दशरात्रेण शुध्येत विप्रो वेदविवर्जितः । जाते पुत्रे पितुः स्नानं सचैलं तु विधीयते ४१

मातापि शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः । होमं तत्र प्रकुर्वीत शुष्कान्नेन फलेन वा ४२

पञ्चयज्ञविधानं तु न कुर्यान्मृत्युजन्मनोः । दशाहात्तु परं सम्यग्विप्रोऽधीयीत धर्मवित् ४३

दानं तु विविधं देयमशुभानां विनाशनम् । यद्यदिष्टतमं लोके यच्चास्य दयितं भवेत् ४४

तत्तद्गुणवते देयं तदेवाक्षयमिच्छता । नानाविधानि द्रव्याणि धान्यानि सुबहूनि च ४५

समुद्रजानि रत्नानि नरो विगतकल्मषः । दत्त्वा गुणाढ्यविप्राय महतीं श्रियमाप्नुयात् ४६

गन्धमाभरणं माल्यं यः प्रयच्छति धर्मवित् । स सुगन्धः सदा हृष्टो यत्र तत्रोपजायते ४७

श्रोत्रियाय कुलीनाय चाभ्यर्थिने हि विशेषतः । यद्दानं दीयते भक्त्या तद्भवेत्सुमहत्फ-(हाफ)लम् ४८

---

* इतः परमेतद्वचनं ग. घ. पुस्तकयोः "शूद्राणां भाजने भुक्त्वा भुक्त्वा वा भिन्नभाजने । अहोरात्रोषितो भूत्वा पञ्चगव्येन शुध्यति" इति ।

---

१ क. च. °सिनः । ए° । २ ग. अथ द्विजोऽभ्यनुज्ञातः स° । ३ ग. च. °म् । पञ्चयज्ञविधानं च कुर्या° । ४ ख. ग. कदाचन । ५ घ हापनं तस्य कुर्याच्च स° । ६ ग °शाहेन वै° । ७ ग. च. प्रेतस्य तु जलं दे° । ८ ग. च. °त्रजैर्बहिः । प्र° । ९ ग. घ. च. शुध्यन्ति वैश्वदेवविवर्जिताः । जा° । १० छ. मातुः शुद्धिर्दशा° । ११ ग. घ. च स्नातस्य स्प° । १२ ग. घ. च. होमस्तत्र तु कर्तव्यः शु° । १३ ग. °नं च विधिना दे° । १४ ग. °भान्तकरं शुभम् । १५ ग. °ष्वापि दयितं गृहे । त° । १६ ङ. °णाय वि° । १७ ग. घ. °नाय त्वार्थि° ।

आहूय शीलसंपन्नं श्रुतेनाभिजनेन च। शुचिं विप्रं महाप्राज्ञं हव्यकव्यैस्तु पूजयेत् ४९
नानाविधानि द्रव्याणि सारवन्तीप्सितानि च। श्रेयस्कामेन देयानि तदेवाक्षय्य-
मिच्छता ५०
वस्त्रदाता सुवेषः स्याद्रूप्यदो रूपमेव च। हिरण्यदः समृद्धिं च तेजश्चाऽऽयुश्च विन्दति
भूताभयप्रदानेन सर्वकामानवाप्नुयात्। दीर्घमायुश्च लभते सुखी चैव सदा भवेत् ५२
धान्योदकप्रदायी च सर्पिर्दः सुखमेधते। अलंकृत्य त्वलंकारदाताऽऽप्नोति महत्फलम्
फलमूलानि विप्राय शाकानि विविधानि च। सुरभीणि च पुष्पाणि दत्त्वा प्राज्ञस्तु जा-
यते ५४
ताम्बूलं चैव यो दद्याद्ब्राह्मणेभ्यो विचक्षणः। मेधावी सुभगः प्राज्ञो दर्शनीयश्च जायते
पादुकोपानहौ छत्रं शयनान्यासनानि च। विविधानि च यानानि दत्त्वा द्रव्यपतिर्भवेत्
दद्याद्यः शिशिरे त्वग्निं बहुकाष्ठं प्रयत्नतः। कायाग्निदीप्तिं प्राज्ञत्वं रूपं सौभाग्यमाप्नु-
यात् ५७
औषधं स्नेहमाहारं रोगिणां रोगशान्तये। दत्त्वा स्याद्रोगरहितः सुखी दीर्घायुरेव च५८
इन्धनानि च यो दद्याद्विप्रेभ्यः शिशिरागमे। नित्यं जयति सङ्ग्रामे श्रिया युक्तस्तु
दीप्यते ५९
अलंकृत्य तु यः कन्यां वराय सदृशाय वै। ब्राह्मेण तु विवाहेन दद्यात्तां तु सुपूजिताम्६०
स कन्यायाः प्रदानेन श्रेयो विन्दति पुष्कलम्। साधुवादं स वै सद्भिः कीर्तिं प्राप्नोति
पुष्कलाम् ६१
ज्योतिष्टोमातिरात्राणां शतं शतगुणीकृतम्। प्राप्नोति पुरुषो दत्त्वा होममन्त्रैश्च संस्कृ-
ताम् ६२
तां दत्त्वा तु पिता कन्यां भूषणाच्छादनाशनैः। +पूजयेत्स्वर्गमाप्नोति नित्यमुत्सववृ-
द्धिषु ६३
रोमकाले तु संप्राप्ते सोमो भुङ्क्तेऽथ कन्यकाम्। रजो दृष्ट्वा तु गन्धर्वाः कुचौ दृष्ट्वा तु पावकः
अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी। दशवर्षा भवेत्कन्या अत ऊर्ध्वं रजस्वला ६५
माता चैव पिता चैव ज्येष्ठो भ्राता तथैव च। त्रयस्ते नरकं यान्ति दृष्ट्वा कन्यां रजस्वलाम्

+ एतदर्धस्थानेऽयं पाठो ग. घ. च. पुस्तकेषु—"दत्त्वा स्वर्गमवाप्नोति पूजितस्तु सुरादिषु" इति।

---

१ ग. °प्राज्ञो हव्यकव्येषु पू°। २ ख. ग. °णि रसव°। ३ ग. च. °नि स्वर्गमक्ष°। ४ क. च. °क्षयमि°। ५ ग. च. °ण्यदो महच्चाऽऽयुर्लभेत्तेजश्च मानवः। भू°। ६ क. °कृतस्त्वलं°। ७ ग. °त्वलंकारं दत्त्वा प्राप्नोति तत्फ°। ८ ग. °त्वा दिव्यगति°। ९ क. ख. दीप्यते। १० ग. °दं लभेत्सद्भि°। ११ ग. °मादिसत्रा°।

तस्माद्विवाहयेत्कन्यां यावन्नर्तुमती भवेत् । विवाहो ह्यष्टवर्षायाः कन्यायास्तु प्रशस्यते ६७
+तैलामलकदाता च स्नानाभ्यङ्गप्रदायकः । नरः प्रहृष्टमासीत सुभगश्चोपजायते ६८
अनड्वाहौ तु यो दद्याद्द्विजे सीरेण संयुतौ । अलंकृत्य यथाशक्त्या(क्ति) धूर्वहौ शुभलक्षणौ
सर्वपापविशुद्धात्मा सर्वकामसमन्वितः । वर्षाणि वसते स्वर्गे रोमसंख्याप्रमाणतः ७०
धेनुं च यो द्विजे दद्यादलंकृत्य पयस्विनीम् । कांस्यवस्त्रादिभिर्युक्तां स्वर्गलोके महीयते ७१
भूमिं सस्यवतीं श्रेष्ठां ब्राह्मणे वेदपारगे । गां दत्त्वाऽर्धप्रसूतां च स्वर्गलोके महीयते ७२
यावन्ति सस्यमूलानि गोरोमाणि च सर्वशः । नरस्तावन्ति वर्षाणि स्वर्गलोके महीयते ७३
यो ददाति शफै रौप्यैर्हेमशृङ्गीमरोगिणीम् । सवत्सां वाससा वीतां सुशीलां गां पयस्विनीम् ७४
तस्यां यावन्ति रोमाणि सवत्सायां दिवं गतः । तावन्ति वत्सरान्तानि स नरो ब्रह्मणोऽन्तिके ७५
यो ददाति बलीवर्दमुक्तेन विधिना शुभम् । अव्यङ्गं गोप्रदानेन दत्तं दशगुणं फलम्*
अग्नेरपत्यं प्रथमं सुवर्णं भूर्वैष्णवी सूर्यसुताश्च गावः ।
लोकास्त्रयस्तेन भवन्ति दत्ता यः काञ्चनं गां च महीं च दद्यात् ॥ ७७
सर्वेषामेव दानानामेकजन्मानुगं फलम् । हाटकक्षितिगौरीणां सप्तजन्मानुगं फलम् ७८
अन्नदस्तु भवेन्नित्यं सुतृप्तो निभृतः सदा । अम्बुदस्तु सुखी नित्यं सर्वकर्म(काम)समन्वितः ७९
सर्वेषामेव दानानामन्नदानं परं स्मृतम् । सर्वेषामेव जन्तूनां यतस्तज्जीवितं परम् ८०
यस्मादन्नात्प्रजाः सर्वाः कल्पे कल्पेऽसृजत्प्रभुः । तस्मादन्नात्परं दानं विद्यते न हि किंचन
अन्नाद्भूतानि जायन्ते जीवन्ति च न संशयः ॥ ८१
मृत्तिकां गोशकृद्भानुपवीतं तथोत्तरम् । दत्त्वा गुणाढ्यविप्राय कुले महति जायते ८२

+ एतद्वचनस्थानेऽयं पाठो ग. घ. पुस्तयोः—"तैलमास्तरणं प्राज्ञः पादाभ्यङ्गं ददाति यः । प्रहृष्टमानसो लोके सुखी चैव सदा वसेत्" इति । * इतः परमेतद्वचनमधिकं ग. पुस्तके—"जलदस्तृप्तिमतुलां वितृप्य सर्ववस्तुषु । अन्नदः सुखमाप्नोति सुतृप्तः सर्ववस्तुषु" इति ।

---

१ ग. °यात्कीलसी° । २ ग. घ. वसति । ३ क. ङ. द्विजो । ४ ग. °नि भारोप्याणि । ५ ग. °वद्वर्षसहस्राणि स । ६ ख. ग. ङ. °न्यङ्गगो° । ७ ग. °न फलादृश° । ८ ग. घ. च. °नं न भूतं न भविष्यति । अन्नदानात्परं दानं वि° । ९ ग. °णाप्रयवि° । १० क. °ते । सुखं वा° । ङ. °ते । सुखवा° ।

मुखवासं तु यो दद्याद्दन्तधावनमेव च। शुचिगन्धसमायुक्तो वाक्पटुः स सदा भवेत् ८३
पादशौचं तु यो दद्यात्तथा च गुदलिङ्गयोः। यः प्रयच्छति विप्राय शुद्धबुद्धिः सदा भवेत्
औषधं पथ्यमाहारं स्नेहाभ्यङ्गं प्रतिश्रयम्। यः प्रयच्छति रोगिभ्यः स भवेद्व्याधिव-
र्जितः ८५
गुडमिक्षुरसं चैव लवणं व्यञ्जनानि च। सुरभीणि च पानानि दत्त्वाऽत्यन्तसुखी भवेत्
दानैश्च विविधैः सम्यक्फलमेतदुदाहृतम्। विद्यादानेन सुमतिर्ब्रह्मलोके महीयते ८७
अन्योन्यानुग्रहा विप्रा अन्योन्यप्रतिपूजकाः। अन्योन्यं प्रतिगृह्णन्ति तारयन्ति तरन्ति च
दानान्येतानि देयानि तथाऽन्यानि विशेषतः। दीनान्धकृपणार्थिभ्यः श्रेयस्कामेन
धीमता ८९
ब्रह्मचारियतिभ्यश्च वपनं यस्तु कारयेत्। नखकर्मादिकं चैव चक्षुष्माञ्जायते नरः ९०
देवागारे द्विजातीनां दीपं दद्याच्चतुष्पथे। मेधावी ज्ञानसंपन्नश्चक्षुष्मान्स सदा भवेत् ९१
नित्ये नैमित्तिके काम्ये तिलान्दत्त्वा स्वशक्तितः। प्रजावान्पशुमांश्चैव धनवाञ्जायते नरः
यो यदाऽभ्यर्थितो विप्रैर्यत्नसंप्रतिपादयेत्। तृणकाष्ठादिकं चैव गोप्रदानसमं भवेत् ९३
+नं विस्मयीत तपसा न यज्ञेनानृतं वदेत्। अपवदेन्न विप्रस्य न दीनं परिकीर्तयेत् ९४
यज्ञोऽनृतेन क्षरति तपः क्षरति विस्मयात्। आयुर्विप्रापवादेन दानं च परिकीर्तनात् ९५
वर्जयेत्तानि कर्माणि संध्यायां वर्जयेद्बुधः। आहारं मैथुनं निद्रां तथा संपाठमेव च ९६
आहाराज्जायते व्याधिर्गर्भो वै रौद्र(द्रो)मैथुनात्। निद्रातो जायतेऽलक्ष्मीः संपाठादायुषः
क्षयः ९७
ऋतुपर्वा तु यो भार्यां संनिधौ नोपगच्छति। तस्या रजसि तन्मासं पितरस्तस्य शेरते ९८
कृत्वा गृह्याणि कर्माणि स्वभार्यापोषणे रतः। ऋतुकालाभिगामी च प्राप्नोति परमां
गतिम् ९९
उषित्वैवं गृहे विप्रो द्वितीयादाश्रमात्परम्। वलीपलितसंयुक्तस्तृतीयं तु समाश्रयेत् १००
वनं गच्छेत्ततः प्राज्ञः सभार्यस्त्वेक एव वा। गृहीत्वा चाग्निहोत्रं च होमं तत्र न हापयेत्
कुर्याच्चैव पुरोडाशं वन्यैर्मेध्यैर्यथाविधि। भिक्षां च भिक्षवे दद्याच्छाकमूलफलादिभिः

+ इतः प्रभृति शेरत इत्यन्तग्रन्थो ग. घ. च. पुस्तकेषु न विद्यते।

---

१ क. ख. °क्षो अवाग्दृष्टः सदा। २ क. ङ °तिश्रियं। ३ ग. सर्वव्याधिविवं। ४ क. ङ. °त्यन्तं सुं। ५ ग. घ च °न पुण्येन ब्रह्म°। ६ ग. °भप्रदा वि। ७ ग. °णादिभ्यः। ८ क. ग. घ. °चारी य°। ९ क. च. °तिदापयें। १० ख. न वै ब्रूयीत तमसा। ११ घ. °त्थाऽग्निहोत्रकर्मा। १२ घ. °षणं परम्। ऋ°। १३ ग. ङ. °लानि च। कुं।

कुर्यादध्ययनं नित्यमग्निहोत्रपरायणः । इष्टिं च पार्वणीयां तु प्रकुर्यात्प्रतिपर्वसु १०१
उषित्वैवं वने विप्रो विधिज्ञः सर्वकर्मसु । चतुर्थमाश्रमं गच्छेज्जितक्रोधो जितेन्द्रियः १०४
अग्निमात्मनि संस्थाप्य द्विजः प्रव्रजितो भवेत् । वेदाभ्यासरतो नित्यमात्मविद्यापरायणः १०५
अष्टौ भिक्षाः समादाय स मुनिः सप्त पञ्च वा । अद्भिः प्रक्षाल्य ताः सर्वा भुञ्जीत सुसमाहितः १०६
अरण्ये निर्जने तत्र पुनरासीत भुक्तवान् । एकाकी चिन्तयेन्नित्यं मनोवाक्कायकर्मभिः
मृत्युं च नाभिनन्देत जीवितं वा कथंचन । कालमेव प्रतीक्षेत यावदायुः समाप्यते
संसेव्य चाऽऽश्रमान्सर्वाञ्जितक्रोधो जितेन्द्रियः ॥ १०८
ब्रह्मलोकमवाप्नोति वेदशास्त्रार्थविद्द्विजः । आश्रमेषु च सर्वेषु प्रोक्तोऽयं प्राश्निको विधिः
*अतः परं प्रवक्ष्यामि प्रायश्चित्तविधिं शुभम् । ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः
महापातकिनस्त्वेते तत्संयोगी च पञ्चमः । ब्रह्मघ्नस्तु वनं गच्छेद्वालवासा जटी ध्वजी
वन्यान्येव फलान्यश्नन्सर्वकामविवर्जितः । भिक्षार्थी विचरेद्ग्रामं वन्यैर्यदि न जीवति
चातुर्वर्ण्ये चरेद्भैक्षं खट्वाङ्गी संयतेः सदा । भिक्षास्त्वेवं समादाय वनं गच्छेत्ततः पुनः
वनवासी सपापः स्यात्सदाकालमतान्द्रितः । ख्यापयेन्मुच्यते पापाद्ब्रह्महा पापकृत्तमः
अनेन तु विधानेन द्वादशाब्दव्रतं चरेत् । संनियम्येन्द्रियग्रामं सर्वभूतहिते रतः ११५
ब्रह्महत्यापनोदाय ततो मुच्येत किल्बिषात् । अतः परं सुरापस्य निष्कृतिं श्रोतुमर्हथ
गौडी माध्वी च पैष्टी च विज्ञेया त्रिविधा सुरा । यथैवैका तथा सर्वा न पातव्या द्विजोत्तमैः ११७
सुरापस्तु सुरां तप्तां पिबेत्तत्पापमोक्षकः । गोमूत्रमग्निवर्णं वा गोमयं वा तथाविधम् +
घृतं वा त्रीणि पेयानि सुरापो व्रतमाचरेत् । मुच्यते तेन पापेन प्रायश्चित्ते कृते सति ११९

---

* एतदर्धस्थानेऽयं पाठो ग. पुस्तके–" अथाभिवक्ष्ये पापानां प्रायश्चित्तं यथाविधि" इति । + इतः परमेतदधिकं ग. पुस्तके–"षण्मासादधिकं वाऽपि पूर्वोक्तव्रतमाचरेत् । महापातकिसंयोगे ब्रह्महत्यादिभिर्नरः" इति ।

---

१ क. ख. ङ. च. °ष्टिं पार्वायणीं । २ ग. च. °र्वेवस्तुषु । च° । ३ ग. घ. °च्छेद्धुतहोमो जि° । ४ ग. घ. च. °ल्य तत्सर्वं भु° । ५ ग. °यसंयुतः । मृ° । ६ ग. °षु त्युक्तः प्रासङ्गिको । घ. च. °षु त्युक्तः प्राणान्तिको । ७ ख. ग. °च्छेद्वल्कवा° । ८ क ख °द्भैक्ष्यं ख° । ९ ग. घ °तः पुमान् । भैक्षं चैव स° । १० ग. घ. च. °पयन्नेव तत्पापं ब्रह्मघ्नः(हा) पापकृत्तरः । अ° । ११ ग. °स्य प्रवक्ष्यामि विनिष्कृतिम् । श्रोतुमिच्छत भो विप्रा वेदशास्त्रानुरूपिकाम् । गौ° । १२ ग. घ. द्विजैः सदा । सुरा° । १३ क. ग. °क्षकम् । गो° ।

अरण्ये वा वसेत्सम्यक्सर्वकामविवर्जितः। चान्द्रायणानि वा त्रीणि सुरापव्रतमादिशेत्
एवं शुद्धिः सुरापस्य भवेदिति न संशयः। मद्यभाण्डोदकं पीत्वा पुनः संस्कारमर्हति
स्तेयं कृत्वा सुवर्णस्य स्तेयं राज्ञे निवेदयेत्। ततो मुसलमादाय स्तेनं हन्यात्सकृन्नृपः
यदि जीवति स स्तेनस्ततः स्तेयाद्विमुच्यते। अरण्ये चीरवासा वा चरेद्ब्रह्महणो व्रतम्
एवं शुद्धिः कृता स्तेये संवर्तवचनं यथा। १२३
गुरुतल्पे शयानस्तु तप्ते स्वप्यादयोमये। समालिङ्गेत्स्त्रियं वाऽपि दीप्तां काष्णायसी-
कृताम् १२४
चान्द्रायणानि वा कुर्याच्चत्वारि त्रीणि वा द्विजः। मुच्यते च ततः पापात्प्रायश्चित्ते कृते
सति १२५
एभिः संपर्कमायाति यः कश्चित्पापमोहितः। +तत्तत्पापविशुध्यर्थं तस्य तस्य व्रतं
चरेत् १२६
क्षत्रियस्य वधं कृत्वा त्रिभिः कृच्छ्रैर्विशुध्यति। कुर्याच्चैवानुरूपेण त्रीणि कृच्छ्राणि
संयतः १२७
वैश्यहत्यां तु संप्राप्तः कथंचित्काममोहितः। कृच्छ्रातिकृच्छ्रौ कुर्वीत स नरो वैश्यघातकः
कुर्याच्छूद्रवधे विप्रस्तप्तकृच्छ्रं यथाविधि। एवं शुद्धिमवाप्नोति संवर्तवचनं यथा १२९
गोघ्नस्यातः प्रवक्ष्यामि निष्कृतिं तत्त्वतः शुभाम्। गोघ्नः कुर्वीत संस्थानं गोष्ठे गोरूपसं-
निधौ १३०
तत्रैव क्षितिशायी स्यान्मासार्धं संयतेन्द्रियः। स्नानं त्रिषवणं कुर्यान्नखलोमविवर्जितः
सक्तुयावकभिक्षाशी पयोदधिशकृन्नरः। एतानि क्रमशोऽश्नीयाद्द्विजस्तत्पापमोक्षकः*
गायत्रीं च जपेन्नित्यं पवित्राणि च शक्तितः। *पूर्णे चैवार्धमासे च स विप्रान्भोजयेद्द्विजः
भुक्तवत्सु च विप्रेषु गां च दद्याद्विचक्षणः। व्यापन्नानां बहूनां तु रोधने बन्धनेऽपि वा
भिषङ्मिथ्यापचारे च द्विगुणं गोव्रतं चरेत् १३५

+ इत उत्तरं सार्धं वचनमधिकं ग. च. पुस्तकयोः—"घृतं चैव सुतप्तं च क्षीरं वाऽपि तथाविधम्। संवत्सरं कणानश्नन्सर्वकामविवर्जितः। चान्द्रायणानि वा त्रीणि सुरापी व्रतमाचरेत्" इति। × इतः परमेतदधिकं ग पुस्तके—"शुध्यते सार्धमासेन नखलोमविवर्जितः। स्नानं त्रिषवणं चास्य गवामनुगमस्तथा। एतत्समाहितः कुर्यान्नरो विगतमत्सरः" इति। * अत्र भङ्गयन्तरेण पाठो ग. पुस्तके—"ततश्चीर्णव्रतः कुर्याद्विप्राणां भोजनं परम्" इति।

१ घ. °माचरेत्। २ ग. °स्य राज्ञे शंसेत मानवः। त°। घ. च. °स्य राज्ञे शंसेत्स मानवः। त°। ३ क. एवं सं°। ४ ग. तत्पापस्य वि°। ५ क. शुचिः। ६ क ख. ङ. संस्कारं। ७ ग. °संस्थिते। त°। ८ ग. कपिण्याकप°। ९ ग. घ. सावित्रीं। १० ग. व्यापादितेषु बहुषु बन्धने रोधनेऽपि। ११ क. ना च हतानां। १२ ग. घ. वा। द्विगुणं गोव्रतं तस्य प्रायश्चित्तं विशुद्धये। ए°।

एका चेद्बहुभिः का चिद्वैवाऽन्यापादिता क्वचित्। पादं पादं तु हत्यायाश्चरेयुस्ते पृथक्पृथक् १३६

यज्ञे गोचिकित्सार्थे गूढगर्भविमोचने। यदि तत्र विपत्तिः स्यान्न स पापेन लिप्यते
*औषधं स्नेहमाहारं ददद्गोब्राह्मणेषु च। दीयमाने विपत्तिः स्यात्पुण्यमेव न पातकम्
प्रायश्चित्तस्य पादं तु रोधेषु व्रतमाचरेत्। द्वौ पादौ बन्धने चैव पादोनं यज्ञणे तथा १३९
पाषाणैर्लकुटैर्दण्डैस्तथा शस्त्रादिभिर्नरः। निपातने चरेत्सर्वं प्रायश्चित्तं विशुद्धये १४०
हस्तिनं तुरगं हत्वा महिषोष्ट्रकपींस्तथा। एषां वधे द्विजः कुर्यात्सप्तरात्रमभोजनम् १४१
व्याघ्रं श्वानं खरं सिंहमृक्षं सूकरमेव च। एतान्हत्वा द्विजो मोहाद्त्रिरात्रेणैव शुध्यति
सर्वासामेव जातीनां मृगाणां वनचारिणाम्। अहोरात्रोषितस्तिष्ठेज्जप्त्वै जातवेदसम्
हंसं काकं बलाकां च बर्हिकारण्डवावपि। सारसं चाषभासौ च हत्वा त्रिदिवसं क्षिपेत् १४४
चक्रवाकं तथा क्रौञ्चं सारिकाशुकतित्तिरीन्। श्येनगृध्रावुलूकं च पारावतमथापि वा
टिट्टिभं जालपादं च कोकिलं कुक्कुटं तथा। एषां वधे नरः कुर्यादेकरात्रमभोजनम् १४६
पूर्वोक्तानां च सर्वेषां हंसादीनामशेषतः। अहोरात्रोषितस्तिष्ठेज्जप्त्वै जातवेदसम् १४७
मण्डूकं चैव हत्वा च सर्पमार्जारमूषकम्। त्रिरात्रोपोषितस्तिष्ठेत्कुर्याद्ब्राह्मणभोजनम्
अनस्थीन्ब्राह्मणो हत्वा प्राणायामेन शुध्यति। अस्थिमतां वधे विप्रः किंचिदद्याद्विचक्षणः १४९
यश्चाण्डालीं द्विजो गच्छेत्कथंचित्कामम्मोहितः। त्रिभिः कृच्छ्रैस्तु शुध्येत प्राजापत्यानुपूर्वकैः १५०
पुंश्चलीगमनं कृत्वा कामतोऽकामतोऽपि वा। कृच्छ्रचान्द्रायणे तस्य पावने परमे स्मृते
शैलूषीं रजकीं चैव वेणुचर्मोपजीविनीम्। एता गत्वा द्विजो मोहाच्चरेच्चान्द्रायणं व्रतम्

---

* एतद्वचनस्थानेऽयं पाठो घ. च. छ. पुस्तकेषु—"निशिबन्धनरुद्धेषु सर्पव्याघ्रहतेषु च। अग्निविद्युन्निपातेषु प्रायश्चित्तं न विद्यते" इति।

---

१ छ यन्त्रिताया°। २ घ. ङ. °मोक्षणे। य°। ३ क. ङ. योक्त्रणे। ग. कुहने। च. योक्षणे। ४ ग. °लैगुडैर्दं°। ५ ख. दिनत्रयम्। ६ घ. °नं तथा सिंहं वृकं सूं। ७ ग. तथा। ८ ग. घ. च. द्विजः कृच्छ्रं ब्राह्मणानां च भोजनम्। स°। ९ ग. घ. च. °म्। त्रिरात्रोपोषि°। १० घ. बकं। ११ ग. घ कपोतकम°। १२ ग. घ. एवं पक्षिषु सर्वेषु दिनमेकम°। १३ ग. घ. °कैः। पुक्कसीं°। १४ क ङ. कृत्व. चा°। ग. घ. कृच्छ्रं चान्द्रायणं त°। १५ ग. घ. °वनं परमं स्मृतम्। नटीं शैलूषिकीं चैव रजकीं वेणुजी°। १६ ग. घ. °म्। गत्वा चान्द्रायणं कुर्यात्तथा चर्मोपजीविनीम्।

क्षत्रियामथ वैश्यां वा गच्छेद्यः काममोहितः । तस्य सांतपनः कृच्छ्रो भवेत्पापापनोदनः १५३

शूद्रां तु ब्राह्मणो गत्वा मासं मासार्धमेव वा। गोमूत्रयावकाहारो मासार्धेन विशुध्यति विप्रस्तु ब्राह्मणीं गत्वा प्राजापत्येन शुध्यति। स्वजनां तु द्विजो गत्वा प्राजापत्यं समाचरेत् १५५

क्षत्रियां क्षत्रियो गत्वा तदेव व्रतमाचरेत्। नरो गोगमनं कृत्वा कुर्याच्चान्द्रायणव्रतम् मातुलानीं तथा श्वश्रूं सुतां वै मातुलस्य च। एता गत्वा स्त्रियो मोहात्परार्केण विशुध्यति १५७

गुरोर्दुहितरं गत्वा स्वसारं पितुरेव च। तस्या दुहितरं चैव चरेच्चान्द्रायणं व्रतम् १५८

पितृष्यदारगमने भातृभार्यागमे तथा। गुरुतल्पव्रतं कुर्यान्निष्कृतिर्नान्यथा भवेत् १५९

पितृभार्यां समारुह्य मातृवर्जं नराधमः। भगिनीं मातुरात्मां च स्वसारं चान्यमातृजाम् एतास्तिस्रः स्त्रियो गत्वा तप्तकृच्छ्रं समाचरेत् । कुमारीगमने चैव व्रतमेतत्समादिशेत् पशुवेश्याभिगमने प्राजापत्यो विधीयते। सखिभार्यां समारुह्य श्वश्रूं वा शालिकां तथा मातरं योऽभिगच्छेच्च स्वसारं पुरुषाधमः। न तस्य निष्कृतिं दद्यात्स्वां चैव तनुजां तथा नियमस्थां व्रतस्थां वा योऽभिगच्छेत्स्त्रियं द्विजः। स कुर्यात्प्राकृतं कृच्छ्रं धेनुं दद्यात्पयस्विनीम् १६४

रजस्वलां तु यो गच्छेद्भिन्नीं पतितां तथा। तस्य पापविशुध्यर्थमतिकृच्छ्रो विधीयते वैश्यां तु ब्राह्मणो गत्वा कृच्छ्रमेकं समाचरेत्। एवं शुद्धिः समाख्याता संवर्तस्य वचो यथा १६६

कथंचिद्ब्राह्मणीं गत्वा क्षत्रियो वैश्य एव च। गोमूत्रयावकाहारो मासेनैकेन शुध्यति शूद्रस्तु ब्राह्मणीं गच्छेत्कदाचित्काममोहितः। गोमूत्रयावकाहारो मासेनैकेन शुध्यति ब्राह्मणी शूद्रसंपर्के कदाचित्समुपागते। कृच्छ्रचान्द्रायणं तस्याः पावनं परमं स्मृतम् १६९

चाण्डालं पुल्कसं चैव श्वपाकं पतितं(?) तथा। एताः श्रेष्ठाः स्त्रियो गत्वा कुर्युश्चान्द्रायणत्रयम् १७०

---

१ क. ग. घ. शूद्रां । २ क. ख. ङ. विप्रास्वजनां ग° । ३ ग. °पत्यं । ४ ग घ. °नीं सनाभिं च मातुलस्याऽऽत्मजां स्नुषाम् । एं° । ५ च. °रं मातु° । ६ च. °त्वाऽज्ञानाच्च सकृद्द्विजः । स चरेत्तप्तकृच्छ्रं तु ज्ञानाच्चान्द्रायणं व्रतम् । कृ° । ७ ख. च °माचरेत् । ८ ग.घ. च. °पत्यं वि° । ९ च. °ते । शिष्यभा° । १० ख. °ते । वैश्यजां ब्रा° । ११ ग. ङ कृच्छ्रं चा° । १२ ग पुक्कसं ।

अतः परं प्रदुष्टानां निष्कृतिं श्रोतुमर्हथ । संन्यस्य दुर्मतिः कश्चिदपत्यार्थं स्त्रियं व्रजेत् १७१
कुर्यात्कृच्छ्रं समानं तत्षण्मासांस्तदनन्तरम् । विषाग्निश्यामशबलास्तेषामेवं विनिर्दिशेत्
स्त्रीणां तथा च चरणे गर्भाभिगमनेषु च । पतनेष्वप्ययं दृष्टः प्रायश्चित्तविधिः शुभः १७२
नृणां विप्रतिपत्तौ तु पावनः प्रेत्य चेह च । गोविप्रप्रहते चैव तथा चैवाऽऽत्मघातिनि १७४
नैवाश्रुपातनं कार्यं सद्भिः श्रेयोभिकाङ्क्षिभिः ॥ १७५
एषामन्यतमं प्रेतं यो वहेत दहेत वा । कृत्वा चोदकदानं तु चरेच्चान्द्रायणव्रतम् १७६
तच्छवं केवलं स्पृष्ट्वा त्वश्रु नो पतितं यदि । पूर्वकेष्वप्यकारी चेदेकाहं क्षपणं तथा १७७
महापातकिनां चैव तथा चैवाऽऽत्मघातिनाम् । उदकं पिण्डदानं च श्राद्धं चैव हि यत्कृतम्
नोपतिष्ठति तत्सर्वं राक्षसैर्विप्रलुप्यते ॥ १७८
चाण्डालैस्तु हता ये तु जलदंष्ट्रिसरीसृपैः । श्राद्धं तेषां न कर्तव्यं ब्रह्मदण्डहताश्च ये १७९
कृत्वा मूत्रपुरीषे तु भुक्तोच्छिष्टस्तथा द्विजः । श्वादिस्पृष्टो जपेदेव्याः सहस्रं स्नानपूर्वकम्
चण्डालं पतितं स्पृष्ट्वा शवमन्त्यजमेव च । उदक्यां सूतिकां नारीं सवासाः स्नानमाचरेत्
स्पृष्टेन संस्पृशेद्यस्तु स्नानं तस्य विधीयते । ऊर्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा
चण्डालाद्यैस्तु संस्पृष्ट उच्छिष्टश्चेद्द्विजोत्तमः । गोमूत्रयावकाहारः षड्रात्रेण विशुध्यति
शुना पुष्पवती स्पृष्टा पुष्पवत्याऽन्यया तथा । शेषाण्यहान्युपवसेत्स्नात्वा शुध्येद्धृताश्-
नात् १८४
चाण्डालभाण्डसंस्पृष्टं पिबेत्कूपगतं जलम् । गोमूत्रयावकाहारस्त्रिरात्रेण विशुध्यति १८५
अन्त्यजैः स्वीकृते तीर्थे तडागेषु नदीषु च । शुध्यते पञ्चगव्येन पीत्वा तोयमकामतः
सुराघटप्रपातोयं पीत्वा नासाजलं तथा । अहोरात्रोषितो भूत्वा पञ्चगव्यं पिबेद्द्विजः
कूपे विण्मूत्रसंस्पृष्टाः प्राश्य चापो द्विजातयः । त्रिरात्रेणैव शुध्यन्ति कुम्भे सांतर्पणः स्मृतः
वापीकूपतडागानां दूषितानां विशोधनम् । अपां घटशतोद्धारः पञ्चगव्यं च निक्षिपेत्+

+इतः परमधिकं घ. च. पुस्तकयोः–"अवत्सैकशफोष्ट्रीणां क्षीरं प्राश्य द्विजोत्तमः । अदशनाया गोश्चैव त्रिरात्रं यावकं पिबेत्" इति ।

---

१ ग. °त् । स कुर्यात्कृच्छ्रमश्रान्तः षण्मा° । घ. °त् । स कुर्यात्कृच्छ्रमासान्तं षण्मा° । २ क. ख घ. °णे ह्यधिमासगमे तथा प° । छ. °णे ह्यधमादिग° । ३ ग. प्रेतराडिह । गोभिर्विप्रह° । ४ क. ङ. °तिमः । नै° । ५ च वा । अथोदकक्रियां कृत्वा च° । ६ ग °ष्ट्वा वस्त्रं वा केवलं य° । ७ ख. ङ. नो पति° । ८ ग. पूर्वः कृच्छ्रापहारी स्यादेकाहश्च° । ९ क. ङ °कारा चे° । १० ग. अस्पृश्यं । ११ ग. तेन । १२ ग. °त्स्नाता शु° । १३ ग. °त्वाऽऽकाशज° । १४ घ.च. नाशम° । १५ ग.घ. °स्पृष्टे प्रा° । १६ ग.छ. °पनं स्मृतम् । वा° । १७ क. ख. ङ. °गानामुपहतानां ।

स्त्रीक्षीरमाविकं पीत्वा संधिन्याश्चैव गोः पयः। तस्य शुद्धिस्त्रिरात्रेण द्विजानां चैव भक्षणे विण्मूत्रभक्षणे चैव प्राजापत्यं समाचरेत्। श्वकाकोच्छिष्टगोच्छिष्टभक्षणे तु त्र्यहं द्विजः बिडालमूषकोच्छिष्टे पञ्चगव्यं पिबेद्द्विजः। शूद्रोच्छिष्टं तथा भुक्त्वा त्रिरात्रेणैव शुध्यति पलाण्डुलशुनं जग्ध्वा तथैव ग्रामकुक्कुटम्। छत्राकं विड्वराहं च चरेत्सांतपनं द्विजः १९३ श्वबिडालखरोष्ट्राणां कपेर्गोमायुकाकयोः। प्राश्यं मूत्रं पुरीषं वा चरेच्चान्द्रायणव्रतम् अन्नं पर्युषितं भुक्त्वा केशकीटैरुपद्रुतम्। पतितैः प्रेक्षितं वाऽपि पञ्चगव्यं द्विजः पिबेत् अन्त्यजाभाजने भुक्त्वा ह्युदक्याभाजने तथा। गोमूत्रयावकाहारो मासार्धेन विशुध्यति गोमांसं मानुषं चैव शुनो (सूनि)हस्तात्समाहृतम्। अभक्ष्यं तद्भवेत्सर्वं भुक्त्वा चान्द्रायणं चरेत् १९७

चाण्डालैस्संकरे विप्रः श्वपाके पुल्कसेऽपि वा। गोमूत्रयावकाहारो मासार्धेन विशुध्यति पतितेन तु संपर्के मासं मासार्धमेव च। गोमूत्रयावकाहारो मासार्धेन विशुध्यति १९९ *पतिताद्द्रव्यमादत्ते भुङ्क्ते वा ब्राह्मणो यदि। कृत्वा तस्य समुत्सर्गमतिकृच्छ्रं चरेद्द्विजः यत्र यत्र च संकीर्णमात्मानं मन्यते द्विजः। तत्र तत्र तिलैर्होमो गायत्र्या प्रत्यहं द्विजः एष एवं मया प्रोक्तः प्रायश्चित्तविधिः शुभः। अनादिष्टेषु पापेषु प्रायश्चित्तं तथोच्यते दानैर्होमैर्जपैर्नित्यं प्राणायामैर्द्विजोत्तमः। + पातकेभ्यः प्रमुच्येत वेदाभ्यासान्न संशयः सुवर्णदानं गोदानं भूमिदानं तथैव च। नाशयत्याशु पापानि ह्यन्यजन्मकृतान्यपि २०४ तिलधेनुं च यो दद्यात्संयताय द्विजन्मने। ब्रह्महत्यादिभिः पापैर्मुच्यते नात्र संशयः माघमासे तु संप्राप्ते पौर्णमास्यामुपोषितः। ब्राह्मणेभ्यस्तिलान्दत्त्वा सर्वपापैः प्रमुच्यते उपवासी नरो भूत्वा पौर्णमास्यां तु कार्तिके। हिरण्यं वस्त्रमन्नं वा दत्त्वा तरति दुष्कृतिम् अयने विषुवे चैव व्यतीपाते दिनक्षये। चन्द्रसूर्यग्रहे चैव दत्तं भवति चाक्षयम् २०८ अमावास्यां(स्या) च द्वादश्यां(शी) संक्रान्तौ(न्ती) च विशेषतः। एताः प्रशस्तास्तिथयो भानुवारस्तथैव च २०९

---

* एतद्वचनं न ग. पुस्तके। + एतदर्धस्थानेऽयं पाठो घ. पुस्तके–"नाशयत्याशु पापानि अन्यजन्मकृतान्यपि" इति।

---

१ ग. °ण विड्भक्ष्याणां च भ°। घ. ण विटजानां च भ°। च. °ण चिद्रानां चैव भक्षणात्। वि°। २ ग. °रेच्चान्द्रायणं द्वि°। ३ ग °युक्कूयोः। ४ क. ङ. °श्यमात्रं। ५ घ. कीटाविलं तथा। प°। ६ क. घ. प्रोषितं। ७ ख. °ण्डाले सं°। ८ ग. °लस्य करे। ९ घ °तितानां च संसर्गे मासं। १० ग. °त्र कार्यस्तिलै°। ११ग. °त्यावर्तनं तथा। एं°। १२ क ख.ङ. °स्तेन चोच्य°। १३ ग.°त्वा मुच्येत दुष्कृतैः। अ°। १४ ख. च. दुष्कृतम्।

अत्र स्नानं जपो होमो ब्राह्मणानां च भोजनम्। उपवासस्तथा दानमेकैकं पावयेन्नरम्[1] स्नातः शुचिर्धौतवासाः शुद्धात्मा विजितेन्द्रियः। सात्त्विकं भावमास्थाय दानं दद्याद्विचक्षणः २११

सप्तव्याहृतिभिर्होमो द्विजैः कार्यो जितात्मभिः। उपपातकशुध्यर्थं सहस्रपरिसंख्यया महापातकसंयुक्तो लक्षहोमं तु कारयेत्। मुच्यते सर्वपापेभ्यो गायत्र्यां चैव पावितः अभ्यसेच्चैव महापुण्यां गायत्रीं वेदमातरम्। गत्वाऽरण्ये नदीतीरे सर्वपापविशुद्धये स्नात्वा[6] च विधिवत्तत्र प्राणानायम्य वाग्यतः। प्राणायामैस्त्रिभिः पूतो गायत्रीं तु जपेद्द्विजः २१५

अक्लिन्नवासाः स्थलगः शुचौ देशे समाहितः। पवित्रपाणिराचान्तो गायत्र्या जपमाचरेत् २१६

ऐहिकामुष्मिकं[7] पापं सर्वं निरवशेषतः। पञ्चरात्रेण गायत्रीं जपमानो व्यपोहति २१७

गायत्र्यास्तु परं नास्ति शोधनं पापकर्मणाम्। महाव्याहृतिसंयुक्तां प्रणवेन च संजपेत्

ब्रह्मचारी निराहारः सर्वभूतहिते रतः। गायत्र्या लक्षजप्येन सर्वपापैः प्रमुच्यते २१९

अयाज्ययाजनं कृत्वा भुक्त्वा चान्नं विगर्हितम्। गायत्र्यष्टसहस्रं तु जपं कृत्वा विशुध्यति २२०

अहन्यहनि योऽधीते गायत्रीं वै द्विजोत्तमः। मासेन मुच्यते पापादुरगः कञ्चुकाद्यथा

गायत्रीं यस्तु विप्रो वै जपेत नियतः सदा। स याति परमं स्थानं वायुभूतः खमूर्तिमान्

प्रणवेन च संयुक्ता व्याहृतीः सप्त नित्यशः। गायत्रीं शिरसा सार्धं मनसा त्रिः पठेद्द्विजः

निगृह्य चाऽऽत्मनः प्राणान्प्राणायामो विधीयते। प्राणायामत्रयं कुर्यान्नित्यमेव समाहितः २२४

मानसं वाचिकं पापं कायेनैव च यत्कृतम्। तत्सर्वं[10] नाशमायाति प्राणायाम[11]प्रभावतः

ऋग्वेदमभ्यसेद्यस्तु यजुःशाखामथापि वा। सामानि सरहस्यानि सर्वपापैः[13] प्रमुच्यते

पावमानीं[12] तथा कौत्सीं पौरुषं[14] सूक्तमेव च। जप्त्वा[15] पापैः प्रमुच्येत सापित्र्यं[16] माधुच्छन्दसम्

---

१ ग. दानं देवतानां च पूजनम्। २ क. ङ. °न्नरः। स्ना°। ३ क ख.ग °मं सदा द्विजः। मु°। ४ ग. °त्र्याश्चैव जापनात्। अ°। ५ क. ख. घ. °च्च तथा पु°। ६ क. ख. घ. °त्वा आचम्य विधिवत्ततः। प्राणान्समापयेत्। ७ ग. °कं लोके पापं सर्वं विशे°। ८ घ. च. °क्षजाप्ये°। ९ क. घ. °तः स्वमू°। १० ग. °र्वं नश्यते तूर्णं प्राणायामत्रये कृते। ऋ°। घ. °र्वं नश्यति क्षिप्रं प्रा°। ११ घ. °मत्रये कृते। ऋ°। १२ च °मानीस्तथा। १३ ग घ. च. कौत्सं। १४ क. ङ. पुरुषं। १५ क. ङ. दत्त्वा। १६ च. सपवित्रं म°। १७ ग. घ. °त्र्यं मधु°।

मण्डलं(ल) ब्राह्मणं रुद्राः(द्रं) शुकोक्ताश्च बृहत्कथाः। वामदेव्यं बृहत्सामं जप्त्वा पापैः
प्रमुच्यते २२८
धर्मशास्त्रमिदं पुण्यं संवर्तेन तु भाषितम्। अधीत्य ब्राह्मणो गच्छेद्ब्रह्मणः सद्म शाश्वतम्
चान्द्रायणं तु सर्वेषां पापानां पावनं परम्। कृत्वा शुद्धिमवाप्नोति परमं स्थानमेव च
इति श्रीसंवर्तप्रणीतं धर्मशास्त्रं संपूर्णम्॥

(समाप्तेयं संवर्तस्मृतिः।)

---

१ क. ख. 'म संवर्त'।

ॐ तत्सद्ब्रह्मणे नमः ।

बौधायनस्मृतिः ।

प्रथमः प्रश्नः ।

(तत्र प्रथमोऽध्यायः ।)

उपदिष्टो धर्मः प्रतिवेदम् ॥ १ ॥ तस्यानुव्याख्यास्यामः ॥ २ ॥ स्मार्तो द्वितीयः ॥ ३ ॥ तृतीयः शिष्टागमः ॥ ४ ॥ शिष्टाः खलु विगतमत्सरा निरहंकाराः कुम्भीधान्या अलोलुपा दम्भदर्पलोभमोहक्रोधविवर्जिताः ॥ ५ ॥
धर्मेणाधिगतो येषां वेदः सपरिबृंहणः । शिष्टास्तदनुमानज्ञाः श्रुतिप्रत्यक्षहेतवः, इति ६
तदभावे दशावरा परिषत् ॥ ७ ॥ अथाप्युदाहरन्ति ॥ ८ ॥
चातुर्वैद्यं विकल्पी च अङ्गविद्धर्मपाठकः । आश्रमस्थास्त्रयो विप्राः पूर्वदेषा दशावरा ९
पञ्च वा स्युस्त्रयो वा स्युरेको वा स्यादनिन्दितः । प्रतिवक्ता तु धर्मस्य नेतरे तु सहस्रशः
यथा दारुमयो हस्ती यथा चर्ममयो मृगः । ब्राह्मणश्चानधीयानस्त्रयस्ते नामधारकाः ११
यद्वदन्ति तमोमूढा मूर्खा धर्ममजानतः । तत्पापं शतधा भूत्वा वक्तॄन्समधिगच्छति १२
बहुद्वारस्य धर्मस्य सूक्ष्मा दुरनुगा गतिः । तस्मान्न वाच्यो लोकेन बहुज्ञेनापि संशये १३
धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः । क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः १४
यथाऽश्मनि स्थितं तोयं मारुतार्कौ प्रणाशयेत् । तद्वत्कर्तरि यत्पापं जलवत्संप्रतीयते
शरीरं बलमायुश्च वयः कालं च कर्म च । समीक्ष्य धर्मविद्बुध्या प्रायश्चित्तानि निर्दिशेत्
अव्रतानाममन्त्राणां जातिमात्रोपजीविनाम् । सहस्रशः समेतानां परिषत्त्वं न विद्यते,
इति १७

पञ्चधा विप्रतिपत्तिः ॥ १८ ॥ पञ्चधा विप्रतिपत्तिर्दक्षिणतस्तथोत्तरतः ॥ १९ ॥
यानि दक्षिणतस्तानि व्याख्यास्यामः ॥ २० ॥ यथैतदनुपेतेन सह भोजनं स्त्रिया सह भोजनं पर्युषितभोजनं मातुलपितृष्वसृदुहितृगमनमिति ॥ २१ ॥ अथोत्तरत ऊर्णाविक्रयः सीधुपानमुभयतोदद्भिर्व्यवहार आयुधीयकं समुद्रसंयानमिति ॥ २२ ॥
इतरादितरस्मिन्कुर्वन्कुष्यतीतरादितरस्मिन् ॥ २३ ॥ तत्र तत्र देशप्रामाण्यमेव स्यात्

---

१ ख. परिषदे° । २ ख. °स्तान्यनुव्या° । ३ ख. °नमिति । तत्रेतरस्मिन्कु° । ४ ख. °त्र दे° ।

॥ २४ ॥ मिथ्यैतदिति गौतमः ॥ २५ ॥ उभयं चैव नाऽऽद्रियेत शिष्टस्मृतिविरोधदर्शनात् ॥ २६ ॥ प्राग्विनशनात्प्रत्यक्कालकाद्वनाद्दाक्षिणेन हिमवन्तमुदक्पारियात्रमेतदार्यावर्तं तस्मिन्य आचारः स प्रमाणम् ॥ २७ ॥ गङ्गायमुनयोरन्तरमित्येके ॥ २८ ॥ अथाप्यत्र भाल्लविनो गाथामुदाहरन्ति ॥ २९ ॥

पश्चात्तिसन्धुर्विधरणी सूर्यस्योदयनं पुरः । यावत्कृष्णा विधावन्ति तावद्धि ब्रह्मवर्चसमिति ३०

अवन्तयोऽङ्गमगधाः सुराष्ट्रा दक्षिणापथाः । उपावृत्तिसन्धुसौवीरा एते संकीर्णयोनयः

आरट्टान्कारस्करान्पुण्ड्रान्सौवीरान्वङ्गकलिङ्गान्प्रानूनानिति च गत्वा पुनस्तोमेन यजेत, सर्वपृष्ठया वा ॥ ३२ ॥ अथाप्युदाहरन्ति ॥ ३३ ॥

पद्भ्यां स कुरुते पापं यः कलिङ्गान्प्रपद्यते । ऋषयो निष्कृतिं तस्य प्राहुर्वैश्वानरं हविः

बहूनामपि दोषाणां कृतानां दोषनिर्णये । पवित्रेष्टिं प्रशंसन्ति सा हि पावनमुत्तमम्, इति

अथाप्युदाहरन्ति— ॥ ३६ ॥

वैश्वानरीं व्रातपतीं पवित्रेष्टिं तथैव चाऋतावृतौ प्रयुञ्जानः पापेभ्यो विप्रमुच्यते *पापेभ्यो वि[प्र]मुच्यत इति ॥ ३७ ॥

इति प्रथमप्रश्ने प्रथमोऽध्यायः ॥ १ ॥

(अथ प्रथमप्रश्ने द्वितीयोऽध्यायः ।)

अष्टाचत्वारिंशद्वर्षाणि पौराणं वेदब्रह्मचर्यम् ॥ १ ॥ चतुर्विंशतिं द्वादश वा प्रतिवेदम् ॥ २ ॥ संवत्सरावमं वा प्रतिकाण्डम् ॥ ३ ॥ ग्रहणान्तं वा जीवितस्यास्थिरत्वात् ॥ ४ ॥ कृष्णकेशोऽग्रीनादधीतेति श्रुतिः ॥ ५ ॥

नास्य कर्म नियच्छन्ति किंचिदा मौञ्जिबन्धनात् । वृत्त्या शूद्रसमो ह्येष यावद्वेदेन जायत इति ६

गर्भादि संख्या वर्षाणां तदष्टमेषु ब्राह्मणमुपनयीत ॥ ७ ॥ ऽयधिकेषु राजन्यम् ॥ ८ ॥ तस्मादेकाधिकेषु वैश्यम् ॥ ९ ॥ वसन्तो ग्रीष्मः शरदित्यृतवो वर्णानुपूर्व्येण ॥ १० ॥ गायत्रीत्रिष्टुब्जगतीभिर्यथाक्रमम् ॥ ११ ॥ आ षोडशादा द्वाविंशादा चतुर्विंशादित्यना(न)त्यय एषां क्रमेण ॥ १२ ॥ मौञ्जी धनुर्ज्या शाणीति मेखलाः ॥ १३ ॥ कृष्णरुरुबस्ताजिनान्याजिनानि ॥ १४ ॥ मूर्धललाटनासाग्रप्रमाणा याज्ञिकस्य

---

* न. विद्यत एतत्क. पुस्तके ।

---

१ ख. 'भयमेव । २ क. प्रागदर्शना' । ३ ख °र्विचरणासू° । ४ ख. पुरा । ५ ख. कर्माणि य° । ६ ख. °नयेत्त्र्यधि° ।

दण्डस्य दण्डा विशेषाः पूर्वोक्ताः ॥ १९ ॥ भवत्पूर्वां भिक्षामध्यां याचन्तां भिक्षां चरेत्सप्ताक्षरां क्षां च हिं च न वर्धयेत् ॥ १६ ॥ भवत्पूर्वां ब्राह्मणो भिक्षेत भवन्मध्यां राजन्यो भवदन्त्यां वैश्यः सर्वेषु वर्णेषु ॥ १७ ॥ ते ब्राह्मणाद्याः स्वकर्मस्थाः ॥१८॥ सदाऽरण्यात्समिध आहृत्याऽऽदध्यात्॥ १९ ॥ सत्यवादी हीमाननहंकारः पूर्वोत्थायी जघन्यसंवेशी ॥ २० ॥ सर्वत्राप्रतिहतगुरुवाक्योऽन्यत्र पातकात् ॥ २१ ॥ यावदर्थसंभाषी स्त्रीभिः ॥ २२ ॥ नृत्तगीतवादित्रगन्धमाल्योपानच्छत्रधारणाञ्जनाभ्यञ्जनवर्जी ॥ २३ ॥ दक्षिणं दक्षिणेन सव्यं सव्येन चोपसंगृह्णीयादीर्घमायुः स्वर्गं चेप्सन् ॥ २४ ॥ काममन्यस्मै साधुवृत्ताय गुरुणाऽनुज्ञातः ॥ २५ ॥ असावहं भो इति श्रोत्रे संस्पृश्य मनःसमाधानार्थम् ॥ २६ ॥ अधस्ताज्जान्वोरा पभ्याम् ॥ २७ ॥ नाऽऽसीनो नाऽऽसीनाय न शयानो न शयानाय नाप्रयतो नाप्रयताय ॥ २८ ॥ शक्तिविषये मुहूर्तमपि नाप्रयतः स्यात् ॥ २९ ॥ समिद्धार्युदकुम्भपुष्पान्नहस्तो नाभिवादयेद्यचान्यदप्येवं युक्तम् ॥ ३० ॥ न समवायेऽभिवादनमत्यन्तशः ॥ ३१ ॥ भ्रातृपत्नीनां युवतीनां च गुरुपत्नीनां जातवीर्यः ॥ ३२ ॥ नौशिलाफलककुञ्जरप्रासादकटेषु चक्रवत्सु चादोषं सहाऽऽसनम् ॥ ३३ ॥ प्रसाधनोच्छादनस्नापनोच्छिष्टभोजनानीति गुरोः ॥ ३४ ॥ उच्छिष्टवर्जनं तत्पुत्रेऽनूचाने वा ॥ ३५ ॥ प्रसाधनोच्छादनस्नापनवर्जनं च तत्पत्न्याम् ॥ ३६ ॥ यावन्तमनुधावेद्गच्छन्तमनुगच्छेत्तिष्ठन्तमनुतिष्ठेत् ॥ ३७ ॥ नाप्सु श्लाघमानः स्नायात् ॥३८॥ दण्डं इव प्लवेत्॥३९॥अब्राह्मणादध्ययनमापदि ॥ ४० ॥ शुश्रूषाऽनुव्रज्या च यावदध्ययनम् ॥ ४१ ॥ तयोस्तदेव पावनम्॥४२॥ भ्रातृपुत्रशिष्येषु चैवम् ॥ ४३ ॥ ऋत्विक्श्वशुरपितृव्यमातुलानां तु यवीयसां प्रत्युत्थायाभिभाषणम् ॥ ४४ ॥ प्रत्यभिवादं इति काव्यः ॥ ४५ ॥ शिशावाङ्गिरसे दर्शनात्* ॥ ४६ ॥ (+धर्मार्थौ यत्र न स्यातां ॥ ४७ ॥)

धर्मार्थौ यत्र न स्यातां शुश्रूषा वाऽपि तद्विधा। विद्यया सह मर्तव्यं न चैनामूषरे वपेत् ४८

अग्निरिव कक्षं दहति ब्रह्म पृष्ठ(ष्ट)मनादृतम् । तस्माद्वै शक्यं न ब्रूयाद्ब्रह्म मानमकुर्वता

मिति ४९

---

* अत्र द्वितीयाध्यायसमाप्तिः ख. पुस्तके । + एतच्चिह्नान्तर्गतं न ख. पुस्तके ।

---

१ ख. °न्तां चरें° । २ ख. °क्षरं णिक्षां च भिचन । ३ ख. °क्षिणेन सव्यं सव्येन चोपसंग्रहणं दीर्घ° । ४ ख. °मिद्धार्यु° । ५ ख. °वादयेदत्य° । ६ ख. °नां च गुरुपत्नीनां च जा° । ७ ख. °पनोच्छिष्टव° । ८ ख. °दण्डवदाप्लवेत् । ९ ख. °भिवादनम् । १० ख. °दन इति काम्यः । शिं° । ११ ख. °मित्येते वै वचेऽस्मै वे° ।

एवास्मै वचो वेदयन्ते ब्रह्म वै मृत्यवे प्रजाः प्रायच्छत्तस्मै ब्रह्मचारिणमेव न प्रायच्छत्सोऽब्रवीदस्तु मह्यमप्येतस्मिन्भाग इति यामेव रात्रिं समिधं नाहराता इति ॥ ५० ॥ तस्माद्ब्रह्मचारी यां रात्रिं समिधं नाऽऽहरत्यायुष एव तामवदाय वसति तस्माद्ब्रह्मचारी समिधमाहरेन्नेदायुषोऽवदाय वसानीति ॥ ५१ ॥ दीर्घसत्रं ह वा एष उपैति यो ब्रह्मचर्यमुपैति स यामुपयन्त्समिधमादधाति सा प्रायणीयाऽथ यां स्नास्यन्त्सोदयनीयाऽथ या अन्तरेण सत्र्या एवास्य ताः ॥ ५२ ॥ ब्राह्मणो वै ब्रह्मचर्यमुपयंश्चतुर्धा भूतानि प्रविशत्यग्निं पदा मृत्युं पदाऽऽचार्यं पदाऽऽत्मन्येव चतुर्थः पादः परिशिष्यते स यदग्नौ समिधमादधाति य एवास्याग्नौ पादस्तमेव तेन परिक्रीणाति तं संस्कृत्याऽऽत्मन्धत्ते स एनमाविशत्यथ यदात्मानं दरिद्रीकृत्याहीर्भूत्वा भिक्षते ब्रह्मचर्यं चरति य एवास्य मृत्यौ पादस्तमेव तेन परिक्रीणाति तं संस्कृत्याऽऽत्मन्धत्ते स एनमाविशत्यथ यदाचार्यवचः करोति य एवास्याऽऽचार्ये पादस्तमेव तेन परिक्रीणाति तं संस्कृत्याऽऽत्मन्धत्ते स एनमाविशत्यथ यत्स्वाध्यायमधीते य एवास्याऽऽत्मनि पादस्तमेव तेन परिक्रीणाति तं संस्कृत्याऽऽत्मन्धत्ते स ऐनमाविशति न ह वै स्नात्वा भिक्षेतापि ह वै स्नात्वा भिक्षां चरत्यपि ज्ञातीनामञ्जनादापि पितृणामन्याभ्यः क्रियाभ्यः स यदन्यां भिक्षितव्यां न विन्देतापि वा स्वयमेवाऽऽचार्यजायां भिक्षेताथो स्वां मातरं नैनं सप्तम्यभिक्षिताऽतीयात् ॥ ५३ ॥ भैक्ष्य(क्ष)स्याचरणे दोषः पावकस्यासमिन्धने। सप्तरात्रमकृत्वैतद्वकीर्णिव्रतं चरेत् ५४

तमेवं विद्वांसमेवं चरन्तं सर्वे वेदा आविशन्ति यथा ह वा अग्निः समिद्धो रोचत एवं ह वा एष स्नात्वा रोचते य एवं विद्वान्ब्रह्मचर्यं चरतीति ब्राह्मणमिति ब्राह्मणम् ॥ ५५ ॥

इति प्रथमप्रश्ने द्वितीयोऽध्यायः ॥ २ ॥

(अथ प्रथमप्रश्ने तृतीयोऽध्यायः।)

अथ स्नातकस्य ॥ १ ॥ अन्तर्वास उत्तरीयम् ॥ २ ॥ वैणवं दण्डं धारयेत्॥३॥ सोदकं च कमण्डलुम् ॥ ४ ॥ द्वियज्ञोपवीती ॥ ५ ॥ उष्णीषमजिनमुत्तरीयमुपा-

---

१ ख. °हरेता°। २ ख. °त्रं वा। ३ ख. एव स्युस्ता ब्रा°। ४ ख. °न्येवास्य च°। ५ ख. एवैनमा°। ६ ख. °त्यविज्ञाननाश°। ७ क. वा स्वामे°। ८ ख. °रति हि ब्राह्मणमिति हि ब्राह्मणम्। भ°। ९ ख. धारयन्। १० ख. °म्। य°।

नहौ छत्रं चोपासनं दर्शपूर्णमासौ ॥ ६ ॥ पर्वसु च केशश्मश्रुलोमनखवापनम् ॥७॥ तस्य वृत्तिः ॥ ८ ॥ ब्राह्मणराजन्यवैश्यरथकारेष्वामं लिप्सेत ॥ ९ ॥ भैक्षं वा ॥ १० ॥ वाग्यतस्तिष्ठेत् ॥ ११ ॥ सर्वाणि चास्य देवपितृसंयुक्तानि पाकयज्ञसंस्थानि भूतिकर्माणि कुर्वीतेति ॥ १२ ॥ एतेन विधिना प्रजापतेः परमेष्ठिनः परमर्षयः परमां काष्ठां गच्छन्तीति ह स्माऽऽह बौधायनः ॥ १३ ॥

इति प्रथमप्रश्ने तृतीयोऽध्यायः ॥ ३ ॥

(अथ प्रथमप्रश्ने चतुर्थोऽध्यायः।)

अथ कमण्डलुचर्यामुपदिशन्ति ॥ १ ॥

छागस्य दक्षिणे कर्णे पाणौ विप्रस्य दक्षिणे। अप्सु चैव कुशस्तम्बे पावकः परिपठ्यते २

तस्माच्छौचं कृत्वाँ पाणिना परिमृजीत पर्यग्निकरणं हि तत् ॥ ३ ॥ उद्दीप्यस्व जातवेद इति पुनर्दाहाद्विशिष्यते ॥ ४ ॥ तत्रापि किंचित्संस्पृष्टं मनसि मन्येत कुशैर्वा तृणैर्वा प्रज्वाल्य प्रदक्षिणं परिदहनम् ॥ ५ ॥ अत ऊर्ध्वं श्ववायसप्रभृत्युपहतानामग्निवर्ण इत्युपदिशन्तिँ ॥ ६ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः ॥ ७ ॥ भग्ने कमण्डलौ व्याहृतिभिः शतं जुहुयाज्जपेद्वा ॥ ८ ॥

भूमिर्भूमिमगान्माता मातरमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति ९

कपालानि संहृत्याप्सु प्रक्षिप्य सावित्रीं दशावरां कृत्वा पुनरेवान्यं गृह्णीयात् ॥१०॥

वरुणमाश्रित्यैतत्ते वरुण पुनरेतु मोमिति अक्षरं ध्यायेत् ॥ ११ ॥

शूद्राद्ब्रह्म शतं कुर्याद्वैश्यादर्धशतं स्मृतम्। क्षत्रियात्पञ्चविंशस्तु ब्राह्मणादश कीर्तिताः १२

अस्तमित आदित्य उदकं गृह्णीयान्न गृह्णीयादिति मीमांसन्ते ब्रह्मवादिनः॥ १३॥

गृह्णीयादित्येतदपरम् ॥१४॥ यावदुदकं गृह्णीयात्तावत्प्राणमायच्छेत्, अग्निर्हि वै क्षुदकं गृह्णाति ॥ १५ ॥ कमण्डलूदकेनाभिषिक्तपाणिपादो यावदार्द्रं तावदशुचिः परेषामात्मानमेव पूतं करोति नान्यत्कर्म कुर्वीतेति विज्ञायते ॥ १६ ॥ अपि वा प्रतिशौचमा मणिबन्धाच्छुचिरिति बौधायनः ॥ १७ ॥ अथाप्युदाहरन्ति ॥ १८ ॥

कमण्डलुर्द्विजातीनां शौचार्थं विहितः पुरा। ब्रह्मणा मुनिमुख्यैश्च तस्मात्तं धारयेत्सदा

ततः शौचं ततः पानं संध्योपासनमेव च। निर्विशङ्केन कर्तव्यं यदीच्छेच्छ्रेय आत्मनः

कुर्याच्छुद्धेन मनसा न चित्तं दूषयेद्बुधः ॥ २० ॥

---

१ ख. °सनोद°। २ ख. °ति य ए°। ३ ख. °त्वा प°। ४ ख. °न्ति भ°। ५ क. °रेवमामो°।

सह कमण्डलुनोत्पन्नः स्वयंभूस्तस्मात्कमण्डलुना चरेत् ॥ २१ ॥ मूत्रपुरीषे कुर्वन्दक्षिणे हस्ते गृह्णाति सव्य आचमनीयमेतत्सिध्यति साधूनाम् ॥ २२ ॥
यथा हि सोमसंयोगाच्चमसो मेध्य उच्यते। अपां तथैव संयोगान्नित्यो मेध्यः कमण्डलुः पितृदेवाग्निकार्येषु तस्मात्तं परिवर्जयेत् ॥ २४ ॥

तस्माद्विना कमण्डलुना नाध्वानं व्रजेन्न सीमान्तं न गृहाद्गृहम् ॥ २५ ॥ पदमपि न गच्छेदिषुमात्रादित्येके ॥ २६ ॥ यदिच्छेद्धर्मसंततिमिति बौधायनः ॥ २७ ॥ ऋग्विधेनेति वाग्वदति(?) ॥ २८ ॥

इति प्रथमप्रश्ने चतुर्थोऽध्यायः ॥ ४ ॥

(अथ प्रथमप्रश्ने पञ्चमोऽध्यायः।)

अथातः शौचाधिष्ठानम् ॥ १ ॥
आद्भिः शुध्यन्ति गात्राणि बुद्धिर्ज्ञानेन शुध्यति। अहिंसया च भूतात्मा मनः सत्येन शुध्यति, इति २

मनःशुद्धिरन्तःशौचम् ॥ ३ ॥ बहिःशौचं व्याख्यास्यामः ॥ ४ ॥ कौशं सूत्रं वा त्रिस्त्रिवृद्यज्ञोपवीतम् ॥ ५ ॥ आ नाभेः ॥ ६ ॥ दक्षिणं बाहुमुद्धृत्य सव्यमवधाय शिरोऽवदध्यात् ॥ ७ ॥ विपरीतं पितृभ्यः ॥ ८ ॥ कण्ठेऽवसक्तं निवीतम् ॥ ९ ॥ अधोऽवसक्तमधोवीतम् ॥ १० ॥ प्राङ्मुख उदङ्मुखो वाऽऽसीनः शौचमारभेत शुचौ देशे दक्षिणं बाहुं जान्वन्तरा कृत्वा प्रक्षाल्य पादौ पाणी चाऽऽसमणिबन्धात् ॥ ११ ॥ पादप्रक्षालनोच्छेषणेन नाऽऽचामेत् ॥ १२ ॥ यद्याचामेद्द्वौ स्रावयित्वाऽऽचामेत्॥१३॥ ब्राह्मेण तीर्थेनाऽऽचामेत्॥१४॥ अङ्गुष्ठमूलं ब्राह्मं तीर्थम् ॥१५॥ अङ्गुष्ठाग्रं पित्र्यम्॥१६॥ अङ्गुल्यग्रं दैवम्॥१७॥ अङ्गुलिमूलमार्षम्॥१८॥ नाङ्गुलीभिर्न सबुद्बुदाभिर्न सफेनाभिर्नोष्णाभिर्न क्षाराभिर्न लवणाभिर्न कलुषाभिर्न विवर्णाभिर्न दुर्गन्धरसाभिर्न हसन्न जल्पन्न तिष्ठन्न विलोकयन्न प्रहो न प्रणतो न मुक्तशिखो न प्रावृतकण्ठो न वेष्टितशिरा न त्वरमाणो नायज्ञोपवीती न प्रसारितपादो न बद्धकक्ष्यो न बहिर्जानुः शब्दमकुर्वन्स्त्रिरपो हृदयंगमाः पिबेत् ॥ १९ ॥

---

१ ख. यदीच्छे°। २ ख. °बन्धनात्°। ३ ख. °र्नसफे°। ४ ख. °र्न कटुकाभिर्न ह°। ५ ख. °छन्नावलो°। ६ ख. °कर्णो नवे°। ७ ख. °दोवाऽऽ(ना)बद्धकच्छोनबद्ध°।

त्रिः परिमृजेत् ॥ २० ॥ द्विरित्येके ॥ २१ ॥ सकृदुभयं शूद्रस्य स्त्रियाश्च ॥ २२ ॥ अथाप्युदाहरन्ति ॥ २३ ॥

गताभिर्हृदयं विप्रः कण्ठ्याभिः क्षत्रियः शुचिः। वैश्योऽद्भिः प्राशिताभिः स्यात्स्त्रीशूद्रौ स्पृश्य चान्ततः, इति २४

दन्तवद्दन्तसक्तेषु दन्तवत्तेषु धारणा। स्रस्तेषु तेषु नाऽऽचामेत्तेषां संस्रावयच्छुचिः, इति

अथाप्युदाहरन्ति—॥२६॥

दन्तवद्दन्तलग्नेषु यच्चाप्यन्तर्मुखे भवेत्। आचान्तस्यावशिष्टं स्यान्निगिरन्नेव तच्छुचिः, इति २७

खान्यद्भिः संस्पृश्य पादौ नाभिं शिरः सव्यं पाणिमन्ततः ॥ २८ ॥ तैजसं चेदादायोच्छिष्टी स्यात्तदुदस्याऽऽचम्याऽऽदास्यन्नद्भिः प्रोक्षेत् ॥२९॥ अथ चेदन्नेनोच्छिष्टी स्यात्तदुदस्याऽऽचम्याऽऽदास्यन्नद्भिः प्रोक्षेत् ॥ ३० ॥ अथ चेदद्भिरुच्छिष्टी स्यात्तदुदस्याऽऽचम्याऽऽदास्यन्नद्भिः प्रोक्षेत् ॥ ३१ ॥ एतदेव विपरीतममत्रे ॥ ३२ ॥ वानस्पत्ये विकल्पः ॥ ३३ ॥ तैजसानामुच्छिष्टानां गोशन्मृद्भस्मभिः परिमार्जनमन्यतमेन वा ॥ ३४ ॥ ताम्ररजतसुवर्णानामम्लैः ॥३५॥ अमत्राणां दहनम् ॥ ३६ ॥ दारवाणां तक्षणम् ॥ ३७ ॥ वैणवानां गोमयेन ॥ ३८ ॥ फलमयानां गोवालरज्ज्वा ॥ ३९ ॥ कृष्णाजिनानां बिल्वतण्डुलैः ॥ ४० ॥ कुतपानामरिष्टैः ॥ ४१ ॥ और्णानामादित्येन ॥ ४२ ॥ क्षौमाणां गौरसर्षपकल्केन ॥ ४३ ॥ मृदा चेलानाम् ॥ ४४ ॥ चेलवच्चर्मणाम् ॥ ४५ ॥ तैजसवदुपलमणीनाम् ॥ ४६॥ दारुवदस्थ्नाम् ॥ ४७ ॥ क्षौमवच्छङ्खशृङ्गशुक्तिदन्तानाम्, पयसा वा ॥ ४८ ॥ वक्षुर्घ्राणानुकूल्याद्वा मूत्रपुरीषासृक्शुक्रकुणपस्पृष्टानां पूर्वोक्तानामन्यतमेन त्रिःसप्तकृत्वः परिमार्जनम् ॥ ४९ ॥ अतैजसानामेवंभूतानामुत्सर्गः ॥ ५० ॥ वचनाद्यज्ञे चमसपात्राणाम् ॥ ५१ ॥ न सोमेनोच्छिष्टा भवन्तीति श्रुतिः ॥ ५२ ॥

कालोऽग्निर्मनसः शुद्धिरुदकाद्युपलेपनम्। अविज्ञातं च भूतानां षड्विधं शौचमुच्यते, इति॥५३॥

अथाप्युदाहरन्ति ॥ ५४ ॥

कालं देशं तथाऽऽत्मानं द्रव्यं द्रव्यप्रयोजनम्। उपपत्तिमवस्थां च विज्ञाय शौचं शौचज्ञः कुशलो धर्मेप्सुः समाचरेत् ५५

---

१ ख. °न्तलग्नेषु द°। २ ख °न्तसक्तेषु यच्चाप्यन्तर्मुखं भ°। ३ ख. °च्छिष्टः स्यत्त°। ४ ख. °दाद्भिः सोच्छिष्टः स्यात्त°। ५ ख. °ष्टैः। ऊर्णा°। ६ ख. °म्। क्षौ°। ७ ख. °वा। मू°। ८ ख. °सभिः प°। ९ ख. च शौचज्ञः। १० ख. °र्मेष्टः स°।

नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम्। ब्रह्मचारिगतं भैक्षं नित्यं मेध्यमिति श्रुतिः
वत्सः प्रस्रवणे मेध्यः शकुनिः फलशातने। स्त्रियश्च रतिसंसर्गे श्वा मृगग्रहणे शुचिः ५७
आकराः शुचयः सर्वे वर्जयित्वा सुराकरम्। अदूष्याः संतता धारा वातोद्धूताश्च रेणवः
अमेध्येषु च ये वृक्षा उत्पाः पुष्पफलोपगाः। तेषामपि न दुष्यन्ति पुष्पाणि च फलानि च
चैत्यवृक्षं चितिं यूपं चण्डालं वेदविक्रयम्। एतानि ब्राह्मणः स्पृष्ट्वा सचेलो जलमाविशेत् ६०
आत्मशय्यासनं वस्त्रं जायापत्यं कमण्डलुः। * शुचीन्यात्मन एतानि परेषामशुचीनि तु
आसनं शयनं यानं [1]पथः पथि तृणानि च। श्वचण्डालपतितस्पृष्टं मारुतेनैव शुध्यति ६२
खलक्षेत्रेषु यद्धान्यं कूपवापीषु यज्जलम्। अभोज्यादपि तद्भोज्यं यच्च गोऽगतं पयः ६३
त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्। अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते
आपः पवित्रं भूमिगता गोतृप्तिर्यासु जायते। अव्याप्ताश्चेदमेध्येन गन्धवर्णरसान्विताः
भूमेस्तु संमार्जनप्रोक्षणोपलेपनावस्तरणोल्लेखनैर्यथास्थानं दोषविशेषात्पाँयित्यम् ॥ ६६ ॥ अथाप्युदाहरन्ति ॥ ६७ ॥
गोचर्ममात्रमब्बिन्दुर्भूमेः शुध्यति पातितः। समूढमसमूढं वा यत्रामेध्यं न लक्ष्यत इति ६८
परोक्षमधिश्रितस्यान्नस्यावद्योत्याभ्युक्षणम् ॥ ६९ ॥ तथाऽऽपणे(णी)यानां च भक्ष्याणाम् ॥ ७० ॥ बीभत्सवः शुचिकामा हि देवा नाश्रद्दधानाय हविर्जुषन्त इति ॥ ७१ ॥
शुचेरश्रद्दधानस्य श्रद्दधानस्य चाशुचेः। मीमांसित्वोभयं देवाः सममन्नमकल्पयन् ७२
प्रजापतिस्तु तानाह न समं विषमं हि तत्। हतमश्रद्दधानस्य श्रद्धापूतं विशिष्यत इति ७३
अथाप्युदाहरन्ति ॥ ७४ ॥
अश्रद्धा परमः पाप्मा श्रद्धा हि परमं तपः। तस्मादश्रद्धया दत्तं हविर्नाश्नन्ति देवताः ७५
इष्ट्वा दत्त्वाऽपि वा मूर्खः स्वर्गं न हि स गच्छति। शङ्काविहतचारित्रो यः स्वाभिप्रायमाश्रितः ७६
शास्त्रातिगः स्मृतो मूर्खो धर्मतन्त्रोपरोधनादिति ॥ ७७
शाकपुष्पफलमूलौषधीनां तु प्रक्षालनम्॥ ७८ ॥ शुष्कं तृणमयाङ्गिकं काष्ठं लोष्टं वा

---

* एतदर्धस्थानेऽयं पाठः ख. पुस्तके "आत्मनः शुचिरेतानि परेषामशुचिर्भवेत्" इति।

---

१ ख. 'त्यं शुद्धमि°। २ ख. °चेलः स्नानमाचरेत्। भा°। ३ ख. नावापथतं। ४ ख. °चाऽभिपूजितम्। भा°। ५ ख. °न्विता इति। भू। ६ ख. °त्प्राशस्त्यम्। ७ ख. 'ङ्गिकका°।

तिरस्कृत्याहोरात्रयोरुदग्दक्षिणामुखः प्रावृत्य शिर[1]उच्चरेदवमेहेद्वा ॥ ७९ ॥ मूत्रे मृदाऽद्भिः प्रक्षालनम् ॥८०॥ त्रिः पाणेः ॥८१॥ तद्वत्पुरीषे ॥८२॥ पर्यायाद्भिस्त्रिः पायोः पाणेश्च ॥ ८३ ॥ मूत्रवद्रेतस उत्सर्गे ॥ ८४ ॥ नीवीं विस्रस्य परिधायाप उपस्पृशेत् ॥ ८५ ॥ आर्द्रैतृणं गोमयं भूमिं वा समुपस्पृशेत् ॥ ८६ ॥ नाभेरधःस्पर्शनं कर्मयुक्तो वर्जयेत् ॥ ८७ ॥ ऊर्ध्वं वै पुरुषस्य नाभ्यै मेध्यमवाचीनममेध्यमिति श्रुतिः ॥८८॥ शूद्राणामार्याधिष्ठितानामर्धमासि[5] मासि वा वपनमार्यवदाचमनकल्पः ॥८९॥ वैश्यः कुसीदमुपजीवेत् ॥ ९० ॥ पञ्चविंशतिस्त्वेव पञ्चमाषकी स्यात् ॥ ९१ ॥

अथाप्युदाहरन्ति ॥ ९२ ॥

यः समर्घमृणं गृह्य महार्घं संप्रयोजयेत् । स वै वार्धुषिको नाम सर्वधर्मेषु गर्हितः ९३

वृद्धिं च भ्रूणहत्यां च तुलया समतोलयत् । अतिष्ठद्भ्रूणहा कोट्यां वार्धुषिः समकम्पत, इति ९४

गोरक्षकान्वाणिजकांस्तथा कारुकुशीलवान् । प्रेष्यान्वार्धुषिकांश्चैव विप्राञ्शूद्रवदाचरेत्

कामं तु परिलुप्तकृत्याय कदर्याय नास्तिकाय पापीयसे पूर्वौ दद्याताम् ॥ ९६ ॥

अयज्ञेनाविवाहेन वेदस्योत्सादनेन च । कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ९७

ब्राह्मणातिक्रमो नास्ति मूर्खे मन्त्रविवर्जिते । ज्वलन्तमग्निमुत्सृज्य न हि भस्मनि हूयते

गोभिरश्वैश्च यानैश्च कृष्या राजोपसेवया । कुलान्यकुलतां यान्ति यानि हीनानि मन्त्रतः

मन्त्रतस्तु समृद्धानि कुलान्यल्पधनान्यपि । कुलसंख्यां च गच्छन्ति कर्षन्ति च महद्यशः

+वेदः कृषिविनाशाय कृषिर्वेदविनाशिनी । शक्तिमानुभयं कुर्यादशक्तस्तु कृषिं त्यजेत्

न वै देवान्पीवरोऽसंयतात्मा रोरूयमाणः ककुदी समश्नुते ।

चलघुन्दी रभसः कामवादी कृशास इत्यणवस्तत्र यान्ति ॥ १०२

यद्यौवने चरति विभ्रमेण सद्वाऽसद्वा यादृशं वा यदा वा ।

उत्तरे चेद्वयसि साधुवृत्तस्तदेवास्य भवति नेतराणि ॥ १०३

शोचेत मनसा नित्यं दुष्कृतान्यनुचिन्तयन् । तपस्वी चाप्रमादी च ततः पापात्प्रमुच्यते

स्पृशन्ति बिन्दवः पादौ य आचामयतः परान् । न तैर्दुश्चेष्टभावः स्यात्तुरयास्ते भूमिगैः सहेति १०५

+ एतदर्धस्थानेऽयं पाठः ख. पुस्तके–"कृषिर्वेदविनाशाय वेदः कृषिविनाशकः" इति ।

---

१ ख. °रेदेव° । २ ख. °र्यायाद्भिस्त्रिः । ३ क. आर्द्रं । ४ ख. °सि वा । ५ ख. °मधारयन् ।

सपिण्डेष्वादशाहम् ॥१०६॥ सपिण्डेष्वादशाहमाशौचमिति जननमरणयोराधिक्यस्य वर्दस्यृत्विग्दीक्षितब्रह्मचारिवर्जम् ॥ १०७ ॥ सपिण्डता त्वा सप्तमात्सपिंडेषु ॥ १०८ ॥

आ सप्तमासादा दन्तजननाद्दोदकोपस्पर्शनम्[1]। पिण्डोदकक्रिया प्रेते नात्रिवर्षे विधीयते १०९

आ दन्तजननाद्वाऽपि दहनं[2] च न कारयेत्। अप्रत्तासु च कन्यासु प्रत्तास्वेके हि कुर्वते ११०

लोकसंग्रहणार्थं हि तदमन्त्राः स्त्रियो मताः। स्त्रीणां[3] कृतविवाहानां त्र्यहाच्छुध्यन्ति बान्धवाः १११

यथोक्तेनैव कल्पेन शुध्यन्ति च सनाभयः, इति। ११२

अपि च प्रपितामहः पितामहः पिता स्वयं सोदर्या भ्रातरः सवर्णायाः पुत्राः पौत्राः प्रपौत्रस्तत्पुत्रवर्जं तेषां च पुत्रपौत्रमविभक्तदायं सपिण्डानाचक्षते ॥ ११३ ॥ विभक्तदायानपि सकुल्यानाचक्षते ॥ ११४ ॥ असत्स्वन्येषु तद्वामी ह्यर्थो भवति ॥ ११५ ॥ सपिण्डाभावे सकुल्यः ॥ ११६ ॥ तदभावे पिताऽऽचार्योऽन्तेवास्यृत्विग्वा हरेत् ॥११७॥ तदभावे राजा तत्स्वं त्रैविद्यवृद्धेभ्यः संप्रयच्छेत् ॥ ११८॥ न त्वेव कदाचित्स्वयं राजा ब्राह्मणस्वमाददीत ॥ ११९ ॥ अथाप्युदाहरन्ति ॥ १२० ॥

* ब्रह्मस्वं पुत्रपौत्रघ्नं विषमेकाकिनं हरेत्। न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते तस्माद्राजा ब्राह्मणस्वं नाऽऽददीत परम ह्येतद्विषं यद्ब्राह्मणस्वमिति ॥ १२२ ॥

जननमरणयोः संनिपाते समानो दशरात्रः ॥ १२३ ॥ अथ यदि दशरात्रात्संनिपतेयुराद्यं दशरात्रमाशौचमा नवमाद्दिवसात्[4] ॥ १२४ ॥ जनने तावन्मातापित्रोर्दशाहमाशौचम् ॥ १२५ ॥ मातुरित्येके तत्परिहरणात् ॥१२६॥ पितुरित्यपरे शुक्रप्राधान्यात् ॥ १२७ ॥ अयोनिजा ह्यपि पुत्राः श्रूयन्ते मातापित्रोरेव तु संसर्गसामान्यात् ॥ १२८ ॥ मरणे तु यथा बालं पुरस्कृत्य यज्ञोपवीतान्यपसव्यानि

---

*एतद्वचनस्थानेऽयं पाठः ख. पुस्तके-"न विषं विषमित्याहुर्ब्रह्मस्वं विषमुच्यते। विषमेकाकिनं हन्ति ब्रह्मस्वं पुत्रपौत्रकम्" इति।

---

१ ख. °दन्ति। ऋत्वि°। २ ख.°म्। असपिण्डत्वात्सपि°। ३ ख. °म्। प्रेतानां त्रिवर्षं उदकक्रिया वि°। ४ ख. °नं नास्य का°। ५ ख. स्त्रीणामकृ°। ६ ख. स्वसोद°। ७ ख. °निपातेयु°।

कृत्वा तीर्थमवतीर्य सकृत्सकृन्निर्मज्ज्योन्मज्ज्योत्तीर्याऽऽचम्य तत्प्रत्ययमुदकेना-
सिच्यातं एवोत्तीर्याऽऽचम्य गृहद्वार्यङ्गारमुदकामिति संस्पृश्याक्षारलवणाशिनो
दशाहं कटमासीरन् ॥ १२९ ॥ एकादश्यां द्वादश्यां वा श्राद्धकर्म ॥ १३० ॥
शेषक्रियायां लोकोऽनुरोद्धव्यः ॥ १३१ ॥ अत्राप्यसपिण्डेषु यथासत्रं त्रिरात्रमहो-
रात्रमेकाहमिति कुर्वीत ॥ १३२ ॥
आचार्योपाध्यायतत्पुत्रेषु त्रिरात्रम् ॥ १३३ ॥ ऋत्विजां च ॥ १३४ ॥ शिष्यस-
तीर्थ्यसब्रह्मचारिषु त्रिरात्रमहोरात्रमेकाहमिति कुर्वीत ॥ १३५ ॥ गर्भस्रावे गर्भ-
माससंमिता रात्रयः स्त्रीणाम् ॥ १३६ ॥ परशवोपस्पर्शनेऽनभिसंधिपूर्वं सचेलोऽपः
स्पृष्ट्वा सद्यः शुद्धो भवति ॥ १३७ ॥ अभिसंधिपूर्वं त्रिरात्रम् ॥ १३८ ॥
ऋतुमत्यां च यस्ततो जायते सोऽभिशस्त इति व्याख्यातान्यस्यै व्रतानि ॥१३९॥
+वेदविक्रयिणं यूपं पतितं चितिमेव च । स्पृष्ट्वा समाचरेत्स्नानं श्वानं चण्डालमेव च
ब्राह्मणस्य व्रणद्वारे पूयशोणितसंभवे । कृमिरुत्पद्यते तत्र प्रायश्चित्तं कथं भवेत् १४१
गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम् । त्र्यहं स्नात्वा च पीत्वा च कृमिदष्टः शुचि-
र्भवेत् १४२
शुनोपहतः सचेलोऽवगाहेत ॥ १४३ ॥ प्रक्षाल्य वा तं देशमग्निना संस्पृश्य
पुनः प्रक्षाल्य पादौ चाऽऽचम्य प्रयतो भवति ॥१४४॥ अथाप्युदाहरन्ति ॥१४५॥
शुना दष्टस्तु यो विप्रो नदीं गत्वा समुद्रगाम् । प्राणायामशतं कृत्वा घृतं प्राश्य विशु-
ध्यति १४६
सुवर्णरजताभ्यां वा गवां शृङ्गोदकेन वाऽनवेक्ष्य कलशैः स्नात्वा सद्य एव शुचिर्भवेत्, इति
अभक्ष्याः पशवो ग्राम्याः ॥ १४८ ॥ क्रव्यादाः शकुनयश्च ॥ १४९ ॥ तथा
कुक्कुटसूकरम् ॥१५०॥ अन्यत्राजाविभ्यः ॥१५१॥ भक्ष्याः श्वाविद्गोधाशशशल्य-
ककच्छपखड्गाः खड्गवर्जाः पञ्च पञ्चनखाः ॥ १५२ ॥ तथैर्यहरिणपृषतमहिष-
वराहकुलङ्गाः कुलवङ्गवर्जाः पञ्च द्विखुरिणः ॥ १५३ ॥ पक्षिणस्तित्तिरिकपोतक-
पिञ्जलवार्ध्रीणसमयूरवारणा वारणवर्जाः पञ्च विष्किराः ॥ १५४ ॥ मत्स्याः
सहस्रदंष्ट्रशिलिचिमो वर्मिबृहच्छिरोमशकरिरोहितराजीवाः ॥ १५५ ॥ अनिर्दशा-
हसंधिनीक्षीरमपेयम् ॥ १५६ ॥ विवत्सान्यवत्सयोश्च ॥ १५७ ॥ आविकमौष्ट्रिक-

+ एतद्वचनं न विद्यते ख. पुस्तके ।

१ ख. °ज्ज्योत्ती° । २ ख. °कमुत्सिच्या° । ३ ख. °क्रियायालो° । ४ ख. कुर्वन्ति । ५ ख. च
वर्षि° । ६ ख. कुर्वन्ति । ७ ख. यतो । ८ ख. °श्च ततः शुनेः । सु° । ९ क. °म्याः । अभक्ष्याः पशवो
ग्राम्याः । क° । १० ख. कुलङ्ग° । ११ ख. वर्मिबृहच्छिरसमशकरो° ।

मैकशफमपेयम् ॥ १५८ ॥ अपेयपयःपाने कृच्छ्रोऽन्यत्र गव्यात् ॥ १५९ ॥ गव्ये तु त्रिरात्रमुपवासः ॥ १६० ॥ पर्युषितं शाकयूषमांससर्पिःघृतधानागुडदधि-मधुसक्तुवर्जम् ॥ १६१ ॥ भुक्तानि तथा जातो गुडः ॥ १६२ ॥ श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य तैष्यां माघ्यां वोत्सृजेयुरुत्सृजेयुः ॥ १६३ ॥

इति प्रथमप्रश्ने पञ्चमोऽध्यायः ॥ ५ ॥

(अथ प्रथमप्रश्ने षष्ठोऽध्यायः ।)

शुचिमध्वरं देवा जुषन्ते ॥ १ ॥ शुचिकामा हि देवाः शुचयश्च ॥ २ ॥ तदेषाऽभिवदति ॥ ३ ॥

शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।
ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः, इति ४

अहतं वाससां शुचिस्त(चि त)स्माद्घर्त्विक्चेज्यासंयुक्तं स्यात्सर्वं तदहतैर्वासोभिः कुर्यात् ॥ ५ ॥ प्रक्षालितोपवातान्यक्लिष्टानि वासांसि पत्नीयजमानावृत्विजश्च परिदधीरन् ॥ ६ ॥ एवं प्रक्रमादूर्ध्वम् ॥ ७ ॥ दीर्घसोमेषु सत्रेषु चैवम् ॥ ८ ॥ यथासमाम्नातं च ॥ ९ ॥ यथैतदभिचरणीयेष्वष्टिपशुसोमेषु लोहितोष्णीषा लोहितवाससश्चर्त्विजः प्रचरेयुश्चित्रवाससश्चित्रासङ्गा वृषाकपाविति च ॥ १० ॥ अग्न्याधाने क्षौमाणि वासांसि तेषामलाभे कार्पासिकान्यौर्णानि वा भवन्ति ॥ ११ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां मृदाऽद्भिरिति प्रक्षालनम् ॥ १२ ॥ वासोवत्पार्ष्यजिनकलानाम् ॥ १३ ॥ दस्कलवत्कृष्णाजिनानाम् ॥ १४ ॥ न परिहितमधिरूढमप्रक्षालितं प्रावरणम् ॥ १५ ॥ नापल्पूलितं मनुष्यसंयुक्तं देवत्रा युञ्ज्यात् ॥ १६ ॥ घनाया भूमेरुपघात उपलेपनम् ॥ १७ ॥ सुषिरायाः कर्षणम् ॥ १८ ॥ क्लिन्नाया मेध्यमाहृत्य प्रच्छादनम् ॥ १९ ॥ चतुर्भिः शुध्यते भूमिर्गोभिराक्रमणात्खननाद्दहनादभिवर्षणात् ॥ २० ॥ पञ्चमाच्चोपलेपनात्षष्ठात्कालात् ॥ २१ ॥ असंस्कृतायां भूमौ न्यस्तानां तृणानां प्रक्षालनम् ॥ २२ ॥ परोक्षोपहतानामभ्युक्षणम् ॥ २३ ॥ एवं क्षुद्रसमिधाम् ॥ २४ ॥ महतां काष्ठानामुपघाते प्रक्षाल्याव्रश्चोपणम् ॥ २५ ॥ बहूनां तु प्रोक्षणम् ॥ २६ ॥ दारुमयाणां पात्राणामुच्छिष्ट-

---

१ क. °जेयुः ।

समन्वारब्धानामवलेखनम् ॥ २७ ॥ उच्छिष्टलेपोपहतानामवतक्षणम् ॥ २८ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः ॥ २९ ॥ तदेतदन्यत्र निर्देशात् ॥३०॥ यथैतदग्निहोत्रे धर्मोच्छिष्टे च दाधिधर्मे च कुण्डपायिनामयने चोत्सर्गिणामयने च दाक्षायणयज्ञे चेडादधे च चतुश्चक्रे च ब्रह्मौदनेषु च तेषु सर्वेषु दर्भैरद्भिः प्रक्षालनम् ॥ ३१ ॥ सर्वेष्वेव सोमभक्षेष्वद्भिरेव मार्जालीये प्रक्षालनम् ॥ ३२ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गोः मृन्मयानां पात्राणाम् ॥ ३३ ॥ मृन्मयानां पात्राणामुच्छिष्टसमन्वारब्धानामवकूलनम् ॥ ३४ ॥ उच्छिष्टलेपोपहतानां पुनर्दहनम् ॥ ३५ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानामुत्सर्गः ॥ ३६ ॥ तैजसानां पात्राणां पूर्ववत्परिमृष्टानां प्रक्षालनम् ॥ ३७ ॥ परिमार्जनद्रव्याणि गोशकृन्मृद्भस्मेति ॥ ३८ ॥ मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां पुनः करणम्॥३९॥ गोमूत्रे वा सप्तरात्रं परिशायनम् ॥४०॥ महानद्यां वैवम् ॥४१॥ अश्ममयानामलाबुबिल्वविनाडानां गोवालैः परिमार्जनम् ॥४२॥ नैडवेणुशरकुशव्यूतानां गोमयेनाद्भिरिति प्रक्षालनम् ॥ ४३ ॥ व्रीहीणामुपघाते प्रक्षाल्यावशोषणम् ॥ ४४ ॥ बहूनां तु प्रोक्षणम् ॥ ४५ ॥ तण्डुलानामुत्सर्गः ॥ ४६ ॥ एवं सिद्धहविषाम् ॥ ४७ ॥ महतां श्ववायसप्रभृत्युपहतानां तं देशं पुरुषान्नमुद्धृत्य पवमानः सुवर्जन इति एतेनानुवाकेनाभ्युक्षणम् ॥ ४८ ॥ मधूदके पयोविकारे पात्रात्पात्रान्तरानयने शौचम् ॥ ४९ ॥ एवं तैलसर्पिषी उच्छिष्टसमन्वारब्धे| उदकेऽवधायोपयोजयेत् ॥ ५० ॥ अमेध्याभ्याधाने समारोप्याग्निं मथित्वा पवमानेष्टिः ॥ ५१ ॥ शौचदेशमन्त्रावृदर्थद्रव्यसंस्कारकालभेदेषु पूर्वपूर्वप्राधान्यं पूर्वपूर्वप्राधान्यम् ॥ ५२ ॥

इति प्रथमप्रश्ने षष्ठोऽध्यायः ॥ ६ ॥

(अथ प्रथमप्रश्ने सप्तमोऽध्यायः।)

उत्तरत उपचारो विहारः ॥ १ ॥ तथाऽपवर्गः ॥ २ ॥ विपरीतं पित्र्येषु ॥ ३ ॥ श्वादोपहतं प्रक्षालयेत् ॥ ४ ॥ अङ्गमुपस्पृश्य सिचं वाऽप उपस्पृशेत् ॥ ५ ॥ एवं

---

१ ख. °लेपन° । २ ख. °यणे यज्ञेऽर्धोदये चतु° । ३ ख. °वयीत । म° । ४ ख. विलाडानां । ५ ख. मन्त्रवे° । ६ ख. °र्वत्प्राधान्यम् ।

छेदनभेदनखननिरसनापित्र्यराक्षसनैर्ऋतरौद्राभिचरणीयेषु ॥ ६ ॥ न मन्त्रवता यज्ञाङ्गेनाऽऽत्मानमभिपरिहरेत् ॥ ७ ॥ अभ्यन्तराणि यज्ञाङ्गानि वाग्या ऋत्विजः ॥ ८ ॥ पत्नीयजमानाद्ऋत्विग्भ्योऽन्तरतमौ ॥ ९ ॥ यज्ञाङ्गेभ्य आज्यमाज्याद्धवींषि हविर्भ्यः पशुः पशोः सोमः सोमादग्नयः ॥ १० ॥ यथाकर्मर्त्विजो न विहारादभिपर्यावर्तेरन् ॥ ११ ॥ प्राङ्मुखश्चेद्दक्षिणमंसमभिपर्यावर्तेत ॥ १२ ॥ प्रत्यङ्मुखः सव्यम् ॥ १३ ॥ अन्तरेण चात्वालोत्करौ यज्ञस्य तीर्थम् ॥ १४ ॥ आ चात्वालादाहवनीयोत्करौ ॥१५॥ ततः कर्तारो यजमानः पत्नी च प्रपद्येरन्, विसंस्थितेः ॥ १६ ॥ संस्थिते च संचरोऽनुत्करदेशात् ॥ १७ ॥ नाप्रोक्षितमप्रपन्नं छिन्नं काष्ठं समिधं वाऽभ्यादध्यात् ॥ १८ ॥ अग्नेणाऽऽहवनीयं ब्रह्मयजमानौ प्रपद्येते ॥ १९ ॥ जघनेनाऽऽहवनीयमित्येके ॥ २० ॥ दक्षिणेनाऽऽहवनीयं ब्रह्मायतनं तमपरेण यजमानस्य ॥२१॥ उत्तरां श्रोणिमुत्तरेण होतुः ॥२२॥ उत्कर आग्नीध्रस्य ॥२३॥ जघनेन गार्हपत्यं पत्न्याः ॥ २४ ॥ तेषु काले काल एव दर्भान्संस्तृणाति ॥ २५ ॥ एकैकस्य चोदकमण्डलुरुपात्तः स्यादाचमनार्थः ॥ २६ ॥ व्रतोपेतो दीक्षितः स्यात् ॥ २७ ॥ न परपापं वदेन्न क्रुध्येन्न रोदेन्मूत्रपुरीषे नावेक्षेत ॥ २८ ॥ अमेध्यं दृष्ट्वा जपति ॥ २९ ॥ अवद्यं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हासीरिति ॥ ३० ॥

इति प्रथमप्रश्ने सप्तमोऽध्यायः ॥ ७ ॥

(अथ प्रथमप्रश्नेऽष्टमोऽध्यायः ।)

चत्वारो वर्णा ब्राह्मणक्षत्रियविट्शूद्राः ॥ १ ॥ तेषां वर्णानुपूर्व्येण चतस्रो भार्या ब्राह्मणस्य ॥ २ ॥ तिस्रो राजन्यस्य ॥ ३ ॥ द्वे वैश्यस्य ॥ ४ ॥ एका शूद्रस्य ॥ ५ ॥ तासु पुत्राः सवर्णानन्तरासु सवर्णाः ॥६॥ एकान्तरव्यन्तरास्त्वम्बष्ठोग्रनिषादाः ॥ ७ ॥ प्रतिलोमास्त्वायोगवमागधवैणक्षत्रपुल्कसकुक्कुटवैदेहकचण्डालाः ॥ ८ ॥ अम्बष्ठात्प्रथमायां श्वपाकः ॥ ९ ॥ उग्राद्द्वितीयायां वैणः ॥१०॥ निषादात्तृ-

---

१ ख. °पु । अप उपस्पृशन्नम° । २ ख. °थाकममृत्विजो । ३ ख. कर्तारो । ४ ख. °मानपत्नी च प्रपद्येते । वि° । ५ ख. तदपरे । ६ ख °तो वा दी° । ७ ख. °टकवै ।

तीयायां पुल्कसः ॥ ११ ॥ विपर्यये कुक्कुटः ॥ १२ ॥ निषादेन निषाद्यामा पञ्चमाज्जो-तोऽपहन्ति शूद्रताम् ॥ १३ ॥ तमुपनयेत्पष्ठं याजयेत् ॥ १४ ॥ सप्तमो विकृतबीजः समबीजः सम इत्येकेषां संज्ञाः क्रमेण निपतन्ति ॥ १५ ॥

त्रिषु वर्णेषु सादृश्यादव्रतो जनयेत्तु यान्। तान्सावित्रीपरिभ्रष्टान्व्रात्यानाहुर्मनीषिणो व्रात्यानाहुर्मनीषिण इति ॥ १६ ॥

इति प्रथमप्रश्नेऽष्टमोऽध्यायः ॥ ८ ॥

(अथ प्रथमप्रश्ने नवमोऽध्यायः।)

रथकाराम्बष्ठसूतोग्रमागधायोगववैणक्षत्तृपुल्कसकुक्कुटवैदेहकचण्डालश्वपाकप्रभृतयः ॥ १ ॥ तत्र सवर्णासु सवर्णाः ॥ २ ॥ ब्राह्मणात्क्षत्रियायां ब्राह्मणो वैश्यायामम्बष्ठः शूद्रायां निषादः ॥ ३ ॥ पारशव इत्येके ॥ ४ ॥ क्षत्रियाद्वैश्यायां क्षत्रियः शूद्रायामुग्रः ॥ ५ ॥ वैश्याच्छूद्रायां रथकारः ॥ ६ ॥ शूद्राद्वैश्यायां मागधः क्षत्रियायां क्षत्ता ब्राह्मण्यां चण्डालः ॥ ७ ॥ वैश्यात्क्षत्रियायामायोगवो ब्राह्मण्यां वैदेहकः ॥ ८ ॥ क्षत्रियाद्ब्राह्मण्यां सूतः ॥ ९ ॥ तत्राम्बष्ठोग्रसंयोगे भवत्यनुलोमः ॥ १० ॥ क्षत्तृवैदेहकयोः प्रतिलोमः ॥ ११ ॥ उग्राज्जातः क्षत्र्यां श्वपाकः ॥ १२ ॥ वैदेहकादम्बष्ठायां वैणः ॥ १३ ॥ निषादाच्छूद्रायां पुल्कसः ॥ १४ ॥ शूद्रान्निषाद्यां कुक्कुटः ॥ १५ ॥

वर्णसंकरादुत्पन्नान्व्रात्यानाहुर्मनीषिणो व्रात्यानाहुर्मनीषिण इति १६

इति प्रथमप्रश्ने नवमोऽध्यायः ॥ ९ ॥

(अथ प्रथमप्रश्ने दशमोऽध्यायः।)

षड्भागभृतो राजा रक्षेत्प्रजाम् ॥ १ ॥ ब्रह्म वै स्वं महिमानं ब्राह्मणेष्वदधाद-ध्ययनाध्यापनयजनयाजनदानप्रतिग्रहसंयुक्तं वेदानां गुप्त्यै ॥ २ ॥ क्षत्रे बलमध्ययनयजनदानशस्त्रकोशभूतरक्षणसंयुक्तं क्षत्रस्य वृध्यै ॥ ३ ॥ विट्स्वध्ययनयजनदानकृषिवाणिज्यपशुपालनसंयुक्तं कर्मणां वृध्यै ॥ ४ ॥ शूद्रेषु पूर्वेषां परिचर्या ॥ ५ ॥

---

१ ख. °यादाप°। २ ख. °ज्जाता भवन्ति। तमु°। ३ ख. °कृतो जीकमर इत्येषां। ४ ख. °षिणः। इति।

पत्तो न सृज्यन्तेति ॥ ६ ॥ सर्वतोधुरं पुरोहितं वृणुयात् ॥ ७ ॥ तस्य शासने वर्तेत ॥ ८ ॥ सङ्ग्रामे न निवर्तेत ॥ ९ ॥ न कर्णिभिर्न दिग्धैः प्रहरेत् ॥ १० ॥ भीतमत्तोन्मत्तप्रमत्तविसंनाहस्त्रीबालवृद्धब्राह्मणैर्न युध्येत ॥ ११ ॥ अन्यत्राऽऽततायिनः ॥ १२ ॥ अथाप्युदाहरन्ति ॥ १३ ॥

अध्यापकं कुले जातं यो हन्यादाततायिनम् । न तेन भ्रूणहा भवति मन्युस्तं मन्युमृच्छति, इति १४

सामुद्रशुल्को वरं रूपमुद्धृत्य दशपणं शतम् ॥ १५ ॥ अन्येषामपि सारानुरूप्येणानुपहत्य धर्म्यं प्रकल्पयेत् ॥ १६ ॥ अब्राह्मणस्य प्रनष्टस्वामिकं रिक्थं संवत्सरं परिपाल्य राजा हरेत् ॥ १७ ॥ अवध्यो वै ब्राह्मणः सर्वापराधेषु ॥ १८ ॥ ब्राह्मणस्य ब्रह्महत्यागुरुतल्पगमनसुवर्णस्तेयसुरापानेषु कुसिन्धभगसृगालेसुराध्वजांस्तप्तेनायसा ललाटेऽङ्कयित्वा विषयाँन्निर्धमनम् ॥ १९ ॥ क्षत्रियादीनां ब्राह्मणवधे वधः सर्वस्वहरणं च॥२०॥ तेषामेव तुल्यापकृष्टत्वधे यथाबलमनुरूपान्दण्डान्प्रकल्पयेत् ॥ २१ ॥ क्षत्रियवधे गोसहस्रम् ॥ २२ ॥ क्षत्रियवधे गोसहस्रमृषभैकाधिकं राज्ञ उत्सृजेद्वैरनिर्यातनार्थम् ॥ २३ ॥ शतं वैश्ये दश शूद्रे ऋषभश्चात्राधिकः॥२४॥ शूद्रवधेन स्त्रीवधो गोवधश्च व्याख्यातोऽन्यत्राऽऽत्रेय्या वधात् ॥ २५ ॥ धेन्वनडुहोश्च वधे धेन्वनडुहोरन्ते चान्द्रायणं चरेत् ॥ २६ ॥ आत्रेय्या वधः क्षत्रियवधेन व्याख्यातः ॥ २७ ॥ हंसभासबर्हिणचक्रवाकप्लवलाककाकोलूकमण्डूकोंडिङ्किकैरिकाश्वबभ्रुनकुलादीनां वधे शूद्रवत् ॥ २८ ॥ लोकसंग्रहणार्थं यथा दृष्टं श्रुतं वा साक्षी साक्ष्यं ब्रूयात् ॥ २९ ॥

पादो धर्मस्य कर्तारं पादो गच्छति साक्षिणम् । पादः सभासदः सर्वान्पादो राजानमृच्छति ३०

राजा भवत्यनेनाश्च मुच्यन्ते च सभासदः । एनो गच्छति कर्तारं यत्र निन्द्यो ह निन्द्यते

साक्षिणं त्वेवमुद्दिष्टं यत्नात्पृच्छेद्विचक्षणः । यां रात्रिमजनिष्ठास्त्वं यां च रात्रिं मरिष्यसि ३२

एतयोरन्तरा यत्ते सुकृतं सुकृतं भवेत् । तत्सर्वं राजगामि स्यादनृतं ब्रुवतस्तव ३३

त्रीनेव ब पितॄन्हन्ति त्रीनेव च पितामहान् । सप्त जातानजातांश्च साक्षी साक्ष्यं मृषा वदन् ३४

---

१ ख. 'कृपेणा'। २ ख धर्मे। ३ ख. 'स्य भ्रूणहत्यागु'। ४ ख 'सिण्डभ'। ५ ख. 'लध्वजकारास्तप्ते'। ६ ख. 'यान्तर्गमन'। ७ ख. 'द्रवधे'। ८ ख. 'स्त्रियाव'। ९ ख. 'कघटेरिकश्च। १० ख. ब्रुवन्।

हिरण्यार्थेऽनृते हन्ति त्रीनेव च पितामहान्। पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ३५
शतमश्वानृते हन्ति सहस्रं पुरुषानृते। सर्वं भूम्यनृते हन्ति साक्षी साक्ष्यं मृषा वदन् ३६
चत्वारो वर्णाः पुत्रिणः साक्षिणः स्युरन्यत्र श्रोत्रियराजन्यप्रव्रजितमानुष्यहीनेभ्यः
॥३७॥स्मृतौ प्रधानतः प्रतिपत्तिः॥३८॥अतोऽन्यथाकर्तपत्यम्(?) ॥३९॥ द्वादशरात्रं
तप्तं पयः पिबेत्कूष्माण्डैर्वा जुहुयादिति कूष्माण्डैर्वा जुहुयादिति ॥ ४० ॥

इति प्रथमप्रश्ने दशमोऽध्यायः ॥ १० ॥

(अथ प्रथमप्रश्न एकादशोऽध्यायः ।)

अष्टौ विवाहाः ॥ १ ॥ श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने दीयते स
ब्राह्मः ॥२॥ आच्छाद्यालंकृत्यैषा(तया) सह धर्मश्चर्यतामिति प्राजापत्यः ॥३॥ पूर्वां
लाजाहुतिं हुत्वा गोमिथुनं कन्यावते दद्यात्स आर्षः ॥ ४ ॥ दक्षिणासु नीयमानास्व-
न्तर्वेद्यृत्विजे स दैवः ॥५॥ धनेनोपतोष्याऽऽसुरः ॥ ६ ॥ सकामेन सकामाया मिथः
संयोगो गान्धर्वः ॥ ७ ॥ प्रसह्य हरणाद्राक्षसः ॥ ८ ॥ सुप्तां मत्तां प्रमत्तां
वोपयच्छेदिति पैशाचः ॥ ९ ॥ तेषां चत्वारः पूर्वे ब्राह्मणस्य ॥ १० ॥ तेष्वपि
पूर्वः पूर्वः श्रेयान् ॥ ११ ॥ उत्तरेषामुत्तरोत्तरः पापीयान् ॥ १२ ॥ अत्रापि
षष्ठसप्तमौ क्षत्रधर्मानुगतौ तत्प्रत्ययत्वात्क्षत्रस्य ॥ १३ ॥ पञ्चमाष्टमौ वैश्यशूद्राणाम्
॥१४॥अयन्त्रितकलत्रा हि वैश्यशूद्रा भवन्ति॥१५॥ कर्षणशुश्रूषाधिकृतत्वात् ॥१६॥
गान्धर्वमप्येके प्रशंसन्ति सर्वेषां स्नेहानुगतत्वात्॥१७॥†यथायुक्तो विवाहः। यथा युक्तो
विवाहस्तथा युक्ता प्रजा भवतीति विज्ञायते ॥ १८ ॥ +अथाप्युदाहरन्ति॥ १९ ॥
क्रीता द्रव्येण या नारी सा न पत्नी विधीयते। सा न दैवे न सा पित्र्ये दासीं तां काश्य-
पोऽब्रवीत् २०
शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः। आत्मविक्रयिणः पापा महाकिल्बिषका-
रकाः २१
पतन्ति नरके घोरे घ्नन्ति चाऽऽसप्तमं कुलम् । गमनागमनं चैव सर्वं शुल्को विधीयते (?)

---

† इदमधिकं वाक्यम्। + इत आरभ्य शुल्को विधीयत इत्यन्तग्रन्थः ख. पुस्तके न विद्यते।

---

१ ख. °नुषही°। २ ख. पिबन्कूष्मा°। ३ क. गोभ्यां सहाऽऽर्षः।

पौर्णमास्यष्टकामावास्याग्न्युत्पातभूमिकम्पश्मशानदेशपतिश्रोत्रियैकतीर्थ्यप्रयाणेष्वहोरात्रमनध्यायः ॥ २३ ॥ वाते पूतिगन्धे नीहारे च नृत्तगीतवादित्ररुदितसामशब्देषु तावन्तं कालम् ॥ २४ ॥ स्तनयित्नुवर्षविद्युत्संनिपाते त्र्यहमनध्यायोऽन्यत्र वर्षाकालात् ॥ २५ ॥ वर्षाकालेऽपि वर्षवर्जमहोरात्रयोश्च तत्कालम् ॥ २६ ॥ पित्र्यप्रतिग्रहभोजनयोश्च तद्दिवसशेषम् ॥ २७ ॥ भोजनेष्वाजीर्णान्तम् ॥ २८ ॥ पाणिमुखो हि ब्राह्मणः ॥ २९ ॥ अथाप्युदाहरन्ति ॥ ३० ॥

भुक्तं प्रतिगृहीतं च निर्विशेषमिति श्रुतिः। ३१

पितर्युपरते त्रिरात्रम् ॥ ३२ ॥ द्वयमु ह वै सुश्रवसोऽनूचानस्य रेतो ब्राह्मणस्योर्ध्वं नाभेरधस्तादन्यत्स यदूर्ध्वं नाभेस्तेन हैतत्प्रजायते यद्ब्राह्मणानुपनयति यदध्यापयति यद्याजयति यत्साधु करोति सर्वाऽस्यैषा प्रजा भवत्यथ यदवाचीनं नाभेस्तेन हास्यैरसी प्रजा भवति तस्माच्छ्रोत्रियमनूचानमप्रजोऽसीति न वदन्ति ॥ ३३ ॥ तस्माद्द्विनामा द्विमुखो विप्रो द्विरेता द्विजन्मा चेति ॥३४॥ शूद्रापपात्रश्रवणसंदर्शनयोश्च तावन्तं कालम् ॥ ३५ ॥ नक्तं शिवाविरावे नाधीयीत स्वप्नान्तम् ॥ ३६ ॥ अहोरात्रयोश्च संध्योः पर्वसु च नाधीयीत ॥ ३७ ॥ न मांसमश्नीयान्न स्त्रियमुपेयात् ॥३८॥ पर्वसु हि रक्षःपिशाचा व्यभिचारवन्तो भवन्तीति विज्ञायते ॥ ३९॥ अन्येषु चाद्भुतोत्पातेष्वहोरात्रमनध्यायोऽन्यत्र मानसात् ॥ ४० ॥ मानसेऽपि जननमरणयोरनध्यायः ॥ ४१ ॥ अथाप्युदाहरन्ति ॥ ४२ ॥

हन्त्यष्टमी ह्युपाध्यायं हन्ति शिष्यं चतुर्दशी। हन्ति पञ्चदशी विद्यां तस्मात्पर्वणि वर्जयेत्तस्मात्पर्वणि वर्जयेदिति ॥ ४३ ॥

इति प्रथमप्रश्न एकादशोऽध्यायः ॥ ११ ॥

[*यथा युक्तो विवाहः ॥१॥अष्टौ विवाहाः ॥२॥ क्षत्रियवधे गोसहस्रम् ॥३॥ षड्भागभृतो राजा रक्षेत् ॥ ४ ॥ रथकाराम्बष्ठ० ॥ ५ ॥ चत्वारो वर्णाः ॥ ६ ॥ उत्तरत उपचारो विहारः ॥ ७ ॥ मृन्मयानां पात्राणाम् ॥ ८ ॥ शुचिमध्वरं देवा जुषन्ते ॥ ९ ॥ अभक्ष्याः पशवो ग्राम्याः ॥ १० ॥ सपिण्डेष्वादशाहम् ॥ ११ ॥ गोचर्ममात्रम् ॥ १२ ॥ नित्यं शुद्धः कारुहस्तः ॥ १३ ॥ अथातः शौचाधिष्ठानम्

---

* धनुश्चिह्नान्तर्गतो ग्रन्थः प्रथमाध्यायेकादशाध्यायस्थादिमादिवाक्यानां व्युत्क्रमेण गणनात्मक इति भाति।

---

१ ख. °न विदेहदेशपतितश्रो°। २ ख. °मशेषभोजनयो°। ३ ख. °ति अथ। ४ ख. °मू। अथ क°।

॥ १४ ॥ कमण्डलुर्द्विजातीनाम् ॥ १५ ॥ अथ कमण्डलुचर्यामुपदिशन्ति ॥ १६ ॥ अथ स्नातकस्य ॥ १७ ॥ धर्मार्थौ यत्र न स्याताम् ॥ १८ ॥ अष्टाचत्वारिंशद्वर्षाणि ॥ १९ ॥ पञ्चधा विप्रतिपत्तिः ॥ २० ॥ उपदिष्टो धर्मः प्रतिवेदम् ॥ २१ ॥]

समाप्तोऽयं प्रथमः प्रश्नः ॥ १ ॥

(अथ द्वितीयः प्रश्नः ।)

(तत्र प्रथमोऽध्यायः ।)

अथातः प्रायश्चित्तानि[1] ॥ १ ॥ भ्रूणहा द्वादश समाः ॥ २ ॥ कपाली खट्वाङ्गी गर्दभचर्मवासा अरण्यनिकेतनः श्मशाने ध्वजं शवशिरः कृत्वा कुटीं कारयेत्तामावसेत्सप्तागाराणि भैक्षं चरन्स्वकर्माऽऽचक्षाणस्तेन प्राणान्धारयेद[2]लब्धोपवासः ॥ ३ ॥ अश्वमेधेन गोसवेनाग्निष्टुता वा यजेत ॥ ३ ॥ अश्वमेधावभृथे वाऽऽत्मानं प्लावयेत् ॥ ४ ॥ अथाप्युदाहरन्ति ॥ ५ ॥

अमत्या ब्राह्मणं हत्वा दुष्टो भवति धर्मतः। ऋषयो निष्कृतिं तस्य वदन्त्यमतिपूर्वके ६
मतिपूर्वे व्रतस्तस्य निष्कृतिर्नोपलभ्यते। अ[3]पगूर्य चरेत्कृच्छ्रमतिकृच्छ्रं निपातने ७
कृ[4]च्छ्रं चान्द्रायणं चैव लोहितस्य प्रवर्तने। तस्मान्नैवापगुरेत न च कुर्वीत शोणितमिति ८

नव समा राज[5]न्यस्य ॥ ९ ॥ तिस्रो वैश्यस्य ॥ १० ॥ संवत्सरं शूद्रस्य ॥ ११ ॥ स्त्रियाश्च ॥ १२ ॥ ब्राह्मणवदात्रेय्याः ॥ १३ ॥ गुरुतल्पगस्तप्ते लोहशयने शयीत ॥ १४ ॥ सूर्मिं वा ज्वलन्तीं श्लिष्येत् ॥ १५ ॥ लिङ्गं वा सवृषणं परिवास्याञ्जलावाधाय दक्षिणाप्रतीच्योर्दिशमन्तरेण गच्छेदा निपतनात् ॥ १६ ॥ स्तेनः प्रकीर्य केशान्सैध्रकं मुसलमादाय स्कन्धेन राजानं गच्छेदनेन मां जहीति तेनैनं हन्यात् ॥ १७ ॥ अथाप्युदाहरन्ति ॥ १८ ॥

स्कन्धेनाऽऽदाय मुसलं स्तेनो राजानमन्वियात्। अनेन शाधि मां राजन्क्षत्रधर्ममनुस्मरन् १९
शासने वा विसर्गे वा स्तेनो मुच्येत किल्बिषात्। अशासनात्तु तद्राजा स्तेनादाप्नोति किल्बिषमिति २०

सुरां पीत्वोष्णया कायं दहेत् ॥ २१ ॥ अमत्या पाने कृच्छ्राब्दपादं चरेत्पुनरुप-

---

१ ख. °नि क°। २ ख. °येत्। अथा°। ३ ख. अवगूर्य। ४ ख कृच्छ्रातिकृच्छ्रौ चान्द्रायणं लो°। ५ ख. °जन्ये तिस्रो वैश्ये संवत्सरं शूद्रे स्त्रि°।

नयनं च॥२२॥ वपनव्रतनियमलोपश्च पूर्वानुष्ठितत्वात्॥२३॥ अथाप्युदाहरन्ति॥२४॥ अमत्या वारुणीं पीत्वा प्राश्य मूत्रपुरीषयोः। ब्राह्मणः क्षत्रियो वैश्यः पुनः संस्कारमर्हति २५

सुराधाने तु यो भाण्डे अपः पर्युषिताः पिबेत्। शङ्खपुष्पीविपक्वेन षडहं क्षीरेण वर्तयेत् गुरुप्रयुक्तश्चेन्म्रियेत गुरुस्त्रीन्कृच्छ्रांश्चरेत्॥२७॥ एतदेवासंस्कृते॥२८॥ ब्रह्मचारिणः शवकर्मणा व्रतावृत्तिरन्यत्र मातापित्रोराचार्यार्थाच्च॥२९॥ स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं भैषज्यार्थे सर्वं प्राश्नीयात्॥३०॥ येनेच्छेत्तेन चिकित्सेत्॥३१॥ स यदागतिः स्यात्तदुत्थायाऽऽदित्यमुपतिष्ठेत॥३२॥ हंसः शुचिषदिति॥३३॥ एतया दिवा रेतः सिक्त्वा त्रिरपो हृदयंगमाः पिबेद्रेतस्याभिः॥३४॥ यो ब्रह्मचारी स्त्रियमुपेयात्सोऽवकीर्णी॥३५॥ स गर्दभं पशुमालभेत॥३६॥ नैर्ऋतः पशुपुरोडाशश्च रक्षोदेवतो यमदेवतो वा॥३७॥ शिश्नात्प्राशित्रमप्स्ववदानैश्चरन्तीति विज्ञायते॥३८॥ अपि वाऽमावास्यायां निश्यग्निमुपसमाधाय दर्विहोमिकीं परिचेष्टां कृत्वा द्वे आज्याहुती जुहोति—॥३९॥ कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा॥४०॥ कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहेति॥४१॥

हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङ ग्निमभिमन्त्रयेत॥४२॥

सं मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः।
सं माऽयमग्निः सिञ्चत्वायुषा च बलेन चाऽऽयुष्मन्तं करोत मेति॥४३॥

अथास्य ज्ञातयः परिषद्युदपात्रं निनयेयुरसावहमित्थं भूत इति॥४४॥ चरित्वाऽपः पयो घृतं मधु लवणमित्यारब्धवन्तं ब्राह्मणा ब्रूयुश्चरितं त्वयेत्योमितीतरः प्रत्याह चरितनिर्वेशं सवनीयं कुर्युः॥४५॥ सगोत्रां चेदमत्योपयच्छेद्भ्रातृवेदनां बिभृयात्॥४६॥ प्रजाता चेत्कृच्छ्राब्दपादं चरित्वा यन्म आत्मनो मिन्दाऽभूत्पुनरग्निश्चक्षुरदादिति एताभ्यां जुहुयात्॥४७॥ परिवित्तः परिवेत्ता या चैनं परिविन्दति। सर्वे ते नरकं यान्ति दातृयाजकपञ्चमाः ४८ परिवित्तः परिवेत्ता दाता यश्चापि याजकः। कृच्छ्रद्वादशरात्रेण स्त्री त्रिरात्रेण शुध्यति, इति ४९

अथ पतनीयानि—॥५०॥ समुद्रसंयानम्॥५१॥ ब्रह्मस्वन्यासापहरणम्

---

१ ख. °त्रोर्गुरोर्वा। सर्वाः स चे°। २ ख. °ज्यार्थे स°। ३ ख. °मिकां प°। ४ ख. °स्वाहेत्यमृतं वा आज्यममृतमेवाऽऽत्मन्धत्ते हुत्वा कर्षति येऽग्निमुपतिष्ठते समासिञ्चतु अकामत आयुष्म°। ५ ख. °द्रया°। ६ ख. °म्। ब्राह्मणस्वन्या°।

॥ ५२ ॥ भूम्यनृतम् ॥ ५३ ॥ सर्वपण्यैर्व्यवहरणम् ॥ शूद्रसेवनम् ॥ ५४ ॥ शूद्राभिजननम् ॥ ५५ तदपत्यत्वं च ॥ ५६ ॥ एषामन्यतमत्कृ(मं कृ)त्वा-॥ ५७ ॥

चतुर्थकालामितभोजिनः स्युरपोऽभ्युपेयुः सवनानुकल्पम् ।
स्थानासनाभ्यां विहरन्त एते त्रिभिर्वर्षैस्तदपघ्नन्ति पापमिति ॥ ५८
यदेकरात्रेण करोति पापं कृष्णं वर्ण ब्राह्मणः सेवमानः ।
चतुर्थकाल उदकाभ्यवायी त्रिभिर्वर्षैस्तदपहन्ति पापम्, इति ५९

अथोपपातकानि— ॥ ६० ॥ अगम्यागमनं गुर्वीसखीं गुरुसखीमपपात्रां पतितां च गत्वा भेषजकरणं ग्रामयाजनं रङ्गोपजीवनं नाट्याचार्यतां गोमहिषीरक्षणं यच्चान्यदप्येवं युक्तं कन्यादूषणमिति ॥ ६१ ॥ तेषां तु निर्वेशः पतितवृत्तिर्द्वौ संवत्सरौ ॥६२॥ अथाशुचिकराणि— ॥ ६३ ॥ द्यूतमभिचारोऽनाहिताग्नेरुञ्छवृत्तिता समावृत्तस्य भैक्षचर्या तस्य चैव गुरुकुले वास ऊर्ध्वं चतुर्भ्यो मासेभ्यस्तस्य चाध्यापनं नक्षत्रानिर्देशश्चेति ॥ ६४ ॥ तेषां तु निर्वेशो द्वादश मासान्द्वादशार्धमासान्द्वादश द्वादशाहान्द्वादश षडहान्द्वादश त्र्यहान्द्वादशाहं षडहं त्र्यहमहोरात्रमेकाहमिति यथा कर्माभ्यासः ॥ ६५ ॥ अथ पतिताः— ॥ ६६ ॥ समवसाय धर्मांश्चरेयुरितरेतरयाजका इतरेतराध्यापका मिथो विवहमानाः पुत्रान्संनिष्पाद्य ब्रूयुर्विप्रव्रजतास्मभ्य एवमार्यान्संप्रतिपत्स्यथेति ॥ ६७ ॥ अथापि नै सेन्द्रियः पतति ॥ ६८ ॥ तदेतेन वेदितव्यमङ्गहीनो हि साङ्गं जनयेत् ॥ ६९ ॥ मिथ्यैतदिति हारीतः ॥ ७० ॥ दधिधानीसधर्माः स्त्रियः स्युर्यो हि दधिधान्यामप्रयतं पय आतच्य मन्थति न तच्छिष्टा धर्मकृत्येषूपयोजयन्ति ॥ ७१ ॥ एवमशुचि शुक्रं यन्निर्वर्तते न तेन सह संप्रयोगो विद्यते ॥ ७२ ॥ अशुचिशुक्रोत्पन्नानां तेषामिच्छतां प्रायश्चित्तिः ॥ ७३ ॥ पतनीयानां तृतीयोंऽशः स्त्रीणामंशस्तृतीयः ॥ ७४ ॥ अथाप्युदाहरन्ति ॥ ७५ ॥ भोजनाभ्यञ्जनादानाद्यदन्यत्कुरुते तिलैः । श्वविष्ठायां कृमिर्भूत्वा पितृभिः सह मज्जतीति ७६

पितॄन्वा एष विक्रीणीते यस्तिलान्विक्रीणीते ॥ ७७ ॥ प्राणान्वा एष विक्रीणीते यस्तण्डुलान्विक्रीणीते॥७८॥सुकृतांशान्वा एष विक्रीणीते यः पणमानो दुहितरं ददाति ॥७९॥ तृणकाष्ठमविकृतं विक्रेयम् ॥ ८० ॥ अथाप्युदाहरन्ति ॥८१॥

---

१ ख. °तवदनम् । २ ख. °सेवाश्च शू° । ३ ख. °पत्यं च भवति तेषां तु निर्वेशश्च तु° । ४ ख. °पोऽभ्यवहरेयुः । ५ ख. °ता महिषीगोरक्ष्यं य° । ६ ख. निर्वेषः । ७ ख. °ति अशुचिकरनिर्वेषो य° । ८ ख धर्मं चरे° । ९ ख. न सहेन्द्रियैः पतितेन समाचरंस्तदे° ।

पशवश्चैकतोदन्ता अश्मा च लवणोद्धृतः। एतद्ब्राह्मण ते पण्यं तन्तुश्चारजनीकृत इति८२

पातकवर्जं वा बभ्रुं पिङ्गलां गां रोमशां सर्पिषाऽवसिच्य कृष्णैस्तिलैरवकीर्यानूचानाय दद्यात् ॥ ८३ ॥ कूष्माण्डैर्वा द्वादशाहम् ॥ ८४ ॥ यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यत इति ॥ ८५ ॥ पातकाभिशंसने कृच्छ्रः ॥ ८६ ॥ तदब्दोऽभिशंसितुः ॥ ८७ ॥

संवत्सरेण पतति पतितेन समाचरन्। याजनाध्यापनाद्यौनान्न[1] तु यानासनाशनादिति

अमेध्यप्राशने प्रायश्चित्तैर्नैष्पुरीष्यं तत्सप्तरात्रेणावाप्यते ॥ ८९ ॥ अपः पयो घृतं पराक इति प्रतित्र्यहमुष्णानि स तप्तकृच्छ्रः॥९०॥त्र्यहं प्रातस्तथा सायमयाचितं पराक इति कृच्छ्रः ॥ ९१ ॥ प्रातः सायमयाचितं पराक इति त्रयश्चतूरात्राः[2] स एष स्त्रीबालवृद्धानां कृच्छ्रः ॥ ९२ ॥ यावत्सकृदाददीत तावदश्नीयात्पूर्वेद्युस्सोऽतिकृच्छ्रः ॥ ९३ ॥ अब्भक्षस्तृतीयः स कृच्छ्रातिकृच्छ्रः ॥ ९४ ॥ कृच्छ्रे त्रिषवणमुदकोपस्पर्शनम् ॥९५॥ अधः शयनम् ॥ ९६ ॥ एकवस्त्रता ॥ ९७ ॥ केशश्मश्रुलोमनखवापनम् ॥ ९८ ॥ एतदेव स्त्रियाः केशवपनवर्जं केशवपनवर्जम् ॥ ९९ ॥

इति द्वितीयप्रश्ने प्रथमोऽध्यायः ॥ १ ॥

(अथ द्वितीयप्रश्ने द्वितीयोऽध्यायः ।)

नित्योदकी नित्ययज्ञोपवीती नित्यस्वाध्यायी वृषलान्नवर्जी ।
ऋतौ च गच्छन्विधिवच्च जुह्वन्न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥ १

मनुः पुत्रेभ्यो दायं व्यभजदिति श्रुतिः ॥ २ ॥ समशः सर्वेषामविशेषात् ॥३॥ वरं वा रूपमुद्धरेज्ज्येष्ठः ॥४॥ तस्माज्ज्येष्ठं पुत्रं धनेन निरवसाययन्तीति श्रुतिः ॥५॥ दशानां वैकमुद्धरेज्ज्येष्ठः ॥ ६ ॥ सममितरे विभजेरन् ॥ ७ ॥ पितुरनुमत्या दायविभागः सति पितरि ॥ ८ ॥ चतुर्णां वर्णानां गोश्वाजावयो ज्येष्ठांशः ॥ ९ ॥ नानावर्णस्त्रीपुत्रसमवाये दायं दशांशान्कृत्वा चतुरस्त्रीन्द्वावेकामिति यथाक्रमं विभजेरन् ॥ १० ॥ औरसे तूत्पन्ने सवर्णास्तृतीयांशहराः ॥ ११ ॥ सवर्णापुत्रानन्तरापुत्रयोरनन्तरापुत्रश्चेद्गुणवान्स ज्येष्ठांशं हरेत् ॥ १२ ॥ गुणवान्हि शेषाणां भर्ता भवति ॥ १३ ॥ सवर्णायां संस्कृतायां स्वयमुत्पादितमौरसं पुत्रं विद्यात् ॥ १४ ॥ अथाप्युदाहरन्ति— ॥ १५ ॥

---

१ ख. °तत्तु ब्राह्मणे प° । २ ख. °लां रोमशां गां स° । ३ ख. °नात्सद्यो न तु शय्यासना° । २ ख. °रात्रः । स । ३ ख. °र्वेकृच्छ्रः । प्रातः सायमयाचितं पराक इति सोऽति° ।

अङ्गादङ्गात्संभवसि हृदयादधिजायसे। आत्मा वै पुत्रनामाऽसि स जीव शरदः शतमिति १६

अभ्युपगम्य दुहितरि जातं पुत्रिकापुत्रमन्यं दौहित्रम्॥१७॥अथाप्युदाहरन्ति ॥१८॥ आदिशेत्प्रथमे पिण्डे मातरं पुत्रिकासुतः। द्वितीये पितरं तस्यास्तृतीये च पितामहमिति

मृतस्य प्रसूतो यः क्लीबव्याधितयोर्वाऽन्येनानुमते स्वे क्षेत्रे स क्षेत्रजः ॥२०॥स एष द्विपिता द्विगोत्रश्च द्वयोरपि स्वधारिक्थभाग्भवति ॥ २१ ॥ अथाप्युदाहरन्ति॥ २२॥ द्विपितुः पिण्डदानं स्यात्पिण्डे पिण्डे च नामनी। त्रयश्च पिण्डाः षण्णां स्युरेवं कुर्वन्न मुह्यतीति २३

मातापितृभ्यां दत्तोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते स दत्तः ॥२४॥सदृशं यं सकामं स्वयं कुर्यात्स कृत्रिमः॥ २५॥ गृहे गूढोत्पन्नोऽन्ते ज्ञातो गूढजः ॥ २६ ॥ मातापितृभ्यामुत्सृष्टोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते सोऽपविद्धः ॥ २७ ॥ असंस्कृतामनतिसृष्टां यामुपयच्छेत्तस्यां यो जातः स कानीनः ॥ २८ ॥ या गर्भिणी संस्क्रियते विज्ञाता वाऽविज्ञाता वा तस्यां यो जातः स सहोढः ॥ २९ ॥ मातापित्रोर्हस्तात्क्रीतोऽन्यतरेण वा योऽपत्यार्थे परिगृह्यते स क्रीतः ॥ ३० ॥ क्लीबं त्यक्त्वा पतितं वा याऽन्यं पतिं विन्देत्तस्यां पुनर्भ्वां यो जातः स पौनर्भवः॥३१॥ मातापितृविहीनो यः स्वयमात्मानं दद्यात्स स्वयंदत्तः ॥ ३२ ॥ द्विजातिप्रवराच्छूद्रायां जातो निषादः ॥ ३३ ॥ कामात्पारशव इति पुत्राः ॥ ३४ ॥ अथाप्युदाहरन्ति ॥ ३५ ॥

औरसं पुत्रिकापुत्रं क्षेत्रजं दत्तकृत्रिमौ। गूढजं चापविद्धं च रिक्थभाजः प्रचक्षते ३६
कानीनं च सहोढं च क्रीतं पौनर्भवं तथा। स्वयंदत्तं निषादं च गोत्रभाजः प्रचक्षते ३७
तेषां प्रथम एवेत्याहौपजङ्घनिः ॥ ३८ ॥

इदानीमहमीर्ष्यामि स्त्रीणां जनक नो पुरा। यतो यमस्य सदने जनयितुः पुत्रमब्रुवन् ३९
रेतोधाः पुत्रं नयति परेत्य यमसादने। तस्माद्भार्यां[तु] रक्षन्ति बिभ्यतः पररेतसः ४०
अप्रमत्ता रक्षथ तन्तुमेतं मा वः क्षेत्रे पर(रे)बीजानि वाप्सुः। जनयितुः पुत्रो भवति सांपराये मोघं वेत्ता कुरुते तन्तुमेतामिति ४१

तेषामप्राप्तव्यवहाराणामंशान्सोपचयान्मुनिगुप्तान्निदध्युरा व्यवहारप्रापणात् ॥ ४२ ॥ [illegible]तव्यवहारान्ग्रासाच्छादनैर्बिभृयुः ॥ ४३ ॥ अन्धजडक्लीबव्यसनिव्याधितादींश्च ॥ ४४ ॥ अकर्मिणः ॥ ४५ ॥ पतिततज्जातवर्जम् ॥ ४६ ॥ न पतितैः

---

१ ख. °यते। आ'। २ ख. रक्षन्तु। ३ ख. पितुः। ४ ख. °कर्मणः।

संव्यवहारो विद्यते ॥ ४७ ॥ पतितामपि तु मातरं बिभृयादनभिभाषमाणः[1] ॥ ४८ ॥ मातुरलंकारं दुहितरः सांपदायिकं लभेरन्नन्यद्वा ॥ ४९ ॥ न स्त्रीस्वातन्त्र्यं विद्यते ॥ ५० ॥ अथाप्युदाहरन्ति ॥ ५१ ॥

पिता रक्षति कौमारे भर्ता रक्षति यौवने । पुत्रस्तु स्थविरे भावे न स्त्री. स्वातन्त्र्यमर्हतीति ५२

निरिन्द्रिया ह्यदायाश्च स्त्रियो मता इति श्रुतिः ॥ ५३ ॥ भर्तृहिते यतमानाः स्वर्गं लोकं जयेरन्[2] ॥५४॥ व्यतिक्रमे तु कृच्छ्रः ॥५५॥ शूद्रे चान्द्रायणं चरेत् ॥ ५६ ॥ वैश्यादिषु प्रतिलोमं कृच्छ्रातिकृच्छ्रादींश्चरेत् ॥ ५७ ॥ पुंसां ब्राह्मणादीनां संवत्सरं ब्रह्मचर्यम् ॥ ५८ ॥ शूद्रं कटाग्निना दहेत् ॥ ५९ ॥ अथाप्युदाहरन्ति ॥ ६० ॥

अब्राह्मणस्य शारीरो दण्डः[3] संग्रहणे भवेत् । सर्वेषामेव वर्णानां दारा रक्ष्यतमा धनात् ६१

न तु चारणदारेषु न रङ्गावतरे[4] वधः । संसर्जयन्ति तान्ह्येतान्निगुप्तांश्चालयन्त्यपि ६२

स्त्रियः पवित्रमतुलं नैता दुष्यन्ति कर्हिचित् । मासि मासि रजो ह्यासां दुरितान्यपकर्षति ६३

सोमः शौचं ददत्तासां(दौ ता)सां गन्धर्वः शिक्षितां गिरम् । अग्निश्च सर्वभक्षत्वं तस्मान्निष्कल्मषाः स्त्रियः ६४

अप्रजां दशमे वर्षे स्त्रीप्रजां द्वादशे त्यजेत् । मृतप्रजां[5] पञ्चदशे सद्यस्त्वप्रियवादिनीम् ६५

संवत्सरं प्रेतपत्नी मधुमांसमद्यलवणानि वर्जयेदधः शयीत ॥ ६६ ॥ षण्मासानिति मौद्गल्यः ॥ ६७ ॥ अत ऊर्ध्वं गुरुभिरनुमता देवराज्जनयेत्पुत्रमपुत्रा ॥ ६८ ॥ अथाप्युदाहरन्ति ॥ ६९ ॥

वशा चोत्पन्नपुत्रा च नीरजस्का गतप्रजा । नाकामा संनियोज्या स्यात्फलं यस्यां न विद्यत इति ७०

मातुलपितृष्वसा भगिनी भागिनेयी स्नुषा मातुलानी सखिवधूरित्यगम्याः ॥ ७१ ॥ अगम्यानां गमने कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति प्रायश्चित्तिः ॥ ७२ ॥ एतेन चण्डालीव्यवायो व्याख्यातः[6] ॥ ७३ ॥ अथाप्युदाहरन्ति ॥ ७४ ॥

चण्डालीं ब्राह्मणो गत्वा भुक्त्वा च प्रतिगृह्य च । अज्ञानात्पतितो विप्रो ज्ञानात्तु समतां व्रजेत् ७५

---

१ ख. भर्तुरभिमते । २ ख. लभेरन् । ३ क. दण्डः । अब्राह्मणस्य शारीरो दण्डः । ४ ख. °रे च तत् । सं । ५ ख. प्रेतप्रजां । ६ ख. °योऽपि व्या° ।

पितुगुरोर्नरेन्द्रस्य भार्यां गत्वा प्रमादतः । गुरुतल्पी भवेत्तेन पूर्वोक्तस्तस्य निश्चय इति+
अध्यापनयाजनप्रतिग्रहैरशक्तः क्षत्रधर्मेण जीवेत्प्रत्यनन्तरत्वात् ॥ ७७ ॥ नेति
गौतमोऽत्युग्रो हि क्षत्रधर्मो ब्राह्मणस्य ॥ ७८ ॥ अथाप्युदाहरन्ति ॥ ७९ ॥
गवार्थे ब्राह्मणार्थे वा वर्णानां वाऽपि संकरे । गृह्णीयातां विप्रविशौ शस्त्रं धर्मव्यपेक्षया
वैश्यवृत्तिरनुष्ठेया प्रत्यनन्तरत्वात् ॥ ८१ ॥ प्राक्प्रातराशात्कर्षी स्यात् ॥ ८२ ॥
अस्यूतनासिकाभ्यां समुष्काभ्यामतुदन्भारया मुहुर्मुहुरभ्युच्छन्दयन् ॥ ८३ ॥
भार्यादिरग्निस्तस्मिन्कर्मकरणं प्रागग्न्याधेयात् ॥ ८४ ॥ अग्न्याधेयमभृत्यर्थेमान्यज-
स्राणि भवन्ति यथैतदग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणमुदगयनदक्षिणाय-
नयोः पशुश्चातुर्मास्यान्यृतुमुखे षड्होता वसन्ते ज्योतिष्टोम इत्येवं क्षेमप्रापणम्॥८५॥
अथाप्युदाहरन्ति—॥८६॥
न दिवा स्वप्नशीलेन न च सर्वान्नभोजिना । कामं शक्यं नभो गन्तुमारुढपतितेन वा
दैन्यं शाठ्यं जैह्म्यं च वर्जयेत् ॥ ८८ ॥अथाप्यत्रोशनसश्च वृषपर्वणश्च दुहित्रोः
संवादे गाथामुदाहरन्ति ॥ ८९ ॥
स्तुवतो दुहिता त्वं वै याचतः प्रतिगृह्णतः । अथाहं स्तूयमानस्य ददतोऽप्रतिगृह्णता दद-
तोऽप्रतिगृह्णत इति ॥ ९० ॥

इति द्वितीयप्रश्ने द्वितीयोऽध्यायः ॥ २ ॥

(अथ द्वितीयप्रश्ने तृतीयोऽध्यायः ।)

तपस्यवगाहनम् ॥ १ ॥ देवतास्तर्पयित्वा पितृतर्पणम् ॥ २ ॥ अनुतीर्थमप
वर्तिष्यति ॥ ३ ॥ ऊर्जं वहन्तीरिति ॥ ४ ॥ अथाप्युदाहरन्ति ॥ ५ ॥
स्रवन्तीष्वनिरुद्धासु त्रयो वर्णा द्विजातयः । प्रातरुत्थाय कुर्वीरन्देवर्षिपितृतर्पणम् ६
निरुद्धासु न कुर्वीरंशभाक्तत्र सेतुकृत् । तस्मात्परकृतान्सेतून्कूपांश्च परिवर्जयेदिति ७
अथाप्युदाहरन्ति ॥ ८ ॥
सकृत्स्नात्वा वाऽपि त्रीन्पिण्डान्कुर्यादापत्सु नो सदा । निरुद्धासु तु मृत्पिण्डान्कूपात्रीनन्य-
दांस्तथेति ९

+ इतः परमेतदधिकं ख. पुस्तके-" धार्म्ये स्वाध्यायप्रवचनेऽधिकारं दर्शयति प्रतिग्रहे दाता ऋत्वि-
ग्यजमाना याजमेन " इति ।

---

१ ख. भार्योद्वाहादे° । २ ख. °पस्यायामवं° ।

बहुप्रतिग्राह्यस्याप्रतिग्राह्यस्य वा प्रतिगृह्यायाज्यं वा याजयित्वाऽनाश्यान्नस्य वाऽन्नमशित्वा तरत्समन्दीयं जपेदिति ॥ १० ॥ अथाप्युदाहरन्ति ॥ ११ ॥

गुरुसंकरिणश्चैव शिष्यसंकरिणश्च ये । आहारमन्नसंकीर्णा दीर्घं तम उपासत इति १२

अथ स्नातकव्रतानि ॥ १३ ॥ सायं प्रातर्यदशनीयं स्यात्तेनान्नेन वैश्वदेवं बलिमुपहृत्य ब्राह्मणक्षत्रियविट्शूद्रानभ्यागतान्यथाशक्ति पूजयेत् ॥ १४ ॥

यदि बहूनां न शक्नुयादेकस्मै गुणवते दद्यात् ॥ १५ ॥ यो वा प्रथममुपगतः स्यात् ॥ १६ ॥ शूद्रश्चेदागतस्तं कर्मणि नियुञ्ज्यात् ॥ १७ ॥ श्रोत्रियाय वाऽग्रं दद्यात् ॥१८॥ ये नित्या भाक्तिकाः स्युस्तेषामनुपरोधेन संविभागो विहितः ॥१९॥ न त्वेव कदाचिददत्त्वा भुञ्जीत ॥ २० ॥ अथाप्यत्रान्नगीतौ श्लोकावुदाहरन्ति २१

यो मामदत्त्वा पितृदेवताभ्यो भृत्यातिथीनां च सुहृज्जनस्य ।
संपन्नमश्नन्विषमत्ति मोहात्तमन्नयहं तस्य च मृत्युरस्मि ॥ २२
हुताग्निहोत्रः कृतवैश्वदेवः पूज्यातिथीन्भृत्यजनावशिष्टम् ।
तुष्टः शुचिः श्रद्दधदत्ति यो मां तस्यामृतं स्यां स च मां भुनक्ति ॥ २३

सुब्राह्मणश्रोत्रियवेदपारगेभ्यो गुर्वर्थनिवेशौषधार्थवृत्तिक्षीणयक्ष्यमाणाध्ययनाध्वसंयोगवैश्वजितेषु द्रव्यसंविभागो यथाशक्ति कार्यो बहिर्वेदि भिक्षमाणेषु कृतान्नमितरेषु ॥ २४ ॥ सुप्रक्षालितपादपाणिराचान्तः शुचौ संवृते देशेऽन्नमुपहृतमुपसंगृह्य कामक्रोधद्रोहलोभमोहानपहत्य सर्वाभिरङ्गुलीभिः शब्दमकुर्वन्प्राश्नीयात् ॥ २५ ॥ न पिण्डशेषं पात्र्यामुत्सृजेत् ॥ २६ ॥ न पिण्डशेषं पात्र्यामुत्सृजेत् ॥ २७ ॥ मांसमत्स्यतिलसंसृष्टप्राशनेऽप उपस्पृश्याग्निमभिमृशेत् ॥ २८ ॥ अस्तमिते च स्नानम् ॥ २९ ॥ पालाशमासनं पादुके दन्तधावनमिति वर्जयेत् ॥ ३० ॥ नोत्सङ्गेऽन्नं भक्षयेत् ॥३१॥ औसन्ध्यां न भुञ्जीत ॥३२॥ वैणवं दण्डं धारयेत् ॥ ३३ ॥ रुक्मकुण्डले च ॥ ३४ ॥ पदा पादस्य प्रक्षालनमधिष्ठानं च वर्जयेत् ॥ ३५ ॥ न बहिर्मालां धारयेत् ॥ ३६ ॥ सूर्यमुदयास्तमये न निरीक्षेत ॥ ३७ ॥ नेन्द्रधनुरिति परस्मै ब्रूयात् ॥ ३८ ॥ यदि ब्रूयान्मणिधनुरित्येव ब्रूयात् ॥ ३९ ॥ पुरद्वारेन्द्रकीलपरिधावन्तरेण नातीयात् ॥ ४० ॥ प्रेङ्खखारन्तरेण न गच्छेत् ॥ ४१ ॥ वत्सतन्तिं च नोपरि गच्छेत् ॥ ४२ ॥ भस्मास्थिरोमतुषकपालावस्थानानि नाधितिष्ठेत् ॥४३॥ गां धयन्तीं परस्मै न प्रब्रूयात्॥४४॥

---

१ ख. °गे विहितो य° । २ ख. °त् । मांस° । ३ ख. °लमधुसं° । ४ ख. °ने यदप । ५ क. आसंध्यां न । ६ ख. 'दि प्रब्रू° । ७ ख. वत्सं तन्तिं । ८ क. °लापस्थाना° ।

नाधेनुमवेनुरिति ब्रूयात् ॥ ४५ ॥ यदि ब्रूयाद्धेनुं मव्येत्येव ब्रूयात् ॥ ४६ ॥ शुक्ला रुक्षाः परुषा वाचो न ब्रूयात् ॥ ४७ ॥ नैकोऽध्वानं व्रजेत् ॥ ४८ ॥ न पतितैर्न स्त्रिया न शूद्रेण ॥ ४९ ॥ न प्रतिसायं व्रजेत् ॥ ५० ॥ न नग्नः स्नायात् ॥ ५१ ॥ न नक्तं स्नायात् ॥ ५२ ॥ न नदीं बाहुकस्तरेत् ॥ ५३ ॥ न कूपमवेक्षेत ॥ ५४ ॥ न गर्तमवेक्षेत ॥ ५५ ॥ न तत्रोपविशेद्यत एनमन्य उत्थापयेत् ॥ ५६ ॥

पन्था देयो ब्राह्मणाय गवे राज्ञे ह्यचक्षुषे। वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ५७

प्रभूतैर्भोदकयवससमित्कुशमाल्योपनिष्क्रमणमाढ्यजनाकुलमनलससमृद्धमार्यजनभूयिष्ठमदस्युप्रवेश्यं ग्राममावसितुं यतेत धार्मिकः ॥५८॥

उदपानोदके ग्रामे ब्राह्मणो वृषलीपतिः। उषित्वा द्वादश समाः शूद्रसाधर्म्यमृच्छति पुररेणुकुण्ठितशरीरस्तत्परिपूर्णनेत्रवदनश्च। नगरे वसन्सुनियतात्मा सिद्धिमवाप्स्यतीति न तदस्ति ६०

रथाश्वगजधान्यानां गवां चैव रजः शुभम्। अप्रशस्तं समूहन्याः श्वाजाविखरवाससाम् ६१

पूज्यान्पूजयेत् ॥ ६२ ॥

ऋषिविद्भृपवरमातुलश्वशुरर्त्विजः। एतेऽर्घ्याः शास्त्रविहिताः स्मृताः कालविभागशः ऋषिविद्भृपाः प्राप्ताः क्रियारम्भे वरर्त्विजौ। मातुलश्वशुरौ पूज्यौ संवत्सरगतागताविति ६४

अग्न्यगारे गवां मध्ये ब्राह्मणानां च संनिधौ। स्वाध्याये भोजने चैव दक्षिणं बाहुमुद्धरेत् ६५

उत्तरं वासः कर्तव्यं पञ्चस्वेतेषु कर्मसु। स्वाध्यायोत्सर्गदानेषु भोजनाचमनयोस्तथा हवनं भोजनं दानमुपहारः प्रतिग्रहः। बहिर्जानु न कार्याणि तद्वदाचमनं स्मृतम्६७

अन्ने श्रितानि भूतानि अन्नं प्राणमिति श्रुतिः। तस्मादन्नं प्रदातव्यमन्नं हि परमं हविः हुतेन शाम्यते पापं हुतमन्नेन शाम्यति। अन्नं दक्षिणया शान्तिमुपयातीति नः श्रुतिरिति ६९

इति द्वितीयप्रश्ने तृतीयोऽध्यायः ॥ ३ ॥

(अथ द्वितीयप्रश्ने चतुर्थोऽध्यायः।)

अथातः संध्योपासनविधिं व्याख्यास्यामः ॥ १॥ तीर्थं गत्वाऽप्रयतोऽभिषिक्तः प्रयतो वाऽनभिषिक्तः प्रक्षालितपादपाणिरप आचम्य सुरभिमत्याऽङ्गिरसाभिर्वारुणीभि-

---

१ ख. °हुना तरं°। २ ख. विपाकशः।

हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयतो भवति॥२॥
अथाप्युदाहरन्ति ॥ ३ ॥
अपोऽवगाहनं स्नानं विहितं सार्ववर्णिकम्। मन्त्रवत्प्रोक्षणं चापि द्विजातीनां विशिष्यत इति ४

सर्वकर्मणां चैवाऽऽरम्भेषु प्राक्संध्योपासनकालाच्चैतेनैव पवित्रसमूहेनाऽऽत्मानं प्रोक्ष्य प्रयतो भवति॥ ५ ॥ अथाप्युदाहरन्ति ॥ ६ ॥ दर्भेष्वासीनो दर्भान्धारयमाणः सोदकेन पाणिना प्रत्यङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेत् ॥ ७ ॥ प्राणायामशो वा शतकृत्वः॥ ८ ॥ उभयतःप्रणवां ससप्तव्याहृतिकां मनसा वा दशकृत्वः॥९॥ त्रिभिश्च प्राणायामैस्तान्तो ब्रह्महृदयेन-॥१०॥ वारुणीभ्यां रात्रिमुपतिष्ठते ॥ ११ ॥ इमं मे वरुण तत्त्वा यामीति द्वाभ्याम् ॥ १२ ॥ एवमेव प्रातः प्राङ्मुखस्तिष्ठन् ॥ १३ ॥ मैत्रीभ्यामहरुपतिष्ठते मित्रस्य चर्षणीधृतो मित्रो जनान्यातयतीति द्वाभ्याम् ॥ १४ ॥ सुपूर्वामपि पूर्वामुपक्रम्योदित आदित्ये समाप्नुयात् ॥ १५ ॥ अनस्तमित उपक्रम्य सुपश्चादपि पश्चिमाम् ॥ १६ ॥ संध्ययोश्च संपत्तावहोरात्रयोश्च संतत्यै॥१७॥अपि चात्र प्रजापतिगीतौ श्लोकौ भवतः-॥१८॥
अनामतां तु ये पूर्वामनतीतां तु पश्चिमाम्। संध्यां नोपासते विप्राः कथं ते ब्राह्मणाः स्मृताः १९
सायं प्रातः सदा संध्यां ये विप्रा नो उपासते। कामं तान्धार्मिको राजा शूद्रकर्मसु योजयेदिति २०

तत्र सायमतिक्रमे राज्युपवासः ॥ २१ ॥ प्रातरतिक्रमेऽहरुपवासः ॥ २२ ॥ स्थानासनफलमवाप्नोति ॥ २३ ॥ अथाप्युदाहरन्ति—॥२४॥
यदुपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत्। बाहुभ्यां मनसा वाऽपि वाचा वा यत्कृतं भवेत् २५
सायं संध्यामुपस्थाय तेन तस्मात्प्रमुच्यते ॥ २६
रात्र्या चापि संधीयते न चैनं वरुणो गृह्णाति ॥ २७ ॥ एवमेव प्रातरुपस्थाय रात्रिकृतात्पापात्प्रमुच्यते ॥ २८ ॥ अह्ना चापि संधीयते मित्रश्चैनं गोपायत्यादित्यश्चैनं स्वर्गं लोकमुन्नयति ॥ २९ ॥ स एवमेवाहरहरहोरात्रयोः संधिषूपतिष्ठमानो ब्रह्मपूतो ब्रह्मभूतो[1] ब्राह्मणः शास्त्रमनुवर्तमानो ब्रह्मलोकमभिजयतीति विज्ञायते ब्रह्मलोकमभिजयतीति विज्ञायते ॥ ३० ॥

इति द्वितीयप्रश्ने चतुर्थोऽध्यायः ॥ ४ ॥

---

१ ख. °मभूतो ब्रह्मविराजो ब्रा°।

(अथ द्वितीयप्रश्ने पञ्चमोऽध्यायः।)

अथ हस्तौ प्रक्षाल्य कमण्डलुं मृत्पिण्डं च संगृह्य तीर्थं गत्वा त्रिः पादौ प्रक्षाल्यते त्रिरात्मानम् ॥ १ ॥ अथ हैके ब्रुवते ॥ २ ॥ श्मशानमापो देवगृहं गोष्ठं यत्र च ब्राह्मणा अप्रक्षाल्य पादौ तत्र प्रवेष्टव्यमिति ॥ ३ ॥ अथापोऽभिमंपद्यते ॥४ ॥ हिरण्यवृङ्गं वरुणं प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्रहः ५

यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतम्। तन्म(न्न) इन्द्रो वरुणो बृहस्पतिः सविता च पुनन्तु पुनः पुनरिति ६

अथाञ्जलिनाऽप उपहन्ति ॥७॥ सुमित्रा न आप ओषधयः [+सन्त्विति॥ ८॥ तां दिशं निरुक्षति यस्यामस्य दिशि द्वेष्यो भवति दुर्मित्रास्तस्मै भूयासुर्योऽस्मान्द्वेष्टि यं च वयं द्विष्म इति ॥ ९ ॥ अथाप उपस्पृश्य त्रिः प्रदक्षिणमुदकमावर्तयति यदपां क्रूरं यदमेध्यं यदशान्तं तदपगच्छतादिति ॥ १० ॥ अप्सु निमज्ज्योन्मज्ज्य ॥ ११ ॥ नाप्सु सतः प्रयमणं विद्यते न वासःपल्पूलनम् ॥ १२ ॥ नोपरपर्शनम् ॥ १३ ॥ यद्युपरुद्धाः स्युरेतेनोपतिष्ठते नमोऽग्नयेऽप्सुमते नम इन्द्राय नमो वरुणाय नमो वारुण्यै नमोऽभ्य इति ॥ १४ ॥ उत्तीर्याऽऽचम्याऽऽचान्तः पुनराचामेत् ॥ १५ ॥

आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्म पूता पुनातु माम् १६

यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम। सर्वं पुनन्तु मामापोऽसतां च प्रतिग्रहं स्वाहेति १७

पवित्रे कृत्वाऽङ्गिर्मार्जयति आपो हि ष्ठा मयोभुव इति तिसृभिर्हिरण्यवर्णाः शुचयः पावका इति चतसृभिः ॥ १८ ॥ पवमानः सुवर्जन इत्येतेनानुवाकेन मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन त्रीन्प्राणायामान्धारयित्वोत्तीर्य वासः पीडयित्वा प्रक्षालितोपवातान्यक्लिष्टानि वासांसि परिधायाप आचम्य दर्भेष्वासीनो दर्भान्धारयमाणः प्राङ्मुखः सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वोऽपरिमितकृत्वो वा दशावरम् ॥ १९ ॥ अथाऽऽदित्यमुपतिष्ठत उद्वयं तमसस्परि उदु त्यं चित्रं तच्चक्षुर्देवहितं य उदगादिति ॥ २० ॥ अथाप्युदाहरन्ति ॥ २१ ॥ प्रणवो व्याहृतयः

+ एतच्चिह्नान्तर्गतग्रन्थः ख. पुस्तके विद्यते।

---

१ ख. 'प्रतिप'।

सावित्री चेत्येते पञ्च ब्रह्मयज्ञा अहरहर्ब्राह्मणं किल्बिषात्पावयन्ति ॥ २२ ॥ पूतः पञ्चभिर्ब्रह्मयज्ञैरथोत्तरं देवतास्तर्पयति ॥ २३ ॥ अग्निः प्रजापतिः(?) । अग्निः प्रजापतिः सोमो रुद्रोऽदितिर्बृहस्पतिः सर्पा इत्येतानि प्राग्द्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि ॥ २४ ॥ ओं वसूंश्च तर्पयामि ॥ २५ ॥ ओं पितरोऽर्यमा भगः सविता त्वष्टा वायुरिन्द्राग्नी इत्येतानि दक्षिणद्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि ॥ २६ ॥ ओमादित्यांश्च तर्पयामि ॥ २७ ॥ ओं वसवो वरुणोऽज एकपादहिर्बुध्न्यः पूषाऽश्विनौ यम इत्येतान्युदग्द्वाराणि दैवतानि सनक्षत्राणि सग्रहाणि साहोरात्राणि समुहूर्तानि तर्पयामि ॥ २८ ॥ ओं विश्वान्देवांस्तर्पयामि ॥ २९ ॥ ओं साध्यांश्च तर्पयामि ॥ ३० ॥ ओं ब्रह्माणं तर्पयामि ॥ ३१ ॥ ओं प्रजापतिं तर्पयामि ॥ ३२ ॥ ओं चतुर्मुखं तर्पयामि ॥ ३३ ॥ ओं हिरण्यगर्भं तर्पयामि ॥ ३४ ॥ ओं स्वयंभुवं तर्पयामि ॥ ३५ ॥ ओं ब्रह्मपार्षदांस्तर्पयामि ॥ ३६ ॥ ओं परमेष्ठिनं तर्पयामि ॥ ३७ ॥ ओं ब्रह्मपार्षदीश्च तर्पयामि ॥ ३८ ॥ ओमाग्निं तर्पयामि ॥ ३९ ॥ ओं वायुं तर्पयामि ॥ ४० ॥ ओं वरुणं तर्पयामि ॥ ४१ ॥ ओं सूर्यं तर्पयामि ॥ ४२ ॥ ओं चन्द्रमसं तर्पयामि ॥ ४३ ॥ ओं नक्षत्राणि तर्पयामि ॥ ४४ ॥ ओं सद्योजातं तर्पयामि ॥ ४५ ॥ ओं भूः पुरुषं तर्पयामि ॥ ४६ ॥ ओं भुवः पुरुषं तर्पयामि ॥ ४७ ॥ ओं सुवः पुरुषं तर्पयामि ॥ ४८ ॥ ओं भूर्भुवःसुवः पुरुषं तर्पयामि ॥ ४९ ॥ ओं भूस्तर्पयामि ॥ ५० ॥ ओं भुवस्तर्पयामि ॥ ५१ ॥ ओं सुवस्तर्पयामि ॥ ५२ ॥ ओं महस्तर्पयामि ॥ ५३ ॥ ओं जनस्तर्पयामि ॥ ५४ ॥ ओं तपस्तर्पयामि ॥ ५५ ॥ ओं सत्यं तर्पयामि ॥ ५६ ॥ ओं भवं देवं तर्पयामि ॥ ५७ ॥ ओं शर्वं देवं तर्पयामि ॥ ५८ ॥ ओमीशानं देवं तर्पयामि ॥ ५९ ॥ ओं पशुपतिं देवं तर्पयामि ॥ ६० ॥ ओं रुद्रं देवं तर्पयामि ॥ ६१ ॥ ओमुग्रं देवं तर्पयामि ॥ ६२ ॥ ओं भीमं देवं तर्पयामि ॥ ६३ ॥ ओं महान्तं देवं तर्पयामि ॥ ६४ ॥ ओं भवस्य देवस्य पत्नीं तर्पयामि ॥ ६५ ॥ ओं शर्वस्य देवस्य पत्नीं तर्पयामि ॥ ६६ ॥ ओमीशानस्य देवस्य पत्नीं तर्पयामि ॥ ६७ ॥ ओं पशुपतेर्देवस्य पत्नीं तर्पयामि ॥ ६८ ॥ ओं रुद्रस्य देवस्य पत्नीं तर्पयामि ॥ ६९ ॥ ओमुग्रस्य देवस्य पत्नीं तर्पयामि ॥ ७० ॥ ओं भीमस्य देवस्य पत्नीं तर्पयामि ॥ ७१ ॥ ओं महतो देवस्य पत्नीं तर्पयामि ॥ ७२ ॥ ओं भवस्य देवस्य सुतं तर्पयामि ॥ ७३ ॥ ओं शर्वस्य देवस्य सुतं तर्पयामि ॥ ७४ ॥ ओमीशानस्य देवस्य सुतं तर्पयामि ॥ ७५ ॥ ओं पशुपतेर्देवस्य सुतं तर्पयामि ॥ ७६ ॥ ओं रुद्रस्य देवस्य सुतं तर्पयामि ॥ ७७ ॥ ओमुग्रस्य देवस्य सुतं तर्प-

यामि ॥ ७८ ॥ ओं भीमस्य देवस्य सुतं तर्पयामि ॥ ७९ ॥ ओं महतो देवस्य सुतं तर्पयामि ॥ ८० ॥ ओं रुद्रांश्च तर्पयामि ॥ ८१ ॥ ओं रुद्रपार्षदांस्तर्पयामि ॥ ८२ ॥ ओं विघ्नं तर्पयामि ॥ ८३ ॥ ओं विनायकं तर्पयामि ॥ ८४ ॥ ओं वीरं तर्पयामि ॥ ८५ ॥ ओं स्थूलं तर्पयामि ॥ ८५ ॥ ओं वरदं तर्पयामि ॥ ८६ ॥ ओं हस्तिमुखं तर्पयामि ॥ ८७ ॥ ओं वक्रतुण्डं तर्पयामि ॥ ८८ ॥ ओमेकदन्तं तर्पयामि ॥ ८९ ॥ ओं लम्बोदरं तर्पयामि ॥ ९० ॥ ओं विघ्नपार्षदांस्तर्पयामि ॥ ९१ ॥ विघ्नपार्षदीश्च तर्पयामि ॥ ९२ ॥ ओं सनत्कुमारं तर्पयामि ॥ ९३ ॥ ओं स्कन्दं तर्पयामि ॥ ९४ ॥ ओमिन्द्रं तर्पयामि ॥ ९५ ॥ ओं षष्ठीं तर्पयामि ॥ ९६ ॥ ओं षण्मुखं तर्पयामि ॥ ९७ ॥ ओं विशाखं तर्पयामि ॥ ९८ ॥ ओं महासेनं तर्पयामि ॥ ९९ ॥ ओं सुब्रह्मण्यं तर्पयामि ॥ १०० ॥ ओं स्कन्दपार्षदांस्तर्पयामि ॥ १०१ ॥ ओं स्कन्दपार्षदीश्च तर्पयामि ॥ १०२ ॥ ओमादित्यं तर्पयामि ॥ १०३ ॥ ओं सोमं तर्पयामि ॥ १०४ ॥ ओमङ्गारकं तर्पयामि ॥ १०५ ॥ ओं बुधं तर्पयामि ॥ १०६ ॥ ओं बृहस्पतिं तर्पयामि ॥ १०७ ॥ ओं शुक्रं तर्पयामि ॥ १०८ ॥ ओं शनैश्चरं तर्पयामि ॥ १०९ ॥ ओं राहुं तर्पयामि ॥ ११० ॥ ओं केतुं तर्पयामि ॥ १११ ॥ ओं केशवं तर्पयामि ॥ ११२ ॥ ओं नारायणं तर्पयामि ॥ ११३ ॥ ओं माधवं तर्पयामि ॥ ११४ ॥ ओं गोविन्दं तर्पयामि ॥ ११५ ॥ ओं विष्णुं तर्पयामि ॥ ११६ ॥ ओं मधुसूदनं तर्पयामि ॥ ११७ ॥ ओं त्रिविक्रमं तर्पयामि ॥ ११८ ॥ ओं वामनं तर्पयामि ॥ ११९ ॥ ओं श्रीधरं तर्पयामि ॥ १२० ॥ ओं हृषीकेशं तर्पयामि ॥ १२१ ॥ ओं पद्मनाभं तर्पयामि ॥ १२२ ॥ ओं दामोदरं तर्पयामि ॥ १२३ ॥ ओं श्रियं देवीं तर्पयामि ॥ १२४ ॥ ओं सरस्वतीं देवीं तर्पयामि ॥ १२५ ॥ ओं पुष्टिं तर्पयामि ॥ १२६ ॥ ओं तुष्टिं तर्पयामि ॥ १२७ ॥ ओं विष्णुं तर्पयामि ॥ १२८ ॥ ओं गरुत्मन्तं तर्पयामि ॥ १२९ ॥ ओं विष्णुपार्षदांश्च तर्पयामि ॥ १३० ॥ ओं विष्णुपार्षदीश्च तर्पयामि ॥ १३१ ॥ ओं यमं तर्पयामि ॥ १३२ ॥ ओं यमराजं तर्पयामि ॥ १३३ ॥ ओं धर्मं तर्पयामि ॥ १३४ ॥ ओं धर्मराजं तर्पयामि ॥ १३५ ॥ ओं कालं तर्पयामि ॥ १३६ ॥ ओं नीलं तर्पयामि ॥ १३७ ॥ ओं मृत्युंजयं तर्पयामि ॥ १३८ ॥ ओं वैवस्वतं तर्पयामि ॥ १३९ ॥ ओं चित्रगुप्तं तर्पयामि ॥ १४० ॥ ओमौदुम्बरं तर्पयामि ॥ १४१ ॥ ओं वैवस्वतपार्षदांस्तर्पयामि ॥ १४२ ॥ ओं वैवस्वतपार्षदीश्च तर्पयामीति ॥ १४३ ॥ ओं भूमिदेवांस्तर्पयामि ॥ १४४ ॥ ओं काश्यपं तर्पयामि ॥ १४५ ॥ ओमन्तरिक्षं तर्पयामि ॥ १४६ ॥ ओं विद्यां तर्पयामि ॥ १४७ ॥ ओं धन्वन्तरिं तर्पयामि ॥ १४८ ॥ ओं धन्वन्तरिपार्षदांश्च

तर्पयामि ॥ १४९ ॥ ओं धन्वन्तरिपार्षदीश्च तर्पयामीति ॥ १५० ॥ अथ निवीती ॥ १५१ ॥ ओमृषींस्तर्पयामि ॥ १५२ ॥ ओं महर्षींस्तर्पयामि ॥ १५३ ॥ ओं परमर्षींस्तर्पयामि ॥ १५४ ॥ ओं ब्रह्मर्षींस्तर्पयामि ॥ १५५ ॥ ओं देवर्षींस्तर्पयामि ॥ १५६ ॥ ओं राजर्षींस्तर्पयामि ॥ १५७ ॥ ओं श्रुतर्षींस्तर्पयामि ॥१५८॥ ओं सप्तर्षींस्तर्पयामि ॥ १५९ ॥ ओं काण्डर्षींस्तर्पयामि ॥ १६० ॥ ओमृषिकांस्तर्पयामि ॥ १६१ ॥ ओमृषिपत्नीस्तर्पयामि ॥ १६२ ॥ ओमृषिपुत्रकांस्तर्पयामि ॥ १६३ ॥ ओं कण्वं बौधायनं तर्पयामि ॥ १६४ ॥ ओमापस्तम्बं सूत्रकारं तर्पयामि ॥ १६५ ॥ ओं सत्याषाढं हिरण्यकेशिनं तर्पयामि ॥ १६६ ॥ ओं वाजसनेयिनं याज्ञवल्क्यं तर्पयामि ॥ १६७ ॥ ओमाश्वलायनं शौनकं तर्पयामि ॥ १६८ ॥ ओं व्यासं तर्पयामि ॥ १६९ ॥ ओं प्रणवं तर्पयामि ॥ १७० ॥ ओं व्याहृतीस्तर्पयामि ॥ १७१ ॥ ओं सावित्रीं तर्पयामि ॥ १७२ ॥ ओं गायत्रीं तर्पयामि ॥ १७३ ॥ ओं छन्दांसि तर्पयामि ॥ १७४ ॥ ओमृग्वेदं तर्पयामि ॥ १७५ ॥ ओं यजुर्वेदं तर्पयामि ॥ १७६ ॥ ओं सामवेदं तर्पयामि ॥ १७७ ॥ ओमथर्वाङ्गिरसं तर्पयामि ॥ १७८ ॥ ओमितिहासपुराणं तर्पयामि ॥ १७९ ॥ ओं सर्ववेदांस्तर्पयामि ॥ १८० ॥ ओं सर्वदेवजनांस्तर्पयामि ॥ १८१ ॥ ओं सर्वभूतानि तर्पयामीति ॥ १८२ ॥ अथ प्राचीनावीती (?) ॥ अथ प्राचीनावीती ॥ १८३ ॥ ओं पितॄन्स्वधा नमस्तर्पयामि ॥ १८४ ॥ ओं पितामहान्स्वधा नमस्तर्पयामि ॥१८५॥ ओं प्रपितामहान्स्वधा नमस्तर्पयामि ॥ १८४॥ ओं मातुः स्वधा नमस्तर्पयामि ॥१८७॥ ओं पितामहीः स्वधा नमस्तर्पयामि ॥ १८८ ॥ ओं प्रपितामहीः स्वधा नमस्तर्पयामि ॥ १८९ ॥ ओं मातामहान्स्वधा नमस्तर्पयामि ॥ १९० ॥ ओं मातुः पितामहान्स्वधा नमस्तर्पयामि ॥ १९१ ॥ ओं मातुः प्रपितामहान्स्वधा नमस्तर्पयामि ॥ १९२ ॥ ओं मातामहीः स्वधा नमस्तर्पयामि ॥ १९३ ॥ ओं मातुः पितामहीः स्वधा नमस्तर्पयामि ॥ १९४ ॥ ओं मातुः प्रपितामहीः स्वधा नमस्तर्पयामि ॥ १९५ ॥ ओमाचार्यान्स्वधा नमस्तर्पयामि ॥ १९६ ॥ ओमाचार्यपत्नीः स्वधा नमस्तर्पयामि ॥ १९७ ॥ ओं गुरून्स्वधा नमस्तर्पयामि ॥ १९८ ॥ ओं गुरुपत्नीः स्वधा नमस्तर्पयामि ॥ १९९ ॥ ओं सखीन्स्वधा नमस्तर्पयामि ॥ २०० ॥ ओं सखिपत्नीः स्वधा नमस्तर्पयामि ॥ २०१ ॥ ओं ज्ञातीन्स्वधा नमस्तर्पयामि ॥ २०२ ॥ ओं ज्ञातिपत्नीः स्वधा नमस्तर्पयामि ॥ २०३ ॥ ओममात्यान्स्वधा नमस्तर्पयामि ॥ २०४ ॥ ओममात्यपत्नीः स्वधा नमस्तर्पयामि ॥ २०५ ॥ ओं सर्वान्स्वधा नमस्तर्पयामि ॥२०५॥ ओं सर्वाः स्वधा नमस्तर्पयामीति ॥२०७॥ अनुतीर्थमप उत्सिञ्चति ॥२०८॥

ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् ।
स्वधा स्थ तर्पयत मे पितॄन् । तृप्यत तृप्यतेति ॥ २०९ ॥ नैकवस्त्रो नाऽऽर्द्रवास दैवानि कर्माण्यनुसंचरेत् ॥ २१० ॥ पितृसंयुक्तानि चेत्येकेषां पितृसंयुक्तानि चेत्येकेषाम् ॥ २११ ॥

इति द्वितीयप्रश्ने पञ्चमोऽध्यायः ॥ ५ ॥

अथ द्वितीयप्रश्ने षष्ठोऽध्यायः ।

अथ पञ्च महायज्ञाः॥१॥ तान्येव महासत्राणि ॥२॥ देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति ॥ ३ ॥ अहरहः स्वाहा कुर्यादा काष्ठात्तथैतं देवयज्ञं समाप्नोति ॥ ४ ॥ अहरहः स्वधा कुर्यादोदपात्रात्तथैतं पितृयज्ञं समाप्नोति ॥ ५ ॥ अहरहर्नमस्कुर्यादा पुष्पेभ्यस्तथैतं भूतयज्ञं समाप्नोति ॥ ६ ॥ अहरहर्ब्राह्मणेभ्योऽन्नं दद्यादा मूलफलशाकेभ्यस्तथैतं मनुष्ययज्ञं समाप्नोति ॥ ७ ॥ अहरहः स्वाध्यायं कुर्यादा प्रणवात्तथैतं ब्रह्मयज्ञं समाप्नोति ॥ ८ ॥ स्वाध्यायो वै ब्रह्मयज्ञस्तस्य ह वा एतस्य ब्रह्मयज्ञस्य वागेव जुहूर्मन उपभृच्चक्षुर्ध्रुवा मेधा स्रुवः सत्यमवभृथः स्वर्गो लोक उदयनं यावन्तं ह वा इमां वित्तस्य पूर्णां ददत्स्वर्गं लोकं जयति तावन्तं लोकं जयति भूयांसं चाक्षय्यं चाप पुनर्मृत्युं जयति य एवं विद्वान्स्वाध्यायमधीते तस्मात्स्वाध्यायोऽध्येतव्य इति हि ब्राह्मणम् ॥ ९ ॥ अथाप्युदाहरन्ति- ॥ १० ॥ स्वभ्यक्तः सुहितः सुखे शयने शयानो यं यं क्रतुमधीते तेन तेनास्येष्टं भवतीति॥११॥

तस्य ह वा एतस्य धर्मस्य चतुर्धा भेदमेक आहुरदृष्टत्वात् ॥ १२ ॥ ये चत्वार इति कर्मवादः ॥ १३ ॥ ऐष्टिकपाशुकसौमिकदार्विहोमानाम् ॥ १४ ॥ तदेषाऽभिवदति ॥ १५ ॥

ये चत्वारः पथयो देवयाना अन्तरा द्यावापृथिवी वियन्ति ।
तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः परिदत्तेह सर्व इति ॥ १६ ॥

ब्रह्मचारी गृहस्थो वानप्रस्थः परिव्राजक इति ॥ १७ ॥ ब्रह्मचारी गुरुशुश्रूष्यामरणात् ॥ १८ ॥ वानप्रस्थो वैखानसशास्त्रसमुदाचारः ॥ १९ ॥ वैखानसो वने मूलफलाशी तपःशीलः सवने]षूदकमुपस्पृशञ्[1]ञ्छ्यामणकेनाग्निमाधायाग्राम्यभोजी देवपितृभूतमनुष्यर्षिपूजकः सर्वातिथिः प्रतिषिद्धवर्जं[2] भैक्षमप्युपयुञ्जीत न फालकृष्टमधितिष्ठेद्ग्रामं च न प्रविशेज्जटिलश्चीराजिनवासा नातिसांवत्सरं[3]

---

१ ख. °शञ्श्यामलके° । २ ख. °वमनुष्यभूतर्षि° । ३ ख. °तिथीन्प्रति° । ४ क. °र्ज वैष्ण्म° ।

भुञ्जीत ॥ २० ॥ परिव्राजकः परित्यज्य बन्धूनपरिग्रहः प्रव्रजेद्यथाविधि ॥ २१ ॥ अरण्यं गत्वा शिखामुण्डः कौपीनाच्छादनः ॥ २२ ॥ वर्षास्वेकस्थः ॥ २३ ॥ काषायवासाः सन्नमुसले व्यङ्गारे निवृत्तशरावसंपाते भिक्षेत ॥ २४ ॥ वाङ्मनः-कर्मदण्डैर्भूतानामद्रोही ॥ २५ ॥ पवित्रं बिभ्रच्छौचार्थम् ॥ २६ ॥ उद्धृतपरिपूताभिरद्भिरप्कार्यं कुर्वाणः ॥ २७ ॥ *अपविध्य वैदिकानि कर्माण्युभयतः परिच्छिन्ना मध्यमं पदं संश्लिष्यामह इति वदन्तः ॥ २८ ॥ ऐकाश्रम्यं त्वाचार्या अप्रजनत्वादितरेषाम् ॥ २९ ॥ तत्रोदाहरन्ति- ॥ ३० ॥

प्राङादित्य वै कपिलो नामाऽऽसुर आस स एतान्भेदांश्चकार देवैः स्पर्धमानस्तान्मनीषी नाऽऽद्रियेत ॥ ३१ ॥ अदृष्टत्वात् ॥३२॥ ये चत्वार इति ॥ ३३ ॥ कर्मवाद ऐष्टिकपाशुकसौमिकदार्विहोमाणाम् ॥ ३४ ॥ तदेषाऽभ्यनूच्यते— ॥ ३५ ॥

एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान् ।
तस्यैवाऽऽत्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति ३६

स ब्रूयात् ॥३७॥ येन सूर्यस्तपति तेजसेऽद्धः पिता पुत्रेण पितृमान्योनियोनौ । नावेदविन्मनुते तं बृहन्तम् । सर्वानुभुपात्मानं संपराय इति ॥ ३८ ॥

इमे ये नार्वाङ्न परश्चरन्ति न ब्राह्मणासो न सुतेकरासः ।
त एते वाचमभिपद्य पापया सिरीस्तन्त्रं तन्वते अप्रजज्ञय इति ॥ ४१ ॥

प्रजाभिरग्ने अमृतत्वमश्याम् ॥ ४२ ॥ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ॥४३॥ एवमृणसंयोगादीन्यसंख्येयानि भवन्ति ॥ ४४ ॥ त्रयीं विद्यां ब्रह्मचर्यं प्रजातिं श्रद्धां तपो यज्ञमनुप्रदानम् ॥ ४५ ॥ य एतानि कुर्वते तैरित्सह स्मो रजो भूत्वा ध्वंसतेऽन्यत्प्रशंसन्निति ध्वंसतेऽन्यत्प्रशंसन्निति ॥ ४६ ॥

इति द्वितीयप्रश्ने षष्ठोऽध्यायः ॥ ६ ॥

(अथ द्वितीयप्रश्ने सप्तमोऽध्यायः ।)

अथ शालीनयायावराणामात्मयाजिनां प्राणाहुतीर्व्याख्यास्यामः ॥ १ ॥ सर्वा-

---

* इतः प्रभृतीतरेषामित्यन्तं न ख. पुस्तके ।

---

१ ख. °क्षीतैकाश्रन्थ्वाऽऽचार्यप्रजनत्वादितरेषां परिवा° । २ ख. °रद्भिः का° । ३ क. °गादन्योऽसंख्येया भ° । ४ क. प्रजार्ति । ५ क. °गादिन्योऽसंख्येया भ° । ६ ख. प्रजापार्ति ।

वश्यकावसाने संमृष्टोपलिप्ते देशे प्राङ्मुख उपविश्य तद्भूतमाहियमाणं भूर्भुवः सुवरोमिति उपस्थाय वाचं यच्छेत् ॥ २ ॥ न्यस्तमन्नं महाव्याहृतिभिः प्रदक्षिणमुदकं परिषिच्य सव्येन पाणिना विमुञ्चन्नमृतोपस्तरणमसीति पुरस्तादपः पीत्वा पञ्चान्नेन प्राणाहुतीर्जुहोति ॥ ३ ॥ प्राणे निविष्टोऽमृतं जुहोमि शिवो मा विशाप्रदाहाय प्राणाय स्वाहेति ॥ ४ ॥ पञ्चान्नेन प्राणाहुतीर्हुत्वा तूष्णीं भूयो व्रतयेत्प्रजापतिं मनसा ध्यायन्नान्तरा वाचं विसृजेत् ॥ ५ ॥ यद्यन्तरा वाचं विसृजेत्, भूर्भुवः सुवरोमिति जपित्वा पुनरेव भुञ्जीत[1] ॥ ६ ॥ त्वक्केशनखकीटास्थिपुरीषाणि दृष्ट्वा तं देशं पिण्डमुद्धृत्याद्भिरभ्युक्ष्य भस्मावकीर्य पुनरद्भिः प्रोक्ष्य वाचा च प्रशस्तमुपयुञ्जीत ॥ ७ ॥ अथाप्युदाहरन्ति ॥ ८ ॥

आसीनः प्राङ्मुखोऽश्नीयाद्वाग्यतोऽन्नमकुत्सयन्। अस्कन्दयंस्तन्मनाश्च भुक्त्वा चाग्निमुपस्पृशेदिति ९

सर्वभक्ष्यापूपकन्दमूलफलमांसानि दन्तैर्नावद्येत् ॥ १० ॥ नातिसुहितोऽमृतापिधानमसीत्युपरिष्टादपः पीत्वाऽऽचान्तो हृदयदेशमभिमृशति ॥ ११ ॥ प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकस्तेनान्नेनाऽऽप्यायस्वेति ॥ १२ ॥ पुनराचम्य दक्षिणे पादाङ्गुष्ठे पाणी निस्रावयति ॥ १३ ॥ अङ्गुष्ठमात्रः पुरुषोऽङ्गुष्ठं च समाश्रितः। ईशः सर्वस्य जगतः प्रभुः प्रीणाति विश्वभुगिति ॥ १४ ॥ हुतानुमन्त्रणमूर्ध्वहस्तः समाचरेत् ॥ १५ ॥ श्रद्धायां प्राणे निविश्यामृतं हुतं प्राणमन्नेनाऽऽप्यायस्वेति पञ्च ॥ १६ ॥ ब्रह्मणि म आत्माऽमृतत्वायेत्यात्मानम् ॥ १७ ॥ अक्षरेण चाऽऽत्मानं योजयेत् ॥ १८ ॥ सर्वक्रतुयाजिनामात्मयाजी विशिष्यते ॥ १९ ॥ अथाप्युदाहरन्ति ॥ २० ॥ यथा हि तूलमैषीकम्[2] ॥ २१ ॥

यथा हि तूलमैषीकमग्नौ प्रोतं प्रदीप्यते। तद्वत्सर्वाणि पापानि दह्यन्ते ह्यात्मयाजिनः २२

केवलाघो भवति केवलादी मोघमन्नं विन्दत इति ॥ २३ ॥ स एवमेवाहरहः सायं प्रातर्जुहुयात् ॥ २४ ॥ अद्भिर्वा सायम् ॥ २५ ॥ अथाप्युदाहरन्ति ॥ २६ ॥

अग्रे भोजयेदतिथीनन्तर्वत्नीरनन्तरम्। बालवृद्धांस्तथा दीनान्व्याधितांश्च विशेषतः २७

अदत्त्वा तु य एतेभ्यः पूर्वं भुङ्क्ते यथाविधि। भुज्यमानो न जानाति न स भुङ्क्ते स भुज्यते २८

पितृदैवतभृत्यानां मातापित्रोर्गुरोस्तथा। वाग्यतो विघसमश्नीयादेवं धर्मो विधीयत इति

अथाप्युदाहरन्ति ॥ ३० ॥

---

१ ख. °त्। म°। २ क. यदन्त°। ३ ख. °त। अथाप्युदाहरन्ति। त्व°। ४ ख. °कम्।

अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः। द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः आहिताग्निरनड्वांश्च ब्रह्मचारी च ते त्रयः। अश्नन्त एव सिध्यन्ति नैषां सिद्धिरनश्नतामिति ३२

गृहस्थो ब्रह्मचारी वा योऽनश्नंस्तु तपश्चरेत्। प्राणाग्निहोत्रलोपेन अवकीर्णी भवेत्तु सः अन्यत्र प्रायश्चित्तात्प्रायश्चित्ते तदेव विधानम् ॥ ३४ ॥ अथाप्युदाहरन्ति॥३५॥

अन्तरा प्रातराशं च सायमाशं तथैव च। सदोपवासी भवति यो न भुङ्क्ते कदाचन ३६

प्राणाग्निहोत्रमन्त्रांस्तु निरुद्धे भोजने जपेत्। त्रेताग्निहोत्रमन्त्रांस्तु द्रव्यालाभे यथा जपेदिति ३७

एवमेवाऽऽचरन्ब्रह्मभूयाय कल्पते ब्रह्मभूयाय कल्पत इति ॥ ३८ ॥

इति द्वितीयप्रश्ने सप्तमोऽध्यायः ॥ ७ ॥

(अथ द्वितीयप्रश्नेऽष्टमोऽध्यायः।)

पित्र्यमायुष्यं स्वर्ग्यं यशस्यं पुष्टिकर्म च ॥ १ ॥ त्रिमधुस्त्रिणाचिकेतस्त्रिसुपर्णः पञ्चाग्निः षडङ्गविच्छीर्षको ज्येष्ठसामकः स्नातक इति पङ्क्तिपावनाः ॥ २ ॥ तदभावे रहस्यवित् ॥ ३ ॥ ऋचो यजूंषि सामानीति श्राद्धस्य महिमा ॥ ४ ॥ तस्मादेवंविदं सपिण्डमप्याशयेत् ॥ ५ ॥

राक्षोघ्नानि च सामानि स्वधावन्ति यजूंषि च। मध्वृचोऽथ पवित्राणि श्रावयेदाशयन्स्वनैः ६

चरणवतोऽनूचानान्योनिगोत्रमन्त्रासंबन्धाञ्शुचीन्मन्त्रतस्त्रयवरानयुजः पूर्वेद्युः प्रातरेव वा निमन्त्र्य सदर्भोपक्लृप्तेष्वासनेषु प्राङ्मुखानुपवेशयत्युदङ्मुखान्वा ॥ ७ ॥ अथैनांस्तिलमिश्रा अपः प्रतिग्राह्य गन्धैर्माल्यैश्चालंकृत्याग्नौ करिष्यामीत्यनुज्ञातोऽग्निमुपसमाधाय संपरिस्तीर्याऽग्निमुखांत्कृत्वाऽन्नस्यैव तिस्र आहुतीर्जुहोति ॥८॥ सोमाय पितृपीताय स्वधा नमः स्वाहा ॥ ९ ॥ यमायाङ्गिरस्वते पितृमते स्वधा नमः स्वाहा ॥ १० ॥ अग्नये कव्यवाहनाय स्विष्टकृते स्वधा नमः स्वाहेति ॥११॥ तच्छेषेणान्नमभिघार्यान्नस्यैता एव तिस्रो जुहुयात् ॥ १२ ॥ वयसां पिण्डं दद्यात् ॥ १३ ॥ वयसां हि पितरः प्रतिमया चरन्तीति विज्ञायते ॥ १४ ॥ अथेतरत्साङ्गु-

---

१ ख. °ते इति होवाच प्रजापतिः। पि°। २ ख. °मथाश°। ३ ख. °यञ्शुचिः। च°। ४ ख. °खान्कृत्वा। ५ ख- °तरेण साङ्गु°।

ष्ठेन पाणिनाऽभिमृशति ॥ १५ ॥ पृथिवीसमन्तस्य तेऽग्निरुपद्रष्टूर्चस्ते महिमा दत्तस्याप्रमादाय पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा पितॄणां क्षेष्ठा अमुत्रामुष्मिँल्लोक इति ॥ १६ ॥ अन्तरिक्षसमन्तस्य ते वायुरुपश्रोता यजूंषि ते महिमा दत्तस्याप्रमादाय पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा पितामहानां क्षेष्ठा अमुत्रामुष्मिँल्लोक इति॥ १७ ॥ द्युसमन्तस्य त आदित्योऽनुख्याता सामानि ते महिमा दत्तस्याप्रमादाय पृथिवी ते पात्रं द्यौरपिधानं ब्रह्मणस्त्वा मुखे जुहोमि ब्राह्मणानां त्वा विद्यावतां प्राणापानयोर्जुहोम्यक्षितमसि मा प्रपितामहानां क्षेष्ठा अमुत्रामुष्मिँल्लोक इति ॥ १८ ॥ अथ वै भवति ॥ १९ ॥ + अथ वै भवति ॥ २० ॥

अग्नौकरणशेषेण तदन्नमभिघारयेत्। निरङ्कुष्ठं तु यद्दत्तं न तत्प्रीणाति वै पितॄन् २१
उभयोः शाखयोर्भुक्तं पितृभ्योऽन्नं निवेदितम्। तदन्तरमुपासन्तेऽसुरा वै दुष्टचेतसः २२
यातुधानाः पिशाचाश्च प्रतिलुम्पन्ति तद्विदः। तिलादाने ह्यदायादास्तथा क्रोधवशेऽसुराः २३
काषायवासा यान्कुरुते जपहोमप्रतिग्रहान्। न तद्देवगमं भवति हव्यकव्येषु यद्विदः २४
यच्च दत्तमनङ्कुष्ठं यच्चैव प्रतिगृह्यते। आचामति च यस्तिष्ठन्न स तेन समृध्यत इति २५
आद्यन्तयोरपां प्रदानं सर्वत्र ॥ २६ ॥ जपप्रभृति यथाविधानम् ॥ २७ ॥ शेषमुक्तमष्टकाहोमे ॥ २८ ॥

द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा। भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे २९
सत्क्रियां देशकालौ च शौचं ब्राह्मणसंपदम्। पञ्चैतान्विस्तरो हन्ति तस्मात्तं परिवर्जयेत्
उरस्तः पितरस्तस्य वामतश्च पितामहाः। दक्षिणतः प्रपितामहाः पृष्ठतः पिण्डतर्कका इति

इति द्वितीयप्रश्नेऽष्टमोऽध्यायः ॥ ८ ॥

(अथ द्वितीयप्रश्ने नवमोऽध्यायः।)

प्रजाकामस्योपदेशः ॥ १ ॥ प्रजननं निमित्ता समाख्येति ॥ २ ॥ अश्विनावूचतुः ॥ ३ ॥
आयुषा तपसा युक्तः स्वाध्यायेज्यापरायणः। प्रजामुत्पादयेद्युक्तः स्वे स्वे वर्णे जितेन्द्रियः ४

+ इदं वाक्यमधिकम्।

---

१ ख. °त्र पि°। २ ख. उरसः। ३ ख. °तक्षका°।

ब्राह्मणस्यर्णसंयोगास्त्रिभिर्भवति जन्मतः। तानि मुच्याऽऽत्मवान्भवति विमुक्तो धर्मसंशयात् ५

स्वाध्यायेन ऋषीन्पूज्य सोमेन च पुरंदरम्। प्रजया च पितॄन्पूर्वाननृणो दिवि मोदते ६

पुत्रेण लोकाञ्जयति पौत्रेणाऽऽनन्त्यमश्नुते। अथ पुत्रस्य पौत्रेण नाकमेवाधिरोहतीति ७

विज्ञायते च ॥ ८ ॥ जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति ॥९॥ एवमृणसंयोगं वेदो दर्शयति॥१०॥ सत्पुत्रमुत्पाद्याऽऽत्मानं तारयति ॥ ११ ॥

सप्तावरान्सप्त पूर्वान्षडन्यानात्मसप्तमान्। सत्पुत्रमधिगच्छानस्तारयत्येनसो भयात् १२

तस्मात्प्रजासंतानमुत्पाद्य फलमवाप्नोति ॥१३॥ तस्माद्यत्नवान्प्रजामुत्पादयेदौषधमन्त्रसंयोगेन ॥ १४ ॥ तस्योपदेशः श्रुतिसामान्येनोपदिश्यते ॥ १५ ॥ सर्ववर्णेभ्यः फलवत्त्वादिति फलवत्त्वादिति ॥ १६ ॥

इति द्वितीयप्रश्ने नवमोऽध्यायः ॥ ९ ॥

(अथ द्वितीयप्रश्ने दशमोऽध्यायः।)

अथातः संन्यासविधिं व्याख्यास्यामः ॥ १ ॥ सोऽत एव ब्रह्मचर्यवान्प्रव्रजतीत्येकेषाम् ॥ २ ॥ अथ शालीनयायावराणामनपत्यानाम् ॥ ३ ॥ विधुरो वा प्रजाः स्वधर्मे प्रतिष्ठाप्य वा ॥ ४ ॥ सप्तत्या ऊर्ध्वं संन्यासमुपदिशन्ति ॥ ५ ॥ वानप्रस्थस्य वा कर्मविरामे ॥ ६ ॥

एष नित्यो महिमा ब्राह्मणस्य न कर्मणा वर्धते नो कनीयान्।
तस्यैवाऽऽत्मा पदवित्तं विदित्वा न कर्मणा लिप्यते पापकेनेति ॥ ७

अपुनर्भवं नयतीति नित्यः ॥ ८ ॥ महदेनं गमयतीति महिमा ॥ ९ ॥ केशश्मश्रुलोमनखानि वापयित्वोपकल्पयते ॥ १० ॥ यष्टयः शिक्यं जलपवित्रं कमण्डलुं पात्रमिति ॥ ११ ॥ एतत्समादाय ग्रामान्ते ग्रामसीमान्तेऽग्न्यगारे वाऽऽज्यं पयो दधीति त्रिवृत्प्राश्योपविशेत् ॥ १२ ॥ अपो वा ॥ १३ ॥ ओं भूः सावित्रीं प्रविशामि तत्सवितुर्वरेण्यम् ॥ १४ ॥ ओं भुवः सावित्रीं प्रविशामि भर्गो देवस्य धीमहि ॥ १५ ॥ ओं सुवः सावित्रीं प्रविशामि धियो

---

१ ख. °णाऽऽनन्दम° ।

यो नः प्रचोदयादिति ॥ १६ ॥ पञ्चोऽर्धर्चशस्ततः समस्तया च व्यस्तया च ॥ १७ ॥ आश्रमादाश्रममुपनीय ब्रह्मपूतो भवतीति विज्ञायते ॥ १८ ॥ अथाप्युदाहरन्ति ॥ १९ ॥

आश्रमादाश्रमं गत्वा हुतहोमो जितेन्द्रियः। भिक्षाबलिपरिश्रान्तः पश्चाद्भवति भिक्षुक इति २०

स एष भिक्षुरानन्त्याय ॥ २१ ॥ पुराऽऽदित्यस्यास्तमयाद्गार्हपत्यमुपसमाधायान्वाहार्यपचनमाहृत्य ज्वलन्तमाहवनीयमुद्धृत्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुचि चतुर्गृहीतं गृहीत्वा समिद्वत्याहवनीये पूर्णाहुतिं जुहोति, ओं स्वाहेति ॥ २२ ॥ एतद्ब्रह्मान्वाधानमिति विज्ञायते ॥ २३ ॥ अथ सायं हुतेऽग्निहोत्र उत्तरेण गार्हपत्यं तृणानि संस्तीर्य तेषु द्वंद्वं न्यञ्चि पात्राणि सादयित्वा दक्षिणेनाऽऽहवनीयं ब्रह्मायतने दर्भान्संस्तीर्य तेषु कृष्णाजिनं चान्तर्धायैतां रात्रिं जागर्ति ॥ २४ ॥ य एवं विद्वान्ब्रह्मरात्रिमुपोष्य ब्राह्मणोऽग्नीन्समारोप्य प्रमीयते सर्वं पाप्मानं तरति तरति ब्रह्महत्याम् ॥ २५ ॥ अथ ब्राह्मे मुहूर्त उत्थाय काल एव प्रातरग्निहोत्रं जुहोति ॥ २६ ॥ अथ पृष्ठ्यां स्तीर्त्वाऽपः प्रणीय वैश्वानरं द्वादशकपालं निर्वपति सा प्रसिद्धेष्टिः संतिष्ठते ॥ २७ ॥ आहवनीयेऽग्निहोत्रपात्राणि प्रक्षिपत्यमृन्मयान्यनश्मयानि ॥ २८ ॥ गार्हपत्येऽरणी ॥ २९ ॥ भवतं नः समनसाविति आत्मन्यग्नीन्समारोपयते ॥ ३० ॥ या ते अग्ने यज्ञिया तनूरिति त्रिस्त्रिरेकैकं समाजिघ्रति ॥ ३१ ॥ अथान्तर्वेदि तिष्ठन्, ओं भूर्भुवः सुवः संन्यस्तं मया संन्यस्तं मया संन्यस्तं मयेति त्रिरुपांशूक्त्वा त्रिरुच्चैः ॥ ३२ ॥ त्रिषत्या हि देवा इति विज्ञायते ॥ ३३ ॥ अभयं सर्वभूतेभ्यो मत्त इति चापां पूर्णमञ्जलिं निनयति ॥ ३४ ॥ अथाप्युदाहरन्ति ॥ ३५ ॥

अभयं सर्वभूतेभ्यो दत्त्वा यश्चरते मुनिः। न तस्य सर्वभूतेभ्यो भयं चापि ह जायत इति ३६

स वाचंयमो भवति ॥ ३७ ॥ सखा मा गोपायेति दण्डमादत्ते ॥ ३८ ॥ यदस्य पारे रजस इति शिक्यं गृह्णाति ॥ ३९ ॥ येन देवा पवित्रेणेति जलपवित्रं गृह्णाति ॥ ४० ॥ येन देवा ज्योतिषोर्ध्वा उदायन्निति कमण्डलुं गृह्णाति ॥ ४१ ॥ सप्तव्याहृतिभिः पात्रं गृह्णाति ॥४२॥ यष्टयः शिक्यं जलपवित्रं पात्रमित्येतत्समादाय

---

१ ख. °हीत्वा । २ ख. °मं वाऽन्त° । ३ ख. °प्य वा प्र° । ४ ख. °ते । अथाऽऽहं । ५ ख. दण्डानाद° ।

यत्रापस्तद्गत्वा स्नात्वाऽप आचम्य सुरभिमत्याऽब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान्धारयित्वोत्तीर्य वासः पीडयित्वाऽन्यत्प्रयतं वासः परिधायाऽप आचम्य, ओं भूर्भुवः सुवरिति जलपवित्रमादाय तर्पयति ॥ ४३ ॥ ओं भूस्तर्पयाम्यों भुवस्तर्पयाम्यों सुवस्तर्पयाम्यों महस्तर्पयाम्यों जनस्तर्पयाम्यों तपस्तर्पयाम्यों सत्यं तर्पयामीति ॥ ४४ ॥ देववत्पितृभ्योऽञ्जलिमादाय, ओं भूः स्वधों[1] भुवः स्वधों[2] सुवः स्वधों[3] भूर्भुवः सुवर्महर्नम इति॥४५॥अथोदु त्यं चित्रमिति द्वाभ्यामादित्यमुपतिष्ठते॥४६॥ ओमिति ब्रह्म ब्रह्म वा एष ज्योतिर्य एष तपत्येष वेदो य एष तपति वेद्यमेवैतद्य एष तपति एवमेवैष आत्मानं तर्पयत्यात्मने नमस्करोति[4] ॥ ४७ ॥ आत्मा ब्रह्मात्मा ज्योतिः॥ ४८ ॥ सावित्रीं सहस्रकृत्व आवर्तयेच्छतकृत्वोऽपरिमितकृत्वो वा ॥ ४९ ॥ ओं भूर्भुवः सुवरिति जलपवित्रमादायापो गृह्णाति ॥ ५० ॥ न चात ऊर्ध्वमनुद्धृताभिरद्भिरपरिस्रुताभिरपरिपूताभिर्वाऽऽचामेत् ॥ ५१ ॥ न चात ऊर्ध्वं शुक्लवासो धारयेत् ॥ ५२ ॥ एकदण्डी त्रिदण्डी वा[5] ॥ ५३ ॥ अथेमानि व्रतानि भवन्ति ॥ ५४ ॥ अहिंसा सत्यमस्तैन्यं मैथुनस्य च वर्जनम्। त्याग इत्येव पञ्चैवोपव्रतानि भवन्ति ॥ ५५ ॥ अक्रोधो गुरुशुश्रूषाऽप्रमादः शौचमाहारशुद्धिश्चेति ॥ ५६ ॥ अथ भैक्षचर्या ॥ ५७ ॥ ब्राह्मणानां शालीनयायावराणामपवृत्ते वैश्वदेवे भिक्षां लिप्सेत भवत्पूर्वां प्रचोदयेत्[6] ॥ ५८ ॥ गोदोहमात्रमाकाङ्क्षेत् ॥ ५९ ॥ अथ भैक्षचर्यादुपावृत्य शुचौ देशे न्यस्य हस्ते पादान्प्रक्षाल्याऽऽदित्यस्याग्रं निवेदयेत् ॥ ६० ॥ उदु त्यं चित्रमिति ब्रह्मणे निवेदयते ब्रह्मज्ञानमिति विज्ञायते ॥ ६१ ॥ आधानप्रभृति यजमान एवाग्नयो भवन्ति तस्य प्राणो गार्हपत्योऽपानोऽन्वाहार्यपचनो व्यान आहवनीय उदानसमानौ सभ्यावसथ्यौ पञ्च वा एतेऽग्नय आत्मस्था आत्मन्येव जुहोति स एष आत्मयज्ञ आत्मनिष्ठ आत्मप्रतिष्ठ आत्मानं क्षेमं नयतीति विज्ञायते ॥ ६२ ॥ भूतेभ्यो दयापूर्वं संविभज्य शेषमद्भिः संस्पृश्यौषधवत्प्राश्नीयात् ॥ ६३ ॥ प्राश्याप आचम्य ज्योतिष्मत्याऽऽदित्यमुपतिष्ठते-उद्वयं तमसस्परीति ॥ ६४ ॥ वाङ्म आसन्नसोः प्राण इति जपित्वा ॥ ६५ ॥

---

१ ख. स्वधयों। २ ख. स्वधयों। ३ ख. स्वधयों। ४ ख. °ते। ब्रह्मोमितिब्रह्मोमिति इदं सर्वमोमितिब्रह्मवाम°। ५ क. ° वा। एकदण्डी त्रिदण्डी वा। अ°। ख. °राणां प्रवृ°। ७ ख. °दयेत्। ८ ख. °श्च ए°।

अयाचितमसंक्लृप्तमुपपन्नं यदृच्छया । आहारमात्रं भुञ्जीत केवलं प्राणयात्रिकमिति ६६
अथाप्युदाहरन्ति ॥ ६७ ॥
अष्टौ ग्रासा मुनेर्भक्ष्याः षोडशारण्यवासिनः । द्वात्रिंशतं गृहस्थस्यापरिमितं ब्रह्मचारिणः ६८
भैक्षं वा सर्ववर्णेभ्य एकान्नं वा द्विजातिषु । अपि वा सर्ववर्णेभ्यो न चैकान्नं द्विजातिष्विति ६९

अथ यत्रोपनिषदमाचार्या ब्रुवते तत्रोदाहरन्ति ॥ ७० ॥ स्थानमौनवीरासनसवनोपस्पर्शनचतुर्थषष्ठाष्टमकालव्रतयुक्तस्य कणपिण्याकयावकदधिपयोव्रततत्वं चेति ॥ ७१ ॥ तत्र मौने युक्तस्त्रैविद्यवृद्धैराचार्यैर्मुनिभिरन्यैर्वाऽऽश्रमिभिर्बहुश्रुतैर्दन्तैर्दन्तान्संधायान्तर्मुख एव यावदर्थं संभाषीत न यत्र लोपो भवतीति विज्ञायते ॥ ७२ ॥ स्थानमौनवीरासनानामन्यतमेन संप्रयोगो न त्रयं संनिपातयेत् ॥ ७३ ॥ यत्र गतैश्च यावन्मात्रमनुव्रतयेदापत्सु न यत्र लोपो भवतीति विज्ञायते ॥ ७४ ॥ स्थानमौनवीरासनसवनोपस्पर्शनचतुर्थषष्ठाष्टमकालव्रतयुक्तस्य ॥ ७५ ॥
अष्टौ तान्यव्रतघ्नानि आपो मूलं घृतं पयः । हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधमिति ७६
सायं प्रातरग्निहोत्रमघ्राञ्जपेत् ॥ ७७ ॥ वारुणीभिः सायं संध्यामुपस्थाय मैत्रीभिः प्रातः ॥ ७८ ॥
अनग्निरनिकेतः स्यादशर्माऽशरणो मुनिः । भैक्षार्थी ग्राममन्विच्छेत्स्वाध्याये वाचमुत्सृजेदिति ७९
विज्ञायते च ॥ ८० ॥ परिमिता वा ऋचः परिमितानि सामानि परिमितानि यजूंष्यथैतस्यैवान्तो नास्ति यद्ब्रह्म तत्प्रतिगृणत आचक्षीत सप्रतिगर इति ॥ ८१ ॥ एवमेवैष आ शरीरविमोक्षणाद्वृक्षमूलिको वेदसंन्यासी ॥ ८२ ॥ वेदो वृक्षस्तस्य मूलं प्रणवः प्रणवात्मको वेदः ॥ ८३ ॥ प्रणवं ध्यायेत् ॥ ८४ ॥ प्रणवो ब्रह्मभूयाय कल्पत इति होवाच प्रजापतिः ॥ ८५ ॥ सप्तव्याहृतिभिर्ब्रह्मभाजनं प्रक्षालयेदिति ॥ ८६ ॥

इति द्वितीयप्रश्ने दशमोऽध्यायः ॥ १० ॥

---

१ ख. °नचीरा° । २ ख. °धीनस्त्रीभिर्नय° । ३ ख. °तश्चेयाव° । ४ ख. प्रजेदा° । ५ ख. °प्रभोज° ।

एकदण्डी त्रिदण्डी वा ॥ १ ॥ अथातः संन्यासविधिं व्याख्यास्यामः ॥ २ ॥ प्रजाकामस्योपदेशः ॥ ३ ॥ अथ वै भवत्यग्नौकरणशेषेण पित्र्यमायुष्यम् ॥ ४ ॥ यथा हि तूलमैषीकम् ॥ ५ ॥ अथ शालीनयायावराणाम् ॥ ६ ॥ अथेमे पञ्च महायज्ञाः ॥ ७ ॥ अथ प्राचीनावीती ॥ ८ ॥ अग्निः प्रजापतिः ॥ ९ ॥ अथ हस्तौ प्रक्ष्याल्य ॥ १० ॥ अथातः संध्योपासनविधिं व्याख्यास्यामः ॥ ११ ॥ न पिण्डशेषम् ॥ १२ ॥ तपस्यमवगाहनम् ॥ १३ ॥ अब्राह्मणस्य शारीरो दण्डः ॥ १४ ॥ नित्योदकी नित्ययज्ञोपवीती ॥ १५ ॥ अथ पतनीयानि ॥१६॥ अथातः प्रायश्चित्तानि ॥ १७ ॥

इति द्वितीयः प्रश्नः ॥ २ ॥

(अथ तृतीयः प्रश्नः ।)

(तत्र प्रथमोऽध्यायः ।)

अथ शालीनयायावरचक्रचरधर्मकाङ्क्षिणां नवभिर्वृत्तिभिर्वर्तमानानाम् ॥ १ ॥ तेषां तद्वर्तनाद्वृत्तिरित्युच्यते ॥ २ ॥ शालाश्रयत्वाच्छालीनत्वम् ॥ ३ ॥ वृत्त्या वरया यातीति यायावरत्वम् ॥ ४ ॥ अनुक्रमेण चरणाच्चक्रचरत्वम् ॥ ५ ॥ ता अनुव्याख्यास्यामः ॥ ६ ॥ षण्निवर्तनी कौद्दाली ध्रुवां संप्रक्षालनी समूहा पालनी शिलोञ्छा कापोता सिद्धेच्छेति नवैताः ॥ ७ ॥ तासामेव वान्याऽपि दशमी वृत्तिर्भवति ॥ ८ ॥ आ नववृत्तेः ॥ ९ ॥ केशश्मश्रुलोमनखानि वापयित्वोकल्पयते कृष्णाजिनं कमण्डलुं यष्टिं वीवधं कुतपँहारमिति ॥ १० ॥ त्रैधातवीयेनेष्ट्वा प्रस्थास्यति वैश्वानर्या वा ॥ ११ ॥ अथ प्रातरुदित आदित्ये यथासूत्रमग्नीन्प्रज्वाल्य गार्हपत्य आज्यं विलाप्योत्पूय स्रुक्स्रुवं निष्टप्य संमृज्य स्रुचि चतुर्गृहीतं गृहीत्वाऽऽहवनीये वास्तोष्पतीयं जुहोति ॥ १२ ॥ वास्तोष्पते प्रतिजानीह्यस्मानिति पुरोनुवाक्यामनूच्य वास्तोष्पते शग्मया संसदा त इति याज्यया जुहोति ॥ १३ ॥ सर्व एवाऽऽहिताग्निरित्येके ॥ १४ ॥ यायावर इत्येके ॥ १५ ॥ निर्गत्य ग्रामान्ते ग्रामसीमान्ते वाऽवतिष्ठते तत्र कुटीं मठं वा करोति कृतं वा प्रविशति ॥ १६ ॥ कृष्णाजिनादीनामुपकृप्तानां यस्मिन्नर्थे येन येन यत्प्रयोजनं तेन तेन तत्कुर्यात् ॥ १७ ॥ प्रसिद्धमग्नीनां परिचरणं प्रसिद्धं दर्शपूर्णमासाभ्यां यजनं प्रसिद्धः पञ्चानां महतां

---

१ ख. °नि षडुत्तरचतुःशतश्लोकैः । इ° । २ ख. अथातः शा° । ३ ख. °याचरचरणकर्म° । ४ ख. °क्रमचरणाच्चरणत्व° । ५ ख. कौन्तालीं । ६ ख. °वा समूहपा° । ७ ख. °पदार° । ८ ख. गृहं ।

यज्ञानामनुप्रयोग उत्पन्नानामोषधीनां निर्वापणं दृष्टं भवति ॥ १८ ॥ विश्वेभ्यो देवेभ्यो जुष्टं निर्वपामीति वा तूष्णीं वा ताः संस्कृत्य सादयति ॥ १९ ॥ तस्याध्यापनयाजनप्रतिग्रहा निवर्तन्तेऽन्ये च यज्ञक्रतव इति ॥ २० ॥ हविष्यं च व्रतोपायनीयं दृष्टं भवति ॥ २१ ॥ तद्यथा सर्पिर्मिश्रं दधिमिश्रमपक्षारलवणमपिशितमपर्युषितम् ॥ २२ ॥ ब्रह्मचर्यमृतौ वा गच्छति ॥ २३ ॥ पर्वणि पर्वणि केशश्मश्रुलोमनखवापनं शौचविधिश्च ॥ २४ ॥ अथाप्युदाहरन्ति ॥ २५ ॥

श्रूयते द्विविधं शौचं यच्छिष्टैः पर्युपासितम् । बाह्यं निर्लेपनिर्गन्धमन्तःशौचमहिंसकम् अद्भिः शुध्यन्ति गात्राणि बुद्धिर्ज्ञानेन शुध्यति । अहिंसया च भूतात्मा मनः सत्येन शुध्यतीति २७

इति तृतीयप्रश्ने प्रथमोऽध्यायः ॥ १ ॥

(अथ तृतीयप्रश्ने द्वितीयोऽध्यायः ।)

य(अ)थो एतत्षण्निवर्तनीति ॥१॥ षडेव निवर्तनानि निरुपहतानि करोति ॥२॥ स्वामिने भागमुत्सृजत्यनुज्ञातं वा गृह्णाति ॥ ३ ॥ प्राक्पातराशात्कर्षी स्यादस्यूतनासिकाभ्यां समुष्काभ्यामतुदन्नारया मुहुर्मुहुरभ्युच्छन्दयन् ॥ ४ ॥ एतेन विधिना षण्निर्वतनानि करोतीति षण्निर्वतनी ॥ ५ ॥ कौदालीति ॥ ६ ॥ जलाभ्याशे कुदालेन वा फालेन वा तीक्ष्णकाष्ठेन वा खनति बीजान्यावपति ॥ ७ ॥ कन्दमूलफलशाकौषधीर्निष्पादयति ॥ ८ ॥ कुदालेन करोतीति कौदाली ॥ ९ ॥ ध्रुवया वर्तमानः शुक्लेन वाससा शिरो वेष्टयति भूत्यै त्वा शिरो वेष्टयामीति ॥ १० ॥ ब्रह्म वर्चसमिति (मसि) ब्रह्मवर्चसाय त्वेति कृष्णाजिनमादत्ते ॥ ११ ॥ अब्लिङ्गाभिः पवित्रम् ॥ १२ ॥ बलमसि बलाय त्वेति कमण्डलुम् ॥ १३ ॥ धान्यमसि पुष्ट्यै त्वेति वीवधम् ॥ १४ ॥ सखा मा गोपायेति दण्डम् ॥ १५ ॥ अथोपनिष्क्रम्य व्याहृतीर्जपित्वा दिशामनुपन्नणं जपति ॥ १६ ॥

पृथिवी चान्तरिक्षं च द्यौश्च नक्षत्राणि च या दिशः । अग्निर्वायुश्च सूर्यश्च पान्तु मां पथि देवता इति १७

मानस्तोकीयं जपित्वा ग्रामं प्रविश्य गृहद्वारे गृहद्वार आत्मानं वीवधेन सह दर्श-

---

१ क. साधयति । २ ख. °क्षारालवणपि° । ३ख. कौन्तालीति । ४ ख. कुन्ताले° । ५ ख. कुन्ताले° । ६ ख. कौन्ताली ।

नास्संदर्शनीत्याचक्षते ॥ १८ ॥ वृत्तेर्वृत्तेरवार्तायां तयैव तस्य ध्रुवं वर्तनाद्ध्रुवेति परिकीर्तिता ॥ १९ ॥ संप्रक्षालनीति ॥२०॥ उत्पन्नानामोषधीनां प्रक्षेपणम्॥२१॥ निक्षेपणं नास्ति निचयो वा ॥ २२ ॥ भाजनानि संप्रक्षाल्य न्युब्जतीति संप्रक्षालनी ॥ २३ ॥ समूहेति ॥ २४ ॥ अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्र यत्रौषधयो विद्यन्ते तत्र तत्र समूहन्या समुह्य ताभिर्वर्तयतीति समूँहा ॥ २५ ॥ पालनीति ॥ २६ ॥ आहिंसिकेत्येवेदमुक्तं भवति ॥ २७ ॥ तुषविहीनांस्तण्डुलानिच्छति सज्जनेभ्यो बीजानि वा पालयतीति पालनी ॥ २८ ॥ शिलोञ्छेति ॥ २९ ॥ अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्र यत्रौषधयो विद्यन्ते तत्र तत्रैकैकं कणिशमुञ्छयित्वा काले काले शिलैर्वर्तयतीति शिलोञ्छा ॥ ३० ॥ कापोतेति ॥ ३१ ॥ अवारितस्थानेषु पथिषु वा क्षेत्रेषु वाऽप्रतिहतावकाशेषु वा यत्र यत्रौषधयो विद्यन्ते तत्राञ्जलिभ्यामेकैकामोषधिमुञ्छयित्वा संदर्शनात्कपोतवदिति कापोता ॥ ३२ ॥ सिद्धेच्छेति ॥ ३३ ॥ वृत्तिभिः श्रान्तो वृद्धत्वाद्धातुक्षयाद्वा सज्जनेभ्यः सिद्धमन्नमिच्छतीति सिद्धेच्छा ॥ ३४ ॥ तस्याऽऽत्मसमारोपणं विद्यते संन्यासिवदुपचारः पवित्रकाषायवासोवर्जम् ॥ ३५ ॥ वान्याँऽपि वृक्षलतावल्ल्योषधीनां च तृणौषधीनां च श्यामाकजर्तिलादीनां वन्याभिर्वर्तयतीति वान्या ॥ ३६ ॥ अथाप्युदाहरन्ति ॥ ३७ ॥

मृगैः सह परिस्पन्दः संवासस्तेभिरेव च । तैरेव सदृशी वृत्तिः प्रत्यक्षं स्वर्गलक्षणं प्रत्यक्षं स्वर्गलक्षणमिति ३८

इति तृतीयप्रश्ने द्वितीयोऽध्यायः॥ २ ॥

(अथ तृतीयप्रश्ने तृतीयोऽध्यायः।)

अथ वानप्रस्थद्वैविध्यम् ॥ १ ॥ पचमानका अपचमानकाश्चेति ॥ २ ॥ तत्र पचमानकाः पञ्चविधाः ॥३॥ सर्वारण्यका वैतुषिकाः कन्दमूलफलभक्षाः फलभक्षाः शाकभक्षाश्चेति ॥ ४ ॥ तत्र सर्वारण्यका नाम द्विविधा द्विविधमारण्यमाश्रयन्त इन्द्रावसिक्ता रेतोवसिक्ताश्चेति ॥ ५ ॥ तत्रेन्द्रावसिक्ता नाम वल्लीगुल्मलतावृक्षाणामानयित्वाँ श्रपयित्वा सायं प्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्त्वाऽथेतर-

---

१ ख. 'र्शनमित्या'। २ ख. °म्। ना°। ३ ख. 'मूहपालिनी'। ४ ख. °षधीनामु'। ५ ख. °न्याभिर्वृक्ष'। ६ ख. वल्ल्यौष°। ७ ख. °त्वा प्रा°।

च्छे(शे)षभक्षाः॥६॥रेतोवसिक्ता नाम मांसं व्याघ्रवृकश्येनादिभिरन्यतमेन वा हतमानयित्वा श्रपयित्वा सायं प्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्त्वाऽथेतरच्छेषभक्षाः ॥ ७ ॥ वैतुषिकास्तुषधान्यवर्जं तण्डुलानानयित्वा श्रपयित्वा सायं प्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्त्वाऽथेतरच्छे(शे)षभक्षाः ॥ ८ ॥ कन्दमूलफलशाकभक्षाणामप्येवमेव ॥ ९ ॥ पञ्चैवापचमानकाः ॥ १० ॥ उन्मज्जकाः प्रवृत्ताशिनो मुखेनाऽऽदायिनस्तोयाहारा वायुभक्षाश्चेति ॥ ११ ॥ तत्रोन्मज्जका नाम लोहाश्मकरणवर्जम्(?) ॥ १२ ॥ हस्तेनाऽऽदाय प्रवृत्ताशिनः ॥ १३ ॥ मुखेनाऽऽदायिनो मुखेनाऽऽददते ॥ १४ ॥ तोयाहाराः केवलं तोयाहाराः ॥ १५ ॥ वायुभक्षा निराहाराश्चेति ॥ १६ ॥ वैखानसानां विहिता दश दीक्षाः ॥ १७ ॥ यः स्वशास्त्रमभ्युपेत्य दण्डं च मौनं चाप्रमादं च ॥ १८ ॥ वैखानसाः शुध्यन्ति निराहाराश्चेति ॥ १९ ॥ शास्त्रपरिग्रहः सर्वेषां ब्रह्मवैखानसानाम् ॥ २० ॥ न ह्युग्रेदंशमशकान्हिमवांस्तापसो भवेत्। वनपतिष्ठुः संतुष्टश्चीरचर्मजलप्रियः २१ अतिथीन्पूजयेत्पूर्वं काले त्वाश्रममागतान्। देवविप्राग्निहोत्रे च युक्तस्तपसि तापसः कृच्छ्रां वृत्तिमसंहार्यां सामान्यां मृगपक्षिभिः। तदहर्जनसंभारां काषायकटुकाश्रयाम् परिगृह्य शुभां वृत्तिमेतां दुर्जनवर्जिताम्। वनवासमुपाश्रित्य ब्राह्मणो नावसीदति मृगैः सह परिस्पन्दः संवासस्तेभिरेव च। तैरेव सदृशी वृत्तिः प्रत्यक्षं स्वर्गलक्षणं

प्रत्यक्षं स्वर्गलक्षणमिति २५

इति तृतीयप्रश्ने तृतीयोऽध्यायः ॥ ३ ॥

(अथ तृतीयप्रश्ने चतुर्थोऽध्यायः।)

अथ यदि ब्रह्मचार्यव्रत्यमिव चरेन्मांसं वाऽश्नीयात्स्त्रियं वोपेयात्सर्वास्वेवाऽऽर्तिष्वन्तराऽगारेऽग्निमुपसमाधाय संपरिस्तीर्याऽग्निमुखात्कृत्वाऽथाऽऽज्याहुतीरुपजुहोति ॥ १ ॥ कामेन कृतं कामः करोति कामायैवेदं सर्वं यो मा कारयति तस्मै स्वाहा ॥ २ ॥ मनसा कृतं मनः करोति मनस एवेदं सर्वं यो मा कारयति तस्मै स्वाहा ॥ ३ ॥ रजसा कृतं रजः करोति रजस एवेदं सर्वं यो मा कारयति तस्मै स्वाहा ॥ ४ ॥ तमसा कृतं तमः करोति तमस एवेदं सर्वं यो मा कारयति तस्मै स्वाहा ॥ ५ ॥ पाप्मना कृतं पाप्मा करोति पाप्मन एवेदं सर्वं यो मा कारयति

---

१ ख. °रकव°। २ ख. °व्रतमि°। ३ ख. °खान्कृत्वा।

तस्मै स्वाहा ॥ ६ ॥ मन्युना कृतं मन्युः करोति मन्यव एवेदं सर्वं यो मा कारयति तस्मै स्वाहेति ॥ ७ ॥ जयप्रभृति सिद्धमा धेनुवरप्रदानात् ॥ ८ ॥ अपरेणाग्निं कृष्णाजिनेन प्राचीनग्रीवेणोत्तरलोम्ना प्रावृत्य वसति ॥ ९ ॥ व्युष्टायां जघनार्धादात्मानमपकृष्य तीर्थं गत्वा प्रसिद्धं स्नात्वाऽन्तर्जलगतोऽघमर्षणेन षोडश प्राणायामान्धारयित्वा प्रसिद्धमाऽऽदित्योपस्थानात्कृत्वाऽऽचार्यस्य गृहानेति ॥१०॥ यथाऽश्वमेधावभृथ एवमेवैतद्विजानीयादिति ॥ ११ ॥

इति तृतीयप्रश्ने चतुर्थोऽध्यायः ॥

अथ तृतीयप्रश्ने पञ्चमोऽध्यायः ।

अथातः पवित्रातिपवित्रस्याघमर्षणस्य कल्पं व्याख्यास्यामः ॥१॥ तीर्थं गत्वा स्नातः शुचिवासा उदकान्ते स्थण्डिलमुद्धृत्य सकृत्किञ्चेन वाससा सकृत्पूर्णेन पाणिनाऽऽदित्याभिमुखोऽघमर्षणं स्वाध्यायमधीयीत ॥२॥ प्रातः शतं मध्याह्ने शतमपराह्णे शतमपरिमितं वा ॥ ३ ॥ उदितेषु नक्षत्रेषु प्रसृतयावकं प्राश्नीयात् ॥ ४ ॥ ज्ञानकृतेभ्योऽज्ञानकृतेभ्यश्चोपपातकेभ्यः सप्तरात्रात्प्रमुच्यते ॥ ५ ॥ द्वादशरात्राद्भ्रूण[1]हननं गुरुतल्पगमनं सुवर्णस्तैन्यं सुरापानमिति च वर्जयित्वैकविंशतिरात्रात्तान्यपि[2] तरति तान्यपि जयति ॥ ६ ॥ सर्वं तरति सर्वं[3] जयति सर्वक्रतुफलमवाप्नोति सर्वेषु तीर्थेषु स्नातो भवति सर्वेषु वेदेषु चीर्णव्रतो भवति सर्वैर्देवैर्ज्ञातो भवत्यां[4] चक्षुषः पङ्क्तिं पुनाति कर्माणि चास्य सिध्यन्तीति बौधायनः ॥ ७ ॥

इति तृतीयप्रश्ने पञ्चमोऽध्यायः ॥ ५ ॥

(अथ तृतीयप्रश्ने षष्ठोऽध्यायः ।)

अथ कर्मभिरात्मकृतैर्गुरुमिवाऽऽत्मानं मन्येताऽऽत्मार्थे प्रसृतयावकं श्रपयेदुदितेषु नक्षत्रेषु ॥ १ ॥ न ततोऽग्नौ जुहुयात् ॥ २ ॥ न चात्र बलिकर्म ॥ ३ ॥ अगृतं श्रप्यमाणं शृतं चाभिमन्त्रयेत ॥ ४ ॥

यवोऽसि धान्यराजोऽसि वारुणो मधुसंयुतः । निर्णोदः सर्वपापानां पवित्रमृषिभिः स्मृतम् ५

---

१ ख. °ल्पगं सु°। २ ख. °रात्रं पीत्वा तान्यपि त°। ३ ख. °र्वं तरति सर्वं जयति सर्वं जयति स°। ४ ख. °त्याचक्षुषात्पङ्क्तीः पु°।

घृतं यवा मधु यवा आपो यवा अमृतं यवाः । सर्वं पुनीथ[1] मे पापं यन्मया दुष्कृतं कृतम् ६

वाचा कृतं कर्मकृतं मनसा दुर्विचिन्तितम्।अलक्ष्मीं कालरात्रीं च सर्वं पुन(नी)थ मे यवाः महापातकसंयुक्तं दारुणं राजकिल्बिषम्। बालवृद्धमधर्मं च सर्वं पुन(नी)थ मे यवाः ८ सुवर्णस्तैन्यमव्रत्यमयाज्यस्य[2] च याजनम्।ब्राह्मणानां परीवादं सर्वं पुन(नी)थ मे यवाः९ गणान्नं गणिकान्नं च शूद्रान्नं[3] श्राद्धसूतकम् । चौरस्यान्नं नवश्राद्धं सर्वं पुन(नी)थ मे यवा इति १०

श्रप्यमाणे रक्षां कुर्यात् ॥ ११ ॥ नमो रुद्राय भूताधिपतये द्यौः शान्ता कृणुष्व पाजः प्रसितिं न पृथ्वीमित्येतेनानुवाकेन ॥ १२ ॥ ये देवाः पुरःसदोऽग्निनेत्रा रक्षोहण इति पञ्चभिः पर्यायैः ॥ १३ ॥ मा नस्तोके ब्रह्मा देवानामिति द्वाभ्याम् ॥ १४ ॥ शृतं च लेंघ्वश्नीयात्प्रयतः पात्रे निषिच्य ॥ १५ ॥ ये देवा मनोजाता मनोयुजः सुदक्षा दक्षपितरस्ते नः पान्तु तेनोऽवन्तु तेभ्यो नमस्तेभ्यः स्वाहेति ॥ १६ ॥ आत्मनि जुहुयात् ॥१७॥ त्रिरात्रं मेधार्थी षड्रात्रं पीत्वा पापकृच्छुद्धो भवति ॥ १८ ॥ सप्तरात्रं पीत्वा भ्रूणहननं गुरुतल्पगमनं[4] सुवर्णस्तैन्यं सुरापानमिति च पुनाति ॥ १९ ॥ एकादशरात्रं पीत्वा पूर्वपुरुषकृतमपि पापं निर्णुदति ॥ २० ॥ अपि वा गोनिष्क्रान्तानां यवानामेकविंशतिरात्रं पीत्वा गणान्पश्यति गणाधिपतिं पश्यति विद्यां पश्यति विद्याधिपतिं पश्यतीत्याह भगवान्बौधायनः॥२१॥

इति तृतीयप्रश्ने षष्ठोऽध्यायः ॥ ६ ॥

(अथ तृतीयप्रश्ने सप्तमोऽध्यायः)

अथ कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति यो योनौ[5] रेतः सिञ्चति यदर्वाचीनमेनो भ्रूणहत्यायास्तस्मान्मुच्यत इति ॥ २ ॥ अयोनौ रेतः सिक्त्वाऽन्यत्र स्वमा[6]दरेपो वा पवित्रकामः ॥ ३ ॥ अमावास्यायां पौर्णमास्यां वा केशश्मश्रुलोमनखानि वापयित्वा ब्रह्मचारिकल्पेन व्रतमुपैति ॥ ४ ॥ संवत्सरं मासं चतुर्विंशत्यहं द्वादश रात्रीः षट् तिस्रो वा ॥ ५ ॥ न मांसमश्नीयान्न स्त्रियमुपेयान्नोपर्यासीत जुगुप्सेतानृतात् ॥ ६ ॥ पयोभक्ष इति प्रथमः कल्पः ॥६॥ यावकं वोपयुञ्जानः कृच्छ्रद्वादशरात्रं चरेत् ॥७॥ भिक्षेद्वा तद्विधेषु यवागूं राजन्यो वैश्य आमिक्षाम् ॥ ८ ॥ पूर्वाह्णे पार्कयज्ञिकधर्मेणाग्निमुपसमाधाय

---

१ क. पुनीथ । २ ख. ब्राह्मणस्य । ३ ख. °न्नं शूद्रसू° । ४ ख लघुसमश्नीतं च लघुसमश्नियां° । ५ ख. ल्पगं सु° । ६ ख.°प्रादिरितो वा । ७ ख. °ह्मकल्पे° । ८ ख. °कयाज्ञक° ।

संपरिस्तीर्याऽग्निमुखात्कृत्वाऽथाऽऽज्याहुतीरुपजुहोति ॥९॥ यदेवा देवहेडनं यददीव्यन्नृणमहं बभूवाऽऽयुष्टे विश्वतो दधदिति ॥ १० ॥ एतैस्त्रिभिरनुवाकैः प्रत्यृचमाज्यस्य जुहुयात् ॥ ११ ॥ सिंहे व्याघ्र उत या पृदाकाविति चतस्रः स्रुवाहुतीः ॥ १२ ॥ अग्नेऽभ्यावर्तिन्नग्ने अङ्गिरः पुनरूर्जा सह रय्येति चतस्रोऽभ्यावर्तिनीर्हुत्वा समित्पाणिर्यजमानलोकेऽवस्थाय वैश्वानराय प्रतिवेदयाम इति द्वादशर्चेन सूक्तेनोपतिष्ठते ॥ १३ ॥

यन्मया मनसा वाचा कृतमेनः कदाचन । सर्वस्मा[त्तस्मा]न्मेडितो[2] मोग्धि त्वं हि वेत्थ यथातथं स्वाहेति १४

समिधमाधाय वरं ददाति ॥ १५ ॥ जघन्यप्रभृति सिद्धमा धेनुवरप्रदानात् ॥१६॥ एक एवाग्नौ परिचर्य ॥ १७ ॥ अथाग्न्याधेये ॥ १८ ॥ यदेवा देवहेडनं यददीव्यन्नृणमहं बभूवाऽऽयुष्टे विश्वतो दधदिति ॥ १९ ॥ पूर्णाहुतिं हुत्वाऽग्निहोत्रमारप्स्यमानो दशहोत्रा हुत्वा दर्शपूर्णमासावारप्स्यमानश्चतुर्होत्रा हुत्वा चातुर्मास्यान्यारप्स्यमानः पञ्चहोत्रा हुत्वा पशुबन्धे षड्ढोत्रा सोमे सप्तहोत्रा ॥ २० ॥ विज्ञायते च ॥ २१ ॥ कर्मादिष्वेतैर्जुहुयात्पूतो देवलोकान्समश्नुत इति हि ब्राह्मणमिति हि ब्राह्मणम् ॥ २२ ॥

इति तृतीयप्रश्ने सप्तमोऽध्यायः ॥ ७ ॥

(अथ तृतीयप्रश्नेऽष्टमोऽध्यायः ।)

अथातश्चान्द्रायणस्य कल्पं व्याख्यास्यामः ॥ १ ॥ शुक्लचतुर्दशीमुपवसेत् ॥ २॥ केशश्मश्रुलोमनखानि वापयित्वाऽपि वा श्मश्रूण्येवाहतं वासो वसानः सत्यं ब्रुवन्नावसथमभ्युपेयात् ॥ ३ ॥ तस्मिन्नस्य सकृत्प्रणीतोऽग्निररण्योर्निमन्थ्यो वा ॥ ४ ॥ ब्रह्मचारी सुहृत्प्रैषायोपकल्पी स्यात् ॥ ५ ॥ हविष्यं च व्रतोपायनीयम् ॥ ६ ॥ अग्निमुपसमाधाय संपरिस्तीर्याऽग्निमुखात्[3]कृत्वा पक्वाज्जुहोति ॥७॥ अग्नये या तिथिः स्यान्नक्षत्राय सदैवताय ॥ ८ ॥ अत्राह गोरमन्वतेति चान्द्रमसीं पञ्चमीं द्यावापृथिवीभ्यां षष्ठीमहोरात्राभ्यां सप्तमीं रौद्रीमष्टमीं सौरीं नवमीं वारुणीं दशमीमैन्द्रीमेकादशीं वैश्वदेवीं द्वादशीमिति ॥ ८ ॥ अथापराः समामनन्ति दिग्भ्यश्च सदैव[4]ताभ्य उरोरन्तरिक्षाय सदैवताय नवो नवो भवति जायमान इति सौविष्टकृतीं

---

१ ख. °खान्कृत्वा । २ ख. °न्मे ततो । ३ ख. °खान्कृत्वा । ४ ख. सदेव° ।

हुत्वाऽथैतद्धविरुच्छिष्टं कंसे वा चमसे वा व्युध्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्य पञ्चदश पिण्डान्प्रकृतिस्थान्नाश्नाति ॥ ९ ॥ प्राणाय त्वेति प्रथमम् ॥ १० ॥ अपानाय त्वेति द्वितीयम् ॥ ११ ॥ व्यानाय त्वेति तृतीयम् ॥ १२ ॥ उदानाय त्वेति चतुर्थम् ॥ १३ ॥ समानाय त्वेति पञ्चमम् ॥ १४ ॥ यदा चत्वारो द्वाभ्यां पूर्वं यदा त्रयो द्वाभ्यां द्वाभ्यां पूर्वौ यदा द्वौ द्वाभ्यां पूर्वं त्रिभिरुत्तरमेकं सर्वैः ॥ १५ ॥ मित्राभ्याः स्थेति ॥ १६ ॥ अपः पीत्वाऽर्थोऽऽज्यस्य जुहोति प्राणापान० वाङ्मनः० शिरःपाणि० त्वक्चर्म० शब्द० पृथिवी० अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमया मे शुध्यन्तां ज्योतिरहं विरजा विपाप्मा भूयासं स्वाहेति सप्तभिरनुवाकैः ॥ १७ ॥ जयप्रभृति सिद्धमा धेनुवरप्रदानात् ॥ १८ ॥ सौरीभिरादित्यमुपतिष्ठते चान्द्रमसीभिश्चन्द्रमसम् ॥ १९ ॥ अग्ने त्वं सुजागृहीति संविशञ्जपति ॥२०॥ त्वमग्ने व्रतपा असीति प्रबुद्धः ॥ २१ ॥ स्त्रीशूद्रैर्नाभिभाषेत ॥ २२ ॥ मूत्रपुरीषे नावेक्षेत ॥ २३ ॥ अमेध्यं दृष्ट्वा जपति ॥ २४ ॥ अबद्धं मनो दरिद्रं चक्षुः सूर्यो ज्योतिषां श्रेष्ठो दीक्षे मा मा हासीरिति ॥ २५ ॥ प्रथमायामपरपक्षस्य चतुर्दश ग्रासान् ॥ २६ ॥ एवमेकापचयेनाऽमावास्यायाः ॥ २७ ॥ अमावास्यायां ग्रासो न विद्यते ॥ २८ ॥ प्रथमायां पूर्वपक्षस्यैको द्वौ द्वितीयस्याम् ॥ २९ ॥ एवमेकोपचयेनाऽऽ पौर्णमास्याः ॥ ३० ॥ पौर्णमास्यां स्थालीपाकस्य जुहोत्यग्नये या तिथिः स्यान्नक्षत्रेभ्यश्च सदैवतेभ्यः ॥ ३१ ॥ पुरस्ताच्छ्रोणाया अभिजितः सदैवतस्य हुत्वा गां ब्राह्मणेभ्यो दद्यात् ॥ ३२ ॥ तदेतच्चान्द्रायणं पिपीलिकामध्यं विपरीतं यवमध्यम् ॥ ३३ ॥ अतोऽन्यतरच्चरित्वा सर्वेभ्यः पातकेभ्यः पापकृच्छुद्धो भवति ॥ ३४ ॥ कामाय कामायैतदाहार्यमित्याचक्षते ॥३५॥ यं कामं कामयते तमेतेनाऽऽप्नोति ॥ ३६ ॥ एतेन वा ऋषय आत्मानं शोधयित्वा पुरा कर्माण्यसाधयन्॥३७॥ तदेतद्धन्यं पुण्यं पुत्र्यं पौत्र्यं पशव्यमायुष्यं स्वर्ग्यं यशस्यं सार्वकामिकम् ॥ ३८ ॥ नक्षत्राणां सूर्याचन्द्रमसोरेव सायुज्यं सलोकतामाप्नोति य उ चैनदधीते य उ चैनदधीते ॥ ३९ ॥

इति तृतीयप्रश्नेऽष्टमोऽध्यायः ॥ ८ ॥

(अथ तृतीयप्रश्ने नवमोऽध्यायः)

अथातोऽनश्नत्पारायणविधिं व्याख्यास्यामः ॥ १ ॥ शुचिवासाः स्याद्वीर-

---

१ ख. °वैः समस्तैर्निप्रा' । २ ख. 'थाऽऽज्याहुतीरुपजु' । ३ ख. 'येन पौर्णमावास्यां ।

वासा वा हविष्यमन्नमिच्छेदपः फलानि वा ॥२॥ ग्रामात्प्राचीं वोदीचीं वा दिशमुपनिष्क्रम्य गोमयेन गोचर्ममात्रं चतुरस्रं स्थण्डिलमुपलिप्य प्रोक्ष्य लवणमुल्लिख्याद्भिरभ्युक्ष्याग्निमुपसमाधाय संपरिस्तीर्यैताभ्यो देवताभ्यो जुहुयात् ॥ ३ ॥ अग्नये स्वाहा प्रजापतये स्वाहा[1] सोमाय स्वाहा विश्वेभ्यो देवेभ्यः स्वयंभुव ऋग्भ्यो यजुर्भ्यः सामभ्योऽथर्वभ्यः श्रद्धायै प्रज्ञायै मेधायै श्रियै ह्रियै सवित्रे सावित्र्यै सदसस्पतयेऽनुमतये च हुत्वा वेदादिमारभेत संततमधीयीत नान्तरा व्याहरेन्न चान्तरा विरमेत् ॥ ४ ॥ अथान्तरा व्याहरेदथान्तरा विरमेत्त्रीन्प्राणायामानायम्य वृत्तान्तादेवाऽऽरभेत ॥ ५ ॥ अप्रतिमायां यावता कालेन[2] न वेद तावन्तं कालं तदधीयीत स यदा जानीयादुक्तो यजुष्टुः साम[3]त इति ॥ ६ ॥ तद्ब्राह्मणं तच्छान्दसं तद्दैवतमधीयीत ॥ ७ ॥ द्वादश वेदसंहिता अधीयीत ॥ ८ ॥ यदनेनानध्यायेऽधीयीत यज्ञुरवः कोपिता यान्यकार्याणि भवन्ति ताभिः पुनीते ॥ ९ ॥ शुद्धमस्य पूतं ब्रह्म भवति ॥ १० ॥ अत ऊर्ध्वं संचयः ॥ ११ ॥ अपरा द्वादश वेदसंहिता अधीत्य ताभिरुशनसो लोकमवाप्नोति ॥ १२ ॥ अपरा द्वादश वेदसंहिता अधीत्य ताभिर्बृहस्पतेर्लोकमवाप्नोति ॥ १३ ॥ अपरा द्वादश वेदसंहिता अधीत्य ताभिः प्रजापतेर्लोकमवाप्नोति ॥ १४ ॥ अनश्नन्संहितासहस्रमधीयीत ब्रह्मभूतो विरजो ब्रह्म भवति ॥ १५ ॥ संवत्सरं भैक्षं प्रयुञ्जानो दिव्यं चक्षुर्लभते ॥ १६ ॥ षण्मासान्यावकभक्षश्चतुरो मासानुदकसक्तुभक्षो द्वौ मासौ फलभक्षो मासमब्भक्षो द्वादशरात्रं वा प्राश्नन्क्षिप्रमन्तर्धीयते ज्ञातीन्पुनाति सप्तावरान्सप्त पूर्वानात्मानं पञ्चदशं पङ्क्तिं च पुनाति ॥ १७ ॥ तामेतां देवनिश्रयणीमित्याचक्षते[5] ॥ १८ ॥ एतया वै देवा देवत्वमगच्छन्नृषय ऋषित्वम् ॥ १९ ॥ तस्य ह वा एतस्य यज्ञस्य त्रिविध एवाऽऽरम्भकालः प्रातःसवने माध्यंदिने सवने ब्राह्मे वाऽपररात्रे ॥ २० ॥ तं वा एतं प्रजापतिः सप्तर्षिभ्यः प्रोवाच सप्तर्षयो महाजज्ञिरे[6] महाजज्ञुर्ब्राह्मणेभ्यो ब्राह्मणेभ्यः ॥ २१ ॥

इति तृतीयप्रश्ने नवमोऽध्यायः ॥ ९ ॥

(अथ तृतीयप्रश्ने दशमोऽध्यायः)

उक्तो वर्णधर्मश्चाऽऽश्रमधर्मश्च ॥ १ ॥ अथ खल्वयं पुरुषो याप्येन कर्मणा

---

१ ख. °हा वि° । २ ख. °न वेद नाव° । ३ ख. °मत्य इं° । ४ ख. तच्छन्ददैव° । ५ क. °णीत्या° । ६ ख. °जज्ञुर्ब्राह्मणो यो ब्राह्मणे° ।

मिथ्या वा चरत्ययाज्यं वा याजयत्यप्रतिग्राह्यस्य वा प्रतिगृह्णात्यनाश्यान्नस्य वाऽन्नमश्नात्यचरणीयेन वा चरति तत्र प्रायश्चित्तं कुर्यान्न कुर्यादिति मीमांसन्ते ॥ २ ॥ न हि कर्म क्षीयत इति कुर्यादित्येव ॥ ३ ॥ पुनस्तोमेन यजेत ॥ ४ ॥ पुनः सवनमायान्तीति ॥ ५ ॥ अथाप्युदाहरन्ति ॥ ६ ॥ सर्वं पाप्मानं तरति तरति ब्रह्महत्यां योऽश्वमेधेन यजत इति ॥ ७ ॥ अग्निष्टुता वाऽभिशस्यमानो यजेतेति ॥ ८ ॥ तस्य निष्क्रयाणि जपस्तपो होम उपवासो दानम् ॥ ९ ॥ उपनिषदो वेदादयो वेदान्ताः सर्वच्छन्दःसु संहिता मधून्यघमर्षणमथर्वशिरो रुद्राः पुरुषसूक्तं रौजनरौहिणे बृहद्रथंतरे पुरुषगतिर्महानाम्न्यो महावैराजं महादिवाकीर्त्यं ज्येष्ठसाम्नामन्यतमद्ध(मं ब)हिष्पवमानः कूष्माण्डचः सावित्री चेति पावनानि ॥१०॥उपसन्न्यायेन पयोव्रतता शाकभक्षता फलभक्षता मूलभक्षता प्रसृतयावको हिरण्यप्राशनं घृतप्राशनं सोमपानमिति मेध्यानि ॥११॥ सर्वे शिलोच्चयाः सर्वाः स्रवन्त्यः सरितः पुण्या ह्रदास्तीर्थान्यृषिनिकेतनानि गोष्ठक्षेत्रपरिष्कन्दा इति देशाः ॥ १२ ॥ अहिंसा सत्यमस्तैन्यं सर्वेषूदकोपस्पर्शनं गुरुशुश्रूषा ब्रह्मचर्यमधःशयनमेकवस्त्रताऽनाशक इति तपांसि ॥ १३ ॥ हिरण्यं गौर्वासोऽश्वो भूमिस्तिला घृतमन्नमिति देयानि ॥ १४ ॥ संवत्सरः षण्मासाश्चत्वारस्त्रयो द्वावेकश्चतुर्विंशत्यहो द्वादशाहः षडहस्त्र्यहोऽहोरात्र एकाह इति कालाः ॥ १५ ॥ एतान्यनादेशे क्रियेरन् ॥ १६ ॥ एनःसु गुरुषु गुरूणि लघुषु लघूनि ॥ १७ ॥ कृच्छ्रातिकृच्छ्रौ चान्द्रायणमिति सर्वप्रायश्चित्तिः सर्वप्रायश्चित्तिः ॥ १८ ॥

इति तृतीयप्रश्ने दशमोऽध्यायः ॥ १० ॥

उक्तो वर्णधर्मश्चाऽऽश्रमधर्मश्च ॥ १ ॥ अथातोऽनश्नत्पारायणविधिम् ॥ २ ॥ अथातश्चान्द्रायणस्य ॥ ३ ॥ अथ कूष्माण्डैर्जुहुयात् ॥ ४ ॥ अथ कर्मभिरात्मकृतैः ॥ ५ ॥ अथातः पवित्रातिपवित्रस्य ॥ ६ ॥ अथ यदि ब्रह्मचार्यव्रत्यमिव चरेत्

१ख. °जयित्वा प्रतिप्रतिग्रा° । २ ख. °शिरसो रु° । ३ ख. राजिन° । ४ ख. °प्राशो घृतप्राशः सो° । ५ ख. °वनोप° । ६ ख °त्सरं ष° । ७ ख. °रात्रमेकाहामिति । ८ ख. °त्तिः । उ° । ९ ख. °ष्माण्डैः । अथ ।

॥ ७ ॥ अथ वानप्रस्थद्वैविध्यम् ॥ ८ ॥ यथो एतत्षण्निवर्तनीति ॥ ९ ॥ अथ शालीनयायावरचक्रचरधर्मकाङ्क्षिणाम्+ ॥ १० ॥

समाप्तोऽयं तृतीयः प्रश्नः ॥ ३ ॥

(अथ चतुर्थः प्रश्नः ।)

(तत्र प्रथमोऽध्यायः ।)

प्रायश्चित्तानि वक्ष्यामो नानार्थानि पृथक्पृथक् । तेषु तेषु च दोषेषु गरीयांसि लघूनि च १

यद्यत्र हि भवेद्युक्तं तद्धि तत्रैव निर्दिशेत् । भूयो भूयो गरीयःसु लघुष्वल्पीयसस्तथा(?) विधिना शास्त्रदृष्टेन प्राणायामान्समाचरेत् । यद्युपस्थकृतं पापं पद्भ्यां वा यत्कृतं भवेत् २

बाहुभ्यां मनसा वाचा श्रोत्रत्वग्घ्राणचक्षुषा ॥ ४ ॥

अपि वा चक्षुःश्रोत्रत्वग्घ्राणमनोव्यतिक्रमेषु त्रिभिः प्राणायामैः शुध्यति॥५॥शूद्रान्त्रीगमनभोजनेषु केवलेषु पृथक्पृथक्सप्ताहं सप्त सप्त प्राणायामान्धारयेत् ॥६॥ अभक्ष्याभोज्योपयान्नाद्यप्राशनेषु तथाऽपण्यविक्रयेषु मधुमांसघृततैलक्षारलवणावरान्नवर्जेषु यच्चान्यदप्येवं युक्तं द्वादशाहं द्वादश द्वादश प्राणायामान्धारयेत् ॥७॥ पातकपतनीयोपपातकवर्जेषु यच्चान्यदप्येवं युक्तमर्धमासं द्वादश द्वादश प्राणायामान्धारयेत्॥८॥ पातकपतनीयवर्जेषु यच्चान्यदप्येवं युक्तं द्वादश द्वादशाहान्द्वादश द्वादश प्राणायामान्धारयेत्॥९॥पातकवर्जेषु यच्चान्यदप्येवं युक्तं द्वादशार्धमासान्द्वादश द्वादश प्राणायामान्धारयेत् ॥१०॥ अथ पातकेषु संवत्सरं द्वादशं द्वादश प्राणायामान्धारयेत् ॥ ११ ॥ दद्याद्भगवते कन्यां नग्निकां ब्रह्मचारिणे । अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम् १२

त्रीणि वर्षाण्यृतुमतीं यः कन्यां न प्रयच्छति । स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम् १३

न याचते चेदेवं स्याद्याचते चेत्पृथक्पृथक् । एकैकस्मिन्ऋतौ दोषं पातकं मनुरब्रवीत् त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् । ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ॥ १५

+ इत उत्तरमेतद्वर्तत ख. पुस्तके तद्यथा–"अशीत्युत्तरशतश्लोकैः समाप्तोऽयं दशखण्डयुक्तस्तृतीयः प्रश्नः" इति ।

---

१ ख. 'शप्रा' ।

बलाच्चेत्प्रहृता कन्या मन्त्रैर्यदि न संस्कृता । अन्यस्मै विधिवद्देया यथा कन्या तथैव सा निसृष्टायां हुते वाऽपि यस्यै भर्ता म्रियेत सः । सा चेदक्षतयोनिः स्याद्गतप्रत्यागता सती पौनर्भवेन विधिना पुनः संस्कारमर्हति ॥ १८

त्रीणि वर्षाण्यृतुमती यो भार्यां नाधिगच्छति । स तुल्यं भ्रूणहत्यायै दोषमृच्छत्यसंशयम् ऋतुस्नातां तु यो भार्यां संनिधौ नोपगच्छति । पितरस्तस्य तन्मासं तस्मिन्रजसि शेरते ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति । तुल्यमाहुस्तयोर्दोषमयोनौ यश्च सिञ्चति भर्तुः प्रतिनिवेशेन या भार्या स्कन्दयेद्रेतुम् । तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं निर्धमेद्गृहात् २२

ऋतुस्नातां न चेद्गच्छेम्रियतां धर्मचारिणीम् । नियमातिक्रमे तस्य प्राणायामशतं स्मृतम् २३

प्राणायामान्पवित्राणि व्याहृतीः प्रणवं तथा । पवित्रपाणिरासीनो ब्रह्म नैत्यकमभ्यसेत् २४

आवर्तयेत्सदा युक्तः प्राणायामान्पुनः पुनः । आ केशान्तान्नखाग्राच्च तपस्तप्यत उत्तमम् २५

निरोधाज्जायते वायुर्वायोरग्निश्च जायते । तापेनाऽऽपोऽधिजायन्ते ततोऽन्तः शुध्यते त्रिभिः २६

योगेनाप्यते ज्ञानं योगो धर्मस्य लक्षणम् । योगमूला गुणाः सर्वे तस्माद्युक्तः सदा भवेत् २७

प्रणवाद्यास्तथा वेदाः प्रणवे पर्यवस्थिताः । प्रणवो व्याहृतयश्चैव नित्यं ब्रह्म सनातनम् २८

प्रणवे नित्ययुक्तस्य व्याहृतीषु च सप्तसु । त्रिपदायां च गायत्र्यां न भयं विद्यते क्वचित् सव्याहृतिकां सप्रणवां गायत्रीं शिरसा सह । त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ३०

सव्याहृतिकाः सप्रणवाः प्राणायामास्तु षोडश । अपि भ्रूणहनं मासात्पुनन्त्यहरहर्धृताः एतदाद्यं तपः श्रेष्ठमेतद्धर्मस्य लक्षणम् । सर्वदोषोपघातार्थमेतदेव विशिष्यत एतदेव विशिष्यत इति ३२

इति चतुर्थप्रश्ने प्रथमोऽध्यायः ॥ १ ॥

---

१ ख हृते । २ ख. निर्गमे° ।

(अथ चतुर्थप्रश्ने द्वितीयोऽध्यायः ।)

प्रायश्चित्तानि वक्ष्यामो नानार्थानि पृथक्पृथक् । तेषु तेषु च दोषेषु गरीयांसि लघूनि च यद्यत्र हि भवेद्युक्तं तद्धि तत्रैव निर्दिशेत् । भूयो भूयो गरीयःसु लघुष्वल्पीयसस्तथा(?) विधिना शास्त्रदृष्टेन प्रायश्चित्तानि निर्दिशेत् । प्रतिग्रहीष्यमाणस्तु प्रतिगृह्य तथैव च ३ ऋचस्तरत्समन्यस्तु चतस्रः परिवर्तयेत् । अभोज्यानां तु सर्वेषामभोज्यान्नस्य भोजने ४ ऋग्भिस्तरत्समन्दीयैर्मार्जनं पापशोधनम् । भ्रूणहत्याविधिस्त्वन्यस्तं तु वक्ष्याम्यतः परम् ५

विधिना येन मुच्यन्ते पातकेभ्योऽपि सर्वशः ६

प्राणायामान्पवित्राणि व्याहृतीः प्रणवं तथा । जपेदघमर्षणं सूक्तं पयसा द्वादश क्षपाः त्रिरात्रं वायुभक्षो वा क्लिन्नवासाः प्लुतः शुचिः । प्रतिषिद्धांस्तथाऽऽचारानभ्यस्यापि पुनः पुनः ८

वारुणीभिरुपस्थाय सर्वपापैः प्रमुच्यत इति ॥ ९

अथावकीर्ण्यमावास्यायां निरग्निमुपसमाधाय दार्विहोमिकीं परिचेष्टां कृत्वा द्वे आज्याहुती जुहोति ॥ १० ॥ कामावकीर्णोऽस्म्यवकीर्णोऽस्मि कामकामाय स्वाहा कामाभिद्रुग्धोऽस्म्यभिद्रुग्धोऽस्मि कामकामाय स्वाहेति ॥११॥ हुत्वा प्रयताञ्जलिः कवातिर्यङ्ङग्निमुपतिष्ठेत ॥ १२ ॥

सं मा सिञ्चन्तु मरुतः समिन्द्रः सं बृहस्पतिः । सं माऽयमग्निः सिञ्चत्वायुषा च बलेन चाऽऽयुष्मन्तं करोत मेति १३

प्रति हास्मै मरुतः प्राणान्दधाति प्रतीन्द्रो बलं प्रति बृहस्पतिर्ब्रह्मवर्चसं प्रत्यग्निरितरत्सर्वं सर्वतनुर्भूत्वा सर्वमायुरेति त्रिरभिमन्त्रयेत त्रिषत्या हि देवा इति विज्ञायते ॥ १४ ॥

योऽपूत इव मन्येत आत्मानमुपपातकैः । स हुत्वैतेन विधिना सर्वस्मात्पापात्प्रमुच्यते १५

अपि वाऽनाद्यापेयप्रतिषिद्धभोजने दोषवच्च कर्म कृत्वाऽभिसंधिपूर्वमनभिसंधिपूर्वं वा शूद्रायां च रेतः सिक्त्वाऽयोनौ वाऽब्लिङ्गाभिर्वारुणीभिश्चोपस्पृश्य प्रयतो भवति ॥ १६ ॥ अथाप्युदाहरन्ति ॥ १७ ॥

अनाद्यापेयप्रतिषिद्धभोजने विरुद्धधर्माचरिते च कर्मणि[1] ।
मतिप्रवृत्तेऽपि च पातकोपमैर्विशुध्यतेऽथापि च सर्वपातकैः ॥ १८ ॥

---

१ ख. °णायामान्ददति । २ ख. °णि । प्रति° ।

त्रिरात्रं वाऽप्युपवसंस्त्रिरह्नोऽभ्युपेयादपः। प्राणानात्मनि संयम्य त्रिः पठेदघमर्षणम् यथाऽश्वमेधावभृथ एवं तन्मनुरब्रवीत् ॥ २० ॥

विज्ञायते च ॥ २१ ॥

चरणं पवित्रं विततं पुराणं येन पूतस्तरति दुष्कृतानि ।
तेन पवित्रेण शुद्धेन पूता अति पाप्मानमरातिं तरेम इति ॥ २२ ॥

इति चतुर्थप्रश्ने द्वितीयोऽध्यायः ॥ २ ॥

(अथ चतुर्थप्रश्ने तृतीयोऽध्यायः ।)

+प्रायश्चित्तानि वक्ष्यामो विख्यातानि विशेषतः । समाहितानां युक्तानां प्रमादेषु कथं भवेत् १

ॐ पूर्वाभिर्व्याहृतीभिः सर्वाभिः सर्वपातकेष्वाचामेत् ॥ २ ॥ यत्प्रथममाचामति तेनर्ग्वेदं प्रीणाति यद्द्वितीयं तेन यजुर्वेदं यत्तृतीयं तेन सामवेदम् ॥३॥ यत्प्रथमं परिमार्ष्टि तेनाथर्ववेदं यद्द्वितीयं तेनेतिहासपुराणम् ॥४॥ यत्सव्यं पार्णिं प्रोक्षति पादौ शिरो हृदयं नासिके चक्षुषी श्रोत्रे नाभिं चोपस्पृशति तेनौषधिवनस्पतयः सर्वाश्च देवताः प्रीणाति ॥ ५ ॥ तस्मादाचमनादेव सर्वस्मात्पापात्प्रमुच्यते ॥ ६ ॥ अष्टौ वा समिध आदध्यात् ॥ ७ ॥ देवकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ८ ॥ मनुष्यकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ९ ॥ पितृकृतस्यैनसोऽवयजनमसि स्वाहा ॥१०॥ आत्मकृतस्यैनसोऽवयजनमसि स्वाहा ॥ ११ ॥ यद्दिवा च नक्तं चैनश्चकृम तस्यावयजनमसि स्वाहा ॥ १२ ॥ यत्स्वपन्तश्च जाग्रतश्चैनश्चकृम तस्यावयजनमसि स्वाहा ॥ १३ ॥ यद्विद्वांसश्चाविद्वांसश्चैनश्चकृम तस्यावयजनमसि स्वाहा ॥ १४ ॥ एनस एनसोऽवयजनमसि स्वाहेति ॥ १५ ॥ एतैरष्टाभिर्हुत्वा सर्वस्मात्पापात्प्रमुच्यते ॥ १६ ॥ अथाप्युदाहरन्ति ॥ १७ ॥

अघमर्षणं देवकृतं शुद्धवत्यस्तरत्समाः । कूष्माण्ड्यः पावमान्यश्च विरजा मृत्युलाङ्गलम् १८

दुर्गा व्याहृतयो रुद्रा महादोषविनाशना महादोषविनाशना इति ॥ १९

इति चतुर्थप्रश्ने तृतीयोऽध्यायः ॥ ३ ॥

(अथ चतुर्थप्रश्ने चतुर्थोऽध्यायः ।)

प्रायश्चित्तानि वक्ष्यामो विख्यातानि विशेषतः। समाहितानां युक्तानां प्रमादेषु कथं भवेत् १

+ एषोऽध्यायो न विद्यते ख पुस्तके ।

ऋतं च सत्यं चेत्येतदघमर्षणं त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ २ ॥ आऽयं गौः पृश्निरक्रमीदित्येतामृचं त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ३ ॥ द्रुपदादिवेन्मुमुचान इत्येतामृचं त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ४ ॥ हंसः शुचिषदित्येतामृचं त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ५ ॥ अपि वा सावित्रीं गायत्रीं पच्छोऽर्धर्चशस्ततः समस्तामित्येतामृचं त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ६ ॥ अपि वा व्याहृतीर्व्यस्ताः समस्ताश्चेति त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ७ ॥ अपि वा प्रणवमेव त्रिरन्तर्जले पठन्सर्वस्मात्पापात्प्रमुच्यते ॥ ८ ॥ तदेतद्धर्मशास्त्रं नापुत्राय नाशिष्याय नासंवत्सरोषिताय दद्यात् ॥ ९ ॥ सहस्रं दक्षिणा ऋषभैकादशं गुरुप्रसादो वा गुरुप्रसादो वा ॥ १० ॥

इति चतुर्थप्रश्ने चतुर्थोऽध्यायः ॥ ४ ॥

(अथ चतुर्थप्रश्ने पञ्चमोऽध्यायः ।)

अथातः संप्रवक्ष्यामि [+सामर्ग्यजुरथर्वणाम्। कर्मभिर्यैरवाप्नोति क्षिप्रं कामान्मनोगतान् १

जपहोमेष्टियज्ञाद्यैः शोधयित्वा स्वविग्रहम्। साधयेत्सर्वकर्माणि नान्यथा सिद्धिमश्नुते जपहोमेष्टियज्ञाणि करिष्यन्नादितो द्विजः।। शुक्लपुण्यदिनर्क्षेषु केशश्मश्रूणि वापयेत् २ स्नायात्त्रिषवणं पायादात्मानं क्रोधतोऽनृतात्। स्त्रीशूद्रैर्नाभिभाषेत ब्रह्मचारी हविर्व्रतः गोविप्रपितृदेवेभ्यो नमस्कुर्याद्दिवा स्वपन्। जपहोमेष्टियज्ञस्थो दिवास्थानो निशासनः प्राजापत्यो भवेत्कृच्छ्रो दिवारात्रावयाचितम्। क्रमशो वायुभक्षश्च द्वादशाहं त्र्यहं त्र्यहम् अहरेकं तथा नक्तमज्ञातं वायुभक्षणम्। त्रिवृद्देष परावृत्तो बालानां कृच्छ्र उच्यते ७ एकैकं ग्रासमश्नीयात्पूर्वोक्तेन त्र्यहं त्र्यहम्। वायुभक्षस्त्र्यहं चान्यदतिकृच्छ्रः स उच्यते अम्बुभक्षस्त्र्यहोनतान्वायुभक्षस्ततः परम्। कृच्छ्रातिकृच्छ्रस्तृतीयस्तु विज्ञेयः सोऽतिपावनः ९

त्र्यहं त्र्यहं पिबेदुष्णं पयः सर्पिः कुशोदकम्। वायुभक्षस्त्र्यहं चान्यत्तप्तकृच्छ्रः स उच्यते गोमूत्रं गोमयं क्षीरं दधि सर्पिः कुशोदकम्। एकरात्रोपवासश्च कृच्छ्रः सांतपनः स्मृतः गायत्र्याऽऽदाय गोमूत्रं गन्धद्वारेति गोमयम्। आप्यायस्वेति च क्षीरं दधिक्राव्णेति वै दधि १२

+ एतच्चिह्नान्तर्गतग्रन्थः ख. पुस्तके न विद्यते।

शुक्रमसि ज्योतिरसीत्याज्यं देवस्य त्वेति कुशोदकम् । गोमूत्रभागस्तस्यार्धं शकृत्क्षीरस्य तत्त्रयम् १३

द्वयं दध्नो घृतस्यैक एकश्च कुशवारिणः । एवं सांतपनः कृच्छ्रः श्वपाकमपि शोधयेत् १४

गोमूत्रं गोमयं चैव क्षीरं दधि घृतं तथा । पञ्चरात्रं तदाहारः पञ्चगव्येन शुध्यति १५

यतात्मनोऽप्रमत्तस्य द्वादशाहमभोजनम् । पराको नाम कृच्छ्रोऽयं सर्वपापप्रणाशनः १६

गोमूत्रादिभिरभ्यस्तमेकैकं तं त्रिसप्तकम् । महासांतपनं कृच्छ्रं वदन्ति ब्रह्मवादिनः १७

एकवृद्ध्या सिते पिण्डानेकहान्याऽसिते ततः । पक्षयोरुपवासौ द्वौ तद्धि चान्द्रायणं स्मृतम् चतुरः प्रातरश्नीयात्पिण्डान्विप्रः समाहितः । चतुरोऽस्तमिते सूर्ये शिशुचान्द्रायणं चरेत् अष्टावष्टौ मासमेकं पिण्डान्मध्यंदिने स्थिते । नियतात्मा हविष्यस्य यतिचान्द्रायणं चरेत् यथाकथंचित्पिण्डानां द्विजस्तिस्रस्त्वशीतयः । मासेनाश्नन्हविष्यस्य चन्द्रस्यैति सलोकताम् २१

यथोद्यंश्चन्द्रमा हन्ति जगतस्तमसो भयम् । एवं पापाद्भयं हन्ति द्विजश्चान्द्रायणं चरन् २२

कणपिण्याकतक्राणि यवाचामोऽनिलाशनः । एकत्रिपञ्च सप्तेति पापघ्नोऽयं तुलापुमान् २३

यावकः सप्तरात्रेण वृजिनं हन्ति देहिनाम् । सप्तरात्रोपवासो वा दृष्टमेतन्मनीषिभिः २४

पौषभाद्रपदज्येष्ठा आर्द्राकाशातपाश्रयात् । त्रीञ्शुक्लान्मुच्यते पापात्पतनीयादृते द्विजः गोमूत्रं गोमयं] क्षीरं दधि सर्पिः कुशोदकम् । यवाचामेन संयुक्तो ब्रह्मकूर्चोऽतिपावनः अमावास्यां निराहारः पौर्णमास्यां तिलाशनः । शुक्लकृष्णकृतात्पापान्मुच्यतेऽब्दस्य पर्वभिः २७

भैक्षाहारोऽग्निहोत्रिभ्यो मासेनैकेन शुध्यति । यायावरवनस्थेभ्यो दशभिः पञ्चभिर्दिनैः २८

एकाहधनिनोऽन्नेन दिनेनैकेन शुध्यति । कापोतवृत्तिनिष्ठस्य पीत्वाऽपः शुध्यते त्रिभिः ऋग्यजुःसामवेदानां वेदस्यान्यतमस्य वा । पारायणं त्रिरभ्यस्येदनश्नन्सोऽतिपावनः [1] थ चेत्त्वरते कर्तुं दिवसे मारुताशनः । रात्रौ जले स्थितो व्युष्टः प्राजापत्येन तत्समम् गायत्र्यष्टसहस्रं तु जपं कृत्वोत्थिते रवौ । मुच्यते सर्वपापेभ्यो यदि न भ्रूणहा भवेत् ३२

---

१ ख. °वसं मा° । २ ख °मू । सावित्र्य° । ३ ख. °त्वात्तरे र' ।

योऽन्नदः सत्यवादी च भूतेषु कृपया स्थितः । पूर्वोक्तयज्ञशुद्धेभ्यः सर्वेभ्यः सोऽतिरिच्यते ३३

इति चतुर्थप्रश्ने पञ्चमोऽध्यायः ॥ ९ ॥

(अथ चतुर्थप्रश्ने षष्ठोऽध्यायः ।)

समाधुच्छन्दसा रुद्रा गायत्री प्रणवान्विता । सप्त व्याहृतयश्चैव जप्याः पापविनाशनाः
मृगारेष्टिः पवित्रेष्टिस्त्रिहविः पावमान्यपि ॥ २
इष्टयः पापनाशिन्यो वैश्वानर्या समन्विताः । इदं चैवापरं गुह्यमुच्यमानं निबोधत ३
मुच्यते सर्वपापेभ्यो महतः पातकादृते । पवित्रैर्मार्जनं कुर्वन्रुद्रैकादशिकां जपन् ४
पावित्राणि घृतैर्जुहृत्प्रयच्छन्हेमगोतिलान् । योऽश्नीयाद्यावकं पक्वं गोमूत्रे सशकृद्रसे ।
सदधिक्षीरसर्पिष्के मुच्यते सोऽहसः क्षणात् ॥ ५
प्रसूतो यश्च शूद्रायां येनागम्या च लङ्घिता । सप्तरात्रात्प्रमुच्येते विधिनैतेन तावुभौ ६
रेतोमूत्रपुरीषाणां प्राशनेऽभोज्यभोजने । पर्याधानेज्ययोरेतत्परिवित्ते च भेषजम् ७
अपातकानि कर्माणि कृत्वैव सुवहून्यपि । मुच्यते सर्वपापेभ्य इत्येतद्वचनं सताम् ॥ ८
मन्त्रमार्गप्रमाणं तु विधानं समुदीरितम् । भरद्वाजादयो येन ब्रह्मणः साम्य(सम)तां गताः
प्रसन्नहृदयो विप्रः प्रयोगादस्य कर्मणः । कामांस्तांस्तानवाप्नोति ये ये कामा हृदि स्थिताः १०

इति चतुर्थप्रश्ने षष्ठोऽध्यायः ॥ ७ ॥

(अथ चतुर्थप्रश्ने सप्तमोऽध्यायः ।)

निवृत्तः पापकर्मभ्यः प्रवृत्तः पुण्यकर्मसु । यो विप्रस्तस्य सिध्यन्ति विना यज्ञैरपि क्रियाः
ब्राह्मणा ऋजवस्तस्माद्यद्यदिच्छन्ति चेतसा । तत्तदासादयन्त्याशु संशुद्धा ऋजुकर्मभिः २
एवमेतानि यज्ञानि तावत्कार्याणि धीमता । कालेन यावतोपैति विग्रहः शुद्धिमात्मनः ३
एभिर्यज्ञैर्विशुद्धात्मा त्रिरात्रोपोषितस्ततः । तदारभेत येनार्थं कर्मणा प्राप्तुमिच्छति ४
क्षापवित्रं सहस्राक्षो मृगारांहोमुचौ गणौ । पावमान्यश्च कूष्माण्ड्यो वैश्वानर्यश्च याः ५

---

१ क. °शिनीं ज° । २ ख. °ह्वन्प्रय° । ३ ख. °कृद्रवे । स । ४ ख. °र्पिष्कं मु° । ५ ख. °त्पतितेवैव भोजनम् । आपा° । ६ ख. °भिर्मन्त्रै° । ७ ख. येनेष्टं क° । ८ ख. °ति । जाप° । ९ क. °गारोंहो ।

तौदनेनैं ता जुहुत्सप्ताहं सवनत्रयम् । मौनव्रती हविष्याशी निगृहीतेन्द्रियक्रियः ६
ंहे म इत्यपां पूर्णे पात्रेऽवेक्ष्य चतुष्पथे । मुच्यते सर्वपापेभ्यो महतः पातकादपि ७
वृद्धत्वे यौवने बाल्ये यः कृतः पापसंचयः । पूर्वजन्मसु वाऽज्ञातस्तस्मादपि विमुच्यते ८
भोजयित्वा द्विजानन्ते पायसेन सुसर्पिषा । गोभूतिमिलहेमानि भुक्तवद्भ्यः प्रदाय च ९
विप्रो भवति पूतात्मा निर्दग्धवृजिनेन्धनः । काम्यानां कर्मणां योग्यस्तथाऽऽधानादि-
कर्मणाम् १०

इति चतुर्थप्रश्ने सप्तमोऽध्यायः ॥ ७ ॥

(अथ चतुर्थप्रश्नेऽष्टमोऽध्यायः ।)

अतिलोभात्प्रमादाद्वा यः करोति क्रियामिमाम् । अन्यस्य सोऽहसाऽऽविष्टो गर्दभी-
रिव सीदति १
चार्यस्य पितुर्मातुरात्मनश्च क्रियामिमाम् । कुर्वन्भात्यर्कवद्विप्रः सा कार्यैषामतः
क्रिया २
एतेन सहस्राक्षं पवित्रेणाकरोच्छुचिम् । अग्निं वायुं रविं सोमं यमादींश्च सुरेश्वरान्
ार्त्किंचित्पुण्यनामेह त्रिषु लोकेषु विश्रुतम् । विप्रादि तत्कृतं केन पवित्रक्रिययाऽनया
ाजापत्यमिदं गुह्यं पापघ्नं प्रथमोद्भवम् । समुत्पन्नान्यतः पश्चात्पवित्राणि सहस्रशः ५
योऽब्दायनर्तुपक्षाहाञ्जुहोत्यष्टौ गणानिमान् । पुनाति चाऽऽत्मनो वंश्यान्दश पूर्वान्दशा-
परान् ६
यते चामरैर्धुरस्थैः पुण्यकर्मेति भूस्थितः । देववन्मोदते भूयः स्वर्गलोकेऽपि पुण्यकृत्
नष्टौ गणान्होतुं न शक्नोति यदि द्विजः । एकोऽपि तेन होतव्यो रजस्तेनास्य
नश्यति ८
वो यस्य शिष्या वा जुहुत्यष्टौ गणानिमान् । अध्यापनपरिक्रीतैरंहसः सोऽपि
मुच्यते ९
नेनापि परिक्रीतैरात्मपापजिघांसया । हावनीया ह्यशक्तेन नावसाद्यः शरीरधृक् १०
नस्य क्रियते त्यागः कर्मणां सुकृतामपि । पुंसोऽनृणस्य पापस्य विमोक्षः क्रियते
कचित् ११
को यो विधिनैतेन सर्वपापार्णसागरात् । आत्मानं मन्यते शुद्धं समर्थं कर्मसाधने १२

---

१ ख. °न ताः शृण्वन्स° । २ ख. °रगारीव । ३ ख. °या । सावं । ४ ख. °त् । विमुक्तो वि° ।

सर्वपापापनुत्तात्मा क्रिया आरभते तु याः। अयत्नेनैव ताः सिद्धिं यान्ति शुद्धशरीरिणः ॥ १३ ॥

प्राजापत्यमिदं पुण्यमृषीणां समुदीरितम्। इममध्यापयेन्नित्यं धारयेच्छृणुतेऽपि वा १४
मुच्यते सर्वपापेभ्यो ब्रह्मलोके महीयते। यान्निसाधयिषुर्मन्त्रान्द्वादशाहानि ताञ्जपेत्
घृतेन पयसा दध्ना प्राश्य निश्योदनं सकृत्। दशवारं तथा होमः सर्पिषा सवनत्रयम्
पूर्वसेवा भवेदेषा मन्त्राणां कर्मसाधने। मन्त्राणां कर्मसाधन इति ॥ १७ ॥

इति चतुर्थप्रश्नेऽष्टमोऽध्यायः ॥ ८ ॥

अतिलोभात्प्रमादाद्वा ॥ १ ॥ निवृत्तः पापकर्मभ्यः ॥ २ ॥ समाधुच्छन्दसः रुद्राः ॥ ३ ॥ अथातः संप्रवक्ष्यामि ॥ ४ ॥ प्रायश्चित्तानि वक्ष्यामः ॥ ५ ॥ प्रायश्चित्तानि वक्ष्यामः ॥ ६ ॥ प्रायश्चित्तानि वक्ष्यामः ॥ ७ ॥ प्रायश्चित्तानि वक्ष्यामः ॥ ८ ॥

इति चतुर्थः प्रश्नः ॥

(इति बौधायनधर्मशास्त्रं समाप्तम्।)